उपन्यस्तवाक्यसम्बन्धिसंक्षिप्ताक्षराणां विज्ञानम्—

तै. सं.	तैत्तिरीयसंहितायां	म.भा.भी.	महाभारते भीष्मपर्वणि
तै. ब्रा.	तैत्तिरीयब्राह्मणे	म.भा.आ.	,, आदिपर्वणि
ऐ. ब्रा.	ऐतरेयब्राह्मणे	म.भा.शां.	,, शान्तिपर्वणि
बृ.	बृहदारण्यकोपनिषदि	भा.	भागवते
ना.	नारायणोपनिषदि	गी.	गीतायां
छां.	छान्दोग्योपनिषदि	याज्ञ.स्मृ.	याज्ञवल्क्यस्मृत्यां
तै.	तैत्तिरीयोपनिषदि	सि. कौ.	सिद्धान्तकौमुद्यां
कठ.	कठोपनिषदि	वाच. पृ.	वाचस्पत्ये(कोषे)पृष्ठे
केन.	केनोपनिषदि		

प्रकटकर्ता—धीरजलाल व्रजदास सांकलीया, बी. ए., एलएल. बी., एडवोकेट.
खखर बिल्डिंग, गिरगाम, मुंबई.

मुद्रकः—शा. फकीरचंद मगनलाल बदामी.
मुद्रणालयम्—धी 'जैन विजयानंद' प्रीन्टींग प्रेस, कणपीठ बजार—सुरत.

પ્રસ્તાવના

આ સર્વગ્રાહી ટીકાના કર્તા શ્રીયોગિગોપેશ્વરજી છે. એમનો પ્રાદુર્ભાવ સં૦ ૧૮૩૬ ના જ્યેષ્ઠ શુકલ પંચમીને દિવસે થયો હતો. રશ્મિને અંતે પોતાનો પરિચય એઓ નીચે પ્રમાણે આપે છે:—

श्रीदामोदरजित्पुत्रौ द्वौ श्रीविट्ठलरायजित्
श्रीगिरिधारिजिच्चैव तत्पुत्रो रघुनाथजित् ।
श्रीगोविन्दरायजित् तत्पुत्रो विट्ठलरायजित् ॥
श्रीगोकुलोत्सवो भ्राता श्रीगोपेश्वरजिदहम् ।
तत्पुत्रस्तु प्रकाशेऽस्मिन् रश्मिं तु वितनोमि ह ॥

BHARATIYA VIDYA BHAVAN
S. N.........

એમણે જે ગ્રન્થો લખ્યા છે તે બહુજ વિસ્તારપૂર્વક લખ્યા છે એમના લખાણોમાં પ્રમાણોની પરંપરા ચાલીજ આવે છે. રશ્મિમાં શ્રુતિસ્મૃતિ પુરાણો અને અન્ય શાસ્ત્રોનાં પ્રમાણ એટલાં બધાં આપ્યાં છે, કે તેનો સંગ્રહ કર્યો હોય તો એમના અગાધ પાંડિત્યનો ભાસ થયા વિના રહેજ નહિ. વળી જ્યાં જ્યાં મુખ્ય પ્રમાણભૂત શ્રુતિઓનો ઉપન્યાસ કર્યો હેય છે, ત્યાં તે તે ઉપનિષદ્‌નો અર્થ પોતે આપી જાય છે કે જેથી શુદ્ધાદ્વૈત સિદ્ધાન્ત પ્રમાણે તે ઉપનિષદ્‌નું ભાષ્ય કોઈ વિદ્વાનને કરવું હોય તો દિશાની સઝ પડે. રશ્મિનો વિસ્તાર શ્રીયોગિગોપેશ્વરજીના પોતાના લખવા પ્રમાણે ૪૨૬૧૧ શ્લોકનો છે. સ૦ ૧૮૯૭ ના ચૈત્ર શુક્લ ત્રયોદશી મગળવારે એ ગ્રન્થ એમણે પૂર્ણ કર્યો એટલે આજે ૯૭ વર્ષ થઇ ગયાં. સ્વર્ગસ્થ ભાટિયા સજ્જન શ૰ લાલજી નારણજીને આ ગ્રન્થ છપાવવાનું મુંબઇના બડામંદિરના કીર્તિમાન ગો. શ્રી ૧૦૮ ગોકુલનાથજીએ કહ્યું. એ ગ્રન્થ કેવો ઉપયોગી છે તે સમજાવવાને ભાઈ તેલીવાળાને બોલાવ્યા, અને તેમણે એ ગ્રન્થની ઉત્તમતા બહુ સારી રીતે સમજાવી, તે એમને ગળે ઉતરવાથી એમણે તુરત મૂળજી જેઠા ફંડમાંથી છપાવવાની યોજના કરી, અને આજે ભગવત્કૃપાથી બીજો, ત્રીજો અને ચોથો અધ્યાય છપાઇ ગયા છે, અને પ્રથમ અધ્યાયનો પ્રથમપાદ પણ પ્રકટ થયો છે. માત્ર પ્રથમ અધ્યાયના બીજો ત્રીજો અને ચોથો પાદ બાકી છે અને તે કાર્ય ચાલુ છે, અને પ્રભુકૃપાથી શીઘ્ર સંપૂર્ણ થઇ જાય એવી અમારી તીવ્ર ઇચ્છા છે.

"લેખ" કહે છે, તે આ ગ્રન્થ વાંચતી વખતે ધ્યાનમાં રાખવાનું છે. અમે લેખને બદલે "પ્રકાશ" એમ ઘણે સ્થલે લખ્યું પણ છે.

આ ગ્રન્થ ઈ સ. ૧૯૨૧ માં અમારા હાથમાં આવ્યો. અને બીજી કોઇપણ હસ્તલિખિત પ્રતિ અમારા જોવામાં આવી નથી. આ એકજ પ્રતિ શ્રીયોગિગોપેશ્વરજીના હસ્તાક્ષરથી લખેલી હોવાથી તેની પ્રેસકોપી કરવાનું કાર્ય તરતજ ૧૯૨૧ માં શરૂ કર્યું. પ્રથમ અધ્યાયનું પ્રથમ પત્ર ચારે બાજુપર એટલું બધું ખીચોખીચ ઝીણા અક્ષરોના ઉમેરાથી ભરેલું હતું કે તરત સમજ પડે તેમ ન હતું. વળી શરૂઆતમાંજ **अत्र शोधपत्रमस्ति** એમ લખેલું હતું, તે શોધપત્ર જડ્યુ નહિ, વળી સમગ્ર ગ્રન્થ ક્યારે લખાઈ રહેશે, અને છપાવાશે, તે કાંઈપણ નિશ્ચિત ન હોવાને લીધે મારા પોતાના ઉપયોગને માટે તૃતીય અધ્યાય પ્રભુના જન્મનો અધ્યાય–લખવાનો શરૂ કર્યો. તૃતીય અધ્યાયના ૪૩ શ્લોક સુધીમાં લગભગ ૧૪૦ પાનાં લખ્યાં અને પછી શા કારણથી એ લખાણ મેં બંધ કર્યું તે હાલ સ્મરણમાં નથી. ઉત્સાહથી લખતાં આંખોને વિશેષ શ્રમ પડ્યો હશે અને આંખો, ઘણી વખત દુખે છે તેમ, દુખવા આવી હશે તેથી પડતું મૂક્યું હોય એમ સંભવિત છે. ગમે તેમ હો પણ આજથી આઠ દશ માસપર પં૰ ગટ્ટુલાલજીનું ગ્રંથાલય ગોઠવવાનું કાર્ય હાથમાં લેતાં એ ગ્રન્થ પાછો હાથમાં આવ્યો, અને ભાઇ મગલદાસને તે બતાવતાં તેમણે બાકીના અધ્યાય લખી લેવાનું કાર્ય શરૂ કર્યું, અને તે પુરુ થતાં પ્રેસની ગોઠવણ કરી લગભગ સત્તરથી અઢાર વર્ષ પર શરૂ કરેલું કાર્ય આજે સંપૂર્ણ થતું જોઈ હૃદયને અતિ આનંદ થાય છે, અને પ્રભુએજ પૂરૂં કરાવ્યુ એમ નિશ્ચય થાય છે. જો ઇ સ. ૧૯૨૧માં છાપવા માંડયું હોત તો જેટલી કાળજી ભાઇ મગલદાસે પ્રૂફ શોધવામાં લીધી છે, તેટલી લેવાઈ ન હોત, અને મોડું થયું તેમાં હાનિ નહિ, પણ લાભ થયો છે, એમ સ્ફુરણા થાય છે.

જેટલી શાંતિથી આ ગ્રન્થ લખાયો છે તેટલી શાંતિથી કોઇ વાંચનાર નીકળશે ખરા ? ઉત્તર, અવશ્ય નીકળશેજ. જે ગ્રન્થની સો વર્ષ સુધીમાં એકપણ હસ્તલિખિત નકલ થઈ નથી, જે ગ્રન્થની પ્રેસકોપી અઢાર વર્ષ પર શરૂ થઇ અને હવે જે છપાયો અને હજાર પ્રતિ થઇ, તેને વાંચનાર કોઈ ન જ નિકળવાના હોત તો પ્રભુ તે લખવાની સર્વવેત્તા લેખકને અને છપાવવાની અમને પ્રેરણા તથા જોગવાઈ શું કરવા કરત ? અમારો તો દૃઢ વિશ્વાસ છે કે સંસારના સર્વ કાર્ય છોડીને ભગવત્સ્વરૂપ શ્રીમદ્ ભાગવતને વાંચવા સમજવામાં પ્રયત્ન કરવો તે ભગવાનની સાથે નિકટના સબંધમાં આવવાના સફલ પ્રયત્નરૂપ છે. અને જ્યારે ભગવચ્ચિંતન કરનારનું યોગક્ષેમ પ્રભુ વહન કરે છે એમ સ્વમુખનું વચન છે, ત્યારે સર્વ યોગક્ષેમનાં કાર્ય છોડી જીવનું આજ કર્તવ્ય છે એમાં લેશ માત્ર પણ શક નથી. કલિયુગ હવે તો ઘણી ત્વરાથી આગળ વધે છે તેટલીજ ત્વરાથી કલિયુગમાં ઉત્પન્ન થનારા ભક્તો આવા ભગવચ્ચિંતનના ઉત્તમ કાર્યમાં પ્રસન્નતાથી લાગી જશે. તેમને માટેજ આવી સામગ્રી પ્રભુ તૈયાર કરાવી રાખે છે.

આ ગ્રન્થ છપાવવામાં અમોએ ઘણીજ કાળજી રાખી છે પ્રેસકોપી સંભાળપૂર્વક મેં તથા ભાઈ મગલદાસેજ કરી છે. વ્યાકરણના ભાગો સમજવાને કૌમુદીનો ઉપયોગ કર્યા છતાં જ્યાં જ્યાં આવશ્યકતા જણાઈ ત્યાં ત્યાં સંપ્રદાયના પ્રાચીન વિદ્વાન્ શાસ્ત્રી કલ્યાણજી કાનજીની સહાય લીધી છે, અને તેમણે પ્રસન્નતાપૂર્વક સહાય કરવાથી તેમનો ઉપકાર ભૂલાય એમ નથી. વળી કોઈ કોઈ સ્થલે શબ્દોની જોડણીમાં **प** ને બદલે **श**, **ण** ને બદલે **न** અને કોઇક સ્થલે નામોમાં ઉપર ઉપરથી અશુદ્ધ જેવું લાગે તે અગે ઘણે સ્થલે જેવુ હતુ તેમજ રાખ્યું છે, કેમકે એવા મહાન્ લેખકના લેખમાં કાંઈપણ ફેરફાર કરવાની અમારી યોગ્યતા અમને લાગી નહિ. છતાં જ્યાં કોઈ

અક્ષર લખતાં પડી ગયલો જણાયો ત્યાં અમે ઉમેર્યો છે. છપાવવાને માટે હસ્તલિખિત પ્રતિ વિના સંકોચે અમારે સ્વાધીન કરવા માટે પં૦ ગટ્ટૂલાલજીની સંસ્થાનો પણ અમારાપર મહાન્ ઉપકાર થયો છે.

શ્રીયોગિગોપેશ્વરજી રશ્મિમાં દરેક અધ્યાયને છેડે પોતાને સર્વજ્ઞ, કૃતકૃત્ય, હૃદીશ્વરજ્ઞ વગેરે લખે છે. રશ્મિમાં ચતુર્થ અધ્યાયને છેડે આ શ્લોક છેઃ—

ब्रह्मज्ञः कृतकृत्यश्च हृदीश्वरज्ञ एव च । कृतार्थश्च प्रमाणज्ञस्तत्कृतिं ज्ञातुपश्यत ॥

આથી અમે પણ એમને સર્વજ્ઞ, કૃતકૃત્ય અને હૃદીશ્વરજ્ઞ કહ્યા છે. એમના હૃદયમાં શાસ્ત્રો એટલાં બધાં ભરેલાં હતાં કે સંસારને માટે અવકાશ હતોજ નહિ. જે સમયમાં ગ્રંથો હસ્તલિખિત સ્થિતિમાંજ હતાં તે સમયે આટલા બધા ગ્રથો વાંચી, તે મનમાં ભરી રાખવાં, અને યોગ્ય સ્થલે તેનો ઉપયોગ કરવો એ કાર્ય કેટલું વિકટ છે તે હાલના છાપેલાં અને તૈયાર અનુક્રમણિકાવાળા ગ્રથોમાંથી પ્રમાણો ટાંકનાર મનુષ્યોને એકદમ સમજાય તેમ નથી. એ તો કોઈ કૃપાપાત્રથીજ થઈ શકે. એમનું ચિત્ત સર્વદા શાસ્ત્રો તથા અલૌકિક વસ્તુઓથી એટલુ તો ભરપૂર હતુ કે એમને મળવા આવનાર વૈષ્ણવને, તે આગલે દિવસે આવી ગયા હોય તોપણ એમને અનુસંધાન ન હોવાથી "ક્યારે આવ્યા, ક્યાંથી આવ્યા," વગેરે પ્રશ્નો ફરી ફરીને કર્યાજ કરતા. શ્રીનાથદ્વારમાં શ્રીવિઠ્ઠલનાથજીના મંદિરમાં જ્યાં શ્રીહરિરાયજી બિરાજતા તે વિદ્યાગૃહમાં પોતે પણ બિરાજી ગ્રન્થોનું ચિંતન કરતાં. શ્રીનાથજીની સેવાના સમયની ખબર એમને કરતાં એઓ ઉઠતાં અને રસ્તામાં પ્રીતમપોલની ગલિમાં કોઈ મનુષ્યને અડકતાં ઉભા રહી પૂછતાં કે 'તમે કોણ છો ?' અને જો ઉત્તર મળતો કે "વૈષ્ણવ", તો તરત ન્હાયા સિવાય શ્રીનાથજીની સેવામાં દાખલ થઈ જતાં; પણ જો 'વાણિયો' 'બ્રાહ્મણ' વગેરે ઉત્તર મળતો તો તો તરત સ્નાન કરી પછી સેવામાં દાખલ થતા. એમને **अलौकिकमन**ની સિદ્ધિ હતી તે નીચેના પ્રસગપરથી જણાય છેઃ—એકવાર શ્રીનાથજીની સેવામાં પોતે હતા, તેવામાં ઘણે દૂર ગૌશાલામાં કોઇ વાઘ આવ્યો તેથી ગાયો બ્હીને બરાડવા લાગી, આનુ જ્ઞાન એમને મંદિરમાં થયુ, અને તરત ભીંતપર જોરથી "ભાગ, ભાગ"કરીને હાથ ઠોક્યા, તેથી વાઘ ન્હાસી ગયો. આવાં આવાં પ્રસંગો એમના પ્રસગમાં બન્યા હોય તો અમને કાંઇ આશ્ચર્ય લાગતુ નથી. ન બન્યાં હોય અને માત્ર લોકવાણી હોય તો તેથી અમને કાંઈ એમની ક્ષતિ લાગતી નથી, કેમકે કોઈ પણ ચમત્કારોની આવશ્યકતા વિના એમનુ રશ્મિ, બુભુત્સુબોધિકા વગેરે સર્વ-ગ્રન્થોમાં પ્રતીત થતુ જ્ઞાન અમારા મનને અત્યુત્તમ ચમત્કારરૂપજ છે. વેદાંતાધિકરણમાલાનો શ્રીપુરુષોત્તમજીકૃત ચતુર્થ અધ્યાય એમને ન પ્રાપ્ત થવાથી એમણે પોતે લખી કાઢ્યો, તે અમે અધિકરણમાલામાં છપાવ્યો છે, તેમાં ભક્તોને મરણ સમયે વેણુનાદનુ શ્રવણ થાય છે એમ લખ્યું છે તેમજ પોતે લખે છે કે મેં પણ શ્રવણ કર્યું છે. આ એમના પોતાના વચનમાં તો કાંઈ પણ શંકા હોયજ નહિ. એમના સમયમાં કોઈ રામાનુજીય પંડિતો શાસ્ત્રાર્થ કરવા શ્રીનાથદ્વાર આવ્યા હતા. યોગિગોપેશ્વરજીને કોઈ કાંઇ કહી શકતા નહિ, કેમકે આસપાસ શું ચાલી રહ્યું છે તેનુ તેમને ભાનજ—અનુસંધાનજ ન હતુ. એમ છતાં કોઈ શિષ્યે નમ્રતાથી પૂછ્યું કે યે રામાનુજીય પંડિતોંકી સાથ આપ શાસ્ત્રાર્થ કરોગે. ઉત્તરમાં હા કહી અને શાસ્ત્રાર્થ થયો, અને એ પંડિતો અત્યંત પ્રસન્ન થઈને ગયા.

એમનું ચિત્ત પ્રમાણથી ભરપૂર હતું, શાસ્ત્રો હસ્તામલકવત્ હતાં, પ્રભુનો હૃદયમાં અનુભવ થતો, છતાં એમને પૂર્વજો અને વડિલો તરફ અત્યત માન હતું. અને ચિત્ત નમ્રતાથી પૂર્ણ હતું;

તેમજ પ્રમાણમાર્ગીય ગણાતા શ્રીપુરુષોત્તમજી અને પ્રમેયમાર્ગીય ગણાતા શ્રીગોકુલનાથજી અને શ્રીહરિરાયજી બન્નેનુ ઐક્ય એમનામાં સિદ્ધ થયલું જણાતું હતું.

આવા એક પ્રભુના સાક્ષાત્કારવાળા ઉત્તમ ભક્ત, ધુરંધર પંડિત, મહાન લેખક, અને અલૌકિક મનની સિદ્ધિવાળા પુરુષના આ અંતિમ સમયે લખેલા ઉત્તમ ગ્રંથના સંબંધમાં પ્રભુએ અમારા જેવા અજ્ઞને મૂકવાથી અમે પ્રભુના ઋણી છીએ, અને એના બદલામાં અમારા સંસારદુષ્ટ હૃદયના સાષ્ટાંગ પ્રણામ શિવાય બીજું કાંઈપણ અર્પણ કરવાનું અમારી પાસે દીસતું નથી શ્રીમહાપ્રભુના સુબોધિનીના અધ્યયનમાં શ્રીગુસાંઇજીના ટિપ્પણીના અધ્યયનમાં, શ્રીપુરુષોત્તમજીના પ્રકાશના અધ્યયનમાં, તેમ આ बुभुत्सुबोधिका ના અધ્યયનમાં, જેમ પાંડિત્ય વધારે, જેમ શાસ્ત્રોનો અભ્યાસ વધારે, તેમ આનંદ વધારે, એમ અમને લાગે છે. અને જે પંડિતો આ ગ્રન્થનું અધ્યયન કરશે તેમને અત્યંત આનંદ મળશે એ વિચારથી જે યત્કિંચિત્ સેવા અમે કરી શક્યા છીએ તેથી અમારા પ્રયાસની સફલતા અમે માનીએ છીએ. છેવટે અમારાથી બની તેટલી કાળજીથી પ્રકટ કરેલો આ ગ્રંથ અત્યંત આનંદથી પ્રભુના ચરણકમલમાં અમે સમર્પણ કરીએ છીએ.

આ જન્મપ્રકરણને લગતા જન્માષ્ટમી નિર્ણય તથા પ્રભુપ્રાકટ્યના સંબંધના નવ સ્વતંત્ર લેખો " 'વેણુનાદ" માસિકમાં છપાયા છે. તે ઉપરાંત જે અમને મળ્યા તે અહીં લીધા છે.

श्रीकृष्णार्पणमस्तु ।

આવા સંસ્કૃત ગ્રંથોની કિંમત સમજનાર અને પ્રકટ કરવા દ્રવ્યની સહાય કરનાર બહુ થોડા હોય છે, માટે શેઠ જેકીસનદાસના ટ્રસ્ટ ફંડના ટ્રસ્ટીઓનો અમે ખાસ ઉપકાર માનીએ છીએ.

॥ श्रीजन्मप्रकरणसुबोधिन्यामुपन्यस्तवाक्यानां स्थलनिर्देशः ॥

अ० १—२

पत्रे	वाक्यम्	कुत्रत्यम्	पत्रे	वाक्यम्	कुत्रत्यम्
२०	अदीनलीलाहसितेक्षणो—	भा.२-२-१२	३५	कृषिर्भूवाचकः शब्दो	गोपालपू.तापिनी
२१	जातो गतः पितृगृहात्	भा.९-२४-६६	४५	यावदासीनः परा—	तै. ब्रा.३-२ ९-६
२८	संज्ञायां भृतृवृजी	सि.कौ.३-२-४६	४७	प्रजापतेः प्रजापतिः	
२८	अस्ति मत्स्यः	शब्दकल्पद्रुमे पृ.६१८	४८	पुरुषो वा नारायणः स्वपिता	
३०	जनपदे लुप्	सि.कौ. ४—२—८१	५४	सितकृष्णकेशः	भा.२-७-३६
३२	अस्त्रतेजः स्वगदया	भा.१-१२-१०	६३	लज्जा सापत्रपान्यतः	अमरः १-७-२३
३४	बलं गदं सारणं च	भा.९-२४-४६	६५	द्वौ सम्मताविह मृत्यू	भा.३ १०-३३
३४	वसुदेवस्तु देवक्याम्	भा.९-२४-५३	६५	मृत्युनैवेदमावृतमासीत्	बृ. १-२-१
३४	कीर्तिमन्तम्	भा.९-२४-५४	६५	अशनाया मृत्युरेव	बृ. १—२—४
३४	सङ्कर्षणमहीश्वरम्	भा.९-२४-५४	६७	तं विद्याकर्मणी समारभेते	बृ. ४—४—२

पत्रे	वाक्यम्	कुत्रत्यम्
६७	तदुदितः स हि यो '	न्यायः
७०	प्रक्षालनाद्धि पङ्कस्य	न्यायः
७०	कामाच्चोदनयापि वा	भा.१२-७-१३
७१	अत्राथ वै मृत्युर्जायते	तै.ब्रा.१-७ ७-५
७१	यत्र यत्रैव मृत्युर्जायते	तै.ब्रा.१-७-७-५
७१	लोकाल्लोकादेव	तै.ब्रा.३-९-१५-१
७२	अलौकिकास्तु ये	म.भा. भी.५—१२
७२	नापराधोस्ति देहिनः	भा.१०-१-४८
७३	पृष्ठस्वीकृतह्रीभयाः	
७५	पुत्रेण जयते लोकान्	
७५	त्वं यज्ञः	बृ. १-५-१७
७५	त्यजेदेकं कुलस्यार्थे	म.भा.आ.११५ ३६
७९	कीर्तिमन्तं सुषेणं च	भा.९-२४-५४
८२	यदूनां कदनं चक्रे	भा. १०-२-६
८७	यदूनां निजनाथानाम्	भा. १०-२-२
९०	देवकीजठरभूः	भा. १०-३२-२३
९०	तव सुतः	भा. १०-३२-१४
९०	तन्मातरौ	भा. १०-८-२३
९०	नन्दस्त्वात्मज उत्पन्ने	भा. १०—५—१
९६	गुहां प्रविष्टावात्मानौ	ब्रह्मसूत्रं१-२-११
१००,१०१	सत्यं परं परꣳसत्यं	ना. ७८
१००	प्राजापत्यो हारुणिः	ना. ७९
१०२	सत्यं तपो दमः शमो	ना. ७९
१०२	कौन्तेय प्रतिजानीहि	गीता ९—३१
१०२	द्विःशरं नाभिसन्धत्ते	वा.रामायणम् ?
१०२	साधवो हृदयं मह्यम्	भा.९-५-३८
१०५	पूर्णस्य पूर्णमादाय	बृ. ५-१-१
१०८	वृक्ष इव स्तब्धो	श्वे.३-९, ना. १२-३
१०९	स वा एष पुरुषः पञ्चधा	ना. ७९

पत्रे	वाक्यम्	कुत्रत्यम्
१०९	अयमात्मा विज्ञानमयः	सर्वोपनिषत्सारः
१०९	भूमिरापोनलो वायुः	गीता ७—४
१०९	असत्यमप्रतिष्ठं ते	गीता १६-८
१११	अयं तु परमो धर्मो	याज्ञ.स्मृ.१-१-८
११८	सत्त्वात् सञ्जायते ज्ञानम्	गीता१४-१७
१२२	यतो वाचो निवर्तन्ते	तै. २—९
१२२	पराञ्चि खानि व्यतृणत्	कठ. २—१
१२२	विष्णोर्नु कम्	तै. ब्रा.२-८-३-२
१२२	तदस्य प्रियम्	तै.ब्रा.२-८-३-२
१२२	इदं विष्णुः	तै.ब्रा. २-७-१४ ३
१२२	प्र तद् विष्णुः	तै. ब्रा. २-८-३-२
१२३	यस्यै देवतायै हविर्गृहीतं	ऐ.ब्रा.३-८-१
१२३	यस्य स्मृत्या च नामोक्त्या	
१२४	इदमुदरे समागमनं	
१२८	रूपं चेदं पौरुषम्	भा.१०-३-२८
१२८	जन्म ते मय्यसौ	भा.१०-३-२९
१२८	मेनेङ्ग कण्डूयनम्	भा. ८-७-१०
१२८	विक्रीडितं तज्जग—	भा.१०-३.१-२९
१३०	छन्दसि लुङ्लङ्लिटः	सि.कौ.३-४-६
१३०	माङि लुङ्	सि.कौ. ३-३-१७५

अ० ३—४

पत्रे	वाक्यम्	कुत्रत्यम्
६	ततो वै ते सर्वान् रोहान्	तै.ब्रा.१-१-२-९
१९	अतोऽस्मि लोके वेदे च	गीता१५-१८
२२	अपां तत्त्वं दरवरम्	भा.१२-११-१४
२२	तेजस्तत्त्वं सुदर्शनम्	भा.१२-११-१४
२५	भृगोः ख्यात्यां समुत्पन्ना	
२६	चैत्यस्य तत्त्वममलं	भा.३-२८-२८
२६	कण्ठं च कौस्तुभमणे—	भा.३-२८-२६
२६	यदग्ने रोहितꣳरूपं	छां. ६—४—१

पत्रे	वाक्यम्	कुत्रत्यम्
२८	सर्वत्र पूर्णगुणकोपि	तत्त्वदीपनि.शा.४३
३१	वेदे रामायणे चैव	हरिवंशे पु. भा.
३१	अर्थी विद्वान् समर्थश्च	वाच.पृ.१२७
३३	अन्यथासन्तमन्यथा	म.भा.आ.७४-२७
३८	स एष इह प्रविष्टः	बृ. १-४-७
३८,३९	तत् सृष्ट्वा तदेवानु-	तै. २-६-१
३८	गुहां प्रविष्टौ परमे परार्धे	कठ. ३-१
३८	यो वा इतो जनिष्यते	तै.सं.६-१०-३-६
४०	चक्षुषः चक्षुः श्रोत्रस्य श्रोत्रं	केन.१-२
४९	पराञ्चि खानि	कठ. २-१
४७	यत् प्रवदन्ति मायाम्	पञ्चरात्रम्
४८	स यथा सैन्धवघनो	बृ. ४-५-१३
४८	असङ्गो ह्ययं पुरुषः	बृ. ४-३-१५
४८	अथात आदेशो	बृ. २-३-६
५०	अन्तरङ्गबहिरङ्गयोः	न्यायः
५१	कृते शुक्लश्चतुर्बाहुः	भा.११-५-२१
५२	यस्मिन् विदिते सर्वं विदितं	
५३	वर्तमानसामीप्ये	सि. कौ. ३-३-१३१
५५	अव्यक्तादीनि भूतानि	गीता २-२८
५५	बृहत्त्वाद् बृंहणत्वाच्च ब्रह्म	
५५	प्रकाशकं तच्चैतन्यं	तत्त्वदीपनि.शा.५५
५६	पूर्णमदः पूर्णमिदं	बृ. ५-१-१
७०	स एकधा भवति दशधा	
७१	या प्रथमं न म्रियते	
७३	मत्तः कामानभीप्सन्तौ	भा.१०-३-३८
७३	वरं मत्सदृशं सुतं	भा. १०-३-४०
७३	अदृष्ट्वान्यतमं	भा. १०-३-४१
९०	कृपणः स तु विज्ञेयो	
९०	स्त्रियाः स्वसुर्गुरुमत्या	भा. १०-२-२१
९१	अनुरक्तो गुणान् ब्रूते	
९१	व्यवहारे शब्दाः	न्यायः
९३	बहुलं छन्दसि	सि.कौ.
९४	भामस्तु भगिनीपतिः	शब्दरत्नावलिः
९५	जिघांसंतं जिघांसीयात्	म.भा.शां.अ.३४
९५	भ्रातापि भ्रातरं हन्यात्	भा.१०-५४-४०
९५	ब्रह्महा पच्यते घोरे	
९५	अस्मात्त्वामप्रमो	भा.१०-१-३४
९५	मर्त्येष्वनृतं प्रतिष्ठितम्	
९५	सन्देहे प्रमाणमन्तःकरण-	शाकुन्तले
९६	जायस्व म्रियस्व	छां. ५-१०-८
९६	नित्यः सर्वगतः स्थाणुः	गी.२-२४
१०१	पुमान् स्त्रिया	सि. कौ.१-२-६७
१०१	अप्रधानं न शिष्यते	
१०२	'यत्र क्वचित्' इति-	भा.१०-४-१२
१०६	प्रपन्नं विरथं भीतं	भा. १-७-३६
१०७	इन्द्रियैर्विषयाकृष्टैः	भा. ४-२२-३०
१०७	तानि धर्माणि प्रथमा-	तै.आ.३-१२-७
१०७	यज्ञो वै विष्णुः	तै. ब्रा. १-२-५-१
१०८	धर्मस्य प्रभुरच्युतः	विष्णुसह.श्लो.१३८
१०८	मुख्ये कार्यसम्प्रत्ययः	न्यायः

श्रीकृष्णाय नमः।
श्रीगोपीजनवल्लभाय नमः।
श्रीमदाचार्यचरणकमलेभ्यो नमः।

शास्त्ररीत्या बुभुत्सुबोधिका।

सा च श्रीकृष्णास्य-वाक्पति-वैश्वानरावतार-श्रीमद्वल्लभाचार्यप्रकटितश्रीमद्भागवतदशम-स्कन्धश्रीसुबोधिन्याः सर्वज्ञ-कृतकृत्य-हृदीश्वरज्ञ-श्रीयोगिगोपेश्वरजित्कृता व्याख्या।

प्रथमोध्यायः।

श्रीकृष्णाय नमः। १०-१-का. १. नवमाध्याये चिद्व्यामोहिका शक्तिरुक्ता। तस्यास्तमोरूपमायायाः सर्वथा तरणं वाक्पते‘र्धाम्ना स्वेन सदा निरस्तकुहक’त्वात् तदुक्त--निरोधेन भवतीति वस्तुनिर्देशनमस्कारात्मकं द्वन्द्वं ‘वेदवेदान्तसारं श्रीभागवत’मिति श्रीभागवतमाहात्म्यान्मङ्गलमाचेरुः नमामीति। नमनसिद्धान्तः पञ्चमस्कन्धात्। तापिनीयप्रसिद्धनमनमिति वेदान्तसारम्। वस्तुसारं वैदिकम्। हृदयं हृदि अयं हृदयमिति छान्दोग्ये। ङेः सुरिति छान्दोग्यीयव्युत्पत्त्या व्याकरणव्युत्पत्तिबाधे हृदयमिति साधयति। अत्र हृदयमित्यत्र प्रकारे लुक्, ङेर्लुक् वा, इकारेण गुणः। हृदयं शेपः तस्मिन्नित्यर्थः। हृदय इति सप्तम्यन्ते तु वेदान्तव्याकरणे ङेर्लुग्वा, हृदि हृदये अयं शेपः तस्मिन्। हृदादि-व्युत्पत्तिस्तु हरति ह्रियते वा हृञोः पुक्दुकौ चेति कयनः बाहुलकात् केवलोपि दुक् हृत्, तदाहुः हृदय इति। कृष्णनिविष्टे मनस्ययं शेपः, तस्मिन् शब्दार्थसाधारणे ब्रह्मणि शेपे शब्दात्मके तदध्यस्तेऽनन्तरूपेर्थे। ‘एको रुद्रो न द्वितीयाय तस्थे’ इति श्रुतेः। भेदान्वये तु ‘यस्यान्तःकरणं गिरित्र’मिति वाक्यात् हृदयाधिकरणके शेप इति भवति, स न टिप्पण्याम्, अयं भक्तिजनकव्याख्याने, अभेदान्वयस्तु तदाज्ञया शास्त्ररीत्या बुभुत्सुबोधिकायामपीति ज्ञेयम्। तादृशे श्रीशुकरूपे यो लीलाक्षीराब्धिः निर्धर्मकत्ववारकः, तत्र लीला निर्धर्म-कत्ववारिका। क्षीरं सर्वप्रतिष्ठास्थानम्। ‘पयसि सर्वं प्रतिष्ठित’मिति श्रुतेः। अब्धिः सत्यं व्युत्पत्तेः, आपो धीयन्तेऽस्मिन्नित्यब्धिः। निरुक्ताच्च, निरुक्ते सत्यं जलनामसु पठितम्। ‘अम्भस्यपारे भुवनस्य मध्ये’ इति महानारायणात्। तत्र शायिनम्। ज्ञानं श्रीभागवतरूपम्।

१. अत्र शोधपत्रमस्तीति प्रत्यक्षमिति लिखितम्, परन्तु तच्छोधपत्रमस्माभिरन्यपत्रेषु न प्राप्तम्।

'ज्ञानमात्रं परं ब्रह्मे'तिवाक्यात् इति वेदान्तस्वरूपलक्षणलक्षितम्। अथ 'नित्यो निष्कलङ्को निराख्यातो निर्विकल्पो निरञ्जनः शुद्धो देव एको नारायणो न द्वितीयोस्ती'ति श्रुतेः। एवं धर्मिण एवं धर्मरूपेण आविर्भाव उक्तः भक्तवश्यत्वात्। न वृक्षादिरूपधर्मैः नवमाध्याय-सुबोधिनीटीकोक्तैः। तत एव। स च विष्णोरेवंविधत्वाभावे नोपपद्यते, अतो विष्णो रूपत्रये इदं महतः सृष्टं। तदुक्तं संहितायां 'विष्णोः कर्माणि पश्यते'ति। तथा चैवं तपोरूपं कर्म विष्णोरिति भगवतोपीति भक्तमनोरथपूर्तिः। अत एव टिप्पण्यां शेषाधिकरणकलीला-क्षीराब्धिः पुष्टिरित्युक्तम्। मङ्गलाचरणे भक्तविशिष्टफलस्य पुष्टिमार्गीयस्य मुख्यत्वात्। किञ्च पुष्टिर्मर्यादातो विपरीता। 'त इमे सत्याः कामा अनृतापिधाना' इति छान्दोग्यदहर-विद्यायां मर्यादा। अखण्डब्रह्मभाने क्षीराब्ध्यधिकरणकशेषस्यानृतापिधानश्रुतिप्रतिपाद्यत्वम्। न ह्यनन्तः शेषः परिच्छिन्नक्षीराब्धौ सम्भवति। पुष्टौ त्वनन्ते शेषे परिच्छिन्नः क्षीराब्धिः सम्भवतीति 'त इमे सत्याः कामा' इतिश्रुतिप्रतिपाद्यत्वमस्तीति विवेकस्तेन वेदवेदान्तसारे श्रीभागवते महानारायणज्ञाने 'स्वरूपलक्षणे सत्यं ज्ञान'मित्यत्र लीलाक्षीराब्धिरित्याकारकं ज्ञानं 'सत्यं ज्ञान'मित्यस्यार्थः। निर्विषयकज्ञानाभावात्। न चायं घट इति ज्ञाने विषयता-सम्बन्धोऽत्र त्वभेदसम्बन्ध इत्यपि सत्यमिति वाच्यम्। स्वयम्प्रकाशत्वार्थमभेदसम्बन्धा-देकरसत्वाच्च। ज्ञानात्मकं जगदितिपक्षे घटस्य ज्ञानत्वाच्च। अनन्तं तु 'हृदये शेषे' इत्यत्रो-क्तमेव। सन्निवेशस्तु पाठक्रमेण ज्ञानमार्गे 'देवस्तुर्यो विभुः स्मृतः' इति श्रुतेः। भक्तिमार्गे 'सर्वं सर्वमयं सर्वे सर्वार्थवाचकाः' इति श्रुत्यनुसरणात्' त्वनन्तस्य शेषरूपत्वेन शय्या-दिरूपत्वाद् यथाभक्ति मुख्यार्थादिक्रममाश्रित्य सन्निवेशः। पुष्टिमर्यादाभ्यां विरुद्ध-धर्माश्रयत्वं ब्रह्मधर्म उक्तः। शिवे पाशुपतशास्त्रं समासम्। नारायणे वेदशास्त्रम्। द्वन्द्वप्रयोगो ज्ञापयत्यनुष्ठाने द्वन्द्वं प्रयोक्तव्यमिति। 'कर्मणि द्वन्द्वं न्यञ्चि पात्राणि प्रयुन-क्ती'ति गृह्यसूत्रवत्। अतः परं सर्वोपनिषदादौ ह्यानन्दमपि स्वरूपलक्षणे निविष्टमिति तद्रूपमाहुः लक्ष्मीति। तेन 'तमेत'मिति श्रुत्युक्तं रूपं पूर्वमुक्तम्। 'यदेव विद्यये'ति श्रुत्युक्तमुत्तरार्धे। लक्ष्मी राधारूपा। 'तावुभौ ब्रह्मसाविन्यावंशेन जगतीं गतौ। तयोर्गेहे महालक्ष्मी'रिति पाठात्। राधाष्टमीनिरूपणे उत्सवप्रतानेऽस्ति। इयं ब्रह्मानन्दरूपा। क्षीराब्धेश्चरणाभ्यां मथने बालत्वादाधिदैविकाभ्यां आचार्यानन्दाविद्याभ्यां चरणाभ्यां क्रीडार्थमारोपिताधिभौतिकत्वैर्द्रव्यैः सम्बन्धादाध्यात्मिकाक्षरानन्दरूपा क्षीराब्धेर्जाता। भक्तिस्यां जाता भक्तापि। अत एव नाक्षरे लयः,भक्तत्वात् सहस्रलीलास्ताभिः,सेव्यमान-मित्यात्मनेपदं ज्ञापयति स्वार्थं स्वलयाभावार्थं सेवत इति। अतः परं धर्मीदमित्थतया ज्ञातुमशक्य इति महाचमसंमतेन चन्द्ररूपतामाहुः कलानिधिमिति। ध्रुवा षोडशी

१. 'महाचमस्य मुवर' इति तैत्तिरीयभाष्य।

तस्यामन्याः कला निधीयन्ते इति। पुरुषोत्तमोऽवतारी अधोक्षजत्वेप्युक्तो दृश्यत्वेपि चन्द्रस्य त्रिरूपत्वात्। 'यस्यामतं तस्य मत'मिति श्रुतेश्च। अवतारश्चतुःषष्टिकलानिधिः कला अब्मये निस्तेजसि चन्द्रे निधीयन्ते येनादित्येन सोपि कलानिधिः। 'सूर्य आत्मा जगतस्तस्थुष'श्चेति श्रुतेः। तेन द्वितीयपादस्थे 'अन्तर उपपत्ते'रित्यधिकरणे योऽक्षिपुरुषस्तत्र स्थितिः। छान्दोग्यीयोपकोसलविद्या सङ्गृहीता। एतेन प्रथमतो गुरुरहस्यभजनं भावितं 'लक्ष्मी राधा सत्या यमुनाजित् श्रीस्वामिन्यो गुरवोत्र न' इत्याचार्याः। पूर्णमपीदं वक्तव्यम्। 'अपश्यत् पुरुषं पूर्ण'मितिवाक्यात्। 'व्यासोऽस्माकं गुरु'रित्याचार्याः। लीलाक्षीराब्धिशायी स्वयम्। लक्ष्मीः स्त्री धनं च। कलानिधिः पुत्रः शेषो वा। 'नारायणाद्रुद्रोजायत' इति नारायणोपनिषदः। कर्माणि भक्तमनोरथपूरकाणि। तथा च बृहदारण्यके साकारं ब्रह्म, 'यदेकमव्यक्तमनन्तरूप'मितिश्रुतेः। 'अविनाशी वा अरे अयमात्मानुच्छित्तिधर्मे'तिश्रुतेश्च ते च महत्प्रतीत्या निश्चीयन्ते। तथा साधनैः सजातीयविजातीयद्वैतरहितम्। स्वगतद्वैतस्य राजसतामसज्ञानविषयस्य सात्त्विकज्ञानेनापाकरणात् सात्त्विकज्ञानमात्रविषयस्याद्वैतस्य सिद्धिः। 'मनसैवानुद्रष्टव्यं' 'नेह नानास्ति किञ्चने'ति बृहदारण्यकात्। ननु कृष्णमूर्तिर्गोपालतापिनीये कृष्णोपनिषदि च, किञ्च द्वितीयस्कन्धे सिद्धान्तनवमेध्याये चतुर्भुजं रूपमुक्तमिति ब्रह्मप्रकरणे च सर्वतः पाणिपादान्तत्वादिरूपमिति तद्विहाय कुत इदं नारायणरूपमुच्यते? उच्यते। 'कृष्णमूर्ति'रित्यादिनोक्तमस्त्येव। यदुक्तं 'ब्रह्मप्रकरण' इत्यादि तत्तु पुरुषविद्यायामित्यक्षरतुल्यमिति नाचार्यस्थितिः। किन्तु 'सोश्नुत' इतिश्रुत्युक्तविपश्चित्त्वेनोपस्थितपरब्रह्मणि। परत्वं न विपश्चित्त्वं, सूर्येतिव्याप्तेः, सत्यज्ञानानन्तविपश्चित्त्वस्य परब्रह्मलक्षणस्य। किन्तु अव्यक्तात् कालकृतं देशकृतं च परत्वम्। तेन पुरुषविद्योक्तेषु पुरा आसेतिव्युत्पन्ने स्थितिः। न तु सहस्रशीर्षिणि। तस्य 'नवाम्बुदानीलमनोहराये'तिग्रन्थोक्तस्य च तथा सप्तस्वरूपाणां च तदुपासकपुराविदनुसृतश्र्याचार्यमार्गीयविशेषपरत्वेन सकलसाधारणरूपत्वाभावात्। 'नमामि हृदये शेषे' इत्युक्तस्य सकलसाधारण्यम्। नन्वेतेष्वेव किञ्चिद्रूपं वक्तव्यम्, मूलस्य 'यतो वाचो निवर्तन्त' इति निषेधादिति चेन्न,'भक्त्या ग्राह्य'त्वेना'चार्यवान् पुरुषो वेदेति'श्रुत्या चात्र विश्रान्तेः। अन्यथाऽक्षरविश्रान्तेः तत्तद्भक्तभावितविशेषरूपविश्रान्तेश्च शास्त्रवैयर्थ्यप्रसङ्गात्। तेन 'यदेकमव्यक्तमनन्तरूप'मितिश्रुताविदं मूलरूपमन्येषु रूपेषु। अत एव 'नारायणसमो गुणै'रिति गर्गवाक्यम्। योगमायाच्छन्नं तु कृष्णत्वेन प्रतीयते। अतः साकारः। तेनाचार्याणां षट्शास्त्रीये रूपे तात्पर्यं ज्ञायते। शेषे पाशुपतं शास्त्रम्। लीलाक्षीराब्धिशायिनि वेदवेदान्तशास्त्रे समाप्ते। 'लक्ष्मीमहस्रलीलाभिः सेव्यमान'मित्यत्र साङ्ख्ययोगौ शास्त्रे पञ्चरात्रं च शास्त्रं समाप्तम्। तथा 'प्रणवो धनुः शरो ह्यात्मा ब्रह्म

१. 'अभ्यर्हितं पूर्व'मिति राजसपदस्य पूर्वनिपात. । २. =मन. ।

तल्लक्ष्यमुच्यते। अप्रमत्तेन वेद्धव्यं शरवत् तन्मयो भवे'दितिश्रुत्या हृदयाभिन्नशेपो धनुः प्रणवत्वात्। स च नवीनभावजनक इति भक्तमनोरथेनान्याचार्यविलक्षणा नूतनाश्च भावास्तदनुभावा इति लीला तद्रूपः क्षीराब्धिः। क्षीरम्। यस्मिन् सर्वं प्रतिष्ठितं भवतीति सर्वाश्रययोग्यः अधिशब्दो रूढः। ततः शायी नारायणः तत्समः कृष्णश्च, स च शक्तीः शाययित्वा स्वप्नयुक्ताः कृत्वा तत्तल्लीलानुकूलस्थितिरूपा वा कृत्वा। अयमर्थः। शर आत्मा। लक्ष्यं ब्रह्म। नारं अयनं यस्य तत्। अप्रमत्तः प्रमादरहितः तेन अप्रमादेनेति वा। एतद् बलतपसोरुपलक्षणम्। 'नायमात्मा बलहीनेने'तिश्रुतेः। एवं भक्तिमार्गानुसारेण। वेद्धव्यम्। व्यध ताडने तड आघाते। आघात इति हन हिंसागत्योरित्यस्य रूपम्। अतः प्राप्तव्यमित्यर्थः। शरो लक्ष्ये लक्ष्यप्रचुर इव ब्रह्मप्रचुरो भवेत्। ततस्त्वत्यन्तानुग्रहे सम्पद्याविर्भावे पुंष्टिलीला आहुः लक्ष्मीसहस्रेति। तेन पुष्ट्यनुभवः। उत्तरार्धे मर्यादायाः 'यदेव विद्यया करोति श्रद्धयोपनिषदा वे'ति श्रुत्युक्तं सेवनमुक्तम्। पूर्वार्धे तु 'तमेतं वेदानुवचनेने'त्युक्तं ज्ञानमित्युक्तम्। ज्ञानस्य भक्तित्वे तु सेवापि। 'ज्ञानं क्रिये'ति पञ्चरात्रे भक्तिज्ञानयोः सामानाधिकरण्यात्। भक्तिमार्गस्य बहुविधत्वात्। पूर्वार्धे मनसि सर्वतो निवृत्तव्यापारे स्वयमुपलब्धनिजसुखानुभवरूपब्रह्मज्ञानमुक्तम्। तेन 'ज्ञानी त्वात्मैव मे मत' इति ज्ञानी पूर्वार्धे, उत्तरार्धे तु 'ज्ञानी चेद् भजते कृष्ण'मिति भजनमुक्तम्। 'सहस्रलीलाभि'रित्युक्त्या स्वमार्गोपि तदन्तर्गतः। 'भूर्लक्ष्मीः भुवर्लक्ष्मीः सुवः कालकर्णी तप्ता महालक्ष्मी'रिति सर्वस्य लक्ष्मीरूपत्वात्। तदिदं स्वमार्गभजनं भक्तिहंसे उक्तम्। स्वरूपान्तर्गतो भेदः 'अविभक्तं च भूतेषु विभक्तमिव च स्थितं' इत्यक्षरात् परेपि ज्ञेयः। अतः सेव्यमानम्। सेव्यसेवकभावस्य क्रीडान्तर्गतत्वात्। 'यदेकमव्यक्तमनन्तरूप'मितिश्रुतेः, सर्वतः पाणिपादान्तत्वेनैकक्रीडासामग्रीरहितं यावत् तावदेकमितिव्यवह्रियते। शाखीयरूपवत्। अतो 'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्ये'दित्यादि केन भिन्नेन करणेन कं भिन्नं कर्म आत्मानम्। ननु घटपटकुड्यकुसूलान्युत्पद्यन्त इतिज्ञाने बहुत्वप्रतीतिः। बहुत्वविशिष्टकुड्यादिनिष्ठा वर्तमानोत्पत्त्यनुकूला बहवो व्यापाराः। अकर्मकत्वेन कुड्यादिनिष्ठमेव फलमिति चेन्न। राजसादिज्ञानविषयत्वेन बहुत्वस्य भ्रमसंशयज्ञानविषयत्वात्। सात्त्विकज्ञानविषयत्वे तु एकमेव ज्ञानम्। गीतावाक्यात्। 'प्रवर्तते यत्र रजस्तमस्तयोः सत्त्वं च मिश्रं न च कालविक्रम' इत्यवस्थितमतवाक्ये मिश्रसत्त्वनिषेधेन शुद्धसत्त्वसत्त्वात्। अधुना 'नारायणपरा वेदा' इत्यादिबहुश्रुतिप्रतिपाद्यत्वेपि 'नारायणपरायणः सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने'इतिवाक्यात् भक्तदौर्लभ्यद्योतितनारायणपरायणदौर्लभ्येन नारायणो-

१. शक्तिसङ्कोचलक्षणा रुढि.। २. =मनः। ३ ब्रह्म=आत्मा, ब्रह्म एव आत्मा। ४ नारोपयोग, अलौकिकत्वे देहाना नाराणाम्।

त्कर्पेपि 'यतो वाचो निवर्तन्त' इति श्रुतेरधोक्षज इतिनाम्नः अन्येभ्यश्च वाक्येभ्यः स्वज्ञात-नारायणसमं महाचमसमतेन चन्द्ररूपं तैत्तिरीयश्रुतेराहुः। किंचारणप्रत्यक्षाभ्यां सूर्यं स्मृतिप्रत्यक्षानुरोधेनाहुः। ब्राह्मणानुरोधेन सूर्योग्निरित्यग्निमाहुः। विराजमाहुः कला-निधिमिति। श्रुत्यनुसारेण कृष्णमाहुः। तद्विदः। 'गूढं ब्रह्मणि वाङ्मय' इतिवाक्यात्। तथा च श्रुतिः 'अविज्ञातं विजानतां विज्ञातमविजानता'मिति केनोपनिषदि।

१०–१–का० २. नन्वाचार्यकृपाभावे आचार्यसन्दर्शितागमत्वमपेयात् तदर्थं कृपा-ज्ञापकः स्वानुभावो वक्तव्य इति चेत् तत्राहुः चतुर्भिश्चेति। चतुर्भिरध्यायैश्चतुर्भिः प्रक-रणैः पुनश्चतुर्भिः प्रकरणैः पुनस्त्रिभिः सात्त्विकानामन्तःकरणप्रामाण्यान्न प्रमाणापेक्षा 'मनसैवानुद्रष्टव्यमेतदप्रमेयं ध्रुव'मिति श्रुतौ सावधारणोक्तेः। तर्हि सर्वेषां मनसा दर्शनं स्यादिति चेत्, महतामन्तःकरणं प्रमाणं प्रमाकरणं न त्वन्तःकरणमात्रमिति यथोद्धवबाल-क्रीडने एकादशाध्यायसंवादः। षड्भिरध्यायैर्गुणप्रकरणमिति। अत्रेदं ज्ञेयम्। 'लक्ष्मी-सहस्रलीलाभिः सेव्यमान'मित्युक्तम्। स चा'त्मानन्दसमुद्रस्थ' इति तं कृष्णं कृपया चिन्तनविषयमुपनिबबन्धुः। ननु दशमे लक्ष्मीः सर्वत्र कथं, वृषभानुगृहे राधारूपास्तु, 'श्रयत इन्दिरा शश्वदत्र ही'ति वाक्यमपि तत्परमस्त्विति चेन्न। नृसिंहतापिनीये 'भूर्लक्ष्मी-र्भुवर्लक्ष्मीः सुवः कालकर्णी तस्मा महालक्ष्मी'रिति श्रुतेः। पञ्चधेति व्यष्टिभावनार्थम्। तेन गणनेन पञ्चत्वलाभेपि न क्षतिः। हृदय इति 'स मानसीन' इति श्रुतेः। ममेति-पदात् परत्वे पादादौ स्थितत्वेपि न 'मे' आदेशः। अग्रेतनपादादिस्थितत्वं गौणमादाय सूत्राप्रवर्तनात्। कृपया लोकं ग्राहयितुं लक्ष्मीलीलान्तर्गतस्वयोग्यभावविषयस्य कृष्णस्य प्रमाणप्रकरणोक्तप्रातराशवनक्रीडासायमाशसम्बन्धिनो निरोधलक्षणग्रन्थोक्ताधिदैविकसे-वया भगवतः स्वद्वारा भुवि प्राकट्यकर्त्र्या सह चिन्तनम्। तदुक्तम् 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य' इति। पाठक्रमेणार्थः। निरोधविधया सर्वतो निवृत्तव्यापारे मनसि स्वयमुपलब्धनिजसुखानुभव इदमेव ब्रह्मज्ञानम्। तदुक्तं 'हृदये शेपे लीलाक्षीराब्धिशायिन'मित्यनेन। तदन्वपि श्रवणादिः। 'आत्मारामाश्च मुनय' इति वाक्यात्। अवैधभक्तिश्च। गुणगानेन तदध्याससिद्धिः। 'तत्त्वमसी'त्युक्तस्य तदध्या-सस्य सिद्धिः। 'कथामात्रावशेषिता' इतिवाक्यात्। किञ्च पञ्चधोपनिषदि मुण्डके कर्मज्ञान-भक्तिमुण्डकोक्तसाधनैः भगवदाविर्भावे प्रश्नोपनिषदा संवत्सरकालतज्जन्यसूर्यचन्द्रादित्व-रूपेण भगवज्ज्ञाने जन्मप्रकरणाध्यायचतुष्कम्। तत आत्मविद्योपनिषदा रुद्रब्रह्मविष्णुरूपैरु-क्तस्याभिनवज्ञातस्य श्रीमन्नन्दराजकुमारस्य क्रीडास्तामसराजससात्त्विकप्रकरणैः। तदनु

१. 'इति भारतमाख्यानं कृपया मुनिना कृत'मितिवाक्यात् वक्ष्यमाणगमनकृतव्याख्यानरूपयोः कार्यकारणभावः।

२. सहस्र्यावारसर्वमिदम्, यद्वा प्रश्ने परब्रह्मान्वेषणोऽसेस्तद्रूपाणि।

गुणप्रकरणे 'कृषिर्भूवाचकः शब्द' इत्युक्तः कृष्णः । स च पुराणे भगवानिति गुणप्रकरणे सः। तत्र एकादशस्कन्धे 'देवस्तुर्यो विभुः स्मृत' इति माण्डूक्योपनिषदुक्तः।

१०–१–का० ३–४. ननु ह्यग्निहोत्रं जुहोति यवागूं पचतीतिवद् आत्मा श्रोतव्य द्रष्टव्यः इत्यार्थक्रमः, तथा च श्रुतिः 'वेदान्तविज्ञानसुनिश्चितार्था' इति, इति चेत् तत्राहुः दशमेति। सत्यं,वेदान्तविज्ञानेन परम्परयात्मदर्शनं परन्तु भूयसामुपनिषद्भागानां वैयर्थ्यापत्त्या वेदान्तविज्ञानं शाब्दं, तच्च स्वव्यापारं कर्मज्ञानभक्तिरूपं मुण्डके निरूपितमपेक्षते इति दशमार्थः प्रकरणाद्यर्थाश्च स्वाध्यायवत् स्वाध्यायत्वार्थमपेक्षन्ते, आर्थक्रमे तु पाठक्रमत्यागहेतोरभावः शाब्दापरोक्षं चेति दोषद्वयम्। विचार्यत इति 'अविचारिताश्च शब्दा नार्थं प्रत्याययन्ति'। तथा सति 'योन्यथासन्तमात्मान'मिति दोषापत्तिः। ननु दशमार्थे सन्देहाभावाद् विचारः कुत इत्यत आहुः नवेति। यथा नवलक्षणलक्ष्य आश्रयस्तथा कृष्णोपि नवलक्षणलक्ष्य इति नवलक्षणलक्ष्यत्वात् कृष्णस्य तन्निरूपणं दशमार्थे सन्देहबीजम्, हीति निश्चयेन। 'कृष्णो हि परमं दैव'मिति गोपालतापिनीये,'अहं सर्वस्य प्रभव' इति गीता। 'समान एवं चाभेदा'दिति व्याससूत्रम्, अतो निश्चय इत्यर्थः। द्वितीयकोटौ पाठक्रमभावित्वान् निरोधः। अत्र पाठक्रमः सन्देहबीजम्। पूर्वपक्षमाहुः लीलानिरिति। लीला दशविधाः तत्र दशविधत्वनिर्धारकोर्थः सर्गादिरूपो न तु पाठक्रमः। अतोत्र क्रममात्रं क्रम एव दुर्बलः। तुना अर्थसहितक्रमस्तु न दुर्बलः।

१०–१–का० ५. ननु क्रमो ह्यृषिप्रणीतस्तेनैव क्रमेण श्रवणं दर्शनफलसाधकं न यथाकथञ्चिदिति चेत् तत्राहुः यथेति। फलं दर्शनं 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः' इति श्रुतेः। लोक इति द्वादशस्कन्धे सप्तमाध्याये लौकिकभाषायां। प्रकृत इति समाधिभाषोक्तभक्तियोगे निरोधे। नेति प्रथमस्कन्धे वाक्यात्। गौणमुख्यन्यायेन महानन्वयश्च स्यात्। न च लौकिकीभाषात्रापि, ततः पोषको निरोधः कुतो नेति चेन्न। पोष्यनिरोधसापेक्षत्वात् पोषकस्य निरोधस्य शुद्धलीलाबोधकस्कन्धार्थत्वात्।

१०–१–का० ६. अतिव्याप्त्या नेत्याहुः प्रतीत इति। अन्यत्रैकादशे। शरीरेण महत्त्वात् स्कन्धस्य। अन्यल्लेखे स्पष्टम्। नन्वाश्रये निरूपयिष्यमाणे लीलाभिधातो मुख्यातात्पर्यवृत्तिः कृष्णमाश्रयं प्रतिपाद्यत्वेन दशमे द्योतयिष्यतीति चेत् तत्राहुः कृष्ण इति। तथा चात्र कृष्णप्राधान्याभावाद् भक्तप्राधान्येन तत्सम्बन्धिनीनां लीलानां वाचकानि बहूनि पदानि सन्ति तानि मुख्यानि। 'सोश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिते'ति श्रुतौ स इति भक्तस्वातन्त्र्येण तत्प्राधान्यात्। ब्रह्मत्वप्रधानं ब्रह्मणेत्यप्रधानतृतीयायाः। 'निवेदितात्मा विचिकीर्षितो म' इतिवाक्यात्। नातोन्योर्थः कल्पनीयः।

१०–१–का० ९. अथ निरोधलक्षणं विवृण्वन्ति स निरोध इति।'निरोधो भगवद्रूप'

इति द्वितीयसुबोधिन्याम् । अन्यथा लोकन्यायेन 'सच्चिदानन्दता ततो' न स्यात्। विजातीयत्वात् । अस्य हरेः । अनुशयनं निरोधः । टीकान्तरे त्वनुरूपं शयनं लीलानुरूपं शयनम् । ननु गौणमुख्यन्यायः प्रवर्ततां ततो निरोधो भगवद्धर्म इत्यपि सङ्गतं भविष्यतीति चेत् सत्यम् । कारणधर्मस्य कार्ये हरौ निरूपणात् । 'भगवान् भक्तभक्तिमा'निति वाक्यात् कारणधर्मः। अत उक्तं अनुशयनमिति । अनुपश्चाच्छक्तिः शाययित्वा स्वप्नयुक्ताः कृत्वा । शीङ् स्वप्ने । शयनं स्वस्य स्वप्नकरणम् । तथा च कल्पः । इषेत्वोर्जेत्वेति शाखां छिनत्तीति । शाखा खशया । खमाकाशम् । 'आकाशशरीरं ब्रह्मे'ति श्रुतिः । तत्र शेते स्वप्नं कुरुते । शाखृ व्याप्तावतो यथादृष्टं सर्वत्र स्वप्नकरणम् । इति संहितामते । वेदान्ते तु 'भूतानां छिद्रदातृत्वं बहिरन्तरमेव चे'ति छिद्राणि जीवाः बहिरन्तरं देहस्थानीयम् । जाग्रत्स्वप्नसुषुप्तयोऽवस्थाः। ज्ञानत्वाज् जीवानाम् । हरिः कश्चिद् भक्तसम्बन्धी धर्मिधर्मः 'ब्रह्मणीत्थं हरिर्मतः' इतिसिद्धान्तमुक्तावल्याः। महानारायणे च वह्निशिखाया धर्मः। हरति दुःखमिति हरिः। यथा प्रपञ्चनिर्माणानन्तरं स्वप्राप्त्यर्थं भक्तिमार्गं निरमासीत्, तथा तद्विषयं हरिरूपमपि वह्निशिखाधर्मं परमात्मानं कृतवानिति । निरोधो लक्ष्यं अस्यानुशयनं लक्षणम् । तच्चातिव्याप्तं सर्वत्र शक्तीः शाययित्वा शयनात् । 'तत् सृष्ट्वा तदेवानुप्राविश'दितिश्रुतेः । तत् स्वप्नयुक्तं जगत् । तत्परिहाराय विवृण्वन्ति स प्रपञ्च इति । प्रपञ्चस्य शब्दात्मकस्य वैदिकस्य ग्रहणम् । तेन सर्वप्रपञ्चनिरासान् नातिव्याप्तिः । किञ्च प्रपञ्च इति वक्तव्यम् । अन्यथा दुर्विभाव्यशक्त्यन्तर्गतविसारकशक्तेः सरणांशे निर्विषयत्वापत्तेः । तथा च सरणस्वरूपालाभे तत्प्रतियोगिकाभावाबोधापत्तेः । न च प्रपञ्चविसारकशक्तिर्दुर्विभाव्यशक्तिर्न तु विसारकमात्रमितिवाच्यम् । 'जगद्व्यापारवर्ज'मितिसूत्रविरोधात् । 'मदन्यत् ते न जानन्ति नाहं तेभ्यो मनागपी'तिवाक्यात् । क्रीडनमनुशयनसहितमित्यनुशयनविवरणं क्रीडनम् । अन्यत्र स्कन्धार्थेष्वतिव्याप्तिरतो हरेरिति । क्रीडादिरवतारो न तु हरिः । हरिपदं तत्रान्यथा योज्यम् ।

१०–१–का० १०. 'निर्धर्मको वा भिन्नो वा निरोधं कुरुते यदि तदा निरोधो व्यर्थः स्या'दित्यत्रोक्तभिन्नकर्तृकनिरोधापत्त्या व्यर्थत्वं स्यात्, तन्निवारणायाग्रे लक्षणम् । शक्तिभिरिति । तदापि पूतनामारणक्रीडायामव्याप्तिश्चरित्रमात्रे लक्षणगमनं न वीर्ये, अतः दुर्विभाव्याभि'रिति वीर्यरूपाभिः । ननु तथापि ऐश्वर्यादिचरित्रनिरूपकेपूतस्वाध्यायादिष्वव्याप्तिरिति चेन्न । 'दुर्विभाव्याभि'रित्यत्र मुख्ये सम्प्रत्ययात् तेन चरित्ररूपशक्तीनामपि ग्रहणात् । भिन्नकर्तृकनिरोधाभावायात्मपदव्याख्यानम् । कृष्णस्येति हरिणा निर्धर्मकत्वभङ्गः शक्तिभिर्दुर्विभाव्याभिः सह हरिधर्मकस्य कृष्णस्य प्रपञ्चे क्रीडनमर्थः, शक्तिसाहि-

१ भक्ति. क्रीडापातो निरोधः । २. विषयस्याभावरूपत्वात् तथा । ३. जगत् प्रपञ्चः । ४. उक्तकल्पोक्तस्वप्नसहितं वेदवेदान्तसारत्वात् ।

त्यवदभिन्नप्रत्यक्षाभिन्नात्मकर्तृकमनुशयनमिति मूले बोधः। दुर्विभाव्यत्वनिवेशेन 'कथितो वंशविस्तार' इत्यादिग्रन्थेनुवादस्तुतिप्रश्ननिरूपकेनाव्याप्तिः प्रतीयेतेति चेन्न। दुर्विभाव्यत्वादेव शक्तीनाम्। ननु, प्रपञ्चविस्मृतिपूर्विका भगवदासक्तिः सुबोधिन्यां निरोधत्वेनोदाहृतेति लक्ष्यलक्षणविरोध इति लक्ष्येऽव्याप्तिरिति चेन्न। शक्तिभिर्दुर्विभाव्याभिः क्रीडनाङ्गीकारात्। प्रपञ्चविस्मृतिपूर्वकभगवदासक्तिजनकशक्तिमत्त्वेनास्याः उदाहरणत्वात्। स्पष्टोदाहरणं चैकोनाशीतितमेऽध्याये। अत एव निबन्धे 'समुदायो जन्मवाची क्रीडायुक्तस्य वै हरेः प्रपञ्चविस्मृतिः सक्तिर्भक्तानां चापि योगत' इति। 'समुदायो' हि धर्मिणोचिन्त्यत्वात् तद्रूपगोविन्दरूपाणां इन्द्रियाणां शरीरस्य चात्मतया स्वीकरणात् सः। स च गोविन्दरूप इति सिद्धम्। अतो 'जन्म त्वात्मतया पुंसः शरीरस्वीकृतिं प्राहु'रिति 'जन्मवाची' जन्मवाचकः समुदायशब्दः। तदाहुः 'क्रीडायुक्तस्ये'ति। धर्मग्लानादिभिर्भक्तक्लेशे भक्तानुग्रहाय प्रणीतः क्रीडायुक्तो हरिर्भवति। भक्तिमार्गप्रणयनवत्। क्रीडामाहुः निरोधरूपां 'प्रपञ्चे'ति। इयं 'योगतो'अवयवशक्त्या निरोधक्रीडेत्यर्थः। तथा च प्रश्नोपनिषदि 'अथोत्तरेण तपसा ब्रह्मचर्येण श्रद्धया विद्ययात्मानमन्विष्यादित्यमभिजयन्त एते एतस्माद् वै प्राणानामायतनमेतदमृतमभयमेतत् परायणमेतस्मान्न पुनरावर्तन्त इत्येष निरोध' इति। 'प्राणा' इन्द्रियाणि। तेषाम्। तथा च भगवत आसक्तिर्भगवदासक्तिरित्यपि समासः। लक्षणव्यापार इति सुबोधिनीप्रकाशे। योजनायां च। योजनायां तु प्रपञ्चविस्मृतिपूर्विका भगवदासक्तिर्लक्षणव्यापारभूता साधिता। हरिस्त्वंगुणविशिष्टकृष्णक्रीडनम्। शक्तयश्च परमानन्दमुक्तिदयादयः कलिकामक्रोधादयश्च। तैः क्रीडनं लक्षणं तेन योज्यं लक्ष्यं प्रपञ्चविस्मृतिपूर्वकभगवदासक्तिरूपं सुखेन प्रतीयत इति, न साधनापेक्षेतियुक्तम्। तेन भरताचार्योक्तं 'या तु व्यसनसम्प्राप्तिर्निरोधः स तु कथ्यत' इति भगवदासक्त्यपेक्षया व्यसननिरोधः कुतो नोक्त इति शङ्कापास्ता। अजामिलोक्तोपचरितनारायणनामवत् कृतार्थतासम्पादकत्वेन लीलाप्रतिबन्धकप्रसङ्गापत्तेः। 'यत्तु व्यसनमासक्ति'रिति योजनायां तल्लक्षणाग्रस्तम्। क्रीडा न द्विविधा। सप्रतियोगिनी निःप्रतियोगिनी च। निःप्रतियोगिनी 'तदेजति तन्नैजती'ति। सप्रतियोगिन्यां प्रतियोगिनः परमानन्दमुक्तिदयादयः कल्पादयश्च तन्सम्बन्धिन्यो दशविधलीलाः 'मल्लानामशनि'रित्याद्युक्ताः रसरूपाः। 'गोप्यः कामा'-दित्यादिवाक्यात्। द्वितीयस्कन्धसुबोधिन्यां यदुक्तमनुशयनं नाम शक्तीः शाययित्वा तद्भोगार्थं पश्चात्स्वस्य शयनं तच्च जाग्रदादिभेदेन त्रिविधम्। शक्तयश्च द्वासप्ततिनाडीरूपा देहस्य तावत्यः। आत्मानः श्र्यादयो द्वादशशक्तयः। तेन सप्ताशीत्यध्याया इति। तदप्येतेन

१. उत्तरायणेन। २. देहमन्विष्य देहेन्द्रियगं इमा। ३. बहुवचनस्थाने एकवचनम्। ४. एते कर्तारः। ५. लक्षणमितिशेषः।

वेदसाररूपं सारितम्। एकसम्बन्धि ज्ञानमपरसम्बन्धि सारकमितिन्यायात्। प्रपञ्चस्य देहत्वात् तेन दैहिकीनां दुर्विभाव्यपदाच्छूयादीनां च सङ्ग्रहात्। तदिदं नवाध्यां वेदटीकायामुक्तम्। विराडुत्पत्तौ च तृतीयस्कन्धे स्पष्टम्। तथा सूतोक्तलक्षणेषु निरोधस्थाने संस्थापाठः। संस्था च 'नैमित्तिकः प्राकृतिको नित्य आत्यन्तिको लयः संस्थेति कविभिः प्रोक्तश्चतुर्धास्य स्वभावत' इति प्रलयरूपा व्याख्याता। एवं प्रकृतलक्षणेपि प्रलय इति चेन् मैवम्। 'संस्थां च पाण्डुपुत्राणा'मित्यत्र संस्थायास्तथात्वेपि नात्र संस्था प्रलयः। 'ब्रह्मसंस्थो अमृतत्वमेती'ति श्रुत्या अमृतत्वफलविरोधात् संस्थात्रभक्तिरेव, शाण्डिल्योपि भक्तिमीमांसायां संस्थां भक्तित्वेन सूत्रितवान्। 'तत्संस्थस्यामृतत्वोपदेशा'दिति। एवं च निरोधशब्दोत्र यौगिको द्वितीयस्कन्धे योगरूढ इति ज्ञेयम्। नितरां रोध इति। केषामित्याकाङ्क्षायां पूर्वस्कन्धानुरोधाद् भक्तानामिति लभ्यते। कस्मादित्याकाङ्क्षायां प्रपञ्चादित्यवधित्वेन सम्बध्यते। 'यत्र नान्यत् पश्यती'ति श्रुतौ ह्यन्यपदोक्तभेदस्य प्रपञ्चप्रतियोगिकत्वात्। अवयवशक्तिरूपयोगाद् यौगिकः। नितरां रोधः प्रपञ्चदेह एव इति समुदायशक्तिसत्त्वाद् योगरूढः शब्दः। अयं भगवन्निष्ठोपि। "प्रपञ्चविस्मृतिः सक्तियोगारूढस्य वै हरे"रिति निबन्धात्। उक्तपक्षस्तु 'भक्तानां चापि योगतः' इति द्वितीयचरणपाठान्तरात्। [1]तेनैतत् सिद्धम्। भगवन्निष्ठनिरोधो दशमोक्तः। भक्तनिष्ठनिरोधस्तु प्रपञ्चविस्मृतिपूर्वकभगवदासक्तिः। पूर्वोक्तनिरोधासम्भवात्। भगवतः आसक्तिरिति समासेयं भगवन्निष्ठोपि निरोधः। ननु तर्हि घटेपि भक्तनिरोधः स्यात्, तथा योगमायाशक्तिः, देवकीगर्भस्य रोहिण्युदरे सन्निवेशोपि भक्तनिरोधः स्यादिति चेन्न। दशमनिरोधपदसारितनिरोधपदार्थान्तरस्य भक्तनिरोधत्वेन विलक्षणात्। तत्र[3] निरोधः प्रलयः, सोपि प्रपञ्चस्य न सर्वात्मना लयः किन्तु भावनया, प्रपञ्चस्य नित्यत्वात्। एवञ्च[4] 'मृत्युरत्यन्तविस्मृति'रितिवाक्यात् प्रपञ्चविस्मृतिपूर्विकेत्यंशलाभः[5] दशमनिरोधपदेन[6][7]। तथा निरोधः संस्था, सा न प्रलयोत्र[8] पुनरुक्त्यापातात्[9], किन्तु प्रलयविलक्षणा भक्तिः संस्थापदार्थः। 'ब्रह्मसंस्थोऽमृतत्वमेती'ति श्रुतेः। सा च भक्तिर्भगवदासक्तिः। 'ततः प्रेम तथासक्तिर्व्यसनं च यदा भवे'दित्यत्र भूमावाधिभौतिकी भक्तिर्व्यक्तव्या। व्यसनस्यात्र दुर्लभत्वात्[10]। सा च प्रेमरूपा। प्रेम्णि यदा व्यसनं भवेत् तदासक्तिपदवाच्यं प्रेम भवति। आध्यात्मिकं प्रेम।

१. अनुशयनेन पूर्वोक्तप्रमेयेन द्वितीयसुबोधिनीसंस्थाप्रसिद्धार्थवासनादिरूपेण।

२. यस्याः कस्याश्चिद् भगवतः आसक्तेः सम्बन्धरूपायाः सत्वाः।

३. दशमस्कन्धसर्वत्रसिद्धवासनावासितार्थे।

४. (परमतीयेन) पोषकेन प्रलयरूपार्थेन (समाधिभाषा)सिद्धपोष्यस्यासक्तिरूपस्यार्थस्य विवक्षितत्वात्।

५. प्रपञ्चस्मरणस्याभावः प्रलयः। ६ शेषमत्र। ७ लभ्यत इतिशेषः। ८. विशेष्ये। ९ विशेषणेन। १०. भूमौ।

१०-१-का० १०. एवं च प्रपञ्चविस्मृतिपूर्विका भगवदासक्तिर्निरोधः। समासेन प्रपञ्चविस्मृतिपूर्वकभगवदासक्तिर्निरोध इति वोपदेवमतं दूषयन्ति स नैमित्तक इति। निमित्तेन निर्वृतः। तेन निर्वृतमिति ठञ्। अन्य इति भरतोक्तत्वात् कामशास्त्रीयः, वेदान्तोक्तादन्यः। व्युत्पत्तिमाहुः धर्मग्लानीति। तथा च तृतीयार्थे वसिल्।

१०-१-का० ११. स एवात्रास्तु प्रसिद्धत्वादित्याशङ्क्य प्रसिद्धेर्दोषत्रयापत्त्यानादरणीयत्वार्थं दोषत्रयमाहुः स चात्रेति। वेदवेदान्तशास्त्रे। (नैव) सद्ग्राह्य इति सद्भिर'स्ति ब्रह्मेति चेद् वेद सन्तमेनं ततो विदु'रिति श्रुत्युक्तैर्न ग्राह्यः, कामशास्त्रीयत्वेन 'असन्नेव स भवति असद् ब्रह्मेति वेद चेत्' इतिश्रुतिविषयत्वेन प्रच्छन्नबौद्धादिभिः ग्राह्यत्वात्। अयमपि 'शक्तिभिर्दुर्विभाव्याभिः प्रपञ्चे क्रीडनं' कृष्णस्य भवत्येवेत्यत आहुः हरिणेति। हरिणा दुष्टभूभुजां कृतोयं निरोधः। कृद्योगे कर्मणि षष्ठी दुष्टभूभुजामिति। अयमर्थः। हरिर्हि परमात्मा महानारायणात्। यथा ब्रह्मणि कामचारे हरिर्भवति। तथा दुष्टभूभुजां प्रलयः बलपार्थभीमव्याजाह्वयेन हरिणा कृतः। 'यास्यन्त्यदर्शनमलं बलपार्थभीमव्याजाह्वयेन हरिणा निलयं तदीय'मिति श्रीभागवतवाक्यात्। तथा च तादृशक्रीडने तत्र कृष्णस्येति लक्षणघटकपदाभावादसम्भवग्रस्तं लक्षणं स्यादिति भावः। उक्तदोषत्रयेऽव्याप्तिरूपं दोषमाहुः आद्यन्तयोरिति। प्रकरणयोरित्यर्थः। आदिप्रकरणम्, आदिः, प्रकरणमिति प्रयोगत्रयात्। एवमन्तशब्दस्य प्रयोगत्रयम्। आद्यन्तयोः प्रलयाभावादव्याप्तिरित्यर्थः। अतिव्याप्तिरूपं दोषमाहुः मुक्तावपीति। ग्रहिलत्वादतयोपोद्घातेनादिप्रकरणे, गुणप्रकरणे तु विवर्तविशेषभगवन्मात्ररूपेणावशेष इतिदुष्टभूभुजां प्रलय इति नाव्याप्तिश्चेन् मुख्यपरिहाराभावेपि तुष्यतु दुर्जनन्यायेनातिव्याप्तिरित्यर्थः।

१०-१-का० १२. तृतीयमसम्भवरूपं दोषमाहुः लक्षणस्येति। स्यान् मुख्यपरिहाराभावेपि लक्षणप्रवेशो यदि मुख्यपक्षो न भवेत्, यो हरिणा दुष्टभूभुजां कृतः स तु वाक्यप्रमाणाद् भवत्यतो भवल्लक्षणस्याप्रवेशः। गौणमुख्यन्यायात्। ततश्चासम्भव इत्यर्थः। तथा लक्षणस्य द्वित्वे प्रकारे लीलाया आधिक्यं द्वित्वं भवेदित्यर्थः। लक्षणत्वं खण्डयित्वा विरोधेन निरोध इतरेभ्यो भिद्यते प्रलयत्वात् प्रलयवदित्यस्य विरुद्धत्वमित्याहुः तदर्थमिति। दुष्टभूभुजां निग्रहार्थम्। पृथास्तोत्रं 'तथा परमहंसानामृषीणाममलात्मनाम्। भक्तियोगवितानार्थ'मिति तस्य विरोध्यतो हेतुः साध्याभावसाधक इति हेतोर्विरुद्धत्वमित्यर्थः। साध्यव्यापकीभूताभावप्रतियोगित्वं विरुद्धत्वम्। साध्यं विमत इतरभेदस्तद्व्यापकीभूताभावः प्रलयत्वात्यन्ताभावः तत्प्रतियोगित्वं प्रलयत्व इति लक्षणसमन्वयः। ननु स्त्रिया 'त्रयी न श्रुतिगोचर'ति तत्स्तुतिरन्यमूलेति तया विरोधे किं स्यादित्ति तदाहितहेतोर्विरुद्ध-

१. व्यसनं दुःखं तदात्मा नैमित्तिको निरोधः। २. 'वह्निविस्तारा मध्ये परमात्मा व्यवस्थितः स ब्रह्मा स शिवः स हरिः सेन्द्रः सोऽक्षरः परमः स्वराट्' इति। ३ व्यसना०।

त्वमप्रयोजकमिति चेन्न। वेदवेदान्तसारे श्रीभागवते कृष्णावैराटीपदयोः सत्त्वात्। कृष्णपदमहिम्ना सर्वज्ञानम्। यतः पृथा पृथ्वीरूपा 'तोयेन जीवान् व्यवसर्ज भूम्या'मिति श्रुतेः भूमिर्भार्या। सा चार्धाङ्गी। 'आत्मनो यदर्धं पत्नी'ति श्रुतेः। हिकारस्तु व्याहृतिरूपत्वात्। अत एव 'भूमिर्दृप्ते'त्यारम्भः। आकाशशरीरं ब्रह्म कृष्णः, सुवस्तु गुणप्रकरणे, 'यदतः परो दिवो ज्योतिर्दीप्यते' इति ज्योतिश्चरणाधिकरणे। 'कृष्णद्युमणिनिम्लोच' इतिवाक्यात्। यद्यपि कुन्तीस्तुतौ 'केचिदाहुरजं जात'मित्यादिश्लोकेषु दैत्यवधादिकमप्यवतारकार्यमुक्तं तथापि पूर्वपक्षत्वेन न तु सिद्धान्तत्वेनेति व्याख्यातं सुबोधिन्याम्।

१०–१–का० १३. प्रलयस्य निरोधत्वे दोषान्तरमाहुः कार्येति। ईशानुकथात्वेन निरोधत्वेन कार्यकारणभावः, निरोधत्वेन मुक्तित्वेन कार्यकारणभावः, मुक्तित्वेन प्रलयत्वेन कार्यकारणभावः, तेषां हानिः। भावप्रधानो निर्देशः। यद्वा नवलक्षणज्ञानमाश्रयज्ञाने कारणं, तथा सति तयोस्तथात्वहानिरित्यर्थः। चकारस्तु प्रलयानन्तरं वस्त्वभावान् मुक्तिः कारणं प्रलयः कार्यं तयोर्हानिरवक्तव्यत्वं अर्थद्वारा हानिर्निरर्थकत्वं चेत्यर्थसङ्ग्राहकः। पाठक्रमत्यागश्चेत्याहुः प्रक्रान्तेति। 'अत्र सर्गो विसर्गश्चे'तिवाक्ये। एवकारेणार्थक्रमादि व्यवच्छिद्यते। अप्रसिद्धेः। चकारेण पुराणविरोधः सङ्गृह्यते। प्रतीयमानः क्वाचित्कोपि प्रलयो भक्तदुःखाभावो न तु प्रसिद्धोतो ह्युपक्रमोपि 'भूमिर्दृप्तनृपे'त्येवंविधोप्यर्थनिर्णायकोपि न तत्पर इत्याहुः भक्तत्वादिति। तथा च भारहारत्वेन भक्तत्वेन कार्यकारणभावः न तु भूमित्वेन भारहारत्वेन। तेन भूमिः कृष्णावतारबीजमित्यंशतो भूमित्वेनावतारत्वेन कार्यकारणभावः। 'एतन् नानावताराणां निधानं बीजमव्यय'मितिवाक्यात्।

१०–१–का० १४. नन्वन्तर्यामिब्राह्मणे 'यः पृथिव्यां तिष्ठ'न्नित्यादिषु भुवो दुःखहरणं प्रसिद्धं कुतोयं समुद्यम इत्यत आहुः प्रकट इति। सत्यमस्ति दुःखहर्ता, परन्त्वन्तरो, न प्रकटः, अन्तर्यामिब्राह्मणोक्तश्चातो रुद्रोपि सम्भाव्येत 'सोन्तरादन्तरं प्राविश'दितिश्रुतेः। अतः प्रकटो विवक्षितः। सोपि परमानन्दः परमश्चासौ आनन्दः,परो मीयते ज्ञायतेऽनेन वीर्येण स परमः अर्शआद्यच् वीर्यवान् पृथिव्या भार्यात्वात्। एतादृश आनन्दोऽलौकिकः भक्तभार्यामनोरथः। गोचारणसम्बन्ध्यपि। तदा भूमेर्मर्दनक्लेशहानिः स्यात्। अन्तर्यामी न प्रसिद्ध इति भाष्यादेवकारोन्तर्यामिव्यवच्छेदकः। अनुभवाद्धीति जन्मत्वेन भारापनयनत्वेन कार्यकारणभावः। 'दिष्ट्या हरेस्या भवतः पदो भुवो भारोपनीतस्तव जन्मनेशितु'रित्यत्र द्वितीयेध्याये वक्ष्यते। प्रकटपरमानन्दत्वेन मर्दनक्लेशहानित्वेन कार्यकारणभावात् इतिशब्दः, इति हेतोः तस्याः समुद्यमः 'गौर्भूत्वो'द्यमः। तदुक्तं महानारायणे 'भूमिर्धेनुर्धरिणी लोकधारिणी'ति। किञ्च 'ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यह'-

१. श्रीभागवते द्वादशस्कन्धे सर्ववेदान्तसारं श्रीभागवतमुक्तं तथापि श्रीभागवतमाहात्म्ये इदम्। २ कालहृतः।

'मिति वाक्याद् धर्मरूपवृषभोपि वेदवेदान्तसारत्वान् मूलस्य। 'ऋषभ ते वयं रक्षिता मुहु'रितिफलप्रकरणे श्रुतिवाक्यम्। ववर्णलोपः। तथा चोक्तं सुबोधिन्यां द्वितीयस्य सप्तमाध्याये 'भूमेः सुरेतरवरूथविमर्दिताया' इतिश्लोकविवरणे मर्दनक्लेशाभावार्थं साक्षादानन्दमय इति।

१०–१–का० १५. अत एवेति तादृशार्त्यभावेन तादृशभक्तत्वाभावादेव। तेन 'ॐ मित्येकाक्षरं ब्रह्मे'त्यत्र गायत्र्याद्यावाहनं समर्थितम्। अन्यसंश्रय इति भक्तेष्वेवाविश्य सेवितवन्त इत्यर्थः।'निरोधोस्यानुशयन'मित्यत्रानुशब्दार्थेनिरूपकानुक्तेर्लक्षणे न्यूनतारूपनिग्रहस्थानं वारयन्ति स भक्तानामिति। पूर्वस्कन्धार्थसङ्गत्या निरूपकलाभात् तदुक्त्यभावेपि न न्यूनतेत्यर्थः। अनन्यलभ्यस्य शब्दार्थत्वात्। 'भक्त्याहमेकया ग्राह्य' इतिवाक्यादेवकारः।

१०–१–का० १६–१७. अत इति भक्त्येकग्राह्यत्वात्। पूर्वस्कन्धार्थप्रसङ्गेनावधिं सम्बन्धसामान्येनाहुः प्रपञ्चस्येति। सम्बन्धसामान्यविवक्षायां षष्ठी। शाब्दबोधविशेषो विवक्षया प्रयोजनम्। अम्बरीषस्यापि भक्तान्तःपातित्वेन सर्वात्मभावे प्रतियोगित्वेन प्रवेशात् प्रपञ्चस्य। तथा च श्रुतिः 'यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद् विजानाति स भूमे'ति। 'अन्यद्'भेदप्रतियोगिप्रपञ्चः। सामान्ये नपुंसकम्। प्रत्येकं प्रपञ्चगतपदार्थानां त्रिलिङ्गत्वात्। इति निश्चयेन विचार्यत इत्युक्तविचारत्वेन कार्यकारणभावः। युक्त्यन्तरोपस्थितावप्यत्र युक्तिसत्त्वात्। 'युक्तयः सन्ति सर्वत्रे'ति वाक्यात्। युक्तिपूर्वकपरमार्थपराणां विश्वस्तानां भक्तानां वा निश्चयः। एवं हेतुं व्यस्योद्यमव्यासाय दृष्टान्तमाहुः यावद् बहिरिति। अस्तु चान्तर्यामिब्राह्मणानुरोधस्तथापि प्रकटश्चेन्न भवेत् तदा दृष्टान्तविरोध इति प्रकट आवश्यक इति भावः।

१०–१–का० १८. सर्वमिति अविद्याकार्यम्। अयमर्थः। ईशानुकथाया विद्याजननद्वाराऽविद्यानाशकत्वे विद्ययाऽविद्योपमर्दः। विद्याविद्ययोरुपमर्द्योपमर्दकभावबोधकनिबन्धात्। अष्टमोदितसद्धर्मैर्वासनादाहे भगवति शुद्धायां वासनायां स्वतो जातायां भक्तिः कर्तव्येति नवमे स्कन्धे ईशानुकथारूपा भक्तिर्निरूपिता। भक्तिः सेवा सा चाधिदैविकी निरोधः। जन्मानन्तरं निरोधः कर्तव्य इति दशमे निरोधः। स चाविद्यानुपमर्दः। भजनेनैव तादृश इति निबन्धात्। तत एकादशे मुक्तिरिति। न लीयत इति संसारस्याविद्याकार्यत्वादाधिदैविकसेवारूपविद्यानाश्यत्वम्। तदुक्तं निरोधलक्षणग्रन्थे 'सच्चिदानन्दता स्वत' इति,'तदध्यासोपि सिद्ध्यती'ति च,'नातः परतरो मन्त्रो नातः परतरः स्तवः। नातः परतरा विद्या तीर्थं नातः परात् परम्' इति। कृष्णसमुद्यम इति अन्याकार्यभक्तियोगवितानार्थं मूलरूपस्य सर्वथा संसारलयफलकनिरोधार्थं जन्मप्रकरणोक्तजन्मकृतिः समुद्यमः। तथा च 'स मे सर्वथे'त्याद्युक्तो य उद्यमः जन्मेत्याद्युक्तः इति ज्ञेयम्। वसुदेववरदानमानुषङ्गिकम्।

१. सप्तमस्कन्धार्थः। २. गर्भसम्बन्धरहित।

नन्दादिभक्तिर्निरोधः। शक्तीः शाययित्वा तदनुकूलतया स्थितिर्जन्मप्रकरणेऽस्त्येव। भगवदासक्तिकरौ हेतूद्यमौ निरूप्य प्रपञ्चाभावकरौ कापट्यस्वीकारौ ह्युद्धारकारणे इत्याहुः रूपान्तरं त्विति। तुशब्द उद्धारं प्रति हेतूद्यमौ अन्यथासिद्धौ भगवदासक्तिमात्रसाधकावित्याह। रूपान्तरस्वीकरणत्वेनोद्धारत्वेन कार्यकारणभावः। एतेनैव कापट्यस्याप्यङ्गता व्याख्याता सामान्यन्यायादेव बोध्या। यतो मुख्यमायाप्राकट्यं तृतीयाध्याये, चतुर्थे तु तत्कार्यमिति सुबोधिन्याम्, कापट्यानुक्तिरध्यायार्थमात्रत्वात्। चतुर्थाध्याये देवक्या उपगूहनरोदनमोचनैरन्यकन्यात्वगोपनं कापट्यम्। त्रिविधानिति त्रिभिः प्रकरणैस्तामसादीन् भक्तान्।

१०–१–का० १९. रूपान्तरस्वीकरणं कारणं प्रपञ्चाभावकरणं व्यापारः उज्जहारेत्युद्धारः कार्यम्। रूपान्तरं न तादृशोद्धारे कारणमैश्वर्येणान्यथाप्युद्धारसम्भवेन व्यभिचारसम्भवात्। स्वीकृते तु रूपान्तरं कारणमानन्दमयत्वात्। 'तमेव विदित्वा अतिमृत्युमेती'तिश्रुतेः तद्विषयकज्ञानस्य भक्तेर्वा कारणत्वात्। ऐश्वर्येणान्यथाप्युद्धारसम्भवो नास्ति। टीकान्तरेऽनङ्गीकारात्। भक्तमनोरथाविषयत्वात्। 'शिलतृणाङ्कुरैः सीदतीति नः कलिलतां मनःकान्त गच्छती'ति वाक्यात्। प्रपञ्चाभावकरणं प्रपञ्चत्वाभावेन प्रपञ्चाभावः विशेषणाभावप्रयुक्तो विशिष्टाभावः, ब्रह्मत्वेन तु ज्ञानं तु प्रपञ्चस्यास्त्येव, 'तमादेशमप्राक्षो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञात'मित्येकविज्ञानेन सर्वविज्ञाने पृष्टे तदुत्तरात्। विद्वन्मण्डने 'अपि वा तमादेशमप्राक्ष'मित्यादिना। तथा च रूपान्तरज्ञानेन प्रपञ्चभिदापमार्जनम्। भिदायाः मायामात्रत्वात्। गीतायामप्युक्तम्। निश्चय इति 'श्रद्धत्स्व सौम्येति' श्रुतेर्निश्चयोऽन्यैरप्यनुसन्धेय इत्यर्थः, 'अविश्वासो न कर्तव्यः सर्वथा बाधकस्तु सः' इति वाक्यात्। अत्र प्रपञ्चत्वावच्छिन्नप्रतियोगिकाभावोऽत्यन्ताभावः। दशमार्थं विचार्य प्रकरणार्थं विचारयन्ति सोद्देशपूर्वकं पञ्च प्रकरणानीति। चतुर्भिरध्यायैः। सत्पतेरिति असतां तु 'देवक्यां विष्णुरूपिण्यां विष्णुः सर्वगुहाशयः' इतिवाक्येन 'कृष्णस्तु भगवान् स्वय'मितिवाक्यं विरुध्येत, 'विष्णुर्व्यापकः पुरुषोत्तमो यो वेदान्ते ब्रह्मशब्देनोच्यत' इतिसुबोधिनी च विरुध्येत। सत्पतित्वे तु ह्यधोक्षजे सत्ताश्रये 'विष्णुराविरासी'दित्युक्ते पुरुषोत्तमोऽप्याविरासीदिति शक्यते, अधोक्षजविष्णुसमानयोगक्षेमत्वेन पुराणप्रसिद्धेः। अत एव 'विष्णुः सर्वगुहाशय' इत्यस्य सुबोधिन्यां 'अनेन सर्वेषां भजनार्थ'मित्यादिचत्वारोऽर्थाः सर्वत्र प्रतिपाद्यन्ते।

१०–१–का० २०. ते च प्रत्येकं सप्तविधा इत्याहुः अष्टाविंशतिभिरिति। एवं

१. =प्रपञ्चत्व०। २. असत्त्वमजकृष्णजन्मानङ्गीकर्तृत्वेनाप्रहवादित्वम्। ३. समत्वान विरुध्येतेत्यन्वयः, विष्णुकृष्णपदयो सामानाधिकरण्यात्। ४. सत्त्व तु उपबृंहणेनाजकृष्णजन्मवादित्वम्। ५. विष्णुकृष्णपदयोरसामानाधिकरण्येनाह अधोक्षज इत्यादि।

क्रमेण तृतीयमुण्डकोक्तं 'पुरुषान् न परं किञ्चित् सा काष्ठा सा परा गति'रित्युक्तपुरुषोत्तम-प्राकट्यमुक्तम्। ततः प्रश्नोक्तं षोडशकलं परब्रह्म वसुदेवसम्बन्धि द्वितीयेऽध्याये, एवमुपनिषद्द्वयोक्तं जन्मप्रकरणे समाप्तम्। तृतीयं ब्रह्मविद्योपनिषदुक्तमाहुः पूर्वं तामसत्वादिति। ननु 'यत्रोत्पत्तिं लयं चैव ब्रह्मविष्णुमहेश्वरा'दिति ब्रह्मविद्योपनिषच्छ्रुत्या पूर्वं राजसत्वादिति वक्तव्यमिति चेन्न। ब्रह्मणो राजसत्वेऽप्यथर्वशिरसि 'अक्षरात् सञ्जायते कालः कालाद् व्यापक उच्यते व्यापको हि भगवान् रुद्रो भोगायमानो यदा शेते रुद्रस्तदा संहार्यते प्रजा' इति श्रुतेः रोदनाच्च महेश्वरत्वमेव प्रथमम्। 'सोरोदीद् यदरोदीत् तद् रुद्रस्य रुद्रत्व'मिति श्रुतेः। युक्तं चैतत्। जन्मानन्तरं यो रुद्रप्रवेशः। तथा च हेयत्वापत्तिः। अत्रोच्यते। 'हेयत्वावचनाच्चे'ति व्याससूत्रात्। 'सत्त्वं रजस्तम इति निर्गुणस्य गुणास्त्रयः स्थितिसर्गनिरोधेषु गृहीता मायया विभो'रित्यत्र निर्गुणसम्बन्धिगुणाः। माययेति पुराणमतं निबन्धात्। इच्छयेति श्रौतं,'स ईक्षांचक्रे' इतिश्रुतेः। तेन योगमाया। पुराणे 'न यत्र माये'ति निषेधात्,'प्रवर्तते यत्र रजस्तमस्तयोः सत्त्वं च मिश्रं न च कालविक्रम' इत्यपि व्याख्यातम्। कारणगुणाः कार्यगुणानारभन्त इति निर्गुणे प्राकृतगुणभिन्नप्राकृतगुणसदृशगुणानामङ्गीकारात्। तथा श्रीभगवानुवाच 'परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम्। यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः। सर्गेऽपि नोपजायन्ते प्रलये नोपव्यथन्ति च। मम योनिर्महद् ब्रह्म तस्मिन् गर्भं दधाम्यहम्। सम्भवः सर्वभूतानां ततो भवति भारत। सर्वयोनिषु कौन्तेय मूर्तयः सम्भवन्ति याः। तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता। सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः निबध्नन्ति महाबाहो देहे देहिनमव्ययम्' इति। देहिनं निबध्नन्ति न माम्। 'न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहे'तिवाक्याज् ज्ञानानन्दमयत्वाच्च। अग्रे उपयोगाय तमःकार्याण्युच्यन्ते। 'तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनां प्रमादालस्य-निद्राभिस्तन्निबध्नाति भारते'ति। 'ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युते'ति तथा। 'अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च तमस्येतानि जायन्ते विवृद्धे कुरुनन्दने'ति। 'तथा प्रलीनस्तमसि मूढयोनिषु जायते' इति। 'अज्ञानं तमसः फल'मिति। तथा 'जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः', 'नान्यं गुणेभ्यः कर्तारं यदा द्रष्टानुपश्यति गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छती'ति। 'परं' गुणकर्तृत्वांशिनं कारणं सगुणम्। उद्धृतिरूपा क्रीडा साधारणीत्याहुः व्रजोद्धृतिरिति। 'व्रजे स बालको भूत्वा क्रीडते पुरुषोत्तम' इति श्रुतेः। ननु 'ह्यधो गच्छन्ति तामसा' इति कुत उद्धृतिरिति चेन्न। ताम्यतीति तमः। तमु ग्लानौ। सर्वधातुभ्योऽसुन्, तम आकाङ्क्षायां वा। 'स्तनार्थी चरणावुदक्षिप'दितिवाक्यात्। स्वार्थेण। प्रपञ्चे ग्लानादेर्हेतोः प्रभस्य स्वनिष्ठस्य स्वासक्तिसम्पादनायो र्ध्वगमनसाधनकर्माणि कृतवान् कारितवांश्च। 'एष उ एव साधु कर्म कारयति यमुन्निनीषती'ति श्रुतेः। तथा च स्वाद्

सगुणत्वं यदि निरोधो न स्यात्, स तु वर्तते इति निर्गुणत्वम्। 'मन्निष्ठो निर्गुणः स्मृत' इति वाक्यात्। तथा चोद्धृतिप्रतिबन्धकतामगत्वेपि निर्गुणत्वस्योत्तेजकस्य सत्त्वात् नाधोगतिरपि तूर्ध्वगतिरेव। 'लोके विकुण्ठमुपनेष्यति गोकुलं स्व'मितिवाक्यात्। तामसत्वमुक्तधर्मैरुन्नेयम्। यथा मातुर्भगिन्याः पूतनाया मारणम्। प्रमादः। नन्वज्ञानासम्भवात् प्रमादादिकं कुत इति चेन्न। 'विद्याविद्ये मम तनू' इति वाक्यात् तनुरूपधर्मारोपात्। ननु जन्मप्रकरणे चतुर्व्यूहजन्मकथनात् त्रयाणामुपयोगस्य स्पष्टत्वेपि प्रद्युम्नव्यूहजन्मप्रयोजनमस्फुटमिति चेत् तत्राहुः तथैवेति। 'तत्रांशेनावतीर्णस्ये'त्यत्र 'अंशेन'प्रद्युम्नांशेनेति केचिदित्युक्त्या निरोधकर्तृत्वेन प्रकारेण। एवकारोन्यप्रकारो निरोधं निरुणद्धीति अन्यप्रकारं व्यवच्छिनत्ति। राजसानां भक्तानाम्। सम्बद्धानां यदूनां वसुदेवादीनां पूर्वचकारेण प्रासङ्गिकीनाम्। विशेषत इति सम्बन्धात्। निजैश्वर्यबलादेवान्तरानन्ददायकसर्ववेदार्थज्ञानदानादिरूपो विशेषः तस्मात्। द्व्यशीतितमेध्याये स्पष्टम्। तदुक्तं 'गुणातीतं स्वरूपेणे'त्यादिना राजसप्रकरणारम्भे।

१.०–१ का० २१. सात्त्विकानिति वसुदेवनृगादीन्। सात्त्विकानां न प्रमाणापेक्षेत्येकविंशत्या सप्ताध्यायाभावात्। निःप्रपञ्चान् मुक्तान्। निष्क्रान्ताः प्रपञ्चत्वात्। 'निरादयः क्रान्ताद्यर्थे पञ्चम्याः' इतिसूत्रेण समासः। ननु प्रपञ्चत्वाद् येन केनापि प्रकारेण प्रपञ्चान् निष्क्रान्ताः न तु वसुदेवनृगादिवचेति चेन्न। वसुदेवनृगादीनामपि प्रपञ्चत्वेन निष्क्रमणात्। तथा च प्रपञ्चत्वप्रविलापनेन ब्रह्मत्वात् प्रपञ्चस्य ब्रह्मत्वेन ज्ञानात् सात्त्विकज्ञानयुक्तानित्यर्थः। 'ततः संसारदुःखस्य निवृत्तिर्ब्रह्मबोधन'मितिवाक्यात् तदुक्तं 'सात्त्विकी त्वधुनोच्यते' 'वसुदेवमखावधि' इति च। उत्तरार्धे पञ्चदशे नृगमोक्षो निरूप्यत इति। हेति प्रसिद्धम्। 'तत्तत् सात्त्विकमेवैषां यद्यद् वृद्धाः प्रचक्षते। निन्दन्ति तामसं यद्यत् (तत्तत्) राजसं तदुपेक्षित'मिति। ननु गुणप्रकरणेभ्यः सगुणः कुतो न स्याच् चतुर्थचरणरूपत्वाचेति चेत् तत्राहुः भगवानेवेति। उपपादितत्वादेवकारः'ब्रह्मेति परमात्मेति भगवानिति शब्द्यत' इतिवाक्यात्।

१.०–१.–का० २२. प्रकरणार्थस्य निरूपितत्वादध्यायार्थानाहुः चतुर्मूर्तेरिति। मूर्तिशब्दात् कात्यायन्यपि 'आत्ममायामृते राजन् परस्यानुभवात्मनः न घटेतार्थसम्बन्धः स्वप्नद्रष्टुरिवाञ्जसे'ति द्वितीयनवमाध्यायवाक्यात्। 'आत्मैवेदमग्र आसीत् पुरुषविध' इत्यत्र 'स पतिश्च पत्नी चाभवताम्' इत्यात्मनो द्विरूपत्वोक्तेः। स्त्रीप्रत्ययात्। धर्मार्थकाममोक्षाः। धर्मो यज्ञः क्रिया। जगदर्थः 'स्त्रीप्रायमितरत् सर्व'मिति वाक्यात् स्त्रीप्रायम्। कामो लक्ष्मीः। मोक्षः सन्त इति ब्रह्मास्तित्वज्ञानवन्त इतिस्त्रीप्रायाः। तथेति चतुर्ष्वेन।: 'चतुष्पाद् ब्रह्म विभाती'ति श्रुतेः। तत्र धर्मः सत्तारूपो देवकीस्तुतौ 'सत्तामात्रं निर्विशेष'मित्यत्र। 'सत्तामात्रं' वेदटीकायां श्रीयमुनाजित्। धर्मः क्रिया, राधिका 'क्रिया सा राधिका'

देवी'ति क्वाचित्कवाक्यात्। ब्रह्मवैवर्ते तस्या उपयोगः। किञ्च युधिष्ठिरयागान्तर्गताग्र्यार्हणीयत्वेन धर्मरूपप्राकट्ये उपयोगः। जगत् जृम्भालीलायाम् ।'सा तत्र ददृशे विश्व'मितिवाक्यात्। लक्ष्म्याः कामरूपायाः फलप्रकरणे 'ता लक्ष्मीरूपाः कृत्वे'त्यत्र । सतां तु स्वरूपनिवेशोपयोगः, 'तस्माद् ब्रह्मऋषीनेतान् ब्रह्मन् मच्छ्रद्धयार्चय एवं चेदर्चितोस्म्यद्धा नान्यथा भूरिभूतिभि'रितिवाक्ये ब्रह्मर्षिषु साक्षाच्च'मद्धा'शब्दार्थः तस्य बाधात्। किञ्च मच्छ्रद्धया मम श्रत् सत्यं दधातीति श्रद्धा तयेति। एवं चेदर्चितोसीति च। अन्यथर्षीणामर्चने कृते 'एवं चेन्नार्चितोसी'त्येव ब्रूयात्। चतुर्मूर्तिप्राकट्यस्य किं प्रयोजनमत आहुः तत्तदिति। यथा भक्तदुःखरूपहेतुर्हेतुत्वेन वासुदेवाविर्भावे उपयुक्तः, तथा कृष्णोद्यमः सङ्कर्षणाविर्भावे उपयुक्तः। प्रद्युम्नाविर्भावे स्वीकरणमुपयुक्तम्। कापट्यं तु ह्यनिरुद्धाविर्भावे। वसुदेवहृदि वासुदेवश्चतुर्धा हेतुनिवारणसामर्थ्यरूपो वासुदेवः। तेन 'पुरुषोत्तमस्तु नन्दगृह एव मायया सह जात' इत्यस्या न विरोधः। चतुर्धोद्यमनिरूपणम्। यद्यपि 'मलम्बबकचाणूरे'त्यारभ्य कंसोद्यमः तथापि सहेतुकोद्यमः। हेतावपि कंसीये नित्यलीलास्थकलौ ह्युद्यमः भगवदीयः, 'कर्ता शास्त्रार्थवत्त्वा'दित्यनेन जीवेषु कर्तृत्वमुक्त्वा 'परात्तु तच्छ्रुते'रितिभगवदीयकर्तृत्वोक्तेरुद्यमो भगवदीयो वा। एष मग्रेपि। गर्भसङ्कर्षणाद् देवक्यां रोहिण्यां गर्भस्थापनेन वसुदेवेपि सङ्कर्षणः स्थापितः 'आत्मनो यदर्धं पत्नी'ति श्रुतेः। वसुदेवगृहे व्यूहत्रयप्राकट्यस्य वक्ष्यमाणत्वात्। एवं तृतीयेध्याये जायमाने 'विष्णुराविरासी'दितिवचनव्यक्तस्तत्र सतिसप्तम्याः सामानाधिकरण्यार्थकत्वेन जायमानप्रद्युम्नसमानाधिकरणो विष्णुरिति भवति प्रत्ययः। स च 'देवक्यां विष्णुरूपिण्या'मतो हि प्रद्युम्नोपि देवक्यां ततो वसुदेवे आत्मनोऽर्धत्वात्। अतश्चतुर्भुजत्वादिस्वीकारे प्रद्युम्नत्वम्। हृद्येव, ततो बहिराविर्भावः। चतुर्थे सर्वविमोचकेऽनिरुद्धत्वं तु कापट्ये सति। 'यदा यदा हि धर्मस्ये'ति वाक्यात्। एकादशस्कन्धेऽमाययेत्यस्याकापट्येनेत्यर्थात्। 'धर्मः प्रोज्झितकैतवोत्रे'ति च। पूर्ववत् सतिसप्तम्या देवक्या उपगूहनरोदनमोचनरूपकापट्यं देवक्यां सुभद्रारूपम्। तत्रानिरुद्ध उचितः धर्मरूपत्वात्। पूर्ववद् वसुदेवेपि। ननु कापट्यं न देवक्यां किन्तूपगूहनार्हमन्यत्र धर्मरूपानिरुद्धस्तु हृदये इति वैयधिकरण्यमिति चेदत एव सुबोधिन्यां नोक्तमस्तीत्यवधेहि।

१०-१-का० २३. हेतूद्यमेति हेतूद्यमादयस्तु वासुदेवाद्यध्यायार्थं उपयुक्ताः सन्तः समुदिताः प्रकरणार्थाः। 'समुदायो जन्मवाची'ति निबन्धात्। प्रथम इति प्रथमो जन्मप्रकरणार्थः। महान् भगवत्सम्बन्धात्। दशमस्कन्धभरणप्रयोजकत्वं वा महत्त्वम्। 'यस्मिन्न मे पावनमङ्ग जन्मे'ति वाक्यात्। उक्तचतुर्मूर्तीराहुः प्रद्युम्नश्चेति। अत्र निबन्धानुसाराद् 'क्रमो बहुष्वनियम'इति सूत्रेण विग्रहवाक्येपि न विवक्षितः। प्रद्युम्नश्चानिरुद्धश्च वासुदेवश्च सङ्कर्षणश्चेति विग्रहवाक्यम्। तथा चकारान्वितत्वेनापरः सङ्कर्षणश्चेत्यर्थात्। अत्र निबन्धः

'सम्मुदायो जन्मवाची क्रीडायुक्तस्य वै हरे'रिति। तेन प्रद्युम्नादयोऽध्यायार्थाः हेत्वादीनां 'सम्मुदायो जन्मवाची' सङ्ख्यातात्पर्येपि तात्पर्यवान्।

१०–१–का० २४. ननु भक्तदुःखं हेतुत्वेन अध्यायार्थ उक्तः स नोपपद्यते नवमस्कन्धोक्तभक्तानां विद्यावत्त्वेनाज्ञानासम्भवादिति चेत् तत्राहुः हेतुश्चेति। सत्यमज्ञानासम्भवस्तथापि यदि भक्ता एकविधा भवेयुः, भक्तास्तु यावन्तो जले भेदास्तावन्तः जलभेदग्रन्थे प्रसिद्धाः। एवं च स स्यात् पूर्णभगवदीयानां शेषव्यासाग्निमारुतानां, अन्येषां तु स्वादविद्यया विद्योपमर्दः, कृष्णावतारे सुतरां,तदुक्तं 'विद्याविद्ये मम तनू विद्ध्युद्धव शरीरिणाम्। बन्धमोक्षकरी आद्ये मायया मे विनिर्मिते' इतिवाक्यात्। तत्रान्यस्मात् निवर्त्य स्वस्मिन्निरोधे तु नाविद्योपमर्दः।'भजनेनैव तादृश' इतिवाक्यात्। एवं चाविद्यया विद्योपमर्दात् निरोधसेवाकारणं युक्तमविद्योपमर्दाय इति। अत्राध्याये हेतुर्भक्तदुःखं त्रिविधः आधिदैविकादिभेदात्। चकारोऽनुक्तानुद्यमादीन् समुच्चिनोति। तेपि त्रिविधाः। हीति 'अथाध्यात्ममथाधिभौतमथाधिदैव'मितिश्रुतेः। ननु भाष्ये साङ्ख्यगुणा नोपबृंहका वेदार्थ इत्युपपादनाद् भक्तत्वभञ्जका गुणाः क उपमर्द्या इति चेत् तत्राहुः गुणा इति। सत्त्वादयो न तु विशुद्धसत्त्वमपि।'प्रवर्तते यत्र रज' इतिश्लोके द्वितीयस्कन्धनवमाध्यायस्य तस्याभ्यनुज्ञानात्। ते च भक्तौ सगुणत्वापादकत्वेन प्रपञ्चवत्स्मरणविषयाः, तदभावोपि प्रपञ्चविस्मृतिपूर्वकभगवदासक्तौ विशेषणविधयोपयुज्यते तदाहुः भक्ताहितप्रदा इति। अहितं भक्तिसगुणत्वसम्पादकम्। अधुना पूर्वाध्याय एवाहुः कंसादेरिति। कंसादेराधिदैविकत्वेनाधिदैविकदुःखदातृत्वं कंसकलित्वस्य कृष्णोपनिषत्स्थत्वेन नित्यक्रीडास्थत्वात्। कालतो दुःखमाध्यात्मिकम्। जन्यमात्रस्य कालोपाधित्वेन कालाध्यात्मिकजन्यत्वात् अज्ञानादाधिभौतिकं स्पष्टम्। अज्ञानं गीतायां स्फुटम्। ज्ञानसम्पदतिरिक्ता सम्पत्। तुरध्यायत्रयार्थव्यवच्छेदकः। तद्गतं भक्तगतम्।

१०–१–का० २८. सुखव्यवच्छेदकस्य तोः प्रयोगस्य प्रयोजनमाहुः भूमिरिति। भूमेः कालतः। मातुः कंसादेः। तथा चैवं च। अन्य इत्यादिः 'सत्पीडाव्यग्रलोके'[1]ति-वाक्यात्। यथायोग्यं सात्त्विकत्वादिरूपं योग्यमनतिक्रम्य। भूमौ सात्त्विकत्वं, मातरि राजसत्त्वं, 'तामात्तयष्टि'रितिवाक्यात्, अन्येषु तामसत्वं 'दुर्भगो बत लोकोय'मितिवाक्यात्। अज्ञानाद् भगवत्त्वेन यज्ज्ञानं तस्यावरणमत्र निरूपितमिति। अत्रैवेति प्रथमाध्याय एव। अन्यत्र न। यद्वा। अत्र लोके। तेनाधिभौतिकं दुःखम्। एवकारेण विकुण्ठो व्यवच्छिद्यते। 'अहन्यापृत'मितिवाक्यात्। निरूप्यत इति परपक्षनिराकरणपूर्वकस्वपक्षस्थापनं क्रियते। प्रलयनिराकरणाद्यग्रेपि द्रष्टव्यम्।

१. 'स्मृत्यनवकाश'सूत्रे।

१०–१–का० २६. त्रयमिति दुःखत्रयम्। ईर्यत इति प्रथमाध्याय ईर्यते उच्यते। प्रेर्यते प्रेरकवचनं क्रियते। एतेन त्रयाणां भगवन्नाश्यत्वेन तन्नाशकत्वरूपहेतुतावच्छेदकमेकमिति हेत्वननुगमोपि परिहृतः। नवमस्कन्धोक्तभक्तित्वेन मुक्तित्वेन कार्यकारणभावे विशेषोनेन स्कन्धेन ज्ञाप्यत इत्याहुः प्रश्नोप्यत्रेति। अत्र प्रथमेऽध्याये, प्रकरणत्रयादधिकः प्रश्नः स्कन्धद्वितयवर्तनः प्रोक्तः। तथा च यथा पञ्च प्रकरणान्यत्रेत्युक्त्वा प्रकरणत्रयमधिकं प्रोक्तं तथा प्रश्नोप्यत्राधिकः प्रोक्तः इत्यर्थः। आधिक्यं स्कन्धद्वितयवर्तनत्वं, तथा चोक्तं 'देहं मानुषमाश्रित्य कति वर्षाणि वृष्णिभि'रिति प्रश्न एकादशस्कन्धीयप्रमेयविषयकः। अन्ये प्रश्ना दशमार्थविषयकाः। तथा च प्रथमाध्याये चत्वारि प्रकरणानि। प्रश्नप्रकरणम्। भूमिप्रकरणम्। मातृप्रकरणम्। अन्यप्रकरण चेति। तदुक्तं निबन्धे 'प्रश्नेन सहिताः पूर्वे चतस्रः प्रक्रिया मताः' इति। सुबोधिन्यां च 'तत्र दशभिः श्लोकैर्भूमिसान्त्वनं वाचा, उपायेन देवक्याः पञ्चत्रिंशद्भिः, ततोष्टभिः सर्वेषा'मिति। तथा च भक्तित्वेन मुक्तित्वेनाधिदैविकनिरोधरूपभक्तित्वेनालौकिकसामर्थ्यभगवत्सेवोपयोगिदेहत्वेन विशेषकार्यकारणभाव इति।

१०–१–का० २७.इमं गुप्तार्थमूलमाहेत्याहुः अनुवाद इति। प्रश्ने प्रश्नप्रकरणेनुवादः, सार्धेन, 'कथितो वंशविस्तार' इतिश्लोकेन, नवमस्कन्धोक्तचरित्रानुवादः, स्तुतिः 'निवृत्ततर्षै'रितिश्लोकेन चरित्रस्तुतिः। एतौ स्तुत्यनुवादावुभौ भक्तत्वज्ञापकौ श्रोतुः। पूर्वोक्तानुसन्धानेनानुवादसामर्थ्यं भक्तस्यैवेतिभावः। 'इदं ते नातपस्काये'तिवाक्यादाहुः अन्यथेति। भक्तत्वाभावे। भक्तिर्गुप्तार्थो निरोधोतिगुप्तार्थोनधिकारात्। हिकारस्तु कृत्स्नभावात्तु गृहिणोपसंहारः। श्रीशुकः सभगवान्।

१०–१–का० २८. 'पितामहा मे' इत्यादितात्पर्यमाहुः अज्ञानमिति। 'पितामहा म' इति द्वाभ्यां दृष्टश्रुतमाहात्म्यप्रतिपादनेन देवत्वविशिष्टाज्ञानं निवार्यते। 'वीर्याणि तस्ये'त्यनेनान्यथाज्ञानं मनुष्यत्वेन ज्ञानं तत् पुरुषोत्तमस्य मायावरणेन 'मायामनुष्यत्व'मिति ज्ञानेन वार्यते इति। विशेषेण निवारणं तु दृष्टत्वात्। कृष्णगमिति कृष्णविषयकमन्यथाज्ञानं कृष्णविशेष्यकमज्ञानम्। विषयतासम्बन्धेन ज्ञानं तदभाववान् कृष्ण इति यथा घटवद्भूतलं संयोगेन घटाभाववद्भूतलं विशेषणविशेष्यतारूपसम्बन्धेनेति। पञ्चश्लोकी त्वग्रे सन्दिग्धयुक्तिविरुद्धप्रश्ननिरूपिका 'रोहिण्यास्तनय' इत्यादिका।

१०–१–का० २८½. एवं द्वादशभिः प्रश्नाः। 'नैषे'ति श्लोकोऽकथने बाधकनिरूपकस्तत्कथनाभिप्रायमाहुः प्राणनत्वमिति। ननु कथा शब्दरूपा प्राणनत्वमपां धर्म इति कथायाः प्राणनत्वं कथमिति चेदित्थम्। कृष्णस्य चन्द्रसूर्यात्मकत्वोक्तेरपां पुष्पत्वा दप्रूपत्वेन चन्द्रसूर्ययोश्चान्तर्यामिब्राह्मणोक्तरीत्या शरीरत्वेन शरीरस्याप्रूपत्वेन च तत्प्रति-

पादककथाया अपि प्राणनत्वं परम्परया। न चैवं घट इत्युक्ते मुखपाटनपूरणाद्यापत्तिरिति वाच्यम्। प्रस्थानरत्नाकरेस्य विचारात्। दोष इति न चाकाशशरीरं ब्रह्म न चन्द्रसूर्यशरीरं तयोर्नेन्नत्वादिति वाच्यम्। चन्द्रवंशीयत्वात् प्रकृते। 'यदेकमव्यक्तमनन्तरूप'मिति श्रुतेः। 'ध्येयः सदा सवितृमण्डलमध्यवर्ती नारायणः सरसि पङ्कजसन्निविष्टः केयूरवान् मकरकुण्डलवान् किरीटी हारी हिरण्मयवपुर्धृतशङ्खचक्रः' इतिश्रुतेः। चकारोऽनुक्तसार्थस्य समुच्चायकः। अतो न प्राणनत्वधर्मविरोधः। नन्वस्त्वेवं परं त्वत्र कस्मै प्रयोजनायेत्याकाङ्क्षायामाहुः दयेति। दया कृपा ज्ञानकारणम्। कृपात्वेन ज्ञानत्वेन कार्यकारणभावः 'इति भारतमाख्यानं कृपया मुनिना कृत'मित्यत्र सिद्धः। कृपायां जातायां श्रीमद्भागवतज्ञानं दृष्टं सिध्यति।'ज्ञानमात्रं परं ब्रह्मे'ति। ततश्च 'वैयासकिः सभगवा'नित्यत्र सः भगवानिति नार्थः किन्तु भगवता सह वर्तमान इत्यर्थो वक्ष्यते। ह्रीति व्याख्यानात् निश्चयार्थकः कृपापात्रत्वं दैवीसृष्ट्युत्पन्नत्वे सति स्निग्धशिष्यत्वम्। 'ब्रूयुः स्निग्धस्य शिष्यस्ये'तिवाक्यात्। अन्यस्माच्च प्राणनत्वं स्निग्धो वक्ति यतः। कृपापात्रत्वेन दयासिद्धित्वेन कार्यकारणभावः। एवमिति दयासिद्ध्यर्थत्वेन प्रश्नाप्रतिपादकत्वप्रकारेण। 'नैषे'त्यस्य प्रश्नरूपत्वाभावात् तं विहाय द्वादशभिः। ब्रह्मणो गुणदोषसमत्वेन समः प्रश्नः गुणदोषगः। सप्तमस्कन्धात्। सङ्ख्यातात्पर्यमिदम्। गुणाः षट् दोषाः षट्। मातुलमारणादयः। समत्वं तु यथा गुणा उत्कटास्तथा दोषा अपीति। गुणविरुद्धा धर्मा दोषाः। देशान्तरगतो गर्भः असञ्ज्ञातिसहभावः, मातुलमारणं, बहुकालद्वारिकावासः, बहुपरिग्रहः, प्रश्नस्था इमे। अन्येपि प्रश्नस्थाः। व्रजगमनप्रश्नः कालप्रश्नश्च साधारणौ नोत्कटौ। एवं षट् वीर्यैश्वर्ययशःश्रीज्ञानविरुद्धाः। ननु 'निर्दोषपूर्णगुणविग्रह आत्मतन्त्र' इत्यादिवाक्यैर्निर्दोषत्वे ब्रह्मणः कुतः षड् दोषा इति चेन् न। 'ज्ञानमात्रं परं ब्रह्मे'त्यादिभिर्ज्ञानात्मकस्य स्वरूपनिर्वाहका दोषा इव दोषाः। अस्थूलत्वादिवत्। तथा च श्रुतिः 'नो एवासाधुना कनीया'निति। अत्रासाधुकर्मप्रसक्तौ 'नो एवे'ति निषेधानुपपत्तिरिति। अतो भगवान् स्वधामनि क्रीडन् न दोषभाग् भवतीति। 'न मां कर्माणि लिम्पन्ती'ति गीतायाम्। सर्वत्र साम्यं भगवद्धर्मः, 'समः सुहृ'दिति सप्तमस्कन्धात्।

१०–१–१. कथित इत्यत्र भक्तत्वादिति भक्तिरत्रानन्दधर्मः, तेन शास्त्रार्थस्यानन्दस्य हरेर्लीलारूपस्य स्कन्धार्थस्याधिदैविकसेवारूपनिरोधस्य भक्तिशब्दार्थस्य शुके बोधनात् तयोरव्याप्तिर्वारिता। रात्रिन्दिवमिति 'आत्मा वै पुत्रनामासी'तिश्रुतेस्तद्वंश्यानामपि। साधनं तु 'सच्चिदानन्दता तत' इति निरोधलक्षणग्रन्थोक्तदिशा। मुक्तत्वाच्च 'कथामात्रावशेषिता' इति चिद्रूपत्वं वा। सर्वेषामित्यादि पुराणगतत्वेन स्त्रीशूद्रयोरपि। सर्वान्धकाराः सत्येन निवर्त्याः ज्ञानेन शब्दान्तेनानन्देन च। इति पूर्वोक्तेति

इत्येवं यत् पूर्वोक्तं तस्य स्वस्य निरोधेभिप्रायं च वदन् निरुद्धत्वादेव श्रोतृत्वस्य समर्थनम्। श्लोकोत्तरार्धे राज्ञो निरोधः। चरितानुवादस्य निरोधकार्यत्वात्। अन्यथा राज्ञां चरित्रे स्पर्धादि स्यात्। प्रकरणार्थमव्याप्तिं परिहर्तुं सङ्गमयन्ति स त इति। वंश्या वंशे साधवः जन्मपरम्परायां कृष्णजन्मघटितायां साधवः भक्ता एव, प्रकरणार्था व्याप्तिर्वारिता। उत्पत्तेः कारणत्वं शरीराणामात्मतया स्वीकरणोत्तरमेव भक्तत्वात्। तच्चानुमेयम्। अयमर्थः। प्रथमसुबोधिन्यां नवमाध्याये "स्वस्य समानाकृतिं शरीरं पुरुषविधं सम्पाद्य स्वसेवां त्याजयित्वा तत्सेवायां नियुक्ताः। तत्र चान्यभजनं मा भवत्विति स्वयमेव हृदि हृदि प्रत्येकपर्यवसायित्वेन घिष्ठितं अधिष्ठाय स्थितं अधिष्ठातृदेवतात्वेन न तु जीववत्। ननु के ते जीवा इति चेन्न। आत्मनैव कल्पिताः। 'अवस्थितेरिति काशकृत्स्न' इति भगवतोऽवस्थाविशेषो जीवः प्राकृतभोगार्थं तामवस्था सम्पादितवा"निति। 'तमिममहमज'मिति श्लोकेऽस्ति। तथात्वादिति अनुभवेन तथात्वात्। पृथगिति विस्तारात् पृथक्। राज्ञामित्यत्र कारकषष्ठी न शेष इत्याहुः अत्र षष्ठीति। अत्र बोधेपि न शेषसम्बन्धप्रतीतिः किन्तु राजकर्तृकं चरितमित्यत्र बोधे जननसम्बन्धप्रतिपादिका। न च तृतीयापत्तिः दण्डेन घट इत्यादौ तथा दर्शनादिति वाच्यम्। कर्तृत्वसम्बन्धसामान्यविवक्षायां जननसम्बन्धोक्तेः न तु तृतीयार्थद्योतनाय। इत्युक्तमिति राज्ञां महत्त्वं भगवत्सम्बन्धादेव यत इति। अद्भुतं आश्चर्यवद् द्रष्टव्यम्। अध्यायार्थौ हेतुस्तस्याव्याप्तिस्तु स्वोपोद्घातसम्बन्धेन हेतुसत्त्वात्। हेतुतासम्बन्धेन वा। एवमग्रेपि। एवमुपक्रमः मृत्युवारणसामर्थ्यं वसुदेवे वासुदेवाविर्भावज्ञापकमिति वासुदेवाविर्भावसामग्रीबोधकः। भक्तदुःखमर्थः।

१०–१–२. यदोश्चेत्यत्र कथनेति भगवदवतारार्थं शुद्धपरम्परायां कथनायुक्तत्वम्। मुख्येति 'अहं बीजप्रदः पिते'तिगीतायाः। पुरोरिति यदुकनिष्ठभ्राता पुरुः। यस्यवेति 'वसुपुङ्गव'मितिवाक्यात् 'कृष्ण एवं भगवति मनोवाग्दृष्टिवृत्तिभिः आत्मन्यात्मानमावेश्य सोन्तःश्वास उपारम'दितिसर्वात्मभावोक्तेः। नन्दादिवत्स्वना सर्वात्मभावदर्शनात्। ब्रह्मणि निष्कले सम्पत्त्या दोषोपि। तत्कृत इति वंशकृतः। दोषमाहुः अत्र इति। प्राप्तज्ञाना इति 'अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदु'रितिश्रुतेः। भक्ता इति 'रुद्रे तु ज्ञानेन भक्ता' इत्यथर्वश्रुतिः। केचिदिति विरलाः। तत्त्वेति 'विशुद्धसत्त्वं वसुदेवशब्दितं' तत्त्वम्। विष्णोरिति इदमित्थतया वाग्व्यापारविषयापेक्षयोक्तं विष्णोरिति। तत्समानगुणादिमान् विष्णुः। तत्प्रिये तदवतारे परेपि तत्प्रियत्वज्ञानार्थम्। साक्षात्त्वं तु 'कृष्णो हि परमं दैवं', 'कृष्णस्तु भगवान् स्वय'मिति श्रुतिपुराणाभ्यां वक्तव्यमेव। कथ वाक्यप्रबन्धे, वाक्यप्रबन्धमाहुः सूक्तेति। प्रबन्धस्तु सूक्त तत्साधारण्येनुपयोगापत्तिः 'काव्यादीनाममत्यत्वान्नोपयोगः कथञ्चने'तिनिबन्धात्। किञ्च प्रबन्धकल्पनान्यथेत्यापत्त्या विशेषणमाहुः अनुशासनेति। 'वेदमनूच्याचार्यो-

न्तेवासिनमनुशास्ति धर्मं चरे'त्याद्यनुशासनस्य रूपं यत्र। तत्प्रचुरतद्रूपमेव वा सूक्तसाधारण्यम्।

-१०-१-३. अवतीर्येत्यत्र स्वतन्त्रेति 'कथा इमास्त' इतिश्लोकानुसरणं चरित्रमात्रप्रश्ने हेतुः। स्वतन्त्रत्वमवतारानपेक्षत्वम्। चरित्रमात्रमिति मात्रं कार्त्स्न्ये। एवकारेण स्वरूपव्यवच्छेदः। 'विष्णोः कर्माणि पश्यते'तिश्रुत्या कर्मणां श्रोतव्यत्वात्। 'आत्मा वा अरे द्रष्टव्यः श्रोतव्य' इतिश्रुतेः। आत्मेदमित्थतयाऽप्रतिपाद्यः। ननु वंशेवतीर्येति नान्वयः वंशे वसुदेवेवतीर्येति, तथा च वंशपदं वसुदेवे लाक्षणिकमत आहुः वीर्याधिक्येति। वीर्यमुत्तरार्धीयं, तदत्र मैथिलप्रसङ्गादधिकं, तत्र द्वैरूप्यमत्र तु यावन्तो धर्मा धर्मिण्युपयुक्तास्तावन्तो वक्तव्याः स्वस्वामिभावसम्बद्धाश्च, ते तु यद्वादिषु त्याजितसेवेषु देहे कारितस्वसेवेषु सेव्यात्मसेवासंस्कारकृताः। तत्राप्या'त्मा वै पुत्रनामासी'तिश्रुतेर्यदुप्रभृत्यात्मसु 'कृष्णस्तु भगवान् स्वय'मित्यत्र स्वयंत्व उपयुक्ताः। ते तु वंशपदस्य लाक्षणिकत्वेन सम्भवन्ति, अतो वंशपदार्थो वंश एव। तथा च यद्वादिसेवितात्मा कालेन भक्तिविषयः सन् 'कृष्णस्तु भगवान् स्वय'मिति। एवेति न तु चरित्री धर्मात्मकः। 'प्रकाशाश्रय'सूत्रे चरित्राणामेव चरित्र्यभेदोक्तेः। अपिशब्देन भक्तिजनकं, उक्तरीत्या। यदुसम्बन्ध इति ननु यदुसम्बन्धेप्यपाक्षिकधर्मिरूपत्वं कथमिति चेन्न। श्रद्धारतिभक्त्यनुक्रमे यद्वादीनां धर्मित्वात्। 'यो यच्छ्रद्धः स एव स' इतिवाक्यात्। वंशपदेनैवार्थाद् यदुलाभादसमस्तयदुपदकृत्यमाहुः असमास इति। व्याससूचक इति यदोराधिक्यं वंशे सूचयति। अतः स्वयंत्वेधिकोपयोगः। धातूनामनेकार्थत्वादाहुः अनुभावयतीति। भूतान्यनुभवन्ति विषयसुखादीनि, तानि भूतान्यनुभावयति भगवान्। 'एष एव साधुकर्म कारयति यं उन्निनीषती'तिश्रुतेः 'यमेवैष' इतिश्रुतेश्च। अनुकृत्यधिकरणात्। 'श्रवणे परीक्षिदभव'दित्युक्तेः एतस्यापि श्रवणात्। न बध्यत इति 'न मे मोक्षो न बन्धन'मितिवाक्यात्। अविद्यातन्वोः 'धाम्ना स्वेन सदा निरस्तकुहक'त्वात्। बध्यन्त इति साधनाभावात्। निर्धारितत्वादिति राजर्षिसत्तमत्वेन बहुपण्डितकत्वात्। भगवद्भावेनेति भगवतो भावो धर्मो अबन्धरूपो ज्ञानकृत इति तेन भाविताः तदा भवन्ति यदा ध्रुवा स्मृतिः, ज्ञानिभावुकनिष्ठाः सदा तद्धर्माः श्रवणादिनिर्वाह्यविशिष्टा विषयाः स्युः। यथाक्षरांशो जीवः आधिदैविक्या सेवया तिरोहिताविर्भूतानन्दः तदध्यासवांश्च भवति, तदा कृतार्थत्वं सर्वग्रन्थिप्रविमोक्षरूपम्। तथा च श्रुतिः 'आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः स्मृतिलम्भे सर्वग्रन्थीनां प्रविमोक्ष' इति। स्मृतिश्च 'यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम् तं तमेवैति कौन्तेय सदा तद्भावभावित' इति। एवमन्यभावेष्वपि। निरोधलक्षणग्रन्थे स्पष्टम्। अत्र नारायणोपनिषत् 'अथ नित्यो निष्कलङ्को निराख्यातो निर्विकल्पो निरञ्जनः शुद्धो देव एको नारायणो न द्वितीयोस्ति कश्चित् य एवं वेद स विष्णुरेव भवती'ति तद्भावो बोध्यः। अग्रिमेति

इत्येवं यत् पूर्वोक्तं तस्य स्वस्य निरोधेभिप्रायं च वदन् निरुद्धत्वादेव श्रोतृत्वस्य समर्थनम्। श्लोकोत्तरार्धे राज्ञो निरोधः। चरितानुवादस्य निरोधकार्यत्वात्। अन्यथा राज्ञां चरित्रे स्पर्धादि स्यात्। प्रकरणार्थमव्याप्तिं परिहर्तुं सङ्गमयन्ति स त इति। वंश्या वंशे साधवः जन्मपरम्परायां कृष्णजन्मघटितायां साधवः भक्ता एव, प्रकरणार्थो व्याप्तिर्वारिता। उत्पत्तेः कारणत्वं शरीराणामात्मतया स्वीकरणोत्तरमेव भक्तत्वात्। तच्चानुमेयम्। अयमर्थः। प्रथमसुबोधिन्यां नवमाध्याये "स्वस्य समानाकृतिं शरीरं पुरुषविधं सम्पाद्य स्वसेवां त्याजयित्वा तत्सेवायां नियुक्ताः। तत्र चान्यभजनं मा भवत्विति स्वयमेव हृदि हृदि प्रत्येकपर्यवसायित्वेन धिष्ठितं अधिष्ठाय स्थितं अधिष्ठातृदेवतात्वेन न तु जीववत्। ननु के ते जीवा इति चेन्न। आत्मनैव कल्पिताः। 'अवस्थितेरिति काशकृत्स्न' इति भगवतोवस्थाविशेषो जीवः प्राकृतभोगार्थं तामवस्थां सम्पादितवा"निति। 'तमिममहमज'मितिश्लोकेस्ति। तथात्वादिति अनुभवेन तथात्वात्। पृथगिति विस्तारात् पृथक्। राज्ञामित्यत्र कारकषष्ठी न शेष इत्याहुः अत्र षष्ठीति। अत्र बोधेपि न शेषसम्बन्धप्रतीतिः किन्तु राजकर्तृकं चरितमित्यत्र बोधे जननसम्बन्धप्रतिपादिका। न च तृतीयापत्तिः दण्डेन घट इत्यादौ तथा दर्शनादिति वाच्यम्। कर्तृत्वसम्बन्धसामान्यविवक्षायां जननसम्बन्धोक्तेः न तु तृतीयार्थद्योतनाय। इत्युक्तमिति राज्ञां महत्त्वं भगवत्सम्बन्धादेव यत इति। अद्भुतं आश्चर्यवद् द्रष्टव्यम्। अध्यायार्थो हेतुस्तस्याव्याप्तिस्तु स्वोपोद्घातसम्बन्धेन, हेतुसत्त्वात्। हेतुतासम्बन्धेन वा। एवमग्रेपि। एवमुपक्रमः मृत्युवारणसामर्थ्यं वसुदेवे वासुदेवाविर्भावज्ञापकमिति वासुदेवाविर्भावसामग्रीबोधकः। भक्तद्‌ समर्थः।

१०–१–२. यदोश्चेत्यत्र कथनेति भगवदवतारार्थं शुद्धपरम्परायां कथनायुक्तत्वम्। मुख्येति 'अहं बीजप्रदः पिते'तिगीतायाः। पुरोरिति यदुकनिष्ठभ्राता पुरुः। वस्त्वेति 'वसुपुङ्गव'मितिवाक्यान् 'कृष्ण एवं भगवति मनोवाग्दृष्टिवृत्तिभिः आत्मन्यात्मानमावेश्य सोन्तःश्वास उपारम'दितिसर्वात्मभावोक्तेः। नन्दादिवसूनां सर्वात्मभावदर्शनात्। ब्रह्मणि निष्कले सम्पत्त्या दोषोपि। तत्कृत इति वंशकृतः। दोषमाहुः अग्र इति। प्राप्तज्ञाना इति 'अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदु'रितिश्रुतेः। भक्ता इति 'रुद्रे तु ज्ञानेन भक्ता' इत्यथर्वश्रुतिः। केचिदिति विरलाः। नत्त्वेति 'विशुद्धमत्त्वं वसुदेवशब्दितं' तत्त्वम्। विष्णोरिति इदमित्थतया वाग्व्यापारविषयापेक्षयोक्तं विष्णोरिति। तत्समानगुणादिमान् विष्णुः। तत्प्रिये तदवतारे परेपि तत्प्रियत्वज्ञानार्थम्। साक्षात्त्वं तु 'कृष्णो हि परमं दैवं', 'कृष्णस्तु भगवान् स्वयं'मिति श्रुतिपुराणाभ्यां वक्तव्यमेव। कथं वाक्यप्रबन्धे, वाक्यप्रबन्धमाहुः सूक्तेति। प्रबन्धस्तु सूक्तं तत्साधारण्येनुपयोगापत्तिः 'काव्यादीनाममत्यरतान् नोपयोगः कथश्चने'तिनिबन्धात्। किञ्च प्रबन्धकल्पनाकथेत्यापत्त्या विशेषणमाहुः अनुशासनेति। 'वेदमनूच्याचार्यो-

न्तेवासिनमनुशास्ति धर्मं चरे'त्याद्यनुशासनस्य रूपं यत्र। तत्प्रचुरतद्रूपमेव वा सूक्तसाधारण्यम्।

१०-१-३. अवतीर्येत्यत्र स्वतन्त्रेति 'कथा इमास्त' इतिश्लोकानुसरणं चरित्रमात्रप्रश्ने हेतुः। स्वतन्त्रत्वमवतारानपेक्षत्वम्। चरित्रमात्रमिति मात्रं कार्त्स्न्ये। एवकारेण स्वरूपव्यवच्छेदः। 'विष्णोः कर्माणि पश्यते'तिश्रुत्या कर्मणां श्रोतव्यत्वात्। 'आत्मा वा अरे द्रष्टव्यः श्रोतव्य' इतिश्रुतेः। आत्मेदमित्थतयाऽप्रतिपाद्यः। ननु वंशेवतीर्येति नान्वयः वंशे वसुदेवेऽवतीर्येति, तथा च वंशपदं वसुदेवे लाक्षणिकमत आहुः वीर्याधिक्येति। वीर्यमुत्तरार्धीयं, तदत्र मैथिलप्रसङ्गादधिकं, तत्र द्वैरूप्यमत्र तु यावन्तो धर्मा धर्मिण्युपयुक्तास्तावन्तो वक्तव्याः स्वस्वामिभावसम्बद्धाश्च, ते तु यद्वादिषु त्याजितसेवेषु देहे कारितस्वसेवेषु सेव्यात्मसेवासंस्कारकृताः। तत्राप्या'त्मा वै पुत्रनामासी'तिश्रुतेर्यदुप्रभृत्यात्मसु 'कृष्णस्तु भगवान् स्वय'मित्यत्र स्वयंत्व उपयुक्ताः। ते तु वंशपदस्य लाक्षणिकत्वेन सम्भवन्ति, अतो वंशपदार्थो वंश एव। तथा च यद्वादिसेवितात्मा कालेन भक्तिविषयः सन् 'कृष्णस्तु भगवान् स्वय'मिति। एवेति न तु चरित्री धर्मात्मकः। 'प्रकाशाश्रय'सूत्रे चरित्राणामेव चरित्र्यभेदोक्तेः। अपिशब्देन भक्तिजनकं, उक्तरीत्या। यदुसम्बन्ध इति ननु यदुसम्बन्धेप्यपाक्षिकधर्मिरूपत्वं कथमिति चेन्न। श्रद्धारतिभक्त्यनुक्रमे यद्वादीनां धर्मित्वात्। 'यो यच्छ्रद्धः स एव स' इतिवाक्यात्। वंशपदेनैवार्थाद् यदुलाभादसमस्तयदुपदकृत्यमाहुः असमास इति। व्याससूचक इति यदोराधिक्यं वंशे सूचयति। अतः स्वयंत्वेधिकोपयोगः। धातूनामनेकार्थत्वादाहुः अनुभावयतीति। भूतान्यनुभवन्ति विषयसुखादीनि, तानि भूतान्यनुभावयति भगवान्। 'एष एव साधुकर्म कारयति यं उन्निनीषती'तिश्रुतेः 'यमेवैष' इतिश्रुतेश्च। अनुकृत्यधिकरणात्। 'श्रवणे परीक्षिदभव'दित्युक्तेः एतस्यापि श्रवणात्। न वध्यत इति 'न मे मोक्षो न बन्धन'मितिवाक्यात्। अविद्यातन्त्वोः 'धाम्ना स्वेन सदा निरस्तकुहक'त्वात्। वध्यन्त इति साधनाभावात्। निर्धारितत्वादिति राजर्षिसत्तमत्वेन बहुपण्डितकत्वात्। भगवद्भावेनेति भगवतो भावो धर्मो अबन्धरूपो ज्ञानकृत इति तेन भाविताः तदा भवन्ति यदा ध्रुवा स्मृतिः, ज्ञानिभावुकनिष्ठाः सदा तद्धर्माः श्रवणादिनिर्वाह्यविशिष्टा विषयाः स्युः। यथाक्षरांशो जीवः आधिदैविक्या सेवया तिरोहिताविर्भूतानन्दः तदध्यात्मवांश्च भवति, तदा कृतार्थत्वं सर्वग्रन्थिप्रविमोक्षरूपम्। तथा च श्रुतिः 'आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः स्मृतिलम्भे सर्वग्रन्थीनां प्रविमोक्ष' इति। स्मृतिश्च 'यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम् तं तमेवैति कौन्तेय सदा तद्भावभावित' इति। एवमन्यभावेष्वपि। निरोधलक्षणग्रन्थे स्पष्टम्। अत्र नारायणोपनिषत् 'अथ नित्यो निष्कलङ्को निराख्यातो निर्विकल्पो निरञ्जनः शुद्धो देव एको नारायणो न द्वितीयोस्ति कश्चित् य एवं वेद स विष्णुरेव भवती'ति तद्भावो बोध्यः। अग्रिमेति

संहितया तमस्तरणं प्रयोजनम्। अत एवेति अग्रिमप्रयोजनार्थत्वादेव, भागवतद्वारा वीर्योपबन्धनार्थम्। उपनिबन्धनं यत्नः, तदर्थं ज्ञानमाहुः ज्ञातानीति। अन्येन भगवता व्यासेन। जानातीच्छति यतत इति। अन्योन्याश्रय इति भगवद्धितकरणे जीवहितकरणं जीवहितकरणे भगवद्धितकरणमित्यन्योन्याश्रयः। विश्वात्मत्वमिति विश्वेषां आत्मा समवायी 'अदृश्यत्वादिगुणको धर्मोक्ते'रित्यधिकरणोक्ताक्षराभेदपक्षे घटादीनां मृदिव। स्वतन्त्रतयेति कर्ता तूक्तः। 'स्वतन्त्रः कर्ते'तिसूत्रात्। अभिन्ननिमित्तोपादानम्।

१०–१–४. निवृत्ततर्षैरित्यत्र चरित्रस्येति धर्मिसम्बन्धात् धर्मिणोधोक्षजत्वाच्च। ननु तर्हि 'असन्नेव स भवति असद् ब्रह्मेति वेद चे'दित्यसता भाव्यमिति चेत् तत्राहुः भगवतश्चेति। तथा चा'स्ति ब्रह्मेति चेद् वेद सन्तमेनं ततो विदु'रितिश्रुत्या सतापि भाव्यमित्यर्थः। नास्तिकवादस्य पातित्यं 'ज्ञानिनामपी'तिवाक्यात् पातित्यस्य सम्पादकत्वेनानादृतत्वात्। 'विष्णोः कर्माणि पश्यते'तिश्रुतेः। अदृष्टेति अदृष्टं श्रुतम्। तत्रेत्यादि। तत्र तयोः प्रातिस्विकरूपेण ज्ञेयत्वाच् चरित्रमाहात्म्यमित्यर्थः। ईश्वरस्तु 'यद्यद् धिया त उरुगाय विभावयन्ति तत्तद् वपुः प्रणयसे सदनुग्रहाये'ति लीलाप्रतियोगिसापेक्ष इतिभावः। एवं सर्वत्र। पुनरप्याह घटपटादीनामपि विष्णुकर्मत्वाच् चरित्रे को विशेष इति तत्राहुः स्वरूपादिति। 'आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे कुर्वन्त्यहैतुकीं भक्तिमित्थंभूतगुणो हरि'रितिवाक्यात्। कीर्तनभक्तिरिव न घटपटादयः कृतिविषया इति। फलतश्च इति 'भक्त्याहमेकया ग्राह्य' इतिफलवत् न घटपटादिभिः फलम्। पञ्चम्यन्तपदद्वयाभिप्रायः। चतुर्थपञ्चम्यन्ताभिप्रायः। महापुरुषेति तृतीयपञ्चम्यन्ताभिप्रायः। विषयोत्तमत इति 'या प्रीतिरविवेकानां विषयेष्वनपायिनी त्वामनुस्मरतः सा मे हृदयान् मापसर्प'त्विति। परोमीयते ज्ञायते येन परमम्। चरित्रं किञ्चिदाश्रितं धर्मत्वात्, स्पर्शवत्। चरित्राश्रयत्वेन परो ज्ञायते। मतमिति सर्वेषाम्। इदं लेखादविरुद्धम्। अत्र तृतीयविशेषणतात्पर्यं पश्चादुक्तं तस्याभिप्रायो'महापुरुषयोगत'इत्यस्य देहलीदीपन्यायेनोभयान्वयित्वद्योतन इत्याशयेन स्वोक्तं प्रपञ्चयन्तश्चरित्रोत्कर्षोक्त्यनन्तरं तदनुवादोत्कर्षमाहुः मुक्तस्येति। मुक्तो द्विविधो जीवन्मुक्तः परममुक्तश्च। पूर्वत्र वाक्यमुक्तं, परममुक्तस्य गुणगानादि फलप्रकरणे वक्ष्यते। 'ते तु ब्रह्महृदं नीता मग्नाः कृष्णेन चोद्धृता' इति। 'सम्पद्याविर्भावः स्वेनशब्दा'दित्यस्य माप्यमनवतारदशायाम्। हीति निश्चयेन। स्वरूपतश्चरित्रानुवादोत्कर्षमुक्त्वा फलतस्तमाहुः मुमुक्षोरिति। फलं भवनाशः। एकं फलं पूर्वमुक्तं तेन 'ततः संसारदुःखस्य निवृत्तिर्ब्रह्मबोधन'मितिवाक्यात्। एतेन ननु चरित्रगानाधिकारो मुक्तानामेवेति चेदन्येषां श्रवणादिकं न स्यात् तेषां दुर्मिलत्वादित्याशङ्कापास्ता। 'महापुरुषयोगतो विषयोत्तमत' इत्युक्तं तदाहुः

१. मेवेतीति स्यात्।

अनिन्द्येति। यद्यपि सगुणभक्तिस्तृतीयस्कन्धे निन्द्या,धर्मिणोऽविषयत्वाच्च निन्द्या, तथापि 'पूर्णा भगवदीयास्ते' इत्यत्र जलभेद उक्तास्तेषां विषयाः धर्मित्वाभावेपि 'यदेकमव्यक्तमनन्तरूप'मितिश्रुतिविषयाः उत्तमाः, अतोऽनिन्द्याः। एतादृशानिन्द्यविषयः। अन्ये हि रूपादयः संसारे बध्नन्ति, इदं तु भगवति बध्नातीति तथा। चकार इममर्थमाह। विरक्त एतद्विषये यत्नं कुर्यात्। पतेदिति पाठेस्मिन् विरक्तो भगवत्परत्वाभावेनानैर्गुण्यात् पतेत् संसारी भवेत्। 'भस्मन्येव जुहोति स' इतितृतीयस्कन्धात्। ध्रुवमिति तादृशवाक्योपलम्भ उभयत्रेति। जलभेदे स्पष्टम्। तेन 'श्रोत्रमनोभिराम'त्वं भगवदीयानां ज्ञेयम्। तेन 'साङ्केत्यं पारिहास्यं च स्तोभं हेलनमेव वा मुकुन्दनामग्रहणमशेषाघहरं विदु'रितिवाक्यं तारतम्यादशेषाघहरमिति बोधितम्। तथा चात्र राजशुकयोः श्रवणे कथने च प्रवृत्तिं बोधयता शास्त्रकारेणास्मिन् पद्ये प्रकारो बोध्यत इतिभावोनया कारिकया बोध्यते। अत्र श्रवणाङ्गत्वेन ज्ञेयमन्यत्। 'श्रवणानन्दत्वेने'त्यत्रैव वक्ष्यमाणत्वात्। 'आत्मा वा अरे द्रष्टव्यः श्रोतव्य' इतिश्रुतेः। उक्तं विरक्तं निश्चिन्वन्तः 'पुमान् विरज्येत विना पशुघ्ना'दित्यस्य चतुर्थचरणस्य तात्पर्यमाहुः आत्मेति। अपगता शुक्। अपेत्यस्य शुक्फलेन्वयः, तस्य कर्तरि। अपशुगाश्रयः आत्मानं हन्तीत्यपशुघ्नःआत्मघाती। पशुघ्न इति पदच्छेदे कर्मजडः, कर्मठः पशुं हन्तीति। निन्दितार्थरतः हन हिंसागत्योरत्र हिंसा तामसधर्मः। आत्मघाती न मुकुन्दनामग्रहप्रायश्चित्तवान्। पशुघ्नो न चित्तशुद्धिद्वारा ज्ञानवान् भक्तिमान् वा,स सदा निन्दितार्थरतः। उभाभ्यां विलक्षणः। नञर्थोत्यन्ताभावे भेदे वा। पशुघ्नादित्यत्र पशुः पुरुषः पशुस्तं हन्ति प्राप्नोतीति घ्ना स्त्री घञर्थे कः। एवं पशुस्त्रीव्यतिरिक्तो हन्तेर्गत्यर्थकत्वे। एवंविधश्चेद् विरक्तोत्र न ततः न'विरक्तोस्मिन् पतेद् ध्रुव'मित्यत्रोक्ताद्विरक्ताद् पृथक्। यद्वा कारिकायां न पृथक्त्वावच्छिन्नप्रतियोगिताकाभावः किन्तु विरक्तो नेति विरक्तत्वावच्छिन्नप्रतियोगिको भेदः। तथा च 'कः पुमान् विरज्येते'त्यनेन स्त्री विरज्येतेति व्यञ्जितम्। तदुपलक्षणं पशूनाम्। 'श्वविड्वराहोष्ट्रखरैः संस्तुतः पुरुषः पशु'रिति ते पश्ववताराः। अत्र यथा आत्मघाती विरक्तो न,कर्मजडो विरक्तो न,सदा निन्दितार्थरतो विरक्तो नेत्यन्वयः, तथानुपदोक्तरीत्या पशुस्त्रीव्यतिरिक्तः विरक्तो नेत्यनन्वयात्। च इदिति न पदच्छेदः। चेदिति यद्यर्थकम्। तथा च पशुस्त्रीव्यतिरिक्तो यदि यस्मिन् काले विरक्तो न तत्त्वावच्छिन्नप्रतियोगिताकाभाववान् तदा ततः प्रथमकारिकोक्तविरक्तात् पृथगित्यर्थः। तथा च विरक्तो ह्यात्मघात्यादिविरक्ताद् गौणात् पृथग् नेत्यर्थः। 'स सर्वपूतो भवतीति'नृसिंहतापिनीयात्। प्रकाशे तु पशुस्त्रीव्यतिरिक्तत्वावच्छिन्नप्रतियोगिताकाभावो व्याख्यातः,पशुस्त्रीव्यतिरिक्तो नेति। तदपि व्याख्यानम्। पुष्टौ तु 'यमेवैष वृणुते तेन लभ्य' इति। पशुस्त्रीव्यतिरिक्तो नो विरक्त इतिभावः। तथा च पशुस्त्रीव्यतिरिक्तोपि न विरक्तः वरणा-

भावात् तस्याप्रयोजकत्वात्। वरणमधिकारः। धृङ् सम्भक्ताविति धातुपाठात् तु भक्तिसत्तासिरूपा। वाक्यानि तु 'कर्मणैव तु संसिद्धिमास्थिता जनकादयः' 'नृदेहमाद्यं सुलभं सुदुर्लभं प्लवं सुकल्पं गुरुकर्णधारं मयानुकूलेन नभस्वतेरितं पुमान् भवाब्धिं न तरेत् स आत्महे'ति। तेन कर्मान्तरङ्गतमं मर्यादाभक्तिरूपं ग्राह्यम्। गुणानुवादेष्टया भक्तिश्च प्रेमसाधनत्वेन। तथा एकादशस्कन्धीयेष्वुक्तं चमसवाक्येषु 'कर्मण्यकोविदाः स्तब्धा' इत्यादिना 'ये कैवल्यमनुप्राप्ता ये चातीताश्च मूढताम् त्रैवर्गिका ह्यक्षणिका आत्मानं घातयन्ति त' इति। ब्रह्मत्वं ब्रह्मेतिसम्बन्धरहितं ज्ञानं'' कैवल्यं', ब्रह्मत्वं ब्रह्मेतिज्ञानं, तयोः सम्बन्धस्यावगाहे आत्मा भगवांस्तत्सेवादिरहिता आत्मघातिनः कैवल्यादिप्राप्ता ज्ञानिनोपीति। 'क्रियावानेष ब्रह्मविदां वरिष्ठ' इतिमुण्डकात्। 'कर्मण्यकोविदाः' पशुघ्नाः। मुण्डकोक्ता एतद्विपरीताः। कर्मजडः पशुघ्नः कर्मण्यकोविदान्तर्गतः। 'अविद्यायामन्तरे वर्तमानाः स्वयं पण्डितंमन्या जघन्यमाना' इतिश्रुतेः। एतद्विपरीतास्तु चित्तशुद्ध्यर्थं कर्माणि ये कुर्वन्ति। एते 'स्तब्धा' अपि। निन्दितार्थरत आपशुघ्नः 'वेदमार्गविरोधेन यैषां करणमण्वपि ते हि पाषण्डिन' इतिवाक्यात्। 'यदेव विद्यया करोति श्रद्धयोपनिषदा वे'तिश्रुतेः। तथा च ये कैवल्यमनुप्राप्ताः कर्मठाश्च। एतद्विपरीता निन्दितार्थरताः। 'त्रैवर्गिकाः' धर्मार्थकामपराः। स्त्रीपशुव्यतिरिक्ताः स्त्रियः पशवश्च। तथा च श्रुतिस्मृती। 'पशुपतिः पशूनां चतुष्पदामुत च द्विपदां,' 'शिवस्य पशवः सर्वे जीवाः संसारवर्तिन' इति। पशुपतिपदस्य शिवपरत्वे 'भोगः शिवेने'तिवाक्यात् भोगिनः। एत एव 'ह्यक्षणिका' अन्यथा कर्तृभेदान्न धर्मादिपरत्वं स्यात्। फलरूपमिति इतरत्र वैराग्यजनकत्वं फलत्वम्। इत उत्कृष्टस्यात्र वैराग्यजनकस्यान्यस्याभावात्। 'भगवदीयत्वेनैव परिसमाप्तसर्वार्था' इति। 'अत इतरज्ञाय' इतिव्यासस्त्रं फलाध्याये। 'इतरत्' तदीयत्वम्। तृष्णेति। यद्यपि तृडपि व्याख्यातुं शक्यते, अप्रेर्योरतनुत्वेन भगवदीये तदप्राप्तेः द्विपि तत्प्राप्तेरिति परन्तु सर्वदा न प्राप्नोतीच्छाधीना चेति तृष्णैव 'तृष्णा लिप्सापिपासयो'रिति विश्वः। 'न खादन्ति न पिबन्ती'ति छान्दोग्ये भगवदीयानामपि ईषत्खादनादिश्रावणाच्च यथाश्रुतं वार्थः। सर्वदोषवदोषा इतिपाठे दोषवन्नित्यलीलास्था दोषाः। इकारलोपः। एतादृग्क्रीडाङ्गीकृता निवृत्ततर्षाः। श्रवणानन्दत्वेनेत्यस्यार्थष्टिप्पण्यामुक्तः। आवृत्त्येति भक्ताना वैराग्यवत्त्वेप्यावृत्त्या वैराग्यदार्ढ्ये आवृत्तिभक्त्या भगवद्रूपवैराग्यप्राप्तेश्च क्षुदादिरूपा निवार्यस्यादिः। आवृत्तेः क्षुदादि निवर्तकत्वं तु 'परस्परं त्वद्गुणवादसीधुपीयूषनिर्यापितदेहधर्मा' इतिकर्दमस्तुतौ। भगवद्विषयत्वेन निरोधलक्षणोक्ताः। येषामिन्द्रियाणां स्पष्टं कार्यं न दृश्यते तानि निग्रहणीयानीति निरोधलक्षणे। अनिवार्या इति भगवद्विषयत्वेन निवारयितुमयोग्याः कामादयः। अग्र इति 'ते तु ब्रह्महृदं नीता मग्नाः कृष्णेन चोद्धृता' इत्यनेन साधनप्रकरणे उक्ताः फलप्रकरणे

फलिष्यन्ति। ब्रह्महृदस्याक्षरात्मकत्वेनास्थूलादिवाक्यप्रतिपाद्यत्वात्। 'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत् केन कं विजानीयात् केन कं मन्वीते'त्यादि। स्वतन्त्रेति स्वातन्त्र्यं मादकत्वमत्र। रसाभीति रसोत्र भक्तिरूपः। वक्तुरित्यादि वक्तुः शुकस्य 'परिनिष्ठितोपि नैर्गुण्य' इतिवाक्यात्। श्रोतृ राज्ञः 'नैपातिदुःसहे'तिवाक्यात्। उत्तमिति चरित्रस्योक्तम्। निवर्तकमिति'पुमान् भवाब्धिं न तरे'दितिवाक्यं द्रष्टव्यम्। उपकारेति 'तस्यारविन्दनयनस्ये'तिवाक्योक्तसंक्षोभशामकत्वमुपकारः। 'आत्मारामाश्च मुनय' इतिस्मरणात्। गानमिति वक्तुः।श्रोतुस्त्विवति श्रोतृत्वेन श्रोतात्र। कर्मणो व्यापारभूतस्य वक्ष्यमाणस्य प्रायोपविष्टे परीक्षित्यभावात्।कर्मज्ञान भक्तिभ्य इति व्यापारेभ्यः।'आत्मा वा अरे द्रष्टव्यः', 'भिद्यते हृदयग्रन्थि'रिति च। न पुरुषेति संयोगमात्रेण तदुत्तरक्षण एव रोगोपशमदर्शनात्। फलत्वसाधनत्वे इति निवृत्ततर्षाणां गुणानुवादस्य फलत्वं प्रथमविशेषणेन,द्वितीयविशेषणेन भवनिवृत्तिसाधनत्वं, ते। एवेति अनुभवात्। प्रविष्टमिति चरित्रम्। तथेति श्रोत्रमनोभिरामत्वेन। ज्ञातव्यमिति मर्यादायां शमलाभावस्य श्रोत्रमनोभिरामकारणत्वात्। अनिवर्त्येति सहजासुरत्वेन। तथा चानिवर्त्यदोषः प्रवेशप्रतिबन्धकः उपगीयमानत्वात् न तु स श्रोत्रमनोभिरामत्वप्रतिबन्धकः। एवं च स्मृतोपोपसर्गार्थं तृष्णार्थात् पूर्वमाहुः उपेतीति। उपेति अप्राप्तिदोष इतिच्छेदः। धनार्पणेति निवारित इतिपूर्वेणान्वयः। एवं निवृत्ततर्षपदतात्पर्यमुक्त्वा भवौषधपदतात्पर्यमाहुः जन्ममरणेति। जन्ममरणसम्बन्धिदुःखस्य। तदुत्तरं तु दुःखं गरुडपुराणे स्वगतम्। अन्येषां तु क्षीयते। 'श्रोत्रमन'इतिविशेषणतात्पर्यमाहुः कर्णेति। श्रोत्रं च मनश्च श्रोत्रमनसी तयोरभिरामादितिसमासे द्वन्द्वान्ते श्रूयमाणं प्रत्येकमभिसम्बध्यत इति श्रोत्रमनःसम्बद्धाभिरामं स्वीकृत्यार्थ उक्तः। स्वरूपेति स्वरूपं फलत्वं गुणः भवौषधत्वं कार्यं श्रोत्रमनोभिरामः तैः। सम्बन्धत इति वक्ष्यमाणषष्ठ्यर्थात्। माहात्म्येति गुणा इत्यनेनान्वेति। तेषामनुवाद इत्यादि तु उत्तमश्लोकस्य वेत्यनेनान्वेति। तेषामिति गुणानाम्। समभीति एतद्विशेषणगतानां पदानां तस्मात्। ननु वैराग्यं भगवानिति तद्विशिष्टत्वरूपं विरक्तत्वं पशुस्त्रीणामसम्भवन् न निषेधार्हमिति चेत् तत्राहुः य इति। अवताराणां सम्भवतीतिभावः। वैकुण्ठादत्रागमनमवतार इति। यथा वत्सधेनुकादयः पशवः नित्यक्रीडास्थाः पूतनादयः स्त्रियश्चाविद्यादिरूपास्तत्तदुपाख्याने प्रसिद्धाः। नाधिकारिण इति तेषां वैराग्यप्राप्त्या विरक्तत्वरूपाधिकारात् तन्निषेध उपपन्न इत्यर्थः। या अपीति पृथाप्रभृतयः। स्वभावत इति परिणामो भगवत्सेवानुकूल्यरूपस्तेन तद्धेतोः स्वभावात् पुरुषा एव। जीवगतपुंस्त्वस्य भगवत्सेवानुकूल्यरूपत्वात्। अत इति जीवदेहोभयगतपुंस्त्वविवक्षणात्। ननु पुमान् विरज्येत गुणानुवादात् गुणानुवादोत्कृष्टस्य रसस्य तेजबिन्दूपनिषदि 'न ध्यानं न च वा ध्याता न ध्येयोऽध्येय एव च सर्वं तत् परमं शून्यं

न परं परमात् पर'मितिश्रावणादिति चेत् तत्राहुः इत इति। गुणानुवादात्। वैराग्यजनकस्येति गुणानुवादे वैराग्यजनकस्य। स्वोत्कृष्टज्ञानजन्यं स्वस्मिन् वैराग्यं तदभाववत्त्वं गुणानुवाद इति। अयमर्थः, तेजविन्दूपनिषदि साधारणसृष्टिकर्तृब्रह्मव्यवस्था तत्रापि, 'शमूनं कुरुते विष्णुरदृश्यः सन् परः स्वयम् तस्माच्छून्यमिति प्रोक्त' इतिव्युत्पत्तिर्महाकौर्म्ये शून्यपदस्यात्र 'त्वानन्दाद्ध्येव खल्विमानि भूतानि जायन्त' इत्युक्त्वा नित्यलीलासृष्टिकर्तृव्यवस्थात्र तु नादविन्दूपनिषदुपतिष्ठते। 'तद्भक्तस्तन्मनाः सक्तः शनैर्मुञ्चेत् कलेवरम् सुस्थितो योगचारेण सर्वसङ्गविवर्जितः ततो विलीनपाशोसौ विमलं केवलं प्रभुः तेनैव ब्रह्मभावेन परमानन्दमश्नुते परमानन्दमश्नुत' इति। तेन गुणानुवादस्यानन्दप्रतिष्ठत्वेनेत उत्कृष्टाभावो बोध्यः। 'गुणगाने सुखावाप्तिर्गोविन्दस्य प्रजायते' 'तदध्यासोपि सिध्यती'ति च। 'तदध्यासः' सुखाध्यासः। दैत्यत्त्वमिति दयाभाववत्त्वम्। तेनैवात्मघातित्वकर्मजडत्वनिन्दितार्थरसत्वं स्त्रीत्वानि भवन्ति। दित्युपाख्यानं द्रष्टव्यम्। तेन ननु घञर्थकविधानं संज्ञायां भवति,अत्र घ्न इति कस्यापि सञ्ज्ञा नास्तीति पशुघ्नशब्दस्य द्वितीयाव्युत्पत्तिरसङ्गतेति प्रत्युक्तम्। न तद्दोष इति गुणश्रवणविरागरूपस्तद्दोषो गुणानुवादपरिहार्यो नेत्यर्थः। मुक्तिरिति 'अन्धं तमः प्रविशन्ते ये सम्भूतिमुपासत' इतिश्रुतेः सम्भूतिं मायाम्। दोषस्येति निर्दयत्वादेः। तन्निवृत्त्यनन्तरमन्धं तमोवशिष्यते। तन्निवृत्त्युपाये तु न प्रवर्तन्त इतिभावः। 'प्रवृत्तिं च निवृत्तिं चे'तिवाक्यात्। ननु दैत्यानां तथामुक्तिप्रतिपादनस्य किं प्रयोजनमत आहुः आविष्टानामिति। कंसाद्याविष्टानां कालनेम्यादीनां तथेति भगवत्प्रत्यनीकत्वप्रकारात्। ननु 'सर्वं खल्विदं ब्रह्म' 'द्वया ह प्राजापत्या' इति कुतो मुख्यमुक्तिं निषेधथेति चेत् तत्राहुः आधारभूता इति। आविष्टानामाधारभूता दैवीसम्पद्युक्ताः प्रह्लादादयः। आविष्टाधारभूता आसुरीसम्पत्तियुक्ता मुच्यन्त इत्यर्थे तेषां मुक्तिमाहुः अपुनरिति। तथा च नोक्तविरोध इतिभावः। बहुश्रुतिविरोधादेवकारः। मुक्तिरिति श्रुतिरुक्ता। विरक्तमिति गुणानुवादे विरक्तम्। अन्यट्टिप्पण्यादौ।

१०-१-५. पितामहा म इत्यत्र श्लोकान्वयः सुबोधिन्यामुक्तः। महावाक्यार्थे तु 'यत्प्लवा अतरन् यश्च जुगोप तस्य वीर्याणि वदस्वे'तितृतीयश्लोकेनान्वयः। पुण्यद्वारेति श्रवणादिभक्तीनां पुण्यं शुभं तद्द्वारा मुक्तिसाधनत्वं भाष्यतृतीयाध्याये सिद्धम्। 'अनर्थोपशमं साक्षाद्भक्तियोगमधोक्षज' इति पुण्यद्वारता। तन्मात्रतां वारयितुं किन्तु टिप्पण्युक्तदिशा'ग्रे भगवानग्रे साक्षादेव भक्तदुःखं निवारितवान् न तु केनचिद् द्वारेणेत्युच्यते, तेन तच्चरित्रेपि साक्षात्पुरुषार्थसाधकत्वं न तु पुण्यद्वारेति ज्ञापितं भविष्यती'ति चरित्रस्य पुण्यद्वारमात्रतां वारयितुम्। किञ्च माहात्म्यज्ञानद्वारा भक्तिमपि साधयितुम्। 'भक्तिजनिकां संहितामारभमाण' इति सुबोधिन्याः। दृष्टान्तार्थं माहात्म्येन भगवन्तं

स्तौति। स्तुतिः पुण्यद्वारमात्रतावारणकीर्तनरूपेति माहात्म्यं कार्यम्। त्रयो वेति धर्मेन्द्र-वायुरूपा वा। पुत्राः युधिष्ठिरभीमार्जुनाः पाण्डुकुन्तीमाद्रीक्षेत्रजेषु पञ्चसु त्रयो वेत्यन्वयः। स्पष्टयन्ति स्म क्षेत्रस्येति। क्षेत्रं द्रौपदी पञ्चानाम्। तथापि बीजित्वं त्रयाणामेव। 'अहं बीजप्रदः पिते'तिगीतावाक्यात् क्षेत्रस्य स्वकीयत्वं त्रयाणामेव। अन्ययोस्तु मात्राज्ञोपाधिकम्। कनिष्ठत्वात्। अतोन्ययोः क्षेत्रस्य स्वकीयत्वाभावात् पितामहत्वरूपं फलं कार्यं बीजिनो भगवतः न तयोरिति त्रयः पितामहाः। अन्येषां भगवदाश्रयाणां लोकदृष्ट्या फलसम्भवान् नैवकारः। 'असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् अपरस्परसम्भूतं किमन्यत् कामहैतुक'मितिवाक्यात्। एतदेवाहुः यत्र पुनरिति। अत एव तारायां बृहस्पतिस्त्रियां चन्द्रादुत्पन्नो बुधः फलं चन्द्रस्य न तु बृहस्पतेः। चन्द्रपुत्र इतिप्रसिद्धेः। चन्द्रः तुरीय इति 'अहं बीजप्रद' इत्यत्र निविशते। शास्त्रदृष्ट्याहुरेवेति। एतदभिप्रेत्य टिप्पण्या'मेकस्वामिकक्षेत्रजत्वेन पञ्चापि। एकक्षेत्रजत्वेन तु त्रय एव पितामहा भवन्ती'त्युक्तम्। राज्ञां धीरप्रकृतिकत्वेन 'मल्लानामशनि'रितिश्लोकोक्तदशरसेषु तादृशमाहात्म्यं स्पष्टमित्याशयेनाभासं त्यक्त्वा प्रतीकमेवोक्तं समर इतीति। माहात्म्यमिति अनुभावरूपं माहात्म्यम्। स्वधर्मेति भगवदिङ्गितकरणं देवव्रतं तद्विरुद्धं तद् दैत्यव्रतं तथा च देवव्रते भीष्मे तिमिङ्गिलत्वं दैत्यव्रतं कौरवैः सम्पादितमिति तेषां कौरवाणां तथा सामर्थ्यं जातम्। इदमतिसामर्थ्यमितिभावः। अतिरथलक्षणमग्रे वक्तव्यम्। तद्रूपा इति देवव्रता एव तिमिङ्गिलाः। तथोक्तमिति तिमिङ्गिलत्वमुक्तम्। पितामहत्वेनेति भीष्मस्य। अस्थ्यादीनामिवेति तेषां गिलनमिव। समुद्रत्वमिति चन्द्रेण समुद्रवृद्धौ बहिःस्थितं मारयति समुद्रः दृष्टान्ते। दार्ष्टान्तिके तु परैर्युद्धे बहिःस्थितं तथा। साधनं पोतादिकमपि गिलन्तीति साधनघातकत्वम्। कौरवशब्दाभिप्रायमाहुः कुरुवंशेति। यावद् भगवान् प्लवः ततोर्वाङ् न निवर्तन्ते। यदि निवृत्ता भवेयुः प्लवो विरुध्येत सागराभावात्। चेतनेति 'योप्सु तिष्ठ'न्नित्यन्तर्यामिब्राह्मणात्। कौरवसैन्ये सागरदृष्टिः कर्तव्या। समवायित्वेन जलस्य,'आपो वा इदमासन् सलिलमेव स प्रजापतिरेकः पुष्करपर्णे समभवत् तस्यान्तर्मनसि कामः समवर्तत इदꣳ सृजेय'मित्यत्रापां जगज्जन्मादिकर्तृत्वोक्तेः। तेन लौकिकमायाया-मवान्तरप्रलयकारणत्वमिति सुबोधिन्याः। तेनारणाधिकारो राज्ञः प्रायोपवेशे इति तथा। स्वरूपत इति उक्तरीत्या। महानौकेति करणत्वसम्बन्धाविवक्षायां सम्बन्धसामान्ये षष्ठी। अल्परूपेणेति प्लवशब्दात्। तथा च श्रुतिः 'पुष्पमग्नि'रित्यारणे। अपां पुष्पमग्निरित्यर्थः। अग्निः सूर्यो वा, ब्राह्मणे तथोक्तेः। प्लवत्वं तु 'योप्सु नावं प्रतिष्ठितां वेदे'ति-पूर्वश्रुतेः पृथ्वीवत्। सन्निधीति यतो हि तद्भक्तिरनर्थोपशामिका किमु वक्तव्यं भगवत्सन्निधिस्तथा भवतीति। इदमपि मनसैव द्रष्टव्यम्। 'मनसैवानुद्रष्टव्यमेतदप्रमेयं ध्रुव'मिति-

बृहदारण्यकात्। मनःशङ्केति अत्र चेतनत्वं सागरत्वम्। 'एवमेवे'त्यादिना संसारत्वं च। स्थलत्रयेपि मनःशङ्का। 'इदं सृजेय'मित्युक्त्वा तस्या अग्रे 'तस्मात् पुरुषो मनसाधिगच्छति तद्वाचा वदती'तिश्रुतिस्थ्यामत्र मनउपस्थितिः। मनस्तु यागसम्बन्धि बोध्यम्।'यस्ये विभूतीर्भवतस्तत्सम्पादय नः प्रभ'वितिवाक्यात्। वत्सपदं कृत्वेत्यन्वयार्थम्।"कृत्वातरन् वत्सपद'मितिक्रियाविशेषणं प्रतीकं मूल उक्तम्। नन्वस्तु मनःशब्दष्टीकायां मूले वत्सपदशब्दः कथमिति चेत् सत्यम्। वत्सपदं चतुर्थस्कन्धे मुख्ये प्रयुक्तं मनुप्रसङ्गेष्टादशाध्याये। मनुं प्रति पृथ्वीवाक्यानि। 'नूनं ता वीरुधः क्षीणाः मयि कालेन भूयसा तत्र दृष्टेन योगेन भवानादातुमर्हती'त्युक्त्वा 'इति प्रियहितं वाक्यं भुव आदाय भूपतिः वत्सं कृत्वा मनु'मितिदर्शनात् मनू राजमुख्यः। अग्रे च 'वत्सं कृत्वा मनुं पाणावदुहत् सकलौषधीः तथा परे च सर्वत्र सारमाददते बुधा' इति सर्वानुज्ञा। तथा च वत्सो युधिष्ठिरः तस्य पदं पदनीयं चेतनं सागरं संसारं च कृत्वेत्यर्थः। ननु पाण्डवानां कनिष्ठत्वेन कौरवसैन्यसागरस्य तुच्छकरणं तरणं वा न सम्भवतीत्यत आहुः तुच्छकरणेति। भगवतः प्लवरूपमाश्रयत्वम्। अत्राश्रयत्वं सामीप्यम्। वटे गावः सुशेरत इतिवत्। तत् पूर्वमुक्तम्। तत्तुच्छकरणतरणमनःशङ्कारूपत्रयेपि हेतुः। गीतायामित्येकादशे 'अमी च त्वां धृतराष्ट्रस्य पुत्रा' इत्यादिभिः। तुच्छेति दुरासदातिदुर्धर्षत्वाभावो भगवत्सम्बन्धाभावात् तुच्छत्वरूपो जातस्तस्य करणम्। तथापीति भगवदाश्रयत्वेपि प्रकारान्तरेण तरणान्वयानुकूले। सम्यगिति 'अजानता महिमानं तवेदं मया प्रमादात् प्रणयेन वापि' 'यच्चावहासार्थमसत्कृतोसी'तिवाक्यात् सम्यगाश्रयणे नैवं कुर्युः। अतो महतां बहुमानाद्यकरणात् 'स कर्ता सर्वपापानां योऽभक्तस्तव केशव'इतिवाक्यात् पापेन मुक्तदेहाभावात् पूर्वं पापभोगार्थं नृगकृकलासवत् *पिपीलिकात्वम्। मुक्तौ ब्रह्मदेहत्वं, पापसम्भावनायां* तु पिपीलिकात्वम्। सर्वोपनिषदि ब्रह्मादिपिपीलिकान्तमुक्तम्। इदं च 'नित्यदा ह्यङ्गभूताना'मितिद्वादशस्कन्धोक्तनित्यप्रलयपक्षे। पापभोगार्थं पिपीलिकात्वेन पाण्डवानां स्वदेहदर्शनमित्याचार्याणां भक्त्या दर्शनम्। एवकारस्तु ब्रह्मभवनपक्षस्य संन्यासाभावात् पुष्टिमर्यादाङ्गीकृतपाण्डवानां मर्यादांशत्वाच्च व्यवच्छेदकः। 'वेदान्तविज्ञाने'तिश्रुतौ संन्यास उक्तः। पिपीलिका अमुक्तदेहः। अत्रापि भगवत्प्रतिपक्षाणां महतां हननं न पापजनकं गीतातात्पर्यात्, तथा भगवतोऽवज्ञानमपि, 'अपि चेत् सुदुराचारो भजते मामनन्यभाक् साधुरेव स मन्तव्य' इतिवाक्यात्। तत्र हेत्वन्तरमाहुः स्वदृष्ट्येति। न तु दिव्यदृष्ट्या। स्वीयवाची स्वशब्दः स्वीयदृष्ट्या भगवान् गृह्यत इति हेतोर्भगवदिच्छातो यो मर्यादांशस्तदर्थं पापं वर्तते क्रीडार्थमित्यर्थः। पिपीलिकात्वे युक्तिमाहुः भगवद्भाव इति। भगवति विषयताभङ्गेन यदुत्पाज्ञाने भगवत्त्वे भगवद्भावरूपे कथं केन प्रकारेण पिपीलिकात्वं स्यात् तेषां प्रसिद्धानां

भगवदीयानाम्। आवृत्त्या तेषामवस्थापनात्। समत्वाद् भगवतः कौरवपाण्डवाना-मवस्थापनात् व्यथितकरणम्।'स्वधर्मे निधनं श्रेयः परधर्मो भयावह' इतिवाक्यात्। यद्यपि क्षत्रियाणामयं धर्म एव तथापि भगवदीयत्वाच्छ्रवणादय एव धर्माः। सर्वथापि त एवेत्यादि, तार्तीयव्यासवचनात्। तथा च परधर्माद् भयेन तुच्छकरणम्। दुरासदातिदुर्धर्षातिरिक्त-तुच्छब्रह्मप्रवेशात्। 'एष एव तुच्छ' इति विद्वन्मण्डनान्ते धृतश्रुतेः। 'तोदनात् तुच्छमुच्यत' इतिमहाकौर्म्यात्। नित्यप्रलये तुच्छसृष्टिकर्तृत्वमपि। अतः तुच्छाज् जातत्वात् तुच्छस्य तत्करणम्। उभयमिति तुच्छकरणं तरणं च। सकृदेवेति एकक्रम एव। यद्वा तुच्छ-भगवत्प्रवेशस्य दुराधर्षातिदुर्धर्षत्वनाशक्षणे प्रागभाव इह तुच्छभगवत्प्रादुर्भावो भविष्यतीति-प्रत्ययात्, तदुत्तरक्षणे तुच्छाविर्भावः ततस्तरणम्। अत्र तु दुराधर्षादिनाशक्षणे तुच्छ-प्रवेशः। सोऽलौकिकः क्रीडास्थत्वात्। 'सद्यो नष्टस्मृतिर्गोपी'त्यत्रानुभवस्मरणयोर्मध्ये न संस्कारः तद्वत्। तदुक्तं सकृदेव जातमिति। तथा चोभयं दुराधर्षत्वादिनाशतुच्छभगव-त्प्रवेशं सकृदेव जातमिति दुर्धर्षादिनाशस्तुच्छकरणं चेत्युभयं सकृदेव जातमित्यर्थः। उभयोर्मध्ये न प्रागभाव इतिभावः। अनन्तशक्तित्वेनात्र संशययोगव्यवच्छेदक एवकारः। अन्तत इति यादवरूपास्त्रकुलसंहारेऽन्ततः त्रयाणां *'अश्वत्थामकृपकृतवर्मणां त्रयाणा'*-मिति श्रीवल्लभाः। वत्सपदमिति वत्सस्य युधिष्ठिरस्य पदं पदनीयमित्युक्तम्। फलवत् साधनस्यापि पदनीयत्वात् साधनफलैकीकरणम्। तत्र चेतनसागरपक्षे स्पष्टम्। वत्सपदत्वम्। पदैंशत्रयम्। व्यष्टिसमष्टिभेदेन। व्यष्टिरूपौ अश्वत्थामकृतवर्माणौ धनुर्वेदसंरक्ष्यधर्मादि-रूपत्वात्। समष्टिर्द्रोणः कृपो वा धनुर्वेदश्रद्धत्वात्। 'यो यच्छ्रद्धः स एव स' इतिवाक्यात् धनुर्वेदात्मक इति। तस्य पुत्रोऽश्वत्थामा नित्यलीलायामपकाररूपः कार्यात्। स आत्मा पुत्रनामा द्विधा विदीर्णः पुत्ररूपत्वेन वृद्धेरात्मन इति। वारद्वयमिति 'अवधीन्निशि बालका'निति ब्रह्मास्त्रसन्धानेन च। पूर्वं जातवत्सपदं न तथा विदीर्णमुखं भवतीति। प्लवमारुह्येति पूर्वं भगवदाश्रयत्वमित्यत्र सामीप्यसप्तमी व्याकृता। वटं गाव इव आरुह्य। तीर्णमित्यादरे वीप्सा। ननु वत्सपदं कृत्वातरन्नित्यत्र पाण्डवानां न कर्तृत्वं किन्तु तरणमात्रेतः क्वो दुर्लभत्वमित्याशङ्क्याहुः कीर्तेरिति। 'ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसी'तिवाक्यात्। तथा च फलप्राप्तिः पाण्डवेष्विति कर्तृत्वमपि पाण्डवेषु फलसाधनयोरैकाधिकरण्यात्। अन्यथा सैन्यस्थेष्वपि कर्तृत्वं परस्येति न वत्सपदकरणे सैन्यानां कर्तृत्वम्। 'परात् तु तच्छ्रुते'रिति व्यासवचनात्। गौणं तु कर्तृत्वं सैन्यपाण्डवयोः समानमित्यर्थः। अथवा पाण्डवानां धर्मेन्द्रवाय्वादिरूपत्वेन कर्तृत्वं सूपपादम्। अपिशब्देन जयः। दृष्टविरोधमाशङ्क्याहुः इदमिति। अन्यत्र दृष्टं कर्तृत्वमन्यत्रेति। अत्यन्तत्वं शास्त्र-मात्रगम्यत्वम्। एवं सैन्यसागरतरणमुक्तम्। जलसागरं समवायिदृष्ट्योक्तम्। तत्तरणमप्यत्र।

युधिष्ठिरयागरूपकृत्या मनोपि यागे इति। स चारणे 'केतवोरुणासश्चे'त्युपक्रमकेस्ति, तथा 'दुरत्ययं कौरवसैन्यसागरं' जलधिरूपं वत्सस्य युधिष्ठिरस्य पदं पदनीयं कृत्वातरन्। तदुक्तं आरणे, 'जानुदघ्नीमुत्तरवेदीं खात्वा अपां पूरयित्वा गुल्फदघ्नम् पुष्करपर्णैः पुष्करदण्डैः पुष्करैश्च सꣳस्तीर्य तस्मिन् विहायसे अग्निं मणीयोपसमाध्याये'तिश्रुतिभागेन। व्याख्यातश्च तत्रैव,'जानुदघ्नीमुत्तरवेदीं खात्वा अपां पूरयति। अपाꣳसर्वत्वाय पुष्करपर्णꣳ रुक्मं पुरुषमुपदधाति। तपो वै पुष्करपर्णं, सत्यꣳ रुक्मः अमृतं पुरुष'इत्यादिना। 'खात्वे'ति यस्य कस्यचित् पदनीयं कृत्वा। समवायिजलभावनया पूरयति। 'सर्वत्वाय' कार्यकारणरूपत्वाय। अत्र तपोधर्मरूपः कृतवर्मा सत्यं द्रौणिः अश्वत्थामा व्युत्पत्त्याश्वशब्दस्य। यद्यप्यश्वत्थामापकारस्तथा'प्येकं भगवतः कार्य'मिदमपि। अमृतं द्रोणः कृपो वा। त्रयाणाममारणात्। कार्यकारणसागरावुक्त्वा विषयतासागरमाहुः एवमेवेति। संसारप्रपञ्चयोर्भेदः। नित्यत्वानित्यत्वाभ्याम्। मायाजन्या विषयता हि कार्यकारणसैन्ययोर्विषययोर्वर्तते, यया दृष्टिः सविषया भवति। अन्यथा ब्रह्मात्मकं जगत् न घटत्वादिप्रकारेण भासेतेति। स्फुटमेतत्, 'ऋतेर्थं यत् प्रतीयेते'त्यस्य सुबोधिन्यां द्वितीयस्कन्धे नवमाध्याये। भगवत्सेवेति भगवत्सेवारूपम्। भगवत्सेवैव भगवत्सेवामात्रम्। संसारपदार्थो न सेवामात्रं क्रियात्वाभावात्। तस्य परिग्रहस्तु भगवत्सेवामात्रं भवत्येव कात्स्न्यार्थकमात्रमत्यये कृत इत्येतावत्पर्यन्तानुधावनम्। पदार्थशब्दस्तु सेवान्तर्गतः संसारः पदार्थो न तु मायिकः।'ततोहंनामाभव'दितिश्रुतेः। ततः संसारपदस्यार्थः स न तु मायिकसंसार इत्यर्थः। हीति सिद्धान्ते अनुपदोक्तश्रुतिविरोधाद्धीति। पारस्थितमिति चैतन्यसागरे उत्तरार्धोक्तयुधिष्ठिरयागरूपं पारस्थितम्। जलसागरे नारायणरूपं पारस्थितम्। आरणे 'अपाꣳ रसमुद्यꣳ सन् सूर्यशुक्रꣳ समाभृतं अपाꣳ रसस्य यो रसः तं वो गृह्णाम्युत्तम'मिति। समुदयन् सन् यतः पदार्थो भवति। सूर्यश्च शुक्रश्च तयोः समाहारः सम्यक् आभृतम्। यच्छब्दार्थे रूपम्। उत्तमं नारायणमित्यर्थात्। संसारसागरे आत्मकार्यमहंनामरूपं पारस्थितमिति ज्ञेयम्। भगवदाश्रया इति पाण्डववदन्येपि। पाण्डवपदसूचितार्थः। अन्यट्टिप्पण्यादौ स्फुटम्।

१०–१–६. द्रौण्यस्त्रेति श्रुतमिति परीक्षिज्जन्मन्यूपय उक्तास्तेभ्यः श्रुतं प्रायोपवेशे। आहेति परीक्षित् श्रीशुकं प्रत्याह। सर्वथेति 'आत्मा वै पुत्रनामासी'ति श्रुतेर्धर्मेन्द्रवायुवत् कुक्षिप्रवेशसम्भवेपि विशेषेण दग्धं यदङ्गं तद्रोपनेऽशक्तिरुक्ता सर्वथापदेन। तदुक्तं उपनिषदि यक्षःप्रसङ्गे। कृपातिशयमिति कृपात्वेन कुक्षिगतत्वेन न कार्यकारणभावः। कुक्षौ कृमिकीटादिगोपनायाप्रवेशात्। अतोतिशयशब्दः। तत्रापि शरणगमनं हेतुः। सोत्रेषाग्रे वाच्यः कुक्षिगतशब्देनाक्षिप्यतेयमर्थः। आक्षेपोर्थापत्तिः। तदुक्तं 'आर्थिकं तु प्रवक्ष्यामी'ति प्रथमस्कन्धसुबोधिन्याम्। आर्थिकं अर्थात् आक्षेपात् प्राप्तम्। आगतम्।

'तत आगत' इति ठक्। अश्वत्थामपदं विहाय द्रौणिपददानस्य प्रयोजनमाहुः माहात्म्येति। माहात्म्यस्वरूपमाहुः द्रोणो हीति। अस्त्रविद्यायामिति 'सरहस्यो धनुर्वेद' इति प्रथमस्कन्धात्।तथा चोपवेदसहितयजुर्वेदाध्येतृत्वं माहात्म्यं महात्मनः सप्तचिरञ्जीव्यन्तर्गतस्य भावः। तस्य चेति तादृशस्याश्वत्थाम्नः, चकारेण भगवदिच्छया। सर्वात्मना दाहे गोप्यमंशमाहुः अर्जुनस्येति। नारायणस्य कृष्णस्य विष्णुत्वम्। 'विष्णुः सर्वगुहाशयः आविरासी'दितिवाक्यात्। तत्सम्बन्धी वैष्णवः नरांशोऽर्जुनः। अर्जुन इतिवृक्षनाम्ना 'वैष्णवा वै वनस्पतय' इतिश्रुतिसारणाद् वैष्णवत्वम्। अर्जुनः कौ इतिख्यातवृक्षस्य नाम। 'अर्ज अर्जने। अर्ज्यते इत्यर्जुनः। अर्जेर्णि लुक् चेति उनन्। 'सितातपत्रं जग्राहे'त्यत्र सुबोधिन्यां 'अर्जुनस्तेन बुद्धिमा'नित्युक्तम्। अन्यथा कृष्णस्य भगवत्त्वेन शुकत्वेपि सितातपत्रग्रहणे न प्रवर्तेत राजत्वात्। अतः सात्त्विकत्वाद् वैष्णवत्वम्। अभिमन्युसुतस्य बीजमिति वक्तव्ये 'सन्तानबीज'मित्यस्य प्रयोजनमाहुः वंशात्मकमिति। तेन वंशः सन्तानः आत्मनि स्वरूपे यस्य बीजस्येति'सन्तान'शब्दार्थ उक्तः। सम्यक् तन्यते यत् तत् सन्तानं कर्मणि घञ्। तादृशं बीजम्। बीजमपि न कर्मणावशिष्टमपि तु बीजत्वेनेत्याहुः बीज भावेति। बीजत्वेनावशिष्टमित्यर्थः। बीजम् 'बीजं तदुच्यते शास्त्रे दग्धं यन्नापि नश्यती'ति दग्धांशः। अत एवेति पूर्वोक्तार्थत्वादेव सन्तानबीजं न तु अभिमन्युसुतस्य बीजमित्युक्तमित्यर्थः। अर्जुनाभिमन्य्वोः परीक्षिता मुक्तेः। कुरुग्रहणप्रयोजनमाहुः कुरूणामपीति। न मुक्तिरिति 'नापुत्रो जयते लोका'नितिवाक्यात्। 'भ्रातॄणामेकजातानामेकश्चेत् पुत्रवान् भवेत् सर्वे ते तेन पुत्रेण पुत्रिणो मनुरब्रवी'दितिमनुस्मृतेश्च लोकजये मुक्तिस्तत्तद्देवसायुज्यम्। वंशाभावे आत्मान्तराभावात् कस्य मुक्तिः, आत्ममते तु त्रिविधात्मनामात्मोपनिषद्युक्तेर्मुक्तिः स्यादेव। वंशः कर्मात्मकोपि 'कर्मणा जायते जन्तु'रित्यादिना कर्मवादात्। 'आत्मा वै पुत्रनामासी'तिश्रुतेः अग्रे मुक्त्यभावः। कुरूणां तु 'परीक्षिता त्वेतदर्थं विष्णुरातेन वैष्णवी मुक्तिर्विलक्षणा सा' न मुक्तिरितिपदेन निषिध्यते। तदुक्तं बृहदारण्यके वंशब्राह्मणे'अथ वंशः,तदिदं वय'मिति। 'वय'मित्यस्मत्पदार्था आत्मानः। तथा च कुरवश्च पाण्डवाश्च कुरुपाण्डवाः तेषामितिविग्रहः। तत्र दोषं ज्ञात्वा विग्रहान्तरमाहुः कुरुभिः सहिता इति। सहार्थतृतीया न तु हेत्वादावितिबोधनाय सहिता इति। एतस्य पदस्य 'सुपो धातुप्रातिपदिकयो'रिति वा सूत्रेण भिस्लोपकाले लोपः। सुप्त्वाभावेपि सन्नियोगशिष्टन्यायेन। तथा च कुरूणां मुख्यमोक्षापत्तिर्दोष इति न द्वन्द्वविग्रह इतिभावः। गौणी मुक्तिस्तु मुख्यवंशत्वाभावात् परीक्षितः। कुरुपाण्डवेत्यत्र विभक्त्यभावो न लेखकदोषात् किन्तु परमभागवतमतेनालौकिकः। तदुक्तं 'हसन्ति नन्दन्ति वदन्त्यलौकिका' इति 'इत्यलौकिकशब्दानां

१. =य सन्तान। २ पुस्तकान्तरे।

दिङ्मात्रमिह दर्शित'मिति सिद्धान्तकौमुदीसमाप्तौ। सुबोधिन्यामलौकिकविग्रहो वा। एतादृशस्य लौकिकविलक्षणस्य प्रसिद्धत्वाद् यथा चतुर्थे पृथूपाख्याने रञ्जयतीति राजेति-व्युत्पत्तेः सूचनात् तथा। पक्षान्तरमाहुः कुरव इति शब्दो नञन्तः पाण्डवा इत्यपत्यप्रत्ययान्त इति कौरवाः पाण्डवा इति। अत्र चकार एकः। तेन पूर्वोक्तविग्रहे एकः समुच्चयार्थकः एको द्वन्द्व इति न द्वौ द्वन्द्वौ। चकारद्वये तु द्वन्द्वद्वयापत्तिः। जनपदे लुविति कुरुशब्दस्य जनपदावाचकत्वेपि'जनपदे लु'बितिसूत्रे लुबितियोगविभागाल्लुबिति सूत्रेण लुप्। टिप्पण्यादौ विस्तरस्तु द्रष्टव्यः। बीजमात्रेति अविनाशि दृढवस्तुरूपेण। सत्तारूपं गोपनकर्म न सम्भवतीत्यत आक्षेप्यमाहुः दग्धैरपीति। अदग्धेति शास्त्रदृष्ट्येति बोध्यम्। 'अविप्रणाशः सर्वेषां कर्मणामिति निश्चयः कर्मजानि शरीराणि तथैवाकृतयो नृपे'तिभारते। अन्यथा प्रतीतैरित्यस्यार्थष्टिप्पण्याम्। धर्मरक्षेति टिप्पण्यां स्पष्टोर्थः। मोक्षे प्रतीति प्रतिबन्धोऽशुभकृतः। तदुक्तं टिप्पण्यां 'येदमत्राधिष्ठिता देवता हि स्वकार्यं कृत्वा निवर्तत' इति। स्वकार्यमशुभभोजनेन मोक्षप्रतिबन्धनिवृत्तिः। बीजमिति दृढमविनाशि वस्तु बीजमित्युक्तम्। अरक्षायामिति सन्तानस्य जातत्वेन प्रयोजनाभावादितिभावः। कुरुवंशेति कुरुपुत्राः 'परीक्षित् सुधनुर्जह्नुर्निषधश्च कुरोः सुता' इत्युक्ताः तदन्वये विचित्रवीर्यक्षेत्रे बादरायणपुत्रौ धृतराष्ट्रपाण्डू। मूलत इति कुरुर्भक्तः मूलं धातारमवधीकृत्य सहस्रशिरसः पुंसो नाभिहृदसरोरुहात् 'जातस्यासीत् सुतो धातुरत्रिः पितृसमो गुणै'रिति नवमस्कन्धचतुर्दशाध्यायवाक्यात् धाता मूलं भक्त इति प्रसिद्धम्। ध्यानार्थ इति ध्यानार्थे ध्यानविषयं 'एष ध्यानार्थे' इत्यस्य सप्तम्यन्तत्वेप्युपपन्नम्। अविरोध इति न च कृतहानिरकृताभ्यागमो दोषः 'अस्त्रतेजः स्वगदये'त्यस्याकृतस्याभ्यागमादिति वाच्यम्। कृतेना-'त्तचक्र' इत्यनेन तेजस्तत्त्वसुदर्शनेनास्त्रतेजोदूरीकरणे उभे 'वघूधाते' न शान्ते भवतः। अकृताभ्यागमे तु वातेन दीपशान्त्यादिवदस्त्रतेजःशान्त्यादेः सुवचत्वात्। 'वायोरग्नि'-रितिश्रुतेः स्वकारणे वायौ लीनश्चक्र आत्त इत्यर्थे गौरवमितिभावः। कालनिग्रहेति कालः परीक्षिन्मारकः तस्य निग्रहः स्ववशे स्थापनं तदर्थम्। कालसत्त्वे गृहीते निःसत्त्वः कालो न परीक्षिदपकर्तेति। अत एवेति प्रयोजनाभावादेव। एवमिति पाठे ध्यानार्थे रूपं दर्शयित्वा। सानुभाव इति अनुभावः प्रथमस्कन्धे सप्तदशाध्याये 'इत्थम्भूतानुभाव' इत्यस्य सुबोधिन्याम्। 'मृतोपि जीवन् तिष्ठतीत्थम्भूतानुभाव' इति टिप्पण्यामपि विवृतः। दग्धादग्धभावनम्। तच्चक्रं कालचक्रम्। परिभ्रान्तमिति कालकर्मस्वभावरूपभगवच्छक्त्यन्तर्गतं सत्। इयमिति परिदृश्यमाना। 'परामिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ'विति-सूत्रोक्तजीवावस्थेव। अनुभावतिरोभावात् कालपरिभ्रमणम्। भगवति निवृत्ते श्रीभागवताश्रयणं नामात्मकभगवदाश्रयणम्। तापदुःखाप्रतीकारश्च। मे मातुर्यः कुक्षिं गतः स जुगोपे-

त्यन्वयो न भवति। कुक्षिगतस्य ध्यानार्थत्वादित्याशयेनाहुः मातुर्मयो ज्ञेय इति। भवदुक्त इति श्रीशुकोक्ते। मम परीक्षितः विश्वासो भविष्यतीतिभावेन वक्तुः शुकस्य प्रोत्साहनम्।

१०-१-७. वीर्याणि तस्येत्यत्र पूर्वपृष्टमिति वीर्यत्वेन रूपेण चरित्रत्वावच्छेदेन च भगवच्चरित्रं पूर्वयो'र्यदोश्चावतीर्ये'तिश्लोकयोः पृष्टम्। तत्र पूर्वं पृष्टं वा। प्रकारान्तरेणेति अमृतसाधकत्वरूपेण प्रकारान्तरेण। अनुवदनीति वीर्यमपि चरित्रविशेष एवेतिभावः। तेन वीर्यानुवादेपि चरित्रमनुवदतीत्युक्तम्। प्रश्नमिति 'वदस्वे'ति सम्प्रश्ने लोट् इतिभावः। अन्तर्बहिरिति पुरि शेत इति पुरा आसेति पुरमुपतीति व्युत्पत्तिभ्यः पुरुषोन्तः अमृतं प्रयच्छति। *यथात्तचक्रो ध्यानम्। गदाधरः सन् मृताभावम्। किं पुनः स्वांशैर्देहानाममृतं* प्रयच्छतीति। एतत् पुरुषरूपैरमृतं प्रयच्छतीत्येवमुक्तम्। बहिः कालरूपैः यथा मम तक्षकरूपेण, अन्येषां कालकर्मस्वभावान्तर्गतकालरूपेण, केषाञ्चिद्भयनाम्ना कालेन। भयेन मृत इतिप्रयोगात्। यद्यपि विस्मरणं मनोधर्म आन्तरः तथापि साधनानां बहिष्ठत्वाद् बहिर्मृत्युं अत्यन्तविस्मरणरूपं प्रयच्छतीत्युक्तम्,'मृत्युरत्यन्तविस्मृति'रितिवाक्यात्। यद्वा बहिर्देहेभ्यो मृत्युं प्रयच्छति आन्तराणां जीवानां नित्यत्वात्। मायामनुष्यस्येति राज्ञो ज्ञानम्। यद्वा मायया मनुष्यः मानुषी तनुर्मनोरपत्यमितिबुद्धिविषयः। अग्रे स्पष्टम्। अनेनेत्यादिटिप्पण्याम्। स्पष्टम्। तन्माहात्म्यं वेति तस्य भगवतो महात्मनो भावः देवत्वम्। रूपान्तरेति प्रत्यभिज्ञेत्यर्थः। 'ॐ तत्सदितिनिर्देशो ब्रह्मणस्त्रिविधः स्मृत' इतिगीतायाः। पुरुषरूपाणीति अत्रायं भावः, वेदवेदान्तसारे श्रीभागवते वेदान्तरीत्या पुरुषरूपाणि व्याख्यातानि। कालरूपाणि वक्ष्यन्ति। वेदरीत्या चात्मनारायणस्य पुरुषरूपाणि मत्स्यादीनि मत्स्यपुराणादि प्रसिद्धानि। एवं भोक्तृकोटिरुक्ता। तस्याः कालानधीनत्वज्ञापनाय कालरूपभोग्यकोटिमाहुः कालरूपाणीति। कालः संवत्सरः प्रत्यक्षः तस्य रूपाणि,आरण्यके प्रसिद्धानि। विषयाः प्रत्यक्षविषयाः। केचिदिति विरलाः। एतेन वेदार्थस्य उत्कर्ष उक्तः। भगवद्ध्यानेति भगवतो ध्याने रूपाणि ध्यानविषयाणि रूपाणि। अन्य इति अस्वरसस्तु 'विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो शृणु प्रथमं महतः स्रष्टृ द्वितीयं त्वण्डसंस्थितं तृतीयं सर्वभूतस्थं यज् ज्ञात्वा मुच्यते बुधः' इतिवाक्यविरोधः। अत्रोक्तस्य'खिलदेहभाजामन्तः पुरुषरूपै'रित्यस्य विरोधश्च। स्वमते कालरूपाण्याहुः कालरूपाण्याब्रह्मेति। ब्रह्मरूपं तृणस्तम्भरूपाणि च मर्यादीकृत्याभिव्याप्य च। यद्यपि 'कालात्मा भगवान् जात' इति ब्रह्मरूपं कालात्मकं तथापि 'यतो वाचो निवर्तन्त' इतिश्रुत्या सन्दिग्धम्। तृणस्तम्भ औषधिविद्येति सोपि। तथेति सर्वोपनिषदि पिपीलिकान्तमुक्तं तत्र न विद्या। विशेषोयमिति पुरुषत्वकालत्वरूपो विशेषः। अत्र इति द्वैविध्यस्यान्तर्बहिर्भेदमात्रकृतत्वात्। कथमपीत्यादि

कथमपीति मूलीयोतशब्दस्य प्रश्नार्थकत्वं स्वीकृत्यार्थः। 'उत प्रश्ने वितर्के स्या'दिति विश्वः। कथमिति मृत्युमित्यनेनान्वेति। कथमिति पुरुषरूपप्रकारेण कालरूपप्रकारेण वा। मृत्युमेव प्राप्नुवन्ति न तु पुरुषरूपेणामृतम्। साधनैरिति पुरुषकालरूपैरित्यत्र हेतुतृतीययोक्तेः पुरुषकालरूपसाधनैः। बहिर्मुखाः बहिरुपाया बहिः कालरूपोपायाः 'असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् अपरस्परसम्भूतं किमन्यत् कामहैतुक'मिति 'अन्धं तमः प्रविशन्ति ये सम्भूतिमुपासत' इति शारीरब्राह्मणश्रुतेः। 'सम्भूतिं' विषयम्। 'तमो'विस्मरणसाधकत्वाद् विस्मरणं'मृत्युरत्यन्तविस्मृतिः'।'भूयस्तमो'मृत्युः। 'ततो भूय इव ते तमो य उ सम्भूत्याँ रता' इतिश्रुतेः। अन्तर्मुखा इति अन्तरुपायाः अन्तः पुरुषरूपोपायाः। कथमपि साधनैरमृतमेव प्राप्नुवन्ति न तु कालरूपेण मृत्युम्। पुरुषकालरूपयोर्मृत्य्वमृतसाधनत्वे श्रुतिः 'पराञ्चि खानि व्यतृणत् स्वयम्भूः तस्मात् पराङ् पश्यति नान्तरात्मन् कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छ'न्निति। पराग्विषयदर्शनेन तमः, जिघृक्षाग्लानी। अग्रे प्रत्यगात्मदर्शनेनामृतत्वकथनात्। एतदुक्तं भवति। बहिर्मुखानां मत्स्यादिरूपाण्यपि सविशेषत्वेन मृत्युदातृत्वात् कालरूपाण्येव, अन्तर्मुखानां विषया अपि भगवद्विषयकत्वेनामृतदातृत्वात् पुरुषरूपाण्येवेति। तथात्व इत्यादि सर्वरूपाणां भगवदीयत्वे। तस्येति भगवतः सामर्थ्यं माया तत् किं अन्तर्बहिर्द्वैधेन कार्येण कृतं अनुमितम्। पराक्रम इति मायारूपे इच्छारूपे वा। अयमिति तस्य किं सामर्थ्यं तथेच्छा वेत्ययम्। तत् वीर्यम्। निर्णीतमिति तत्र बहिर्मुखेभ्योप्यमृतदानात् सन्देहे तथेच्छा वेति द्वितीयकोटिरेव निर्धारिता भविष्यतीति भावः। एतदिति अखिलदेहभाजां मृत्य्वमृतदानम्। 'इन्द्रो मायाभिः पुरुरूप ईयत' इतिश्रुत्युक्तपुरुरूपेष्वेकतमं रूपं 'माययान्यदिवे'तिश्रुतेर्वाहुः बुद्ध्यावरिकेति। 'माया च तमोरूपे'तिनृसिंहतापिनीयात् तमः, सा द्रष्टृबुद्ध्यावरिका करणदोष इतिभावः। तथा ज्ञानेति मनुष्यत्वप्रकारकमनुष्यविशेष्यकज्ञानविषयस्य स्वयं तु स्वयंप्रकाश इति-भावः। अस्मदुपेति परीक्षिदाद्युपकाराय। त्वापीति शुकस्यापि। आत्मने पदमिति 'स्वरितञितः' इतिसूत्रेणेत्यर्थः। सर्वत्रेति वदनादौ। यथाहुः 'यन् मनसा ध्यायति तद् वदति यद् वदति तत् करोती'तिश्रुतेः। जानातीच्छतियतत इति नैयायिकप्रवादः।

१०–१–८. रोहिण्या इत्यत्र चरित्राणीति शते पञ्चाशदितिन्यायेन वीर्यचरित्रयोः सामान्यचरित्रग्रहणम्। भगवत्प्रभाव इति ऐश्वर्यस्य विद्यमानत्वात् स प्रभावः कार्यविशेषः। तत्रेति कार्यान्तरे रोहिण्यास्तनयस्य देवक्यां सप्तमत्वे। कारणम्। उभयत्रेति रोहिण्यां देवक्यां च।

१०–१–९. कस्मान् मुकुन्द इत्यत्र व्रजगमन इति कारागृहं त्यजतु नाम भक्तदुःखसारकत्वान् नित्यसन्निहितहरिकामथुरापुरीं त्यक्त्वा व्रजगमने। मोक्षदातेति मुक्तं

मोक्षं ददातीति मुकुन्द इतिव्युत्पत्तिः। मोक्षः कालादिभ्यो भयनिवारणम्, 'अभयं ह वै जनक प्राप्तोसी'ति बृहदारण्यकात्। 'घेः किन्तु कर्मण्यधिकरणे चे'तिसूत्रैकवाक्यतया कर्माधिकरणयोर्भवति। अतः कर्मणि घञ्। परिकल्प्येति सजातीयविजातीयस्वगतद्वैतवर्जितमिति परिकल्प्येत्युक्तम्। नन्दादीनामाभीरत्वेन यदुज्ञातित्वेन परिकल्पनं नास्तीति पक्षान्तरमाहुः अथ वेति। सम्यक्ज्ञातीति सम्यक्त्वं वर्तमानत्वम्। सम्यक्ज्ञातिभावो यदुषु। तद्रहितैः आभीरैः। साकमितिभावप्रधानमित्याशयेनाहुः सहभावमिति। 'इति तु न साम्प्रत'मित्यादौ केवलाव्ययप्रयोगदर्शनात्। सार्धमित्यपि मूले पाठः। ऋध्यति ऋध वृद्धौ। बाहुलकात् कम्। सह ऋधं वर्तते। सह अकम्। अम्प्रत्ययः सहस्य सः। 'सहस्ये'तिसूत्रेण। 'आभीक्ष्ण्ये णमुल् वा'। अन्यट्टिप्पण्यां स्पष्टम्। ननु सहभावस्तु यत्र क्वचन गमने भविष्यत्येव किं प्रश्नेन। न च वासाधिष्ठानज्ञानेन मोक्ष इतिप्रश्न इति वाच्यम्। तदपि भविष्यत्येवेति चेद् असङ्गश्रुतिविरोधप्रश्न इति चेत् तत्राहुः भगवतस्त्विति। एते नन्दादयः परीक्षिद्बुद्ध्या सगुणाः न तु निर्गुणाः तैः सहासङ्गपुरुषवासप्रश्न इति न श्रुतिविरोधप्रश्नः। न च द्वितीयनवमाध्यायश्रवणेन विशुद्धसत्त्वप्रतिष्ठिता नन्दादय इति राज्ञो ज्ञानं वर्तत इतिवाच्यम्। राजत्वान् नापीति वक्तुं शक्यत्वात्। यद्वा असङ्गः पुरुषः क सहभावं कृतवानिति प्रश्नो न सम्भवति विरुद्धत्वात्। अत उक्तं'सात्वतां पति'रित्याशयेनाहुः भगवतस्त्विति। सात्वतां सङ्गो वर्तत इति न सर्वथाऽसङ्ग इति प्रश्नसम्भव इतिभावः। सतामेवेति न तु भक्तानाम्। वासुदेवकार्यत्वाद् भक्तैः सह निगूढभावकरणस्य। संरक्षणेति सङ्कर्षणांशः। स इति पूर्वः। सात् सत्त्वगुणः सोस्त्येषामिति सात्वन्तः शुद्धसत्त्वे प्रतिष्ठिताः प्रतिनिधितया स्थिताः तेषाम्। एवेति द्वितीयनवमाध्याये 'प्रवर्तते यत्र रजस्तमस्तयोः सत्त्वं च मिश्रं न च कालविक्रम' इतिवाक्यपात्।

१०–१–१०. व्रजे वसन्नित्यत्र तज्जातीति आभीरजात्यनुकरणम्, 'वयं गोवृत्तयोनिश'मितिवाक्योक्तं तद्भावानुकरणं, 'श्रूयतां मे पित'रिति आभीरभावः पितृत्वभावः तस्यानुकरणं ते एव लीले तयोः प्रश्नः। पूर्वश्लोके अथवेत्यत्रोक्तवाक्यद्वयाश्रवणमुक्तं परीक्षित इत्यस्वरसेन पक्षान्तरमाहुः पूर्वोक्तानुवाद इति। पूर्वोक्तपक्षयोगव्यवच्छेदक एवकारः। स्पष्टमिति राजचरित्रं राज्ञा परीक्षिताऽन्यतः श्रुतमेवेति स्पष्टमित्यर्थः। पृच्छतीति स्वेन वध्यबालकहिंसा गर्हितेति न कृतेति गर्हितप्रश्नः आत्मौपम्येन सर्वदर्शनस्य श्रीभागवते स्मरणात्। का व्यवस्थेतीति मुक्ता वा संसृता वा। मुक्तेति फलिष्यति। 'कामाद् गोप्यो भयात् कंस' इतिवाक्यात्।

१०–१–११. देहं मानुषमित्यत्र द्वारकायामिति स्मार्तप्रयोगः। आचार्यवाचां वेदतुल्यत्वाच्छन्दसि सर्वविधिविकल्पान् न द्वारिकायामित्युक्तम्। तत्र स्थितस्येति

वृष्णिषु स्थितस्य विशेषस्य भक्तियोगविधानादधिकस्य सङ्कर्षणांशकृतभूभारहरणादधिकस्य च प्रयोजनस्य फलस्याभावात्। अग्रेपि हेतुः। तत्रैवोक्तमिति टिप्पण्यां स्पष्टम्। न सन्देह इति लुङो भूते विधानात् नवमोक्तकृष्णजन्मनो यदुषु स्मारणात् स्वदृष्ट्या न सन्देहः।

१०-१-१२. एतदन्यचेत्यत्र युक्तिविरुद्धमिति उत्तरार्धीयं जरासन्धयुद्धादिकं, गोपालस्य राजयुद्धादिकं युक्तिविरुद्धम्। तदीयत्वादिति म इत्यस्य ममेत्यर्थादसत्पदार्थगोपनेन तदीयत्वम्। ज्ञानार्थमिति मन ज्ञाने दि० आत्म० अ० मन्यते। 'मनेरुचे'तीन्। सदानन्द इति चिद्वाचकः कृष्णशब्द इति न न्यूनता। 'सत्यं परं धीमही'त्यत्र चिदानन्दयोरुपलक्षणात्। 'अर्हसीत्यत्रार्ह पूजायाम्। अत्र पूज्यो मर्मभिज्ञः इत्याशयेनाहुः एतन्मर्माभिज्ञ इति। अत एव 'सर्वज्ञे'तिसम्बोधनम्। सर्वेष्वन्तर्गतानि मर्माणीति। 'सर्वज्ञः शिवः शुकोभूद् वृषध्वज' इति द्वादशस्कन्धात्। श्रद्दधान इति तस्मै। तादृशोपीति कृष्णविचेष्टितं तद् दृश्यते यत्र विस्तारे। 'त्यदादिषु दृशेरनालोचने कञ्चे'ति कञ्। अत्रानालोचनं नास्तीति कञ् दुर्लभ इति चेत् भाष्योक्ता व्युत्पत्तिस्तात् महाभाष्ये कर्मकर्तरि व्युत्पत्तिर्दर्शिता। तमिवेमं पश्यन्ति जनाः। स इवायं पश्यति ज्ञानविषयो भवतीत्यर्थात्। तत्र विषयत्वापत्तिमात्रवृत्तित्वेपि विषयीकरणावृत्तित्वादज्ञानादिति सङ्गच्छते इति मनोरमा। भाष्यं च सोऽयं स इव दृश्यमानस्तमिवात्मानं पश्यतीति। यद्वा छन्दोवत् सूत्राणि भवन्तीति। दृशेरालोचने कञ्चेति। बाहुलकात्। मनोरमायां अनालोचने किम्। तत्पश्यतीति तद्दर्शः। तादृशादयस्तु रूढिशब्दत्वादसताप्यवयवार्थेन व्युत्पाद्यन्ते। अत एवाज्ञानार्थाद् दृशेरिति सङ्गच्छते इति रूढिमात्रमुक्तम्। भगवच्छास्त्रे तु रूढिमात्रं नास्ति। पूर्वमीमांसाकारिकासूक्तम्। अतः स्वव्युत्पत्तौ रूढिर्द्रष्टव्या। अतस्तादृशशब्दो योगरूढो मन्तव्यः। वीर्याणीति 'तत्रांशेने'त्यनेन वीर्याणि, 'अवतीर्ये'त्यनेन सर्वगेयचरित्राणि, 'वीर्याणि तस्ये'त्यनेनालौकिकवीर्याणि, 'रोहिण्या' इत्यादिना अगेयचरित्राणि पृष्टानीतिविभेदः। न च 'वीर्याणि तस्ये'त्यत्र वीर्याणामनुवाद उक्तः, स चालौकिकेतिविशेषणं न सोढुमलमिति वाच्यम्। 'विशिष्टं शुद्धान् नातिरिच्यत' इति नैयायिकोद्घोषात्।

१०-१-१३. नैषेत्यत्र बाधकमिति बाधत इति बाधकं क्षुद्रूपम्। आर्तीति आर्तिः पीडा। तेन गीतोक्ताधिकारिषु प्रथमाधिकार उक्तः। एषा समीपतरवर्तिनी। अप्रयोजकत्वं क्षुधः। प्रमाणकथनमिति प्रमा परीक्षिदनुभवः तस्याः करणं 'नैषातिदुःसहा क्षुन्मां त्यक्तोदमपि बाधते' इतिशब्दः तस्य कथनम्। इति न प्रमाणतावच्छेदकगौरवात्। किन्तु 'क्षुन्मा'मित्येव प्रमा। विभक्त्युत्पादकक्रियापदस्यापि वाक्यादेव ज्ञानात्, विशेषणवत्। प्रमाणतावच्छेदकं'क्षुन्मा'मिति शब्दत्वम्। देहरक्षाभावार्थ इत्यत्र देहरक्षाभाव इतिपाठे।

१. कात्स्न्यें। २. धातो.।

देहो रक्ष्यतेऽनेनोदकेनेति देहरक्षमुदकम्। तस्याभावस्त्यागः। परमोत्तमेति विदुरोद्धववत्। 'नैव किञ्चित् करोमीति युक्तो मन्येत तत्त्ववि'दित्यादिवाक्येभ्यः। यद्यपि शुकपरीक्षितोरुत्तमाधिकारस्तथाप्युत्तमपरमोत्तमयोर्नाधिकतारतम्यमिति परमोत्तमशब्दः। उभयेति क्षुत्तृड्भयनाशकत्वात् तथोक्तं त्यागविषयत्वमुक्तम्। ननूभयनाशकत्वे नास्तूदकस्य बाधकप्राथम्यं क्षुधस्तु कथं बाधकप्राथम्यमत आहुः क्षुधो भ्रातृव्यत्वेति। तदेवोक्तमिति क्षुद्बाधकमेवोक्तम्। वर्तमानेति 'बाधत' इति वर्तमानप्रयोगः। अस्य शीघ्रकथनार्थत्वं त्वेवम्, क्षुन्निष्ठो मन्निष्ठबाधानुकूलः वर्तमानकालिक एको व्यापार इतिबोधे नञर्थो भावः धात्वर्थे बाधेन्वेति। तथा च मन्निष्ठबाधाभावानुकूल इत्यर्थो भवति। एवं च शीघ्रकथनरूपप्रतीकाराभावे वर्तमानकालिकव्यापारो मन्निष्ठबाधानुकूलो भवेत् न तु मन्निष्ठबाधाभावानुकूल इति उत्तरार्धे। अम्भोजत्वमिति शुकमुखं लालामृतं स्रवति, अमृतपदस्य जलवाचकत्वात्। अम्भोजं कालेमृतं जलं स्रवतीति। पानमन्तरिति तथा च श्रोत्रद्वारान्तःप्रवेशनानुकूलो व्यापारः पिबतेरर्थः। फलमात्रमुक्तम्। शृण्वन्तमित्यनुक्त्वा 'पिबन्त'मिति यदुक्तं तदाशयमाहुः अविस्मरणायेति। तथा च श्रोत्रेण शब्दग्रहणानुकूलव्यापाररूपे शृणोतेरर्थे श्रुतस्य विस्मरणमपि स्यादतः 'पिबन्त'मित्युक्तम्। कथं शब्दपानमिति चेत् कथाया अमृतत्वं वक्ष्यते। अमृतं जलम्। कथा वायुरपि। वायुः शब्दतामापद्यत इति। तेन परीक्षिदब्भक्षो वायुभक्षो वा निरूपितः। इदानीमिति प्रश्नकालेपि पूर्वोक्तकथनस्य 'कथितो वंशविस्तार' इत्यत्रत्यस्यानुसन्धानात्। 'पिबन्त'मिति वर्तमानप्रयोगः। वर्तमानार्थकलटः शतेति। सम्भावनयेति कथयिष्यतीति सम्भावनया 'वर्तमानसामीप्ये वर्तमानवद्वे'तिसूत्रेण पास्यन्तमित्यत्र 'पिबन्त'मितिवर्तमानप्रयोगः। अन्य इत्यस्वरसस्तु। स्वारसिकप्रयोगनिर्वाहेन्यकल्पनम्। त्वन्मुखाम्भोजच्युतमितिपदस्य तात्पर्यमाहुः आनन्दत्वेति। कथामृतस्य सत्यस्यानन्दत्वद्योतनायाम्भोजसम्बन्धः। चेतनत्वज्ञापनाय स्वत एव च्युतमिति चोक्तम्। सच्चिदानन्दात्मकत्वं कथाया उक्तम्। अमृतं जलं सत्यं निरुक्ते। अम्भोजं अमृतजलस्रावात्। आनन्दोश्रु स्रावयतीति साम्यात् अम्भोजमानन्दः। 'सर्वं सर्वमयं सर्वे सर्वार्थवाचका' इतिश्रुतिवचनात्। यद्यज्जनकं तत्तद्गुणकं, यद्यद्गुणकं तत्तदात्मकमितिव्याप्तेर्मुखाम्भोजमानन्दः। आनन्दोपलक्षणं वाच्युतामृतपदाभ्याम्। इयदवधि कृष्णसम्बन्धः चरित्रेग्रे चेति तद्वाक्यप्रबन्धे हरिसम्बन्धमाहेत्याशयेनाहुः हरीतीति। कथास्थितानामक्षरभेदभूतकालकर्मस्वभावानां नियामको हरिरिति हरिकथामृतम्। किंच 'वेदे रामायणे चैव पुराणे भारते तथा आदावन्ते च मध्ये च हरिः सर्वत्र गीयत' इति वाग्विषयत्वं हरेरेवेदमित्थतया। ननु तर्हि षड्धर्माः धर्मी च प्रमाणाद्यप्रकरणसप्तकेषु प्रतिपाद्यमानाः कृष्णस्य कथं सङ्गच्छेरन्निति चेत् सत्यम्। इदमित्थतया वाग्-

१. बाधकत्वम्।

विषयेपि ब्रह्मपरमात्मभगवच्छब्दानां प्रवृत्तेः सर्वेशत्वात् । भक्तिवशात् तद्विदां प्रवृत्तेश्च । हरिस्तु अग्निशिखाया मध्येस्ति । 'तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः स ब्रह्मा स शिवः स हरिः सेन्द्रः सोक्षरः परमः स्वरा'डिति महानारायणादग्निब्रह्मशिखामध्ये हरिः । स भगवदभिन्नोपि । 'प्रकाशाश्रयवद्वा तेजस्त्वा'दितिव्याससूत्रात्। विशेषत इति इद-मित्थतया। विशेषत इति परमतभाषया लौकिकभाषया च । ननु कथा चामृतमिति-कर्मधारये अमृतं किमित्यत आहुः अमृतपद इति। न मृतं मृतिर्यस्मादिति यौगिकोर्थः। क्षुदादिबाधामृतिनिवर्तकत्वात् । कथामृताज्जीवनं वक्तव्यं, तदभावात् किं फलं वक्तव्यमिति चेत् तत्राहुः असङ्कोचादिति।'अपपुनर्मृत्युं जयती'तिश्रुतेरपमृत्युजयबोधकश्रुत्यसङ्कोचात्, श्रोतृस्वनिकटस्थापनेच्छाऽसङ्कोचाच्च । द्वादशस्कन्धश्रवणानन्तरं मुक्तिरेव न तु तक्षककृताप-मृत्युजयोपि फलतीत्यर्थः। अत इत्यादि । कथामृतस्यावात्। त्वं शुकः न तु फलदो भगवान् । अत्र 'फलमत उपपत्ते'रितिसूत्रविरोधमाशङ्क्याहुः स्तुत इति। असदुत्कर्षाधायक-गुणवर्णनरूपस्तुतिविषय इत्यर्थः।

१०-१-१४.एतन्निशम्येत्यत्र सावधानतयेति अवधानमनन्यचित्तता। शौनको भार्गवः ज्ञानपूर्णो भक्त्या युक्तश्चेत्युत्तरार्धे गुणप्रकरणेस्ति । ज्ञानिनोन्यासक्तिः सम्भवतीत्यतः सावधानतयाभिमुखकरणमुक्तम् । निशम्यमत्यर्च्यपदयोस्तात्पर्येणाहुः परस्परेति । तेनै-तावत्कालोपि नान्यार्थ इतिज्ञापितम्। तथेति परस्पराभिनन्दनप्रकारेण मूले प्रतिपाद्यते। एतन्निशम्येतिपदसमभिव्याहाराल्लब्धमर्थमाहुः एतस्येति। एतदन्यचेत्यत्र नितरां श्रवणे एतच्छब्दोक्तकृष्णचरितप्रश्नस्य मूलत्वान्निकुञ्जत्वात् । 'मूलमोघे शिफायां स्यात् भे निकुञ्जेन्तिकेपि चे'ति विश्वः। निकुञ्जमूलेन प्रश्नेन निकुञ्जनिरूपणम्। प्राधान्येन निर्देशः निशम्यक्रियाफलाश्रयत्वेन निर्देशः । वक्तुरिति शुकस्य। नितरामिति तथा च शम आलोचने चु० आ० से०। तस्य रूपम्। दाक्षिण्येनेति कौशल्येन । लोककौशल्येन सरलभावेनेतियावत् । विश्वासेति भृगोः परब्रह्माविष्टत्वम् । तथा च सुबोधिनी 'तस्य जिज्ञासये'त्यत्र । 'सर्वेषां ब्रह्मशक्तिः ज्ञानात्मिका महत्त्वाद् भृगौ समारोपिता । तदा भृगुः साक्षात्परब्रह्माविष्टो जातस्ततो विस्मितदेहः अक्षोभ्यपरीक्षार्थं सर्वैर्ब्राह्मणैः प्रेषित' इति। अत्र भृगोर्विश्वासो ब्राह्मणवाक्येषु निरूपितः । हेतुभूतमिति कुतो निशम्येत्याकाङ्क्षायां यतः साधुवादं तत एतं निशम्येत्यर्थाद्धेतुभूतम्। विशेषणविभक्तेः हेतुरर्थः भावप्रधानः। साधुवादत्वादित्येवं पञ्चम्या हेतुकथनाद्वा। हेतुभूतं षष्ठीतत्पुरुषे प्रश्नेन्वयासौष्ठव्यात् पञ्चम्य-न्तान्यपदार्थघटितविग्रहमाहुः साधूनां वाद इति। यस्मादिति प्रश्नात् । प्रमेयस्येति प्रमातुं योग्यं प्रमेयं न तु प्रमाविषयं, तस्य प्रमाणत्वात् तस्येत्यर्थः । शाब्दज्ञानयोग्यस्य ।

१. भा० १०-उ०४०-२ । २ 'विस्मृतदेहसम्बन्ध' इति तत्र सुबोधिन्याम् ।

यद्वा प्रमाविषयं प्रमेयं, अनधिगतार्थगन्तृत्वम् । प्रमाकरणत्वं वा प्रमाणम् । वैयासकिपद-व्याख्यानार्थम् । 'अपि चेत् सुदुराचारो भजते मामनन्यभाक् साधुरेव स मन्तव्यः सम्यग् व्यवसितो हि स' इतिगीतावाक्यात् साधवो भक्ताः । मां भजन्ते ते भक्ताः । कर्तरि क्तश्छान्दसः, ते च साधवो मन्तव्या इति । तदाहुः भगवद्भक्ता इति मिलन्तीति वदनार्थं मिलन्ति । एवं वाक्यमिति साधुवादत्वमकारकवाक्यम् । प्रष्टव्यमिति वाक्यं प्रष्टव्यम्, साधुवादस्य प्रश्नविशेषणत्वात् । अर्थोपि प्रष्टव्य इति पदजन्यपदार्थोपस्थित्यर्थ-मुक्तम् । कष्टेनेति देह्यात्मतोपात् पूर्वम् । प्रथमस्कन्धे स्पष्टम् । चकारेति नारदोपदेशेन चकार । प्रवृत्त इति अपेक्षत इत्यनेनान्वेति । महता प्रयासेनेति 'परिनिष्ठितोपि नैर्गुण्ये उत्तमश्लोकवार्तया गृहीतचेता राजर्षे आख्यानं यदधीतवा'निितिवाक्यात् परिनिष्ठितस्य गृहीतचेतस्त्वेपि महानेव प्रयासः तेन । तदुक्तं 'स वै निवृत्तिनिरतः सर्वत्रोपेक्षको मुनि'रिति । वैयासकिरिति व्यासस्य महता कष्टेन भगवद्गुणप्रतिपादकशास्त्रकर्तुः अपत्यं महता प्रयासेन भगवन्मतप्रवर्तको वैयासकिः । दुर्ज्ञेयेति 'यतो वाचो निवर्तन्त'इतिश्रुतेर्दुर्ज्ञेयत्वात् । भिन्न-प्रक्रमस्य विष्णुरातमित्यत्रान्वयाभावं द्योतयितुमथशब्दात् पूर्वं विष्णुरातपदं व्याकर्तुमाहुः नन्वेवमिति । तथा च विष्णुरातत्वं न भिन्नप्रक्रमकृतं भिन्नं किन्तु प्रत्यर्चनेपि तदेवे-त्युक्तम् । कथमिति केन प्रकारेण विष्णुराततत्त्वरूपेण हेतुना किं वा परीक्षित्त्वेन हेतुनेतिप्रश्नः । विष्णुरातमितीति विष्णुरक्षितम् । रा आदाने यमादत्ते तं रक्षतीति । एतदर्थमिति भागवतप्रकटनार्थं, एवकार इतरयोगव्यवच्छेदकः । अन्यथेति परीक्षिद्रक्षणाभावे । श्रवणे दृष्टान्ताभावादप्रवृत्त्या न सिध्यतीत्यादिः । शुकस्येश्वरत्वाद् भगवता किमित्याशङ्का तु न कार्या । 'न मे विदुः सुरगणाः प्रभवं न महर्षय' इति, 'स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तमे'तिवाक्याभ्याम् । 'निशम्ये'तिपदादाहुः श्रवणे निमग्नेति । शुकस्येश्वरत्वेपि क्षत्रिया-र्चनं मनसोन्यत्र श्रवणे सक्तत्वात् । क्षत्रियस्यापीश्वरत्वाद् वा । प्रतेः प्रतिदानमर्थमाहुः पूर्वं शुक इति । 'एतदन्यच्चे'त्यत्र मुने इति सर्वज्ञ इति पदाभ्यां स्तुतः । तेनेति स्तवनहेतुना । शास्त्रेति । वेदवेदान्तशास्त्राभ्यां सिद्धम् । शास्त्रे एवाहुः येन्योन्यत इति वेदवेदान्त-सारत्वाच्छ्रीभागवतस्य । एतावदिति अधिकारित्वपूर्वकप्रत्यर्चनपर्यन्तस्योद्योगस्य । फलं सच्चिदानन्दस्य व्याहरणे कीर्तनभक्तौ विषयत्वम् । आहेति चरित्रस्य शोधकत्वमाह । देशादीनामिति देशकालकर्तृमन्त्रद्रव्यादीनाम् । एवेति 'अकामः सर्वकामो वे'तिवाक्या-देवकारः । कीर्तनभक्तेर्नैवस्तु मुख्यत्वात् प्रेमसाम्यम् । अन्यथेति भक्तेः शोधकत्वाभावे । न स्यादिति यथाकथञ्चित् कल्मषहन्तुः कीर्तनादिभक्तीतरस्य कलियुगादावभावात् । भाग-वतप्रधानः व्याहर्तुमारभतेतियोजनयार्थं वक्तुमाहुः महतेति । द्वादशभिः प्रश्नः, द्वाभ्यां प्रत्यभिनन्दनमिति महता भिन्नप्रक्रमेण । यस्येति प्रलयेधिकृतस्य भक्तुरीश्वरस्य तेन भाग-

वतेषु प्रधान इति विग्रहोपास्तः। अधिकारित्वेन शुद्धभागवतप्रधानत्वाभावात्। भागवतलक्षणं निबन्धे 'कृष्णवाक्यानुसारेण शास्त्रार्थं ये वदन्ति हि ते हि भागवताः प्रोक्ताः शुद्धास्ते ब्रह्मवादिन' इति। ते प्रधाना यस्य स एकादश उक्तः। 'देहेन्द्रियप्राणमनोधियां यो जन्माप्ययंक्षुद्भयतर्षकृच्छ्रैः संसारधर्मैरविमुह्यमानः स्मृत्या हरेर्भागवतप्रधान' इति। आहर्तुमिति शुकस्याप्ययमेवाहारः। 'नैपातिदुःमहा क्षुण्मा'मितिवाक्यात्। वायुभक्षोऽभक्षो वा यतिः स्मर्यते इत्यत आहारं विघ्ण्वन्ति स्म चक्रुमिति। वायुः शब्दतामापद्यन्त इति प्राचां वैदिकानां प्रवादाद् वायुभक्षणमुक्तम्। अत एवेति भक्ष्यत्वादेव। कथयतीति शुकः कथयति। कथ वाक्यप्रबन्धे। चुरा० सभाजयतीति सभाज प्रीतिसेवनयोः चुरा०, न च भागवतप्रधानत्वापलापः अब्वायुभक्षणार्थप्रवृत्तेरिति वाच्यम्। भागवतप्रधानत्वार्थमेवाब्वायुभक्षणात्।

१०–१–१९. सम्यग्व्यवसितेत्यत्र श्रीशुकोत्र सभगवान् चूपध्वजः शुकनामा निर्गुणः जन्मप्रकरणेधिकारी, कथायाः मकटसच्चिदानन्दरूपत्वात्। भगवदाकाङ्क्षाप्रपञ्चग्लानिभ्यां तामससत्ता तद्वान्। श्रीभागवतमाहात्म्ये स्कान्दीये 'श्रीमद्भागवतं तस्मा अपि नारायणो ददौ स तु संसेवनात् तस्य जिह्वे शीघ्रं तमोगुणम् कथा भागवती येन सेविता वर्षमात्रतः लये त्वात्यन्तिके तेनावाप शक्तिं सदाशिव' इति। समानशीलेति 'राजर्षिसत्तमे'तिसम्बोधनरूपाप्तवाक्यात्। दृष्ट्वेति रूपं दृष्ट्वा शीलव्यसनयोः दर्शनं त्यक्तोदकस्य परीक्षितः क्षुद्बाधाभावकार्यात्। शीलं स्वभावः परिणामहेतुः व्यसनं यद्विना स्थातुमशक्तिः तत्। द्वाभ्यामित्यभिनन्दनकर्मद्वयेन। भगवतीति 'यो बुद्धेः परतस्तु स' इति वाक्याद्गीताद्वितीयाध्यायाच्च। लयो भगवत्प्राप्तिः, शान्तिश्च, तस्मादित्यर्थः। स्थिरप्रज्ञतैवेति। 'प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान्। आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यत' इति गीता। एवकारेण स्थितधीत्वमतिष्ठितप्रज्ञत्वयोगो व्यवच्छिद्यते। सर्वोत्तमेति सर्वा चासावुत्तमेति कर्मधारयः पुरुषोत्तम इतिवत्, 'उत्तमः पुरुषस्त्वन्य' इति गीतावाक्ये कर्मधारय उक्तः। सर्वा पूर्णा। आत्मन्येवात्मनैकादशवृत्तिकमनसा तुष्टः। 'कृत्स्नभावात्तु गृहिणोपसंहार' इत्यधिकरणोक्तरीत्या,यदात्मन्येवात्मना मनसात्मैकावलम्बनेन तुष्ट इत्यर्थस्तदा मानसी सेवा ज्ञेया। सर्वासामुत्तमा सर्वासूत्तमेति न विग्रहौ 'न निर्धारण' इतिसूत्रेण समासनिषेधात्। स्थितधीलक्षणे 'सुखेषु विगतस्पृह' इति 'पृथक्सत्रेण वा मह्यं पर्वयात्रामहोत्सवा'नित्यस्य विरोधः। प्रतिष्ठितप्रज्ञलक्षणे 'यः सर्वत्रानभिस्नेह' इति भगवत्यपि व्यसननिषेधाद् भक्तिमार्गविरोधः। एवमग्रेपि प्रतिष्ठितलक्षणेषु दोषाः। एकादशोक्तस्य ब्रह्मसम्पत्तेः पूर्वं सिद्ध्यष्टकस्य कालनिर्यापकस्यापि स्थिरप्रज्ञतापेक्षया नोत्तमत्वमन्यसङ्गप्रसङ्गात्। अध्यवसायं प्राप्तेति। विषयत्वेन प्राप्ता अध्यवसायविषया बुद्धिः। अध्यवसाये

इत्यन्तं विषयः। निर्विषयकज्ञानाभावात्। बुद्धिमानयं पदार्थाञ् जानातीत्यत्राऽध्यवसायविषया बुद्धिः। अध्यवसायं ज्ञानं अधिकं विशेषं अवसिनोतीत्यध्यवसायः तम्। कर्मण्यण्।ब्रह्मर्षीणामिति। मम तु ब्रह्मर्षिसत्तमत्वाज्ञातम्। सन्निति अस्ति ब्रह्मेति वेद। भगवद्धर्मनिष्ठ इति राजर्षिसत्तर इत्यर्थः। तत्राप्युत्कर्ष इति श्रवणभक्त्यवङ्गीकारात्। तथा च स राजर्षिसत्तमः। पूर्वार्धे व्यवसायशब्देनोक्तं निश्चयं स्तोतुमुत्तरार्धं वदतीत्याशयेनोत्तरार्धमवतारयन्ति स द्विधेत्यादि। स्वरुच्येति यथोद्धवपरीक्षिदम्बरीषाः। सात्त्विकश्रद्धारूपस्वरुच्या। रुचिर्भक्तिः प्रेम चेति प्रथमस्कन्धे नारदस्य। 'श्रद्धारतिर्भक्तिरनुक्रमिष्यती'ति तृतीये। उत्तम इति स्वरुच्या निश्चयवानुत्तम उक्तः। तत्र 'ये शास्त्रविधिमुत्सृज्ये'त्यादिगीता। अत्र सात्त्विकश्रद्धावन्तोऽम्बरीषोद्धवपरीक्षितः। राजसश्रद्धावन्तो दक्षादयः। तामसश्रद्धावन्तो वृकहिरण्यकशिप्वादयः। तत्र सात्त्विकानामास्तिकत्वं फलम्। तस्य पूर्वमीमांसोक्तविश्वजिन्न्यायेन मोक्षः फलम्। 'अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते यष्टव्यमेवेति मनः समाधाय स सात्त्विक' इति। 'अभिसन्धाय तु फलं दम्भार्थमपि चैव यत् इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम् विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् श्रद्धाविरहितं यज्ञं तामसं परिचक्षत' इति। विधिदृष्ट इति पदेन 'ये शास्त्रविधिमुत्सृज्ये'त्यादिगतम्। शास्त्रविधिसङ्ग्रहेण भगवानुवाचेति रामानुजभाष्ये। यदा तु विधिदृष्ट इतिपदेन विधिसंवादिरूपार्थो विवक्ष्यते तदा 'ये शास्त्रविधिमुत्सृज्ये'त्यनुसन्धेयम्। दम्भार्थमिति दम्भः परस्य स्वोत्कर्षख्यापकचेष्टादिः। निमित्ताभावे तु नैमित्तिकाभावश्चेत् तदा दम्भः, तदर्थमित्यर्थः। उत्तमत्वार्थं पुष्टिमार्गः कल्पनीयः। यद्वा 'ये शास्त्रविधिमुत्सृज्ये'त्यत्रोक्तसात्त्विकानां यज्ञः शास्त्रीयः,'यावानर्थ उदपान' इतिवाक्यात्,'उत ये शास्त्रविधिमुत्सृज्ये'त्युपक्रमानुरोधादशास्त्रीयः। अशास्त्रीयत्वेपि महतामन्तःकरणं प्रमाणमित्याचार्योक्तेः'मनसैवानुद्रष्टव्यमेतदप्रमेयं ध्रुव'मिति बृहदारण्यके महतां मनसेति विशिष्य महान्तः सात्त्विका ग्राह्याः। अन्यथा दम्भकृतयज्ञस्य मोक्षास्तिकत्वे फले स्याताम्। अत्रापि पुष्टिप्रवेशः। पूर्वोक्तश्रुतिसंवादात्। पुष्टिर्भगवदनुग्रहः। अत उक्तं त्वं तूत्तम इति। तेजबिन्दूपनिषदि 'न ध्यानं न च वा ध्याता न ध्येयोऽध्येय एव च सर्वं तत्परमं शून्यं न परं परमात् पर'मित्याद्युक्त्वा 'न भयं सुखदुःखं च तथा मानापमानयोः एतद्भावविनिर्मुक्तं तद् ग्राह्यं ब्रह्म तत्परं तद् ग्राह्यं ब्रह्म तत्पर'मित्युक्तं,'शून्यं' 'परं ने'त्यर्थः।'परमात्' शून्यात् 'परं', 'तत् ग्राह्यं ब्रह्म' येन केनापि साधनेन। 'यतो वाचो निवर्तन्त' इतिश्रुतौ वेदलक्षणापि वाग्व्याख्यातेति, अत उक्तं त्वं तूत्तम इति। द्विधा व्याकुर्वन्ति स (यत्)यस्मात् कथायामिति। 'य'दित्यव्ययम्।'यत्' यस्मात्। तत्र यस्मात् कथायामित्यपि पाठः। तत्रेति निश्चयद्वैधे। रतिरिति रतिपदात् 'श्रद्धा रतिर्भक्तिरनुक्रमिष्यती'तिकपिलदेवोक्तसिद्धान्तान्तरे,रुचिः भक्तिः प्रेम चेति प्रथम-

स्कन्धसिद्धान्ते पोषके चातः रतिर्भक्तिरित्येकवाक्यतासिद्धान्तसिद्धान्तान्तरयोः। सिद्धान्ते प्रेम सिद्धान्तान्तरे भक्तिरित्येकोर्थः। अत्र रतिपदं स्वरुचिः भक्तिः प्रेमेत्यत्र भक्ती रतिरिति-बोधनार्थम्। परीक्षितो रुचिमतो भक्ती रतिरिति। रुचौ प्रेम मेलनाद् रतिवत् भक्तिराध्यात्मिकी। 'नैष्ठिकी'त्यत्र निष्ठाऽचञ्चला, नितरां तिष्ठतीति निष्ठेति कर्तरि क्विप्। निष्ठा निर्धार्यत इति शैषिकष्ठक् कृष्णविषयकनिर्धारानुकूलव्यापारवती निष्ठेत्यर्थः। निर्धारविषयानुकूलव्यापारः शुकनिष्ठोर्थः। 'सम्यग्व्यवसायः' तद्विषयिणी निष्ठा भिन्ना रतिर्जातेत्यर्थः। केनेति विषयावेशेन। अन्यथेति भगवदतिरिक्तविषया। निश्चयेति सम्यग्व्यवसायस्य सम्यक्कालापेक्षया सम्यक्पोषिका। तथा च नैष्ठिकरतिपोषितनिश्चयवत्त्वाद् बुद्धिरुत्तमेत्यर्थः। 'व्यवसायः' रतिसाधनं फलं च। 'सर्वभूतेषु मन्मति'रिति 'भक्त्या जानाति चान्यय'-मितिश्रुतिस्मृतिभ्याम्। यज्जातेतिपदं समस्तमङ्गीकृत्य द्वितीयां व्याकृतिमाहुः यस्मान्निश्चयादित्यादि। तथा च वासुदेवकथायां यस्मान् निश्चयाज्जाता यज्जाता रतिरिति वेतियोजना। तथा च निश्चयोत्पन्ननैष्ठिकरतिमत्त्वात् तथेत्यर्थः। तेन ज्ञानस्य भक्त्यङ्गत्वमुक्तम्। पूर्वार्धे 'तवे'ति पदं उत्तरार्धे 'त' इति पदं यदुक्तं तत्पुनरुक्तिभिया प्रकारद्वयेन राजा स्तूयते न तु बुद्धिरित्याशयेन तृतीयं पक्षमाहुः अथवेत्यादि। पूर्वार्धे सम्यग्व्यवसितबुद्धेः सुबोधिन्यामार्थिकं हेतुद्वयं राज्ञो नैष्ठिकरत्याधारयोग्यताधारत्वेनोपस्थितावेव सम्भवतीति तद्द्वारा राजैव स्तूयत इति राजाभिनन्दन एव। तद् व्युत्पादयन्ति स दुर्लभत्वमिति। दुर्लभत्वं कुतः कारणादितिशङ्कायां कारणं वदन्त आहुः कारणभूतमिति। तथा च ज्ञानं यस्याः साधनं सा रतिर्दुर्लभा भवत्येव। आहेति पूर्वार्धेनाह। जातेति भूतार्थक्तान्तप्रयोगान् निष्पन्नत्वं साध्यसाधनयोः रतिबुद्ध्योः। तस्मात् सम्बोधनेन राज्ञः सभाजनं; प्रीणनं, तेन निश्चयाद् रतिरिति भरः सूचितः। किञ्च सभायां देवर्षिराजर्षयः सर्वेपि तिष्ठन्ति तथापि तवैव जातमिति तव सभाजनमितिभावः। एतेन सिद्धमर्थान्तरं 'अनुवादः स्तुतिः प्रश्ने भक्तत्वज्ञापकावुभा'विति कारिकायां प्रश्नेनुवाद उक्तः 'कथितो वंशविस्तार' इत्यनेन, स्तुतिस्तु 'पितामहा म' इत्यनेन, तत्रास्याः स्तुतेः सन्निवेशरूपमाहुः प्रश्नेन चेति। द्वादशभिः प्रश्नेन। एवम्भाव इति पूर्वोक्तप्रकारेण भावो रतिः। अत इति साधनभूतप्रश्नस्य एवम्भावरूपफलेनैक्यात्। अर्थात् अभिधेयात् प्रश्न इति सप्तम्यन्तं प्रश्ने एव न तु व्यवधायके सर्वथा कथनादौ त्रयोदशादिश्लोकाभासोक्ते राजा स्तुतः स्तुतत्त्वविशिष्टः। विशिष्टे शक्तेः। स्तुत्वं स्तुतिः। 'पितामहा म' इत्यत्र भगवान् स्तुतोत्र तु राजेतिविशेषः। स च विष्णुरात इति स्तावकत्वेन स्तुतौ निविष्टः भगवांस्तुत्यत्वेन 'पितामहा म' इत्यत्र। यद्वा द्वितीयपक्षे किञ्चिदाहुः प्रश्नेनेति। एवम्भावः नैष्ठिकी रतिः। तस्य परीक्षितः निश्चयेनैवाभिज्ञातः। अत इत्यादि पूर्ववत्। प्रश्न इति प्रथमान्तम्। नैष्ठिकरत्येकीभूतः

प्रश्न इत्यर्थः । अन्यत् पूर्ववत् । अग्रे प्रश्नस्य साक्षाच्चार्थं तृतीयपक्षान्ते प्रश्नस्तुतिरुक्ता ।

१०-१-१६. वासुदेवकथेत्यत्र साक्षादिति गतश्लोके तु नैष्ठिकरत्येकीभूतः प्रश्नः स्तुत इतिभावः। पवित्रयत्येवेति कथा पवित्रयति न तु प्रश्न इतिशङ्कायामत्यन्तायोगव्यवच्छेदकैवकारः । नीलं सरोजं भवत्येवेत्यत्रेव । तत्रापीति वासुदेवसम्बन्धिवस्तुष्वपि । तत्सम्बन्धीति वासुदेवसम्बन्धिगुणदोषाः 'समतो गुणदोषग' इत्यनयोक्ताः तत्राभिनिवेशस्त्रयाणां तस्य जनिका । तत्रापीति कथायामपि तज्जिज्ञासयेति कथाज्ञानेच्छया कृतः । दार्ढ्येति तत्सम्बन्धिगुणदोषाभिनिवेशे कथाकार्ये दार्ढ्यहेतुः । गणनादेव त्रित्वे लब्धे 'त्री'नित्यस्य पदस्य तात्पर्यमाहुः कश्चिदिति । तथा च मध्यस्थं न पुनाति, समीचीनासमीचीनत्वमात्रदृष्टिमत्त्वात्, इत्येतदर्थं 'त्री'नित्युक्तमितिभावः। त्रय इति पावनाधिकारिणस्त्रयः । पावनफलाश्रयाः कर्मत्वात् । स्तब्धचित्तेति तत्तत्कार्यप्रतिबन्धकवस्तुविशेषः। स्तब्धं प्रतिबद्धं चित्तं यस्य । पापादेवेति 'नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायत' इतिवाक्याद् भगवद्गुणेषु वक्तव्येषु सत्सु समानाधिकरणपापादेव। अन्ययोगव्यवच्छेदक एवकारः। पितृपितामहेति आदिना मध्यस्थः । तेन प्रेमलक्षणा भक्तिरेव पितृपितामहादीन् पुनातीत्युक्तम् । श्रोतामध्यस्थ इति श्रोता अमध्यस्थः, भगवद्वाचकपदवाक्यानां भगवति शक्तितात्पर्यनिर्धारः श्रवणम् ,तत्कर्ता अमध्यस्थो भवति । निमित्तमिति वक्तृत्वपृच्छकत्वश्रोतृत्वरूपपदप्रवृत्तिनिमित्तम्। तदेवेति वक्तृत्वादिकम् । पदप्रवृत्तिनिमित्तभेदप्रयोजकत्वेनोक्तम् । वक्तृपुरुषत्वं न शक्यतावच्छेदकम् ,गौरवात् ,भिन्नपदत्वाच्च । वक्तृत्वादिकं भेदप्रयोजकं पुरुषत्वं शक्यतावच्छेदकम् । पूर्ववदिति 'निवृत्ततर्षै'रितिश्लोके व्याख्यातपुंपदवत्। तथा च प्रश्नोऽप्यासुरव्यतिरिक्तानेव त्रीन् पुनातीतिभावः। कार्यान्तरेति कार्यान्तरमर्थः प्रयोजनं येषां तान् श्रोतृभिर्वक्त्रा वा सह वाणिज्याद्यर्थं कथास्थले समागतानित्यर्थः। अनेकविधमिति आधिभौतिकाध्यात्मिकाधिदैविकादिरूपम् । तद्व्यावृत्त्यर्थमिति आधिभौतिकाध्यात्मिकव्यावृत्त्यर्थम्। क्वचिदिति प्रश्नकर्तरि । कश्चिदिति वक्तारम् । कश्चिदिति श्रोतारम् । न तु मध्यस्थम् । तस्य छिद्रान्वेषणार्थं श्रवणाच्छ्रोतृत्वेपि । करोतीति प्रश्नः करोति । सफलतेति । प्रश्नोऽपि कीर्तनभक्तिः तस्य सफलता । कथारूपफले संसारदुःखस्य निवृत्तिः ब्रह्मबोधनं चेति गुणद्वयरूपफलसम्पादनात् तादृशफलेन सह वर्तमानता । उत्पादयतीति । प्रथमस्कन्धसुबोधिन्यां 'या वै लसच्छ्रीतुलसीविमिश्रकृष्णाङ्घ्रिरेण्वभ्यधिकाम्बुनेत्री' त्यत्रैकोनविंशेस्ति । पूर्वेति पूर्वकर्मसम्बन्धिनं देहम् । तत्कार्यं पापकार्यं स्तब्धत्वम् । चकारोत्र ज्ञेयः। यावत्येति शुद्ध्या । करोतीति प्रश्नः करोति । उत्तरार्धाभासे दृष्टान्ताभासे चास्वरसं सूचयन्तः पक्षान्तरमाहुः त्रीन् त्रिलोकस्थानिति । स्पष्टम् । ब्रह्माणमष्टमस्कन्धे वामनप्रसङ्गे, महादेवं भगीरथं च नवमस्कन्धे गङ्गा पुनाति। दार्ष्टान्तिके

च त्रिलोकस्थान् प्रश्नकर्तुः पितृपितामहादीन् सात्त्विकादिभेदभिन्नान् तान् प्रश्नः पुनाति। 'धर्मः प्रोज्झितकैतवोत्रे'तिवाक्यात्। हृद्यवरुद्धेश्वरेणेति। एतद्वाक्यविरोधक एवास्वरसः।

१०-१-१७. भूमिर्दृप्तेत्यत्र। भगवदवतारेति भगवदवतारप्रयोजनं भक्तानां दुःखनाशः। आरभते इति नभसे मासे नवम्यामारभते। भूमिरितीति भूमिपदं पुरस्कृत्य कथारम्भस्तु,वेदवेदान्तसारत्वात्। वेदस्य 'मुह्यन्ति यत्सूरय' इति वाक्यात् मोहकत्वेन वेदान्तस्यापि वेदत्वं 'स्मृतेश्चे'ति सूत्रभाष्य उक्तम्। ततस्तस्यापि मोहकत्वं, अतः 'पञ्चरात्रमुपतिष्ठते' श्लोकवद्रूत्वेनामोहकत्वात् तत्र च 'अधीताः सकला वेदा साङ्गोपाङ्गाः सविस्तरा' इत्युपक्रम्य 'निश्चयं नाधिगच्छामि मनसा विमृशन्नपि' इत्युक्त्वाग्रे 'एतच्छास्त्रं च दातव्यं शिष्यायानभ्यसूयवे मोक्षमाणाय नान्यस्मै कस्मैचन यदृच्छया त्रैवर्णिकाय दातव्यमध्येतव्यं च वेदव'दित्युक्तत्वात्। तदनुक्रियापादारम्भे 'सुभद्रा भद्रका पूर्णा धूम्रा चेति चतुर्विधा भूमयो लक्षणं तासां क्रमेणोपदिशामित' इति भूमिलक्षणपुरस्काराद्। स्वपदभारदूरीकरणं चावश्यकमिति भूमिपदपुरस्कारः। भगवदवतारप्रयोजनज्ञानार्थं कथामारभत इति यदुक्तं तद् व्युत्पादयन्ति स भक्तानामित्यादि। भक्तिमताम्। आधिदैविकविरहदुःखनाशाय कृष्णावतरणम्। आधिभौतिकदुःखनाशाय शब्दरूपसङ्कर्षणव्यूहावतरणम्। भूमिदुःखभाजे। मातृदुःखभाजे प्रद्युम्नः। गर्भसम्बन्धस्तस्यैवेति।आदिशब्दार्थोत्तरापरीक्षित्प्रभृतिदुःखभाजेऽनिरुद्धः, धर्मपुरुषार्थत्वात्। परीक्षिन्मोक्षदानार्थं वासुदेवः। तेनावतारप्रयोजनपञ्चानां न विरोधः। तानि तु 'भक्तियोगवितानार्थं कथं पश्येमहि स्त्रिय'इति। 'मुक्तिं ददाति कर्हिचित् स न भक्तियोग'मिति।'भारावताराय च भुव' इति। 'प्रादुरासं वरदरा'डिति। 'यदा यदा हि धर्मस्य ग्लानिर्भवति भारते'ति। पूर्ववाक्ये भक्तियोगोत्र विरहः। द्वितीयवाक्ये मुक्तिदानं वासुदेवकार्यम्। तृतीयवाक्ये भुवो भारावतारः सङ्कर्षणकार्यम्। चतुर्थवाक्ये वरदराट्प्रादुर्भावः देवकीगर्भसम्बन्धः प्रद्युम्नकार्यम्। पञ्चमवाक्ये धर्मरक्षाऽनिरुद्धकार्यम्। भूमिर्मालेति भूमेः प्राथम्यमुक्तम्। भूमिः सात्त्विकी भगवत्पत्नीत्वात्। माता राजसी राजपुत्रीत्वात्। अन्ये उत्तरा च तामसी तम काङ्क्षायां गर्भाकाङ्क्षावतीत्वात्। परीक्षित् राजसः। तदुक्तं त्रिविधा इति। सर्वेषामिति स्वशान्तरूपाणाम्।'स्वशान्तरूपेष्वितरैः स्वरूपैरभ्यर्द्यमानेष्वनुकम्पितात्मे'ति तृतीयस्कन्धात्। दुःखे महत्त्वं किमित्यत आहुः नान्येनेत्यादि। तथा चान्याविनिवार्यत्वं महत्त्वमितिभावः। अन्येनावतारान्तरेण साधनेन च। निवारणं ज्ञानादिनापि सम्भवति यदा तदा न कृष्णाविर्भावः, यथा चित्रकेतुप्रसङ्गे। चित्रकेतुं प्रति न भगवदवतारः। भूमेर्ब्रह्मवाक्यमात्रेण दुःखे निवृत्ते परन्तु विशेषेण मर्दनक्लेशादिकं न निवृत्तं तदा कृष्णः प्रादुरासीदिति। हरिरिति हरित्वेन रूपेण। दुःखानि हरतीति हरित्वधर्मपुरस्कारेण न तु भक्तनिगूढभावकरणत्व-

धर्मपुरस्कारेण। स्थितिर्निर्णयः। अस्मिन् वाक्ये साधारणे व्यष्टिसमष्टिभेदेन कृष्णावतारः। 'आहूत इव मे शीघ्रं दर्शनं याति चेतसी'तिनारदवाक्ये। भक्तियोगविधानार्थं कृष्णाविर्भावः नारदस्य। प्रह्लादस्य सर्वदा दर्शनं, तत्रापि भक्तियोगविधानार्थं कृष्णाविर्भावः। एतयोः पूर्वोक्तावतारप्रयोजनपञ्चस्वन्तर्भावः। तथा च भक्तमहद्दुःखविनिवारणे साधनान्तरावतारान्तरेच्छाशक्तिरेव प्रयोजिकेतिभावः। उद्धारविषयनिर्धारमाहुः ये भक्ता इति। शास्त्रसहितोद्धरणे प्रमेयबलं न स्यादितिभावः। स्त्रीणामिति जगज्जन्मादिकर्त्री शक्तिः सदानन्दस्येति शक्तिस्त्रीमहिम्ना तथा। 'भूर्लक्ष्मीर्भुवर्लक्ष्मीः सुवः कालकर्णतपा महालक्ष्मी'रितिश्रुतेः। अत्रेति दशमे। तथा च तृतीयस्कन्धादेव विशेषः। ननु ससाधनानामपि कुतो न विषयत्वमित्याशङ्क्य तत्र बाधकमाहुः येषामिति। निरोधकमिति चित्तवृत्तिनिरोधकम्। शेषभाव इति समाध्यादिविषयत्वेन तन्निर्वाहकत्वाच्छेषभावः। 'शेषः परार्थत्वा'दितिजैमिनिसूत्रम्। ननु भक्तिमार्गेपि भक्तिशेषत्वं वर्तते तद्वत् योगादौ शेषत्वं भवत्विति चेन्न 'सोश्नुते सर्वान् सह ब्रह्मणे'ति श्रुतावप्रधानतृतीयया भक्तिमार्गे शेषत्वेप्यदोषात्। हरेरिति उपस्थितिप्रयोजकधर्मार्थं हरिपदम्। हरिः कृष्ण इति घटः पृथिवीतिवत्। किञ्च ससाधनानां निरोधपदार्थोपि पुष्टिस्थाद्विलक्षणोतोपि न विषयत्वमित्याहुः संसारेति। 'दुःखाभावः सुखं चैव पुरुपार्थद्वयं मत'मित्याशयेनोक्तम्। तथा च सूत्रं 'यद्वा तद्वा तदुच्छित्तिः पुरुपार्थः तदुच्छित्तिः पुरुपार्थ' इति। निरोध इति 'योगश्चित्तवृत्तिनिरोध' इति योगसूत्रम्। अत्रेति ससाधनेषु। निरूप्यत इति अत्र त्वया योगादिशास्त्रनिरुद्धेन। तथा च संसारस्याविद्याकार्यत्वेन तन्निवृत्तेश्च ज्ञानैकसाध्यत्वेन ज्ञानरूप एव निरोधो योगादिशास्त्रनिरुद्धानां वाच्य इत्याहुः अत इति। संसारस्याविद्याजन्यत्वेनाविद्यात्वात्। साङ्ख्ययोगावेकं शास्त्रम्। तत्र 'देशबन्धश्चित्तस्य धारणा'।'तत्र प्रत्ययैकतानता ध्यानम्'। 'तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधि'रिति योगसूत्रत्रयम्। कापिलसाङ्ख्यप्रवचनसूत्रवृत्तौ'समाधिसुषुप्तिमोक्षेषु ब्रह्मरूपत' इति सूत्रम्। अतो ब्रह्मणो ज्ञानत्वाज् ज्ञानात्मेति। दुःखरूपेति 'यद्वा तद्वे'त्युक्तसूत्रात्। भक्तानां तु संसारो लीलोपयोगित्वेन सुखरूप इति बहुवेव वैलक्षण्यमितिभावः। एवं प्रासङ्गिकमुक्तम्। वेदवेदान्तसारे उपनिषदां संशयवारकत्वं, किञ्च कपिलस्मृतीनां तृतीयस्कन्धोक्तानामुपबृंहकत्वम्, न साङ्ख्ययोगशास्त्रयोरिति 'स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्ग' इति द्वितीयाध्यायवैयाससूत्रन्याय उक्तः। प्रासङ्गिकमुक्त्वा पूर्वोक्त'भक्तानां दुःखे'त्यादिनोक्तमुपसंहरन्ति स एवमिति। एकं निःसाधनानां भगवत्प्राप्तिलक्षणम्। द्वयं चेति भक्तियोगवितानरूपं, पृथोक्तम्। पुष्टिस्थामलात्मसुन्योर्निरोधस्यैकरूपत्वेन पूर्वोक्तशेषभावाभावाच्च विरुध्यत इत्यर्थः। विरुध्यत इति कर्मकर्तरिप्रयोगः। पच्यते फलं स्वयमेवेत्यत्रेव। एवं प्रकारेण निःसाधनोद्धारजनक-

त्वोक्तावपि शेषभावाभावात् साधारणोद्धारजनकत्वोक्तेरुपलक्षणविधया ग्रहणप्रकारेण लीलाकरणे तस्य शुकव्यासाभ्यां च कथने हेतुमाहुः साङ्गस्येति। निरोधस्येति शेषः। प्रक्रिया एकत्वमविवक्षितम्। प्रक्रियाः प्रकरणानि पञ्च। अत्रोपपत्तिमाहुः तत इति। यतश्चिकीर्षितनिरोधमवतीर्य स्वयं कृतवानतो हेतोरयं स्कन्धो हि पञ्चप्रकरणसहितो दशमत्वेन युज्यत इत्यर्थः। अन्यथाऽनवतीर्यैवाम्बरीपादेरिवात्रापि भक्तदुःखनिवारणोक्तौ भक्तकथैवोक्ता भवतीतीशानुकथैवेयमपि भवेदित्यस्य स्कन्धस्य दशमत्वं न स्यादितिभावः। अङ्गमाहुः अवतार इति। येन विना यन्न सम्भवति तत्तदङ्गमत्रौचित्ये निरोधे उच्यते। तथा चाविर्भावप्रतिपादकजन्मप्रकरणाभावे निरोधपदार्थ एव न धार्यः स्यादितिभावः। तदङ्गमित्यवताराङ्गम्। 'भक्ताना'मित्यादिना भक्तानां दुःखनिवारकः। ये शास्त्ररहितास्ते भक्तास्तेषामुद्धारक इति'गोप्यः कामा'दित्यत्रोक्ताः,भयद्वेपवन्तोऽभक्ता दुःखनाशादौ न सङ्गृहीताः, तत्सङ्ग्रहार्थं टिप्पण्यां व्याख्यानान्तरं संसारेति। अत्रेति भयादिसाधनेषु। निरोधः मनोनिवेशः। 'तस्मात् केनाप्युपायेन मनः कृष्णे निवेशये'दितिवाक्यम्। तेन भक्तिरहस्यभजनं तदिहामुत्रफलभोगनैराश्येनैवामुष्मिन्मनःकल्पनमेतदेव च'नैष्कर्म्य'मितिश्रुतौ मानसी सेवोक्तोभयसाधारणी। अत इति भयादीनां मानसत्वप्रवेशात्। ज्ञानात्मा स्मरणात्मा। एकं भगवत्प्राप्तिलक्षणम्। तथा च 'ददर्श चक्रायुधमग्रतो यतस्तदेव रूपं दुरवापमाप'इत्यादिवाक्यादसुरा अप्युद्धारविषयत्वेन सङ्गृह्यन्ते। द्वयं चेति दुःखनिवृत्तिः संसारनिवृत्तिश्चेति। केषाञ्चिद् भक्तानां अम्बरीपादीनां संसारदुःखमेव निवारितम्, न तु संसारम्। लीलोपयोगित्वेन संसारस्य स्थापितत्वात्। केषाञ्चिद् भक्तानां वृत्रासुरप्रभृतीनां अन्येषाममलात्ममुनीनां च संसारोपि नाशितः तेन द्वयमपि फलमित्यर्थः। अध्यायार्थं भक्तदुःखमध्याये सङ्गमयितुं व्याप्तिवारणार्थं वाक्यकदम्बं पृथक्कृत्य वाक्यकदम्बार्थमाहुः अवतार इति। ननु दुःखत्वेनावतारत्वेन-कार्यकारणभावाद् दुःखान्त एव ग्रन्थो वक्तव्यः। सान्त्वनग्रन्थस्य किं प्रयोजनमत आहुः धैर्यार्थमिति। दुःखसहनार्थं भूमिमात्रोः सान्त्वनमाश्वासनं प्रोक्तम्। अन्यथा सान्त्वनाभावे दुःखस्य महत्त्वाद् दुःखाश्रयस्थितिरेव न स्यात्। तथा सति कारणाभावादवतारोपि न स्यादतः सान्त्वनम्। तथा च भक्तिमार्गीयावान्तरसाधनार्थं सान्त्वनं, 'कश्चिद् धीरः प्रत्यगात्मानमैक्ष'दितिश्रुतेः। ननु यद्येवं तर्हि पश्चान्नारदोक्त्या दुःखं किमित्युक्तमत आहुः अन्त इति। भक्तकृतं नारदकृतम्। ननु तर्ह्याकाशवाण्याः किं प्रयोजनमत आहुः वै हरेरित्यादि। हरेः सकाशाद् या आकाशवाणी सा वै चतुर्थ्या लुक्, निश्चयार्थकात्। प्रादुर्भावनिश्चयायेति 'वै' इत्यव्ययस्यार्थः। यद्याकाशवाणी व्यापिका परिच्छिन्ना न स्यात् तदा मायोद्घाटनाभावाद् व्यापककृष्णः परिच्छिन्नः प्रादुर्भूत इतिनिश्चयो न स्यात्। मायाशक्तिरहितानां व्यापकदिगादीनामप्याविर्भावस्य

सम्भवात्। अतो वै हरेराकाशवाणी भवतीति वाक्यभेदेनान्वयः।'आकाशवाणी' 'वाग्देव' इतिपदद्वयात्। 'सद्यो देव्यम्बरं गते'त्याकाशवाणी आकाशतन्मात्रा तत्र मुक्तेः। वाग्देवः 'अदृश्यतानुजा विष्णोः सायुधाष्टमहाभुजे'त्युक्तः। इत्यतो वाग्देवः। ननु तस्याः किंप्रयोजनं यदेवं निश्चायितवतीत्यत आहुः वाग्देव इत्यादि। वाग्देवः सर्वमुक्त्यर्थं 'तमेव विदित्वा अतिमृत्युमेती'तिश्रुतेः। पितुर्गेहाद् व्रजगमनेनान्यत्र स्थितस्यान्यत्र स्थापनरूपेण। उद्गत हर्याविर्भावं कर्तुं अशक्तः सन् तथा चक्रे नाम कलहोद्यमेन प्रादुर्भावनिश्चायनं कृतवान्। भक्तत्वमस्या भगवत्कार्यसाधकत्वात्। ननु कथमेतदवगम्यते इत्यत आहुः तथेति। हि यतो हेतोः नारदस्तथैव, वाग्देववदेव अन्ते स्फुटं कलहोत्पादकत्वेनोक्तः। द्वितीयस्कन्धे 'पायुर्यमस्ये'त्यत्र सुबोधिन्यां नारदस्यानुद्भूतकलहानां कलहमुत्पाद्य तद्द्वारा तन्निवर्तकत्वं व्याख्यातम्। तन्निवर्तकत्वं विरोधिनिवर्तकत्वम्। अत उपसंहारात् प्रादुर्भावनिश्चायनार्थत्वं वाग्देव्याः कलहोद्यमकरणमित्यवगम्यत इत्यर्थः। सुबोधिन्यां श्लोकान् विभजन्ते स दशभिरिति। तथेति श्रीदेवकीसान्त्वनम्। नारदोक्त्यैवेति एवकारेण मातृदुःखदाकाशवाणीयोगो व्यवच्छिद्यते। अञ्जसा सामस्त्येन। तथा च शीघ्रमवताराय नारदोक्तिरित्यर्थः। तत्रेति अध्यायस्थेषु श्लोकेषु। हेतुभूतमिति अध्यायार्थम्। श्लोकाष्टकार्थमाहुः उद्यम इति। 'शरणं ययावि'ति वक्ष्यते। स्वगृहादन्यत्र स्वाभिप्रायप्रकाशनं शरणमार्गः। षड्विधशरणागतौ कार्पण्यं शरणागतिः, सापि अष्टकेन स्तुवीतेत्यष्टकेन स्वाभिप्रायप्रकाशने स्तवनात्मके सति भवतीति श्लोकाष्टकम्। दैन्यमिति कार्पण्यम्। 'कृपणः स तु विज्ञेयो योनालोचितयाचकः'। भक्त्यन्तर्गतत्वाद् भगवदवतारे साधुकारणम्। 'भक्तानां दैन्यमेवैकं हरितोषणसाधन'मिति। भक्त्यन्तर्गतत्वं आर्तिरूपाधिकाररूपत्वात्। साङ्गभक्तेर्भगवदवतारकारणत्वात्। शब्दत इति पूर्वान्वयि। श्लोकचतुष्टयार्थ उक्तः। तदर्थ इति भगवद्वाक्यार्थः। विवृत इति तत्समानार्थकशब्दैस्तदर्थकथनं विवरणं तत्कर्म न पृथक्। क्रियेति 'यदुषूपजन्यता'मित्यनेनोक्ता सेवार्था जननक्रिया। जन्म द्वाभ्यां श्लोकाभ्यां, मिलित्वा तु नव श्लोकाः। उपसंहार इति 'इत्यादिश्यामरगणा'नित्यनेनोपसंहारः। तत्र प्रथममिति अर्थाष्टके निरूपणीये। उद्योग इति पूर्वोक्तोद्यमलक्षणालक्षितोऽस्य श्लोकस्यार्थः। शरणगमनरूपः। अयमुद्यमो वा। हरिरिति व्यापिवैकुण्ठेपि हरित्वधर्मेण प्राकट्यमित्युक्तम्। 'वेदे रामायणे चैव पुराणे भारते तथा आदावन्ते च मध्ये च हरिः सर्वत्र गीयत' इतिवाक्यात्। भगवत्स्थान इति प्रकटभगवत्के स्थाने मोक्षदशायां गमनान्न गता। जनितेति तृतीयस्कन्धे वाराहप्रसङ्गे स्पष्टम्। तत्रेति ब्रह्मस्थाने। यावदासीन इति 'असुराणां वा इयमग्र आसीद्यावदासीनः परापश्यति तावद्देवाना'मितिश्रुतौ भुवो याचनोत्तरं कियद्वो दास्यामीतिप्रश्ने ततः सलावृकी त्रिःपरिक्रान्तिमितां याचित्वा धृतसलावृकीरूपेणेन्द्रेण

'सर्वस्याः परिक्रमणे भूमेः प्राप्त्या वेदित्वमुक्तम्, तदिदानीं नष्टं, राज्ञामुच्छास्त्रवृत्तित्वा-दितिज्ञापनाय तावद्रूपेण हविर्धान्यात्मकेन खिन्नेन गमनम्। परापश्यति 'परादिमोक्ष-प्राधान्यप्रातिलोम्येषु धर्षणे, आभिमुख्ये भृशार्थे च विक्रमे च गतौ वध' इति विश्वः, परिक्रमे पश्यतीत्यर्थः। 'वः' सलावृकीभ्यो'ह'मसुरो दासामीत्यर्थः। 'सलावृकी'शचीन्द्राणी। तदुक्तमारणे 'एतयैवेन्द्रः सलावृक्या सह असुरान् परिवृश्चती'ति 'एतया' शच्या सलावृक्या। 'शालावृकः शृगालेपि सारमेये वलीमुख' इति विश्वः। सलावृकस्य स्त्री सलावृकी, तया। वृश्चति ओ व्रश्चू छेदने। छिनत्ति। आरम्भे भूमिब्रह्मयोगकथनेन वेदसारत्वम्। ब्रह्मणि मन्त्राः हविर्धान्यां हविर्दुग्धम्। द्रव्यदेवतात्मको याग इति याग उक्तः। संहितारम्भे 'उपायवस्थे'-त्यत्र मनुष्याः स्थेत्यर्थे ब्राह्मणानां मन्त्रदेवताधाराणां सत्त्वात्, 'आप्यायध्वमघ्निया' इत्यत्र हविराश्रयाणां गवां सत्त्वादिति। वेदान्ते विराड्रूपम्। 'भूमिः गौः पशुरन्तरिक्ष-देवता, अन्तरिक्षदेवा वै पशव' इति। 'पुरैव पुंसे'तिश्लोके पुमानुक्त इति व्याहृतिरूपो विराट्। तथा च श्रुतिः, 'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीते'ति छान्दोग्ये। अत उक्तं देवोपयोगिनेति। यागो देवोपयोगी। 'देवान् भावयतानेन ते देवा भावयन्तु वः परस्परं भावयन्तः श्रेयः परमवाप्स्यथे'ति गीतायाः। विराट् दैवीसम्पद्युक्तदेवोपयोगीति। द्वितीये ज्ञानस्कन्धे धारणाश्रयो विराडिति। वेदान्तसारत्वम्।'वेदवेदान्तसारं हि श्रीभागवतमिष्यत' इति। शीघ्रमिति शीघ्रं निमज्जनाभावाय। कार्येति अष्टकोक्तकार्यावश्यकत्वाय। शरणेति शरणे रक्षकस्य ब्रह्मणः स्थाने गमनम्। शरणपदेन स्वाभिप्रायप्रकाशनम्। तत्र गत्वा सूच्यते। दैवसम्पदा शरणमार्गेण सेवमानाया भूमेः पापवेधः सभारात्मात्रोक्तः दैत्यकृत इति 'दैत्यानीकशतायुतै'रित्येतावता निर्वाहे तदितरवैयर्थ्यमाशङ्क्य दृप्तादिशब्दार्थं वक्तुमाहुः दैत्याः सर्व इति।'मायेत्यसुरा' इतिश्रुतेः मायादेवताः। माया देवता येषां ते। अकापट्येन सा सेवितवतीति भगवत्स्पृष्टा तां स्वदेवतयैव नयनमाहुः कापट्येनैवेति। कापट्यं माया, भूभारप्रयोजिका, विश्वम्भरात्वात्।'दासवधदमायये'त्येकादशे मायाकपटः। देवतया देवताभिभवकरणस्य युक्तत्वादेवकारोन्ययोगव्यवच्छेदकः। रसातले दैत्यमुक्ति-स्थाने। अवतीर्णा इति 'मनो यत्र निपक्तमस्ये'तिश्रुतेः। राज्ञामिति अत्र राजानीक-कृतभूभारो भूमेर्न सम्भवति दैत्यानां देवाभिभावकत्वात्। स्पष्टं सह वैयभायां बृहदारण्यके छान्दोग्ये च। अत उक्तं राज्ञां दैत्यत्वज्ञापकं लक्षणमिति। दैत्यत्वस्य ज्ञापकमनुज्ञापकम्। दैत्यलक्षणं वक्ष्यते दृप्तत्वमिति। दृप्तशब्दः दृप हर्षमोहनयोः दि० प० से० तस्य कर्मणि-क्तप्रत्यये रूपम्, इडभावः। तत्त्वं उच्छास्त्रवृत्तित्वम्। किं शास्त्रं कोत्रोदर्थः। 'उत् प्रकाशे वियोगे च प्राबल्यास्वास्थ्यशक्तिषु। प्राधान्ये बन्धने भावे मोक्षे लाभोर्ध्वकर्मणी'ति विश्वोक्ते-ष्वर्थेषु। शास्त्रं गीता त्रयोदशाध्यायीयं 'अमानित्वमदम्भित्व'मित्यारभ्य 'एतज्ज्ञानमिति

प्रोक्त'मित्यन्तं, षट् शास्त्राणि वा। उदर्थो वियोगः। शास्त्राणां व्यृद्धिरुच्छास्त्रम्। अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थेति समासोऽव्ययीभावः। धात्वर्थो मोहनमत्र। क्तप्रत्ययार्थः कर्म, वर्तित्वाख्यम्। एवं च शास्त्ररहितकर्मत्वमुच्छास्त्रवर्तित्वम्। अतिदिशन्ति स एत-देवेति। यथा 'दृप्ता केशवमब्रवी'दित्यत्र भगवानस्मदर्थे खेदं न प्राप्नोति, अस्माभिः कथं तदर्थे खेदः प्राप्तव्य इति दृप्तत्वमिति। 'मदर्थेऽर्थपरित्यागो भोगस्य च सुखस्य चे'ति शास्त्र-वियोगः, 'अमानित्व'मितिशास्त्रवियोगः, उच्छास्त्रे वर्तित्वम्। सहसुपेति समासः। हता अ-मुक्ता इति सम्भूत्युपासकत्वेन अन्धंतमःप्रवेशरूपमुक्तित्वेन कार्यकारणभावः। अन्धंतमो माया सम्भूतिरतत्त्वेन भूयस्तमस्त्वेन। उच्छास्त्रवर्तित्वेन अन्धन्तमआवृतलोकगतित्वेन कार्य-कारणभावः। शारीरब्राह्मणश्लोकाभ्याम्। एवं च हताः उच्छास्त्रवर्तित्वेनान्धन्तमआवृतलोकं गताः। प्रविष्टा इति अन्धन्तमःप्रवेशरूपमुक्त्यभावात् तावज्ज्ञानसत्त्वात् प्रविष्टा इत्यर्थः। तथेति दैत्या इत्यर्थः। तेप्यन्त इति भीष्मादय इति टिप्पण्याम्। अवतार इति बुद्धे तद्धर्मा-स्ते राजधर्मा उच्छास्त्रवर्तित्वादयः। व्याजेतीति बुद्धो दृप्तनृपः न तु दृप्तव्याज इति दृप्तनृप-व्याजा अन्ये राजानः। ते च दैत्या इति विशेषणेन बलिप्रह्लादादयो व्यावर्तिताः। घातार्थ-मिति दृप्तविशेषणेन ज्ञातम्। शतानीति सङ्ख्ये ये शतपदं नैकवचनान्तमितिज्ञापितम्। तेन न स्मार्तप्रयोगः। भूरिभारेणाक्रान्तत्वं विश्वंभराया न सम्भवतीत्युक्तम्। दैत्यानां लक्षणमाहुः दैत्यत्वमिति। विश्वम्भरायाः विश्वस्मिन् भारः तज्जनकत्वम्। भारो नाम सन्नह्य सहसैवा-चारित्वम्। आरणे 'तेऽसुराः सन्नह्य सहसैवाचरन्, ब्रह्मचर्येण तपसैव देवास्तेऽसुरा अमु-ह्य'न्नितिश्रुतेः। श्रुतौ'देवा'इति आचरन्। लङ् बहुवचनम्। अविद्वत्त्वमबुधत्वं च भारः। शारीर-ब्राह्मणे 'असुर्या नाम ते लोका अन्धेन तमसा वृताः तांस्ते प्रेत्यापि गच्छन्त्यविद्वांसोऽबुधा जना'इतिश्रुतेः, छान्दोग्ये पाप्मवेद्धृत्वं भारः। 'तं ह्यसुराः पाप्मना विविधु'रितिश्रुतेः। 'तं' प्राणरूपोद्गीथोपासकम्। ननु 'गामाविश्य च भूतानि धारयाम्यहमोजसे'ति गीतोक्तौजः सर्वतश्च शीघ्रं निमग्ना भवतीत्यत्र बाधकमिति लोकदृष्टिमथने तु मारणोक्तं पृथिव्या नौकात्वं दृष्टान्तेनाहुः यथेति। मज्जयतीति अकर्मको धातुः। नौका मज्ज'ति तां मज्जयति। णिच्। ननु नौकानिमज्जने नौजः प्रतिबन्धकं तथा चिक्रीडिषाभावात् किन्तु रसस्तदभावात् विषमो दृष्टान्त इति चेद् नौकामज्जनमात्रं दृष्टान्तोस्तु, नैयायिकमतेन पृथिवीत्वान् नाप्योजः प्रतिबन्धकं मास्तु। नन्वियदवधि दैत्याः स्थिता एवाधुनैव भारे किं कारणमत आहुः चलेति। अनीकैः सैन्यैराक्रमणे इतस्ततः पादविक्षेपे। तथा च बलं भारत्वकारणम्। पूर्वमिति तृतीयस्कन्धे। उद्धार इति वाराहद्वारा उद्धारे। उपाय इति चिन्तादिः। ब्रह्माण-मिति या प्रापणे द्विकर्मकः। ब्रह्मणः शरणं गृहं शरणमार्गं वा ययौ।

१०–१–१८. गौर्भूत्वेत्यत्र देवानामिति स्वस्या अपि देवत्वादितिभावः। हविरिति

दुग्धं यज्ञैकदेशं धीयतेस्यामिति हविर्धानी तद्रूपेणेत्यर्थः। 'करणाधिकरणयोश्चेति ल्युट्'। गौर्भूत्वेति भक्त्या सामर्थ्यम्। 'भूमिर्धेनुर्धरिणी लोकधारिणी'तिश्रुतेर्भूमेराधिदैविकं रूपं गौः। व्यसनं दुःखं अश्रूणि मुखे यस्याः सा इत्यत्राश्र्वाधारत्वं मुखे न सम्भवतीति तद् व्युत्पादयामासुः अश्रूणीति। न च मुखशब्दो मूर्धनि लाक्षणिक इति वाच्यं 'लक्षणां नैव वक्ष्यामी'ति प्रथमस्कन्धसुबोधिन्यां स्वयं प्रतिज्ञानात्। समायान्तीति अधोमुखीत्व-दशायाम्। अन्यदा तु कपोले। अन्तरिति 'सोरोदी'दितिश्रुतेरन्तःप्रसिद्धे। स्वेद इति 'अग्नेराप' इतिश्रुतेः। अश्रूणां ज्ञानद्वारत्वे युक्तिमाहुः खेदोपीति। भारज्ञानजनितः। क्रिया-जनितः खेदोङ्गान्तरेभ्यो निर्गच्छतीतिभावः। अभिप्राय इति भगवत्पत्नीत्वेन यशसा ज्ञानं पृथावत्। विसंवादीति विरुद्धः संवादः संवदनमस्यास्तीति विरुद्धसंवादि। इन्। यथा शुक्तौ रजतमिति वाक्यमप्रमाणं अन्तःस्थितो धर्मः शुक्तित्वं तद्विरुद्धः संवादः रजतत्ववदनं रजतमिति, रजतत्वेन शुक्त्युपस्थितिः। सोस्य शुक्तौ रजतमितिवाक्यस्यास्तीतीदं वाक्य-मप्रमाणम्। धर्मप्राकट्येति 'अश्रुमुखी खिन्ने'तिपदाभ्यामन्तःस्थितखेदप्राकट्यपूर्वकं रुदन-रूपबहिःखेदरूपधर्मकथनम्। बह्वूनामिति अश्रुहेतुभूतानां बहूनां दुःखानां सम्भवात्। कथनमिति खिन्नेति खेदरूपधर्मकथनम्। ननु ब्रह्मापि सर्वज्ञ ईश्वरत्वात् अतः कथनम-युक्तमित्याशङ्क्याहुः अधिकारित्वादिति। ब्रह्मणोधिकारित्वात्। न सर्वज्ञतेति अत एव द्वितीयस्य नवमाध्याये 'स आदिदेवो जगतां परो गुरुः स्वधिष्ण्यमास्थाय सिसृक्षयैक्षत, तां नाध्यगच्छद् दृशमत्र सम्मतां प्रपञ्चनिर्माणविधिर्यया भवे'दित्यनेनाविचारदशायामसर्वज्ञ-तोक्ता। कथनमिति व्यसनकथनं 'व्यसनं समवोचते'ति। 'खेदेनाश्रुमुखी खिन्ने'तिपाठ-क्रमाद् दुःखसन्ततिः। अत्यन्तं परिभाषणपर्यन्तम्। अग्रेपि। ज्ञापकाविति कार्यभूतौ ज्ञात-व्यौ। कारणेन कार्यावश्यम्भावात्। न्यूनपूरणमिदं ज्ञेयम्। 'न न्यूनादन्यपूरण'मिति प्रथम-सुबोधिन्याः। तस्या इति ततः प्रतिकारादन्य उपायो ज्ञानादिरूपः तद्बोधननिवृत्त्यर्थं तस्याः भूमेः तथा खिन्नत्वमुक्तमित्यर्थः। करुणमिति करुणपदज्ञापितशोकः स्थायिभाव आर्थिक उक्तः। 'आर्थिकं तु प्रवक्ष्यामी'ति प्रथमस्कन्धसुबोधिन्याः। पितृवियोगेति पितृ-वियोगजखेदस्य भक्तित्वेन सुखसम्भेदात् तदभाव उक्तः। रोदनमिति स्वस्मिन् मनोनिवेशकं अन्यत्र मनोवारकम्। सामर्थ्यमिति विभुः समर्थः शक्त इति पर्यायाः। उप समीपार्थकं अन्तिक इति समीपार्थकमिति पुनरुक्तिदोषं वारयन्ति स उप समीप इति। अन्तर्या-मिणीति व्यापकाधारत्वं बोधितम्। सतिसप्तमी वा। अन्तर्यामिणि सति। अन्तिकशब्द-स्योपान्ययस्य समीपार्थे तात्पर्यग्राहकत्वं यदा तदा न्यूनता। वेदान्तसारत्वेनान्तर्यामि-ब्राह्मणोक्तान्तर्यामिसामीप्यावश्यकत्वात् पत्नीत्वाच्च। अन्तर्यामिसामीप्याबोधात्। यद्यपि उपस्थिता दोषाख्याने स्थितेत्यर्थे न पुनरुक्तिः तथाप्यप्रसिद्धार्थत्वं दोषः। एवमारम्भार्थक-

त्वेपि बोध्यम्। तथा च विश्वः 'उप सामर्थ्यदाक्षिण्यदोषाख्यानात्ययेषु च। आश्चर्यकरणे दाने नाभावारम्भपूजयोः॥ तद्योगेपि च लिप्सायां रमणार्थोपमार्थयोः उपादानेधिके प्रोक्तमासन्नेषु प्रकीर्तित'मिति। अत आसन्नमात्रार्थकमुपेत्यव्ययम्। श्रीभागवतीयवेदवेदान्तसारत्वार्थं सामीप्यार्थकाव्ययद्वयस्यावश्यकत्वात्। अप्रतीकारेति ज्ञानादिभिरप्रतीकारो यस्येत्यप्रतीकारम्। तच्च दुःखमप्रतीकारदुःखम्।

१०–१–१९. ब्रह्मा तदुपेत्यत्र दैत्यसम्बन्धित्वादिति। भगवत्पत्नीत्वेपि भगवदिच्छया दैत्यसम्बन्धित्वादित्यर्थः। ज्येष्ठत्वाद् दैत्यानाम्। 'यावदासीन' इत्युक्तश्रुतेः। अकारणशङ्केति कारणं देवसम्बन्धित्वमशोके। गीतायां 'मा शुचः सम्पदं दैवीमभिजातोसि पाण्डवे'तिवाक्यात्। अकारणं दैत्यसम्बन्धित्वं तस्य शङ्का तर्कः तद्व्यावृत्त्यर्थम्। ब्रह्मज्ञानमत आलोचनेन तत् भूम्युक्ताष्टकार्थं उपधार्य निश्चित्येतिपदत्रयार्थमाहुः आलोचनेति। प्रतीकारं क्षीरपयोनिधितीरगमनोपस्थानदेवाज्ञापनादिकम्। तथेति अष्टकोक्तषड्गुणैश्वर्ययुक्ताष्टार्थाविर्भावनेन प्रतीकारे सामर्थ्यम्। ब्रह्मत्वात् भक्तिमत्त्वात्। ज्ञानात्मकत्वादिति न बृहत्त्वाद् बृंहणत्वाद् ब्रह्मेति हेतुरथशब्दस्य, अथ ब्रह्मा तदुपधार्येत्यन्वयमतिक्रम्य यथाश्रुतान्वयेन अथशब्द आनन्तर्ये इत्याहुः स्वेति। भूमीति सतिसप्तमी। ससाधनमिति आज्ञापने साधनं हेतवो देवास्तैः सह ससाधनम्। अनेनाकारणशङ्काव्यावृत्त्यर्थमित्यपि सुबोधिनीपाठः। देवाकारणशङ्काव्यावृत्त्यर्थमित्यर्थः। उपायेति यथा वृकासुराय वरः। निमित्तेति जगन्नाथस्य। नयनमिति ज्ञानम्। भगवत इति तेन तत्र भगवत्प्राकट्यं, मधुरावत्। 'क्षीरोदं मे प्रियं धाम श्वेतद्वीपं च भास्वर'मिति गजेन्द्रमोक्षेष्टमस्कन्धे। इतीति इति हेतोः क्षीरपयोनिधेस्तीरं जगामेति सम्बन्धः। अतो यत्र भगवांस्तत्र जगाम। पक्षान्तरमाहुः व्यापिवैकुण्ठेति। तत्रेति क्षीरपयोनिधेस्तीरे। नैकट्यादिति अयमर्थः। क्षीरपयोनिधिः क्रौञ्चपर्वतः क्रौञ्चद्वीपः। क्रौञ्चद्वीपाद् द्विगुणः क्षीरपयोनिधिः, तत्र क्रौञ्चपर्वतः। तस्य पर्वतराजस्य सपूर्वपगिरयः शुक्लो वर्धमानो भोजनउपबर्हणो नन्दो नन्दनः सर्वतो भद्र इति। तत्र शुक्लः श्वेतपर्वतः। 'शुक्लो योगान्तरे श्वेत' इतिविश्वात्, 'श्वेतो द्वीपाद्रिभेदयो'रिति विश्वाच्च। श्वेतद्वीपनामनिवर्तकः। क्रौञ्चपर्वतवत्। तदुक्तं पञ्चमस्कन्धे, 'ततो बहिः क्रौञ्चद्वीपो द्विगुणः स्वसमानेन क्षीरोदेन परित उपक्लृप्तः वृतो यथा कुशद्वीपो घृतोदेन, यस्मिन् क्रौञ्चो नाम पर्वतराजो द्वीपनामनिवर्तक आस्ते' इति। एवं सति श्वेतपर्वते स्वप्रियधाम, श्वेतद्वीपनामनिवर्तके भगवतः प्रियत्वं तेन तत्र व्यापिवैकुण्ठाविर्भावस्य जातत्वेन तदधिष्ठानद्वीपावरणक्षीरपयोनिधिस्तदीयतीरस्य नैकट्यादित्यर्थः। क्षीरपयोधिमात्रान्तरितत्वं नैकट्यम्। ननु ब्रह्मणो न दुर्वासापेक्षया न्यूनसामर्थ्यं, अतो वैकुण्ठे

१. क्रौञ्चद्वीपस्य।

कुतो न गतं ब्रह्मणेत्याशङ्क्याहुः भूमाविति। सपत्न्यां। आसक्तो भगवान्। चेति क्षीरपयोनिधेस्तीरं जगामेत्यर्थः।

१०-१-२०. तत्र गत्वेत्यत्र तिरोभावादिति स्तोत्रकरणाज् ज्ञायते। एतेन ब्रह्मकृतमानससेवायाः कीर्तनभक्तेर्ज्ञापकत्वं द्योतितम्। सायुज्यं फलम्। मध्यकालनिर्वाहकोऽधिकारः। गमनमात्रेणैवेति एवकारेण मार्गश्रमाद्यननयोगो व्यवच्छिद्यते। अनुवाद इति 'जगामे'त्यस्यानुवादः। 'समाहित' इतिपदस्यार्थमाहुः समाहितेति। समाधीयते समाधिविषयीक्रियते यो योगः कर्मकौशलरूपः स आरूढो येन, समारूढ इति वा। सहसुपेति समासः। समाहितः इति प्रथमान्तं भिन्नं पदम्। तस्य विवरणं योगारूढ इति। योगः आरूढो येन। न तु योगारुरुक्षुर्ब्रह्मा। स्वयमिति ब्रह्मा। एवेति ब्रह्मयोगव्यवच्छेदक एवकारः। स्वस्याकरणमिति। कृद्योगे, कर्तरि षष्ठी। स्वकर्तृककरणाभावः। इत्याहेति इति हेतोराह स एवेति अन्ययोगव्यवच्छेदक एवकारः। देव इति पचाद्यच्। प्रजापतेरिति त्रयाणां ग्रहणेन वेदवेदान्तस्मार्तसिद्धान्ताः। 'प्रजापतिरकामयते'ति संहिता, काठकोपनिषद्भिः, आरण्यके 'स्मृतिः प्रत्यक्षमैतिह्यमनुमानश्चतुष्टयम्, एतैः सर्वैः आदित्यमण्डलमेव विधास्यत' इति। प्रजापतिः शरीरं, अग्निः आत्मा, सूर्योन्तरात्मेति वा। ऋग्वेदे शरीरम्, आत्मातः प्रजापतिः शरीरम्, 'ब्रह्म तर्हि अग्नि'रित्युत्तरार्धादग्निः परमात्मा, सूर्यश्चक्षुरिन्द्रियाधिष्ठातृत्वादन्तरात्मेति। चतुर्थस्कन्धे त्रयोविंशाध्याये प्रजापतिर्ब्रह्मेतिश्लोकः। 'यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्' इतिवाक्यम्।'चक्षुषश्चक्षुः' इति 'सूर्यस्य सूर्य' इत्यत्र श्रुतिः,सूर्यस्य चक्षुष्ट्वात्। दैत्यानामिति 'कृद्योगे कर्तरि षष्ठी'। न पक्षेति दैत्येषु न पक्षपातः। 'स्वशान्तरूपेष्वितरैः स्वरूपैरभ्यर्द्यमानेष्वनुकम्पितात्मा अजोपि जात' इति वाक्यात्। तत इति दैत्येभ्यः। स्वशान्तरूपदेवत्वनाशोपीति न पक्षपात इत्याहुः देवानां चेति। अदृष्ट इति भगवान्। पुरि शेत इति पुरुषपदव्युत्पत्त्याहुः स्रष्टीति। स्वपितेति ञिष्वप् शये, नित्यस्वप्नकर्ता। तेन नारं नरसमूहः अयनं यस्येति नारायणपदव्युत्पत्तिः। परन्तु महतः स्रष्टैव मणिगणवज् जगद्धारकत्वेन रूपेण वर्ततेन्तर्यामी। महतः स्रष्टुरिदमित्थतया पुरुषसूक्तवागविषयत्वात्। ननु सङ्कर्षणस्य वाग्विषयत्वाद् भूमिनिमित्तदर्शत्वेन भूमिभारभञ्जकत्वाच्च पुरुषसूक्तेनान्तर्यामिधर्मपुरःसरोपस्थानं कथमिति चेन्न। भूमिपत्न्याः पादत्वात् तद्भारहरणार्थं कृष्णस्यावश्यकत्वात् तस्य च पुरुषसूक्तवागविषयत्वेनान्तर्यामिपुरःसरोपस्थानस्य युक्तत्वात्। उपस्थानं सूर्यस्येति 'य आदित्ये तिष्ठन्' इत्याद्यन्तर्यामिब्राह्मणोक्तसूर्यान्तर्याम्यत्र मुख्यः। युक्तं चैतत्। नारायणः स्वपितेत्युक्ते मायिकस्वप्नसृष्टौ दृष्टनित्यपदार्थस्य भगवदाज्ञादिरूपस्यान्तर्यामिकार्यत्वात्। महतः स्रष्टा तु भक्तैः सह निगूढभावं करोतीति। मायासाहित्यस्य श्रुतावदर्शनात्। तेन 'कामं कामं पुरुषो निर्मिमाण' इतिश्रुतौ पुरुषोन्तर्यामी, सोत्र

पुरुषपदार्थः । तेन स्वहृदये वर्तनमप्यन्तर्यामिधर्मः । तत्र इत्यादि तत्र इति भक्तैः सह निगूढभावकर्तृत्वेपि ततः कृष्णात् कार्यं स्वपादभारदूरीकरणं सङ्कर्षणसहायात् तस्यावश्यंभाव इति ज्ञापनार्थम् । अन्तर्यामिधर्मपुरःसरप्रतिपादकपुरुषसूक्तेनेत्युक्तमित्यर्थः। पूर्वान्वयित्वे तु ततः कार्यावश्यंभाव इतिज्ञापनार्थं स्वहृदये पुरुषपदेन नारायणोन्तर्यामित्वेन व्याकृत इत्यर्थः । वैदिकेनेति पुरुषस्य सूक्तं पुरुषसूक्तं तेनेत्यत्र षष्ठी प्रतिपाद्यप्रतिपादकभावसम्बन्धे । पुरुषोक्तत्वाद् वेदमर्हतीति वैदिकं, तदर्हतीति ठक्, तेन पुरुषसूक्तेनेत्युक्तं, तत्र संशयः, पुरुषस्य सूक्तं तत्पुरुषप्रतिपादकं सूक्तं तद् भगवत्प्रेरणया प्राप्तं 'तेने ब्रह्म हृदा य आदिकवय' इतिवाक्यात् आहोस्वित् ब्रह्मणादिकर्विं प्रति वाक्येनोक्तम् । तत्र प्रथमपक्षोत्र 'गिरं समाधा'वित्यग्रेतनवाक्यादित्याहुः भगवदिति । 'गिरं समाधौ गगने समीरिता'मितिवाक्ये क्षेपार्थकेरतिधातुनिष्पन्नस्य सम्पूर्वस्य 'समीरिता'मितिपदस्य कथनात् भगवत्प्रेरणयेति । क्षिप प्रेरण इतिधातुपाठात् । अतो भगवत्प्रेरणया प्राप्तेनेत्युक्तम् । पुरुषसूक्तेनेत्यत्र सूपसर्गार्थमाहुः भगवत इति । अतिप्रियमेव सूक्तं भवतीतिभावः । 'स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तमे'तिन्यायेनाहुः पुरुषसूक्तमिति । पुरुषपदेन सूर्यतदन्तर्यामिणोर्ग्रहणात् तेजोमयाविर्भावकं पुरुषसूक्तं तेजोमयमित्युक्तम् । उपस्थानेति मध्याह्नसन्ध्यायां प्रसिद्धम् । पुरुषसूक्तं भाष्ये तृतीयाध्याये तृतीयपादे पुरुषविद्याधिकरणे उत्तमाधिकारिभिस्तदेवोपासनीयं न विभूतिरूपमित्यनयाऽशेषगुणपूर्णब्रह्मणि विनियुक्तम् । तत् कथमत्र चिन्मात्रे विनियुक्तमनुचितमत आहुः अन्तर्यामीति । एवेति 'कृष्णद्युमणी'तिवाक्यादशेषगुणपूर्णस्य सूर्यतदन्तर्यामित्वादेवकारः । अत एव श्रीभागवते 'पौरुषेणापि सूक्तेने'त्यत्र सत्यज्ञानानन्तानन्दं विषय उक्तम् ।

१०–१–२१. गिरं समाधावित्यत्र पुरुष एवेति अन्तर्यामित्वेन नारायणः न तु कृष्णत्वेन । स्वान्तःकरण इति 'स मानसीन आत्मा जनाना'मितिश्रुतेः । अतिसूक्ष्मत्वादिति 'यथा यथात्मा परिमृज्यतेसौ मत्पुण्यगाथाश्रवणाभिधानैः तथा तथा पश्यति वस्तु सूक्ष्मं चक्षुर्यथैवाञ्जनसम्प्रयुक्त'मितिवाक्यात् सूक्ष्मं केषाञ्चिद् देवानां गम्यं भवतीति 'त्रिदशानुवाच हे'ति ज्ञापनमनुपपन्नमतः अतिशब्दः । ब्रह्मणो मानसीसेवामाहुः समाधौ य इति । सलोक इति एतेन भक्तियुक्तो वेधा उक्तः, अन्तराभूतग्रामवत्, 'स्वात्मनः' इतिसूत्रात् । अन्यथा तु समाधावभेदः । 'ता नाविदन् मय्यनुषङ्गबद्धधियः स्वमात्मानमदस्तथेदं यथा समाधौ मुनयोब्धितोये नद्यः प्रविष्टा इव नामरूपे' इतिवाक्यात् । तत्राकाश इति समाधौ यो गगनं आकाशस्तस्मिन् । 'गिर'मिति गगनतन्मात्रा तद्व्यावृत्त्यर्थमाहुः भगवद्वाक्यमिति । गगनशब्दस्याप्रयोजकत्वात् । तथा सति गगनेन समीरितामिति प्रयुक्तं स्यात् । एवं च 'यद् वाचानभ्युदितं येन वागभ्युद्यते तदेव ब्रह्म त्वं विद्धि

नेदं यदिदमुपासत' इतिकेनोपनिषच्छ्रुतेः। 'समीरिता'मित्यस्यार्थः पूर्वश्लोके भगवत्प्रेरणया प्राप्तेनेत्यनया सम्यक्प्राप्तामित्युक्तः। 'निशम्ये'त्यत्र 'नि'शब्दार्थमाहुः भगवतोक्तमिति। तच्छ्रुत्वेति निशम्येत्यस्यार्थः। उक्तस्यैव नितरां श्रवणसम्भवात्। श्रुतवानिति कर्तृप्रत्ययान्तेन भावप्रत्ययान्तनिशम्येत्यस्य विवरणम्। धात्वर्थश्रवणकर्ता उवाचेत्येककर्तृकत्वबोधाय। किञ्च अव्ययकृतो भाव इतिवचनं 'कर्तरि कृदि'ति सूत्राद् दुर्बलम्। विशेषवचनत्वेपीत्यभिप्रायः। पूर्वकालो न वाच्यः। 'तद्विशेष्यकत्वोधापत्ते'रित्यादि बहूक्तं मनोरमायाम्। यद्वा भगवतोक्तमिति 'समीरिता'मित्यस्य विवरणम्। श्रुतवानिति 'निशम्ये'त्यस्य। निशम्येति न निपूर्वकशम आलोचे चु० आ० से० इत्यस्य रूपं किन्तु शम उपशमे दि० प० से० इत्यस्य निपूर्वस्य ज्ञानार्थकस्येति न न्युपसर्गस्य पृथगर्थः। एवं च भगवता उक्तमित्यत्र ऐश्वर्यवता उक्तमिति वच परिभाषणे अ० प० अनि० इत्यस्य कर्मणि क्ते रूपम्। परिभाषणाश्रयो भगवद्वाक्यम्। परितः भगवत्प्रेरणया प्राप्तं भाषणं परिभाषणं, उभयवाक्योक्तम्। वाक्ये तु 'तेने ब्रह्म हृदा य आदिकवय' इति, 'भवान् कल्पविकल्पेषु न विमुह्यति कर्हिचि'दिति च। 'समीरिता'मित्यत्र सम् ईरितामिति ईर क्षेपे चु० प० से० इत्यस्य कर्मणि क्ते रूपम्। क्षिप प्रेरणे तु० प० अ०। एवं च सम्यक्प्रेरितां प्रेरणाश्रयाम्। 'तेने ब्रह्म हृदे'तिवाक्यमात्रविषयाम्। द्वितीयवाक्यविषयत्वमुपलक्षणेन। वच भाषण इतिपक्षे पूर्ववाक्यविषयामित्येव। तत्र प्रमाणमिति श्रवणे प्रमाणमनुमानरूपमाह। विदधातीति विदधातीति वेधाः, विधाञो वेध चेति वेधादेशो सिप्रत्ययश्च। ब्रह्मा श्रुतवान् वेधस्त्वात्। यत्र यत्र यत्नः तत्र तत्र तज्जनकं ज्ञानम्। कुलालपुत्रवत्। जानातीच्छति यतत इतिप्रवादात्। 'यन् मनसा ध्यायति तद् वाचा वदति यद् वाचा वदति तत् करोती'तिश्रुतेश्च। तच्चेत्यादिसुबोधिन्याः ब्रह्मणा भावितस्य यथार्थत्व इति तत्रेत्यस्यार्थः,अन्यथानुपपत्तिः प्रमाणमिति प्रमाणमित्यस्यार्थ इति श्रीवल्लभानां लेखे। तुल्या इति देवत्वेन तुल्याः। कथं नेति उत्तरस्यातिसूक्ष्मत्वेपि कथं न श्रुतवन्तः। ज्ञापितमिति तेन मानससेवाभावादधिकाराभावादीश्वरत्वाभावाच्च न श्रुतवन्त इत्यर्थः। 'हे'त्यस्यार्थमाहुः अकस्मादिति। कारणं विना। क्षणमिति अत्यन्तसंयोगे द्वितीया। अकस्मात् क्षणं स्थितिज्ञानं अन्येषां त्रिनयनस्यापि। ईश्वरत्वेपि तत्क्षणे दैत्यनयनमनस्त्वात्। तस्या वाच इति पौरुष्या वाचः, 'वाचं धेनुमुपासीते'ति श्रुतेः। अत्र न वाचि धेनुत्वं गुणवादः यः पूर्वतन्त्रेर्थवादत्वेनोक्तः, 'विरोधे गुणवादः स्या'दिति, किन्तु भूमिर्धेनुर्धरिणीतिवद् वाक् आधिभौतिकी, धेनुराधिदैविकी, त्रिनयनो वत्सः मुख्यत्वात्, गौरपादानं, भूमिः पात्रं, भूमौ भगवदवतारात्, वेधाः दोग्धा, भगवान् पय इति। तथा हि 'भूमिर्दृप्ते'त्यत्र

१. डुधाञ् धारणपोषणयोः। विपूर्वस्य धाञ।

'गौर्भूत्वा ब्रह्माणं शरणं यया'वित्यर्थात् प्राप्ते सति द्रव्यदेवतात्मको याग उक्तप्रायः। गवि हविः, ब्रह्मणि मन्त्रा इति, आरम्भे मङ्गलार्थमुक्तं, वेदसारत्वात्, वेदान्तसारत्वात् तु गौर्भूत्वोपस्थितान्तिके तस्मा' इत्यत्र ब्रह्मान्तर्यामिणि स्थिता ध्यानेनेति गोनिष्ठान्तर्यामिणो गोदोहात् पयो भगवानित्युक्तम्। तथा सत्यन्तर्याम्यवतरिष्यतीति शङ्का पूर्वश्लोक एवापास्ता। दोग्धृत्वायेति वेधसो बोध्यम्। गामितिपूर्वेणान्वयः। पुरुषसम्बन्धिन्येवेति वस्तुतः पुरुषसम्बन्धिनी पुरुषोक्ता, मत्तस्तु श्रवणमात्रं इति हेतोः 'म'इतिपदादादौ भगवत्कर्तृकमाज्ञापनं 'पौरुषी'मितिपदेनाह। 'मे' मत्त इत्यर्थमाहुः मत्त इति। तसिलन्तम्। आज्ञापनमिति जातं उत्तरम्। अन्तर्यामित्वधर्मपुरःसरं पुरुषोत्तमस्य स्तुतत्वात् पुरुषोत्तम एवाविर्भविष्यति नान्तर्यामिपुरुष इति। 'पुनः'पदार्थमाहुः प्रथमत इति। सामग्रीमेवेति देवानां प्राप्तयज्ञफलानां दैवीं सम्पदं विबुधत्वम्। एवकार आसुरसम्पद्योगव्यवच्छेदकः। दानवारीणां दिवौकसां अमर्त्यानां वा। आदौ अस्मिञ्छ्लोके। बोधयति वेधाः। 'शृणुते'त्यन्तेन। आज्ञामिति 'विधीयता'मित्यादिराज्ञा, ताम्। अग्रे इति श्लोके। बोधयति वेधाः। शृणुतेत्यन्तेन। आज्ञामिति विधीयतामित्यादिराज्ञा ताम्। अग्रे इति श्लोके। तदिति अंशावतरणम्। सम्बोधयतीति देहधर्ममनादृत्य देवधर्मेण सम्बोधयति, मरणं तु देहस्येति भावः। साहित्येनैव श्रवणं सिद्धमिति 'शृणुते'त्यधिकमित्याशङ्क्याहुः सावधानार्थमिति। स्वयमिति रामः। प्रकृत इति कृष्णावतरणे।

१०–१–२२. पुरैव पुंसेत्यत्र। त्वया किमुक्तमित्यादि त्वया किमुक्तमित्यस्य प्रश्नस्योत्तरमाद्यपादेन। भगवान् पूर्वमेव ज्ञातवानतो मया स्तोत्रमेव कृतं न त्वन्यत् किञ्चिदुक्तमिति। किं वा भगवतोक्तमित्यस्य प्रश्नस्योत्तरार्थं द्वितीयपादेन भगवदुक्ताज्ञापनमुक्तम्। तदुक्तं कृष्णोपनिषदि, 'अङ्गसङ्गं करिष्यामि भवद्वाचं करोम्यह'मिति देवान् प्रति भगवद्वाक्यम्। पूर्वमित्यादिनोक्तायाः शङ्काया उत्तरं उत्तरार्धेन। पूर्वं रामावतारे भगवत्प्राकट्यात् पूर्वं अवतारसमाप्त्यनन्तरं च बहुकालं स्थितत्वात् खेदः। अत्र तु यावद् भगवांस्तावदेव स्थातव्यमिति न खेद इति। पीडेति मत्कर्तृकपीडाकथनात्। भार्यामिति नारदपञ्चरात्रे प्रसिद्धम्। स्पर्शो भक्तैः सह निगूढभावकरणान्तर्गतः आश्चर्यरसत्वात्, विरुद्धधर्माधारत्वाच्च। एवेति कथनादियोगव्यवच्छेदक एवकारः। अस्मत्कृतमिति पञ्चमीबहुवचनान्तं असत् कृतं उत्पन्नम्। पूर्वमेवेति पश्चाद्योगव्यवच्छेदक एवकारः, न तु पश्चादिति। स्वयमेवेति एवकारेण गगनयोगव्यवच्छेदः क्रियते, गगनस्याश्रयत्वात्। द्वितीयपादार्थमाहुः आज्ञामाहेति। वेधा आह। न्यूनं पूरयन्ति स्म ततः पूर्वमेवेति। सामीप्यस्य निरूपकसापेक्षत्वान्निरूपकमाहुः भगवज्जननेति। आवश्यकत्वायेति 'यो यदंशः स तं भजे'दिति भजनार्थं जननावश्यकत्वाय। हस्तपादादय इति तत्त-

दधिष्ठात्र्यो देवताः। हस्तपादौ भये देहरक्षकौ पक्ष्मणी चक्षूरक्षके। तद्वदिन्द्रविष्णू सेवकौ सूर्यश्चेति। ससेचक एवेति हस्तपादादिवत्तदितरेपि सेवका इतीतरैरपि सेवकैः सह ससेचकः। पूर्वस्मादिति रामावतारे वानरेष्ववतारात्। लोक इति भगवदवताररहिते। उत्तरार्धं व्याकर्तुमाहुः इदं जननमिति। स्थितिपूर्वकमिति कियत्कालस्थितेः पूर्वं जननमज्ञातमित्यज्ञाते कप्रत्ययः। आन्तमिति आ अन्तम्। 'अत्यन्तसंयोगे द्वितीया। तथा चावतारसमाप्तिमभिव्याप्येत्यर्थः'। अभिविधावाङ्। तन्नोक्तमिति तदित्यव्ययम्। सा स्थितिः। तदपीति चरणमपि। कियान् कालो यस्येति कियत्कालम्। अनेनेति स्थितिकालनियमाज्ञानेन। यद्वा'ईश्वरेश्वर'पदेन। एवं नियतेति पूर्वोक्तजननेन नियताः अनेनैतदेतत् कर्म कारयित्वास्मै जीवायैतदेतत् फलं दास्यामीति मतिजीवं विचारितवानिति विचारविषया ये भोगाः तैर्युक्तानाम्। देवानाम्। अत्र अकरणशङ्काएवकरणशङ्काइवकरणशङ्केति पाठत्रयम्, कर्तुमकर्तुमन्यथाकर्तुं समर्थ ईश्वरो यतः। अस्मानिति देवान्। न शङ्कनीयमिति देवैस्तथा। एवेति एवकारो देवयोगव्यच्छेदकः, न तु देवैरिति। तदर्थमिति दैत्यरूपभारहरणार्थम्। चरणमिति अनेकत्र चरणम्। कालनियमेति चरणे तथा। लिङो वर्तमानादिकालानामर्थत्वाभावात्। ननु भगवज्ज्ञानं कालाधीनचरणेन कालाभावे चरणाज्ञानं 'अनागतमतीतं चे'तिवाक्यात् तत्राहुः अज्ञातस्त्विवति। 'भुवि चरे'दिति सर्वे मां पश्यन्त्विवतीच्छया चरेदिति तथा। अनागतमितिवाक्येऽतीन्द्रियभगवद्दर्शनमुक्तभगवदिच्छया भवति। अत एव भगशब्दवाच्यषड्धर्मानवतार्य षड्बालकवधे तु षड्धर्माकर्षणं सिध्यत्यध्यायार्थः। सुबोधिन्याम् 'सर्वतः सर्वानंशानाचकर्षे'त्युक्तेः। पूर्णावतारार्थम्। तेन भगवान् मायावरणसहितः। अग्रे मायापसारणम्।

१०–१–२३. वसुदेवगृह इत्यत्र लौकिकमिति अलौकिककरणेनावतारज्ञानेपि क गोपगृहे व्यवहारयोग्येऽव्यवहारयोग्ये वावतरिष्यतीति देवतरस्त्रीसाधारणाकाङ्क्षायाम्। तस्यापीति 'तत्त्वमसी'त्यत्र तच्छब्दार्थव्यापिना कृष्णस्य। पदार्थसम्भावनायामपिः। न तु चक्रादीति चक्रस्यादिः चक्रादिः शङ्खः। चक्रमादिर्ययोः गदाब्जकाण्डयोः ते चक्रादी। चक्रादिश्च चक्रादी च चक्रादयः तेषां रूपेणेत्यर्थः। विष्णुरूपोंशस्तस्य शङ्खरूपेणावतारणम्। गोप्तात्मजोंशः तस्य चक्ररूपेणावतारणम्। कालिकारूपोंशः तस्य गदारूपेणावतारणम्। जगद्बीजमंशस्तस्य अब्जकाण्डरूपेणावतारणम्। 'यः शङ्खः स स्वयं विष्णु'रिति 'कृपार्थे सर्वभूतानां गोप्तारं धर्ममात्मजं यत् सृष्टमीश्वरेणासीत् तच्चक्रं ब्रह्मरूपधृ'गिति 'गदा च कालिका साक्षा'दिति 'अब्जकाण्डं जगद्बीज'मितिश्रुतयः। शङ्खादीनां 'तस्माद् वा एतस्मादात्मन आकाश' इत्यादिश्रुत्युक्तसृष्टिक्रमे। आकाशादुत्पन्नानां वायुतत्त्वाग्नितत्त्वाप्तत्त्वपृथिवीतत्त्वरूपाणां श्रीभागवतोक्तानां विष्णोश्च सत्त्वव्यवधानेनावतारः। 'विष्णुराविरासी'दिति तु कृष्णा-

विर्भावो भवतीति सम्भावनार्थम्। वर्तेत इति न च घटेपि पटत्वं स्यादिति शङ्क्यम्। भगवत्त्वस्य पटत्ववज्जातित्वेपि भगवाञ्छुकः भगवान् व्यास इत्यादौ गौणप्रयोगे षड्गुणैश्वर्यस्य सत्त्वात् तेनैश्वर्येण गौणेष्वपि वर्तते, नैतावता घटे पटत्वापत्तिः,षड्गुणैश्वर्याभावात्। 'पुरुषः स परः पार्थ भक्त्या लभ्य' इतिगीताया अर्थमाहुः पुरुषोत्तम इत्यर्थ इति। 'ब्रह्मविदाप्नोति पर'मित्यत्र निर्णीतं भाष्ये। नन्दे भक्तिः वसुदेवे तप इति तपसो भगवदाविर्भावकत्वं दशमस्कन्धनवमाध्याये श्रीगोपालतापिन्यां नारदपञ्चरात्रे लक्ष्मीतन्त्रेपि। 'अतप्ततनुर्न तदामोश्नुत' इतिश्रुतेः। अशनं भगवदाविर्भावे भक्तावपि। परत्वनिरूपकं वक्तुमाहुः ब्रह्माण्डादिति। 'गिरं समाधा'वित्यनेनोक्तसमाधौ भावितस्येत्यर्थः। प्रकृतिप्रवर्तक इति प्रकृतेर्लयस्थानं प्रकृतेः कारणं स एव प्रवर्तकः। तृतीयसुबोधिन्यां पुरा आसेति पुरुषपदव्युत्पत्तिरलौकिकी। तत इति प्रकृतेः ब्रह्माण्डादिति वा। 'प्रथमं महतः स्रष्टृ द्वितीयं त्वण्डसंस्थितम् तृतीयं सर्वभूतस्थ'मितिवाक्यात्। 'अव्यक्तात् पुरुषः पर' इतिश्रुतेश्चैवकारः। जनिष्यत इति 'अजायमानो बहुधा विजायत' इतिश्रुतेः, भक्तवश्यत्वाच्च। तत्सेवार्थमिति तेन प्रिया सेवेत्युक्तम्। सम्यगिति तेन सुराणां सौन्दर्यमित्युक्तम्। योग्यस्थानेष्विति गोपस्थानेषु कुब्जास्थाने रुक्मिण्यादिस्थाने। सम्भवन्तु तत्तत्स्थाने स्त्रीभवनेऽन्ते मनःस्थापनेन सम्भवन्तु। लक्ष्म्या सहिता इति अष्टमस्कन्धे समुद्रमथनेस्ति। वारितमिति 'गोपान् नः स्त्रीश्च नो कु'र्विति कृष्णोपनिषदि 'न' इत्यनेन सुरान् गोपान्, 'नः स्त्रीः' गोपीः कुर्वित्यर्थात्।

१०–१–२४. वासुदेवकलेत्यत्र भगवदथेति इयं पूर्वश्लोकीया। सम्भवन्त्विति समुपसर्गार्थत्वात्। क्वचित् तु अस्य श्लोकस्याभास इत्युक्तम्। भगवच्छय्येति 'अहीन्द्रतल्पेधिशयान एकः कृतक्षणः स्वात्मरतावनीह' इत्यादिवाक्याच्छेषस्य शय्यारूपत्वम्। सङ्कर्षणेति साधिदैविकस्य। कृष्णस्य शब्दार्थरूपत्वार्थम्। तदुक्तं द्वादशनिबन्धे 'शब्दार्थरसरूपधृ'गिति। 'औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्ध' इति जैमिनिसूत्रम्। 'औत्पत्तिकमिति नित्यं ब्रूम' इति शाबरभाष्यम्। पूर्वश्लोके पुरुषोत्तमनिरूपणादत्र तत्कलेत्येव चारितार्थ्येपि यद् वासुदेवपदोपादानं तत्तात्पर्यं वेदवेदान्तार्थसामानाधिकरण्यप्रतीतीच्छयोच्चरितत्वरूपमाहुः। यद्वा द्वितीयस्कन्धे नवमाध्याये तप तपेतिशब्दानन्तरं वासुदेवो ब्रह्मप्रार्थनयावतीर्णः। अतो वासुदेवस्य विशुद्धं सत्त्वं धर्मः। अत्र तु वासुदेवस्य शब्दात्मकोनन्त इतिसंशये नारायणोपनिषदनुसारेणाहुः सात्त्विकेष्वित्यादि। सात्त्विकाः कल्पा ब्रह्मवासराः तेषु। ते च मात्स्ये कल्पानुकीर्तने उपान्त्याध्याये 'प्रथमः श्वेतकल्पस्तु द्वितीयो नीललोहितः वामदेवस्तृतीयस्तु तथा रथन्तरोऽपरः रौरवः पञ्चमः प्रोक्तः षष्ठः प्राण इति स्मृतः सप्तमोथ बृहत्कल्पः कन्दर्पोऽष्टम उच्यते सद्योथ नवमः कल्प ईशानो दशमः स्मृतः

व्यान एकादशः प्रोक्तस्तथा सारस्वतोपरः त्रयोदश उदानस्तु गारुडोथ चर्तुदशः कौर्मः पञ्चदशः प्रोक्तः पौर्णमासी अजायत षोडशो नारसिंहस्तु समानस्तु ततः परः आग्नेयोऽष्टादशः प्रोक्तः सोमकल्पस्तथा परः मानवो विंशमः प्रोक्त उदान इति चापरः वैकुण्ठश्चापरस्तद्वल्लक्ष्मीकल्पस्तथा परः चतुर्विंशतिमः प्रोक्तः सावित्रीकल्पसंज्ञितः पञ्चविंशतिमो घोरो वाराहस्तु ततः परः सप्तविंशोथ वैराजो गौरीकल्पस्तथा परः माहेश्वरस्ततः प्रोक्तस्त्रिपुरं तत्र घातितम् पितृकल्पस्तथैवान्यो या कुहूर्ब्रह्मणः स्मृता इत्येवं ब्रह्मणो मासः सर्वपातकनाशनः सङ्कीर्णास्तामसाश्चैव राजसाः सात्त्विकास्तथा रजस्तमोमयास्तद्वत् त्रयस्त्रय उदाहृताः सङ्कीर्णेषु सरस्वत्याः पितॄणां व्युष्टिरुच्यते अग्नेः शिवस्य माहात्म्यं तामसेषूपवर्ण्यते राजसेषु माहात्म्यमधिकं ब्रह्मणो विदुः सात्त्विकेष्वधिकं तद्वद् विष्णोर्माहात्म्यमुच्यत' इति। तुना राजसतामसयोगव्यवच्छेदः क्रियते। य इति व्यूहमुख्योन्नताराधिकारी। द्वितीयस्कन्धे नवमाध्याये तप तपेति शब्दानन्तरं वासुदेवोवतीर्ण इति।अयमर्थः। क्षीरसमुद्रतीरे स्थितः 'समुद्रं मनसाध्याये'दितिश्रुतेः ध्यातस्य समुद्रस्य गिरं समाधौ गगने समीरितां श्रुत्वा वेधा इदमुवाच। तद् यदि राजसतामसकल्पेषु यो भवेत् तदा देवान् प्रत्युपदिष्टं सन्दिग्धं विपर्यस्तं वा भवेत्। रजस्तमसोः संशयविपर्यासजनकत्वात्। तदा ज्ञानाभावाद् 'विधीयतामा'- मित्यादि विरुध्येत। जानातीच्छति यतत इति अनन्तपदसमभिव्याहारात् प्राप्तं वासुदेवस्य नारायणत्वमाहुः शेते सलिल इति। 'देवानन्त नमस्तुभ्यं नमस्ते जलशायिन' इति भविष्योत्तरात्। नारायणे शास्त्रभरः सूचितः। हरिरिति कृष्णो विष्णुरिति.नोक्तम्। एकस्याकारकत्वात् द्वितीयस्य सात्त्विकस्य सात्विकपुराणादिमात्रविषयत्वाद्धरेः सर्वत्र गानाद्धरिपदम्। अत्र वासुदेवः हरिः कोशात्। महानारायणे तु 'स हरिः सेन्द्रः सोक्षरः परमः स्वरा'डिति स्वराट् हरिरुक्तः। तत्र स्वेनात्मना राजत इति स्वराट्पदव्युत्पत्तिः। वासुदेवकलायां तु स्वेनात्मीयेनात्मना राजत इति व्युत्पत्तिः। एवं नारायणे वेदान्तप्रतिपाद्ये वेदप्रतिपाद्यवासुदेवत्वमाहुः वासुदेव इति। ज्योतिषे सौरसिद्धान्ते 'वासुदेवः परं ब्रह्म एष छन्दसि पठ्यते' इतिवाक्याद्वेदप्रतिपाद्यः। विज्ञेय इति निश्चयविषयत्वेन विशेषेण ज्ञेयः। न तु कोशोक्तविष्ण्वादिर्वासुदेवो विज्ञेयः। अनन्त इति सप्तम्यन्तम्। तथा चानन्तोंशावतारः। 'अन्ये चांशकलाः पुंस' इतिवाक्यात्। अनन्त इति प्रथमान्तं वा, प्रथमाप्रायपाठात्। उच्यत इति तस्यांश इति ज्ञानस्य निश्चयत्वायोच्यते। अन्यथाशुक्ताविमे रङ्गरजते इतिवत् शुक्ताविदं रजत मितिवच्च तत्त्वांश इतिज्ञाने संशयत्वं भ्रमत्वं वा स्यान्न तु शुक्ताविदं शुक्तित्वमितिवन्निश्चयत्वं भवेत्। कालात्मेति भविष्योत्तरपुराणेऽनन्तव्रतकथा। युधिष्ठिर उवाच 'कोयं कृष्ण त्वयाख्यातो योनन्त इति विश्रुतः। किं शेषनाग आहोस्विदनन्तस्तक्षकः स्मृतः। परमात्माथ वानन्त उताहो ब्रह्म उच्यते। क एषोनन्तसंज्ञो वै सत्यं मे

ब्रूहि केशव'। कृष्ण उवाच 'अनन्त इत्यहं पार्थ मम रूपं निबोधय। आदित्यग्रहचारेण यः काल उपपद्यते। कलाकाष्ठामुहूर्तादि दिनरात्रिशरीरवान्। पक्षमासा ऋतुर्वर्षायुगकल्पव्यवस्थया। योयं कालो मयाख्यातः सोनन्त इति कीर्तितः। सोहं कालोवतीर्णोत्र भुवो भारवतारणा'दिति। 'ख्यातो सोनन्त' इतिपाठे अकारो विष्णुः सोलोपः। 'वतारणा'दित्यत्र भागुरिमतेनावे अकारलोपः। आश्चर्यवद्दर्शनात् साधु। तथापि शास्त्रीत्या बुभुत्सुबोधिकायां किञ्चिदुच्यते। 'सत्यं ज्ञानमनन्तं ब्रह्मे'ति स्वरूपलक्षणे। अनन्तोऽनन्तानन्द उक्तः।'सोनन्त इत्यहं पार्थे'त्यनेनोक्तः। अर्थः। आदित्यग्रहचारेण यः कालः सदेहः। तथा च कृष्णोनन्तः कलाकाष्ठादिदेहवान्। यथा देवदत्त देहो मारयति म्रियते च तथा कालः। 'कालात्मा भगवान् जात' इति वक्ष्यन्ति। पक्षदेहः। सत्यं सत्ता। 'सत्तामात्र'मितिवाक्यात्। तस्याप्यभेदसम्बन्ध इति कालात्मेत्यत्र कर्मधारयः। विज्ञेय इति सात्त्विककल्पीयत्वात् पूर्ववदर्थः। भूभारेति कालशरीरत्वात्तथा, तेन कालात्मेत्यत्र षष्ठीतत्पुरुषः। एवं स्वरूपलक्षणेऽभेदसम्बन्ध उक्तः, श्रीभागवतमते धारणायां भेदान्वयं वदन्तः परस्परं व्यूहे निरोधलक्षणाव्याप्तिपरिहारमाहुः तत्र सुप्त इति। तत्र साधिदैविकशेषे शय्यारूपेऽनन्ते। हरिरिति पूर्ववत्। वाग्विषयत्वात्। ज्ञानम्। एवं अनन्ते ज्ञानं निरूपितम्। तज्ज्ञानं लीलाधिकरणकमिति 'नमामि हृदये शेषे' इत्यत्र निरूपितम्। सत्यं लीलाब्धिरिति लीलां निरूपयन्ति स तदाविष्ट इति। 'तस्मिन् सङ्कर्षणे आविष्ट' इत्यादि टिप्पण्यां स्पष्टम्। अतः कालात्मेति भावः। टिप्पण्यामावेशरूपेति सङ्कर्षणस्यावेशित्वादितिभावः। लीलेति भिन्नं पदम्। अत इत्यत्र टिप्पण्यां यत इत्यादि। यतः शयानस्य हरेः कृष्णस्यावेशोतो हेतोः कृष्णस्य तमोऽवैशिष्ट्ये सत्यक्लिष्टकर्मत्वे सति भक्तनिगूढभावकर्तृत्वेन प्रकृतानुशयनेऽसम्भवादित्यर्थः। विष्णोरिति विष्णोः सात्त्विकत्वेन तमोवैशिष्ट्याद्यसम्भवात् कृष्णवत् प्रकृतानुशयनेऽसम्भवमाशङ्क्याहुः सात्त्विककल्पाधिष्ठातुरेवेति। सात्त्विककल्पाः ब्रह्मणो वासराः भविष्योत्तरपुराणोक्तं कृष्णाभिन्नानन्तस्य शरीरं कालरूपं तद्रूपाः इतिहेतोः सात्त्विककल्पः कालः तमोवैशिष्ट्यादिविशिष्टः तस्याप्यधिष्ठाता तस्य। एवकारः कृष्णयोगं व्यवच्छिनत्ति। बलभद्रेणेति अनन्तमात्रेण कालशरीरेण सहानुशयनं भूभारावतारणरूपम्। एवकारार्थोयमित्याशयेन नात्मन इत्यस्यार्थमाहुः नात्मन इत्यादि। कुत इति चेत्। न। बलदेवाविष्टवासुदेवकलाया या लीला तस्या निरोधजनकत्वाभावात्। 'निरोधोस्यानुशयनमात्मन' इति मूलवाक्यात्। नोक्तदूषणमिति बलदेवाविष्टवासुदेवकलाया एव लीला स्कन्धार्थ इति दूषणं नेत्यर्थः। तल्लीलात्वेन रूपेण स्कन्धार्थः स्यात्, न तु पुरुषोत्तमलीलात्वेन रूपेण। भूभारहरणे ग्रन्थबाहुल्यात्। तथा सति स्कन्धार्थाननुगमः तदपि दूषणं न। भूभारहरणस्य बलाढ्येन हरिणा परम्परयानन्ताभिन्नकृष्णेन वेत्युक्तदूषणाभावात्। तथा च

पुरुषोत्तमलीलात्वेन स्कन्धार्थोऽभेदान् मुख्यत्वाचेति भावः। तर्हीत्यादि यदि बलदेवेन पुरुषोत्तमस्य नानुशयनं तमोवैशिष्ट्यादिधर्मभेदात् तर्हि। एवं पूर्वोक्तप्रकारेण बलदेवेनुशयनिरूपण इत्यर्थः। पूर्वोक्तेति नारायणवासुदेवस्य बलभद्रस्यांशत्वादंशांशिनोः प्रतिपाद्यप्रतिपादकयोरपि। तादात्म्येनाभेदादिति तादात्म्येनाभेदो यथा घटानां तादात्म्येन घटात्मधर्मेण घटत्वेनाभेदः, घटो घटो नेत्यप्रयोगात् न तु भेदाभावरूपादभेदात्। भेदाभावरूपमद्वैतं तु सत्त्वेन रजोजये सत्त्वेन ज्ञान ऐक्ये भाते भवति। तत्रापीति बलभद्रेपि। तच्चरित्रमिति बलभद्रचरित्रम्। कृष्णेति कृष्ण इति। प्रेमवशान् निकटस्य कृष्णस्य सम्बोधनम्। भ्रमरगीतटिप्पण्यां 'वर्णयाम्यवशः क्वचित्' इति प्रेमविवशतोक्ता। अस्य श्लोकस्य टिप्पण्यामाहेत्येकवचनं तत एव। चरित्रेपीति रासलीलाभूभारहरणचरित्रयोश्चरित्रत्वेनैक्येपि स्वरूपे द्वैविध्यप्रतीतिः। एकस्यैवानेकत्वे दृष्टान्तं वदन्तो देवक्यामित्यस्या आभासमाहुः अत एवेत्यादि। यत एकस्यैव द्विविधत्वं न तु द्वित्वं अत एव यथा चतुर्व्यूहरूपेण प्राकट्यं मथुरायां व्यूहान् बहिरवस्थाप्यान्तः स्वस्य प्राकट्यं व्रजे नन्दगृहे पुरुषोत्तमस्य। यद्यपि वासुदेवप्राकट्यं व्रज एव तथापि व्यापिवैकुण्ठाद् वसुदेवहृद्यवतीर्यादौ स्वकार्यं देवकीमृत्युनिवारणं कृतवानिति निबन्धे निरूपणात् कार्यतोन्तः प्राकट्यं वसुदेवहृदि, स्वरूपतो बहिःप्राकट्यमादौ व्रज एवेति ज्ञेयम्। किञ्च व्रजे वासुदेवप्राकट्यमप्यस्तीति चेत्, अत्रैवं ज्ञेयम्। प्राकट्यं द्वेधा, कार्यतः स्वरूपतश्च। तत्र कार्यतः प्राकट्ये व्यूहचतुष्टयप्राकट्यं मथुरायाम्। पुरुषोत्तमस्य व्रजे। प्राथमिकतत्तत्कार्यस्य तत्र तत्रैव जातत्वात्, स्वरूपतः प्राकट्यं तु व्यूहत्रयविशिष्टपुरुषोत्तमस्य व्रजे। तत्र कार्यतः प्राकट्यमत्रोच्यते। तथा च वासुदेवस्यादौ व्रज एव बहिःप्राकट्येपि तत्कार्यमादौ मथुरायामेव जातम्। व्यूहचतुष्टयकार्यमादौ मथुरायामेव जातमिति निबन्धे स्फुटम्। पुरुषोत्तमकार्यं तु निःसाधनजनोद्धरणमादौ व्रज एव जातमिति। अत्रापीति सङ्कर्षणेपि। द्विरूपेण प्राकट्येपि वस्तुतः स्वरूपैक्यमित्यर्थः। सुबोधिन्यां एकवत् प्रोच्यत इत्युक्तं तत्र हीनोत्तमयोर्नैकवद्भाव इति, हीनतामेकस्य वारयन्ति स्म देवक्यामिति। देवक्यां शयनस्य शेषस्यैव सम्भवो न हरेः शयानस्य। तत्र प्रमाणमाहुः स्मृत इति। 'देवक्या जठरे गर्भं शेषाख्यं धाम मामक'मित्यनेन शेषस्य सम्भवः स्मृतः हरेः सम्भवो न स्मृतः। रोहिण्यामपरस्य हर्यंशस्य। यद्वा रोहिण्यां गर्भस्थित्यनन्तरमपरस्य वासुदेवस्यावेश इत्यर्थः, इति अस्माद्धेतोः कर्षणान् मायाकृताद् शेषांशस्य कर्षणात् रोहिणीगर्भस्थस्य वासुदेवांशस्य हीनता मायाधीनता नेत्यर्थः। एकवदित्यत्र कारिकायां औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्ध इति शब्दार्थावेकवत्। एक इव। द्वाविव द्विवत्। प्रतीयत इति भगवदिच्छया घटादौ तथा व्यवहारात्। एवं चात्र द्वयोः पृथग्गर्भबोधनात् श्रीरोहिणीगर्भस्याकस्मिकत्वशङ्काप्रयुक्ता

हीनता मायाधीनतापि वारिता। अतो गर्भसम्भवोत्तरमेव श्रीरोहिण्याः श्रीगोकुले स्थापनम् अन्यासां सप्तदशस्त्रीणामन्यत्रेति बोध्यम्। तमिति श्रीबलदेवम्। अन्यस्मादिति अर्थात् आधिभौतिकात् शेषात् तमसः रजसो देवदेहात् चारितार्थ्यकर्तृरूपाच्च। ज्ञातुमिति देवानां ज्ञानाय। भावे तुमुन्। सोपीति अंशरूपोपि सः शय्यारूपो भवतीति हेतोरनन्त इति सङ्कर्षणविशेषणमित्यर्थः। कालात्मेति कालस्य देहस्य आत्मा सोनन्तः, उक्तभविष्योत्तरात्। हीति निश्चये उक्त एव हेतुः। स्वाश्रयोब्धिः तस्मिन्। शेते स्वप्नं कुरुते। पाताले तु कालात्मा व्यापकरूपेण तिष्ठतीत्यर्थः। एवकारेण धराभराक्रान्ते शेषे न स्वप्नः किन्तु स्वदेहभूते काले शेषे स्वप्नः। स्थितमिति अविनाभावेन स्थितम्। अनन्तसहस्रवदनयोः सामानाधिकरण्यात्। तत्र स्थितमित्याधाराधेयभावस्तु लोकैः प्रतीयते। तथा भवतीति सहस्रवदनो भवति। 'सहस्रशीर्षा पुरुष' इत्यत्र पुरि शेत इति व्युत्पत्तिः व्युत्पत्तित्रये। श्रुतौ सहस्रपात् सहस्रपाद् सत्त्वः। पुरुषेणापि सूक्तेनेत्यर्थे पुरुषविद्यामाशङ्क्याहुः वेदात्मेति। प्रतिपाद्यार्थवत् प्रतिपादकवेदेपीयं विधेत्यर्थः। तथेति सहस्रशीर्षा भवति। स्वर्गेपीति सङ्कर्षणस्य यत् स्वं स्थानं तस्मिन्नपि स्वेन स्वीयेन राजत इति लौकिकव्युत्पत्तिः। कर्तरि क्विप्। स्वरूपलक्षणानन्तस्य ज्ञानेनाभेदान्वयान् स्वर्गेपीत्युक्तं 'वेदा यथा मूर्तिधरास्त्रिपृष्ठे' इतिवाक्यात्। भवितेति लुट्। अनद्यतनकाले। अष्टप्रहराः अद्यतनकालस्तत्र न भविष्यतीत्यर्थः। भगवदवतारेणेति अनवतारेणादृश्येन निःसाधनजनोद्धरणं भविष्यतीति किमिति प्रश्नः। स हीति सङ्कर्षणसहितः शेषो हि। देवरूपेणेति साक्षिरूपेण। अत एव लीलासु साक्षिवत् तत्स्थितिं वक्ष्यति। लीलां तु भगवदावेशेनेति बहुस्थले प्रसिद्धम्। एवकारः चरितार्थकर्तृरूपयोगं व्यवच्छिनत्ति। दैत्यानां सुखार्थं इति तेषां कालं प्राप्यैव भगवत्प्राप्तेस्तथा। तदिदं 'मन्येऽसुरान् भागवता'नित्यत्र तृतीयस्कन्ध उपपादितम्। साहाय्येति प्रलम्बादीनां मोक्षदाने तद्वधेन साहाय्यम्। भूमेर्भाररूपदुःखहरणे जरासन्धादिभिः सह युद्धेन साहाय्यं ज्ञेयम्। प्रियमिति न तु चारितार्थ्यम्। एवमत्र सहस्रवदनदेवदेहे कृष्णाभिन्नानन्तो बलदेवस्वरूपम्। कार्यकाले कृष्णावेशादावेशी। 'वासुदेवकले'तिविशेषणेन तमसः भिन्नतया ज्ञातुं, वासुदेवस्य साक्षिकर्त्वेनानन्तस्य तामसत्वेन सात्त्विकतामसत्वात्, 'विशुद्धसत्त्वं वसुदेवशब्दित'मितिवाक्यात्, भगवतश्चतुर्मूर्तेस्तुरीयां तामसीं मूर्तिमिति पञ्चमस्कन्धात्। 'अनन्त' इति रजसो भिन्नतया ज्ञातुम्। 'मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते' इति गीताष्टादशाध्यायात्। 'सहस्रवदन' इति अर्थाद् भिन्नतया ज्ञातुम्। वेदात्मेति सुबोधिन्याः। 'स्वराट्'डिति आधिभौतिकात् शेषात् भिन्नतया ज्ञातुम्। देव इति चारितार्थ्यकर्तृरूपात् भिन्नतया

१ पत्र, द्विः।

ज्ञातुम्। 'सहस्रवदनो देव' इति देवदेहाद् भिन्नतया ज्ञातुम्। अत्र प्रथमान्तप्रायपाठे देहदेहिनोर्वासुदेवपदार्थहरिकलयोरभेदः स्फुरति। स चैवं परिहरणीयः वेदत्वेनैकरसत्वात्। 'यस्य यजुरेव शिरः ऋगुत्तरः पक्ष' इत्यादि तैत्तिरीयात्। आनन्दमयवत्।

१०-१-२५. विष्णोर्मायेत्यत्र सर्वमुक्तिरिति 'तमेव विदित्वातिमृत्युमेती'तिश्रुतेः। सार्वभौमत्वादितिभावः। सा तदंशेति उद्घाटनमस्या अतो मायातदाकारकतावत्परिमाणकरूपेत्यर्थः। इदं च अंशेनेत्यस्य विवरणम्। यो हि विष्णुरिति सर्वत्र कृष्णस्याकारकत्वात् कृष्णस्थले विष्णुशब्दः हरिशब्दश्च। विष्णौ कृष्णसमानयोगक्षेमत्वाद्धरौ सर्वत्र गीयमानत्वात् योगमात्राद् वा। मायोद्घाटनेनेति वाक्यमप्यत्र 'निशीथे तम उद्भूत' इति। विष्णोः सत्त्वरूपा माया तस्या उद्घाटनम्। कृष्णे तु त्रिगुणमायाया इच्छारूपलक्ष्मीरूपमायाया वोद्घाटनम्। षड्गुणैश्वर्येति उक्तार्थः षड्गुणैश्वर्यशब्दः। अयं विशेषः। नारदपञ्चरात्रे मायाया इच्छारूपलक्ष्मीरूपत्वमुक्तम्। 'न यत्र माये'तिवाक्यात्, 'नास्ति श्रुतिषु तद्वार्ते'ति निबन्धाच्च। तस्यै षड्गुणैश्वर्यं कालिन्दीवत् भगवता दत्तम्। अतः षड्गुणा लक्ष्म्यंशस्त्रीषु सन्तु यथा कात्यायन्याम्। 'स्वलक्षणा प्रादुरभूत् किलास्यत' इतिवाक्यात् भगवल्लक्षणायां सरस्वत्याम्। तत्र भगवतीत्वं षड्गुणैश्वर्यं विना न गच्छति। घटे पटत्ववत्। ऐश्वर्यं कर्तुमकर्तुमन्यथाकर्तुं सामर्थ्यं यतः। तद् भगवदीयं सम्भवति। यत्र त्वात्मसृष्टिः 'कदाचिन् माययाऽभव'दित्युक्ता मायिकसृष्टिः, तत्र मायिकसृष्टौ मायायाः षड् गुणाः सन्ति, अस्मादेव वाक्यात्। अत एव माया भगवतीतिप्रयोगः। तत्रैश्वर्याभावे तिरोहितषड्गुणे जीवे अहं भगवानितिप्रयोगे भगवत्त्वाध्यासो न सम्भवति। मायिकषड्गुणैश्वर्याभावात्। अत उक्तं षड्गुणैश्वर्ययुक्तेति। समवेतसमवायेन। द्रव्यत्वपक्षे युक्ता संयुक्ता। परम्परया। इयं कात्यायनी। 'गच्छ देवि व्रजं भद्र' इति वाक्यात्। तदाहुः भगवत्प्रसादादिति प्रसादरूपा सा शक्तिर्भवतीति साधनप्रकरणसुबोधिन्याम्। अतो नाखण्डाद्वैतविरोधः। अस्य इति प्रसादरूपशक्तित्वात्। स्वस्थानेति स्वस्थानं वैकुण्ठाख्यम्। न दोष इति अवतार्यवतारविनियोगाभावो दोषः परिच्छिन्नत्वेन प्राप्तः स नेत्यर्थः। स्वस्याः व्यापकत्वेप्युत्क्रान्तिगत्यागतीनां सम्भवान्न व्यापकत्वजदोषः। अत्रापीति भूमावपि बोध्यम्। अपिना वैकुण्ठे। कार्यं वक्ष्यमाणम्। इदमत्र ज्ञेयम्। 'विष्णुर्नाम महायोगी महामायो महातपा' इति योगतत्त्वोपनिषच्छ्रुतौ विष्णुमायोक्ता। सा यद्यपि वैकुण्ठे नास्ति 'प्रवर्तते यत्र रजस्तमस्तयोः सत्त्वं च मिश्रं न च कालविक्रम' इतिवाक्यात् तथापि विष्णुसम्बन्धिनी माया वागगोचरे कृष्णेपि मायां बोधयति, सा गुणरूपमायाबाधात् प्रसादरूपा शक्तिरूपा मायेति मायेन्द्रियाणीतिसम्प्रदाये निबन्धमते। नृसिंहतापिनीये द्वैते भेदभाननिर्वाहाय माया निरूपिता। भवन्त इति देवाः। वसुदेवादीति वसुदेवसत्त्वांशे माया-

व्यामोहं विना कंस एवमपराधिनो न मोचयेत्। 'यत् तदग्रे विषमिव परिणामेऽमृतोपमं तत् सुखं सात्त्विक'मितिवाक्यात्।

१०–१–२६. इत्यादिश्येत्यत्र तत इति क्षीरपयोनिधितीरात्। गणबहुवचनशब्दार्थमाहुः अनेकेति। प्रजापतीनामिति दक्षादीनाम्। अन्यथेति तथा च सृष्टौ नियुक्तस्तदतिरिक्तं जन्म न प्राप्नोतीत्यर्थः। पूर्वमिति अस्मात् पुष्टावतारात् पूर्वं न सम्भावितम्। मर्यादांशकलावतारा एवान्यदा जाता इति। जातमिति सन्तापात्मकस्य शरणमार्गात्मकस्यान्तर्यामिणो ध्याने पुंसश्च साधनत्वं पृथिव्याम्। द्वितीयस्कन्धनवमाध्याये 'तपो मे हृदय'मितिवाक्यात्, 'ब्रह्माणं शरणं यया'वितिवाक्यात्, 'उपस्थितान्तिके तस्मा' इतिवाक्यात्, 'पुरैव पुंसावधृतो धराज्वर' इति वाक्याच्च। तद्भाग्येति भूमिभाग्याभिनन्दनम्।

१०–१–२७. शूरसेन इत्यत्र दुःखप्रापणेति। 'भूमिर्माता तथा चान्य' इत्युक्तेषु भूमेः शामनमुक्तं, मातुः सान्त्वने मातृदुःखमङ्गं, तथा सति सान्त्वनमध्यायार्थो भवेत्, न तु भक्तदुःखं हेतुरध्यायार्थः। अध्यायार्थसङ्गत्यर्थं तस्याः दुःखप्रापण उपाय उत्कर्षे सत्युपायस्तमाह। उत्कर्ष उच्यत इति सुबोधिन्या अवान्तरवाक्यार्थत्वेनोत्कर्षे सत्युपाय आकाशवाणीव्यक्तवचनरूपोत्र व्यापृतकंसव्यापारकः तस्याः स्वल्पकत्वज्ञापनाय पूर्वं सप्त श्लोकाः, अष्टमे आकाशवाण्या व्यक्तवचनं, तत्कार्यं नवमे भगिनीहननारम्भः, दशमे सान्त्वनारम्भः, एवं सान्त्वनविशिष्टो भगवन्निरस्यः सकार्य आकाशवाण्याऽव्यक्तवचनरूप उपायो दशश्लोकानां महावाक्यार्थ उक्तः। अत्र शूरसेनपदपुरःसरं कथने बीजं भक्तस्य धैर्यमुक्तम्। शूरस्य शूराः सेनायां भवन्ति। शूरो धैर्येऽधिकारी, विवेकधैर्याश्रये ग्रन्थे धैर्ये शूरस्याधिकारोक्तेः। 'अशूरेणापि कर्तव्यं स्वस्यासामर्थ्यभावना'दित्यनेन। सहस्राजुनस्येत्यादि नवमस्कन्धे प्रसिद्धम्। त्रयोविंशेऽध्याये। 'अर्जुनः कृतवीर्यस्य सप्तद्वीपेश्वरोऽभवत् दत्तात्रेयाद्धरेरंशात् प्राप्तयोगमहागुणः। न नूनं कार्तवीर्यस्य गतिं यास्यन्ति पार्थिवाः। यज्ञदानतपोहोमश्रुतवीर्यजपादिभिः। पञ्चाशीति सहस्राणि ह्यव्याहतबलः समाः। अनष्टवित्तस्मरणो बुभुजेऽक्षय्यं षड्वसु। तस्य पुत्रसहस्रेषु पञ्चैवोर्वरिता मृधे जयध्वजः शूरसेनो वृषभो मधुरूर्जित' इति। यादवानामिति 'ययातिशापाद्यदुभिर्नासितव्यं नृपासन' इति दशमे वाक्यात्। यदुर्हि ज्येष्ठ एवासीत् स चेत् पित्रा निवारितः। ततः प्रभृति न मर्यादाराज्यम्। अर्जुनादयस्तु पुष्ट्या सार्वभौमा जाताः। अत एव हताः, कंसोपि। अत उक्तं ततः पुष्ट्यैवेति। यो महानिति यथार्जुनः। पुष्ट्येति भद्रसेनकस्य द्वौ पुत्रौ दुर्मदधनकौ, तत्र धनकस्य कनिष्ठस्य चत्वारः पुत्राः, कृतवीर्यः कृताग्निः कृतवर्मा कृतौजाः। तत्र कृतवीर्यस्यार्जुन इति पुष्ट्या धनकस्य कनिष्ठत्वात्। ज्येष्ठ इति जयध्वजः। माहिष्मत्यामेवेति नवमस्कन्धे पञ्चदशेऽध्याये 'विध्राविनं स्वशिबिरं प्रतिस्रोतःसरिज्जलैः नाप्लावयत् तस्य तत्

वीर्यं वीरमानी दशाननः गृहीतो लीलया स्त्रीणां समक्षं कृतकिल्बिषः माहिष्मत्यां सन्निरुद्धो मुक्तो येन कपिर्यथे'ति रावणो दिग्विजये माहिष्मत्याः समीपे नर्मदायां देवपूजां कुर्वन् तेन प्रवाहस्यावरोधात् प्रतिस्रोतसः तस्याः तस्याः सरितो जलैः विप्लावितं स्वशिबिरमालक्ष्यार्जुनवीर्यं न सेहे। ततश्च कृतकिल्बिषः क्रीडन्तमर्जुनमभिभवितुं प्रवृत्तः दशाननोऽर्जुनेन गृहीतः माहिष्मत्यां स्वपुर्यां कपिरिव सन्निरुद्धश्च, पुनश्चावज्ञया येन मुक्त इत्यर्थः। तस्यार्जुनस्य ज्येष्ठपुत्रो जयध्वजः सोपि माहिष्मत्यामेव ज्येष्ठत्वादेचकार:। लोके चोलीमहेश्वर इति पुरीनामेति चोलीग्रामः पृथक् महेश्वरः पृथक् इति द्रष्टव्यम्। माहिष्मती पुरी तस्याम्। सर्वोत्कर्षे त्वित्यादि कारिकार्थस्तु टिप्पण्यां द्रष्टव्यः। टिप्पण्यां तथाकाशवाणीति सर्वोत्कर्षे सति आकाशवाणी व्यक्तवचनयुक्ता बोध्या। भगवदाविर्भावेति श्रीदेवकीति बोध्यम्। यद्दुःखमिति यत् प्रसिद्धम्। स्वल्पक इति सर्वोत्कर्षे सति आकाशवाणीव्यक्तवचनरूपे निमित्ते कारणे सति विरुद्धधर्माश्रयत्वात्। शीघ्रमिति विशुद्धसत्त्वे प्रवेशमन्तरापि। भगवन्मार्ग इति श्रीभागवते। स्कन्दपुराणे श्रीभागवतमाहात्म्ये चतुर्थेऽध्याये 'यथा कथञ्चित् कर्तव्यं सेवनं भगवन्मत'मिति वाक्यात्। सेव्यतेनेनेति सेवनम्, करणे ल्युट्। शास्त्र इति द्वादशस्कन्धे 'पुष्करे मथुरायां च द्वारवत्यां यतात्मवान् उपोष्यसंहितामेतां पठित्वा मुच्यते भयात्' इतिशास्त्रे। 'भयं' दुःखम्। भक्तदुःखमित्यादितात्पर्यार्थे भक्तदुःखं तपः। भगवन्मार्गः भगवदाज्ञया यत्राऽऽस्थीयते सः द्वितीयस्कन्धनवमाध्यायोक्तः। तत्र तपसा ब्रह्मणो हिरण्यगर्भदर्शनम्। शास्त्रं नारदपञ्चरात्रम्। तत्रेन्द्रस्य तपसा लक्ष्मीदर्शनम्। तयोर्निरूपितमिति टिप्पण्यामर्थः। स्मृतमिति 'स्वशान्तरूपेष्वितरैः स्वरूपैरभ्यर्द्यमानेष्वनुकम्पितात्मा। अजोपि जात' इतिस्मृतम्। तदुक्तं 'भूमिर्दृप्तनृपे'त्यत्र 'सर्वेषां च महद्दुःखं नान्येन विनिवार्यते। यदा तदा हरिः कृष्णः प्रादुरासीदिति स्थिति'रिति। अतोऽल्पकं दुःखं वसुदेवेन निवार्यं न दुःखं महदिति नैतावता भगवदाविर्भाव इति भावः। अन्यथा विशुद्धसत्त्वात्मको वसुदेवः कथं भगवत्प्रादुर्भावप्रतिबन्धिकां प्रतिक्रियां समारभेत। देवकी ब्रह्मविद्या, तस्याः सुखदाः सप्तैव। 'रुद्रो रुद्रश्च दन्तिश्च नन्दिः षण्मुख एव च गरुडो ब्रह्म विष्णुश्च नारसिंघस्तथैव च। आदित्योग्निश्च दुर्गिश्च क्रमेण द्वादशाम्भसी'त्युक्ता द्वादश। अम्भसि जले प्रतिपाद्या अर्थाः, अभिशब्दे इति धातोरम्भःशब्दः तदा ते गौणाः अर्थाः सप्तैव मुख्याः तानवान्तरवाक्यार्थानाहुः देशात्त इत्यादि। सुबोधिन्याम्। सप्तैव सुखदा इति पुरुषोत्तमजन्मप्रकरणात् पुरुषोत्तमयोगाध्यायोक्ताः सप्तैव सुखदाः अत्रैव भागवते गीताविस्तारे स्मृता ग्राह्याः। सङ्क्षेपे। प्रपञ्चे तु 'भूमिरापोनलो वायुः खं मनो बुद्धिरेव च। अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधे'ति स्मृत्योच्यन्त इति स्मृताः शैषिकोण्। एवकारः द्वादशयोगं व्यवच्छिनत्ति। तत्र त्रिवृत्करणं जीवेषु। पुरुषोत्तमे तु

भूम्यादिदेवत्वाः। भूमिः शरीरम् ,आपो लीलाः सर्गरूपाः, अनलः आत्मा, वायुः प्राणः,खं शब्दः षोडशरूपः, मनः मनसो मनः, बुद्धिर्ब्रह्म आनन्दः। अहङ्कारः सप्तसमष्टिः। अहङ्कारेण सप्तानां व्यतिहारात्। यथाहं स्थूल इति भूमिधर्मव्यतिहार आत्मनि अहङ्कारेण। अहं प्राण इति प्राणधर्मदेहधारणाध्यास आत्मनि अहङ्कारकृतः। अहंशब्द इति शब्दाध्यासः शब्द-सृष्ट्यभावकालेऽहङ्कारकृतः। अहं पश्यामि शृणोमि जिघ्रामि स्पृशामि रसामीत्यादयोऽध्यासा अहङ्कारेण। अहं अप्रमेयं पश्यामीत्यप्रमेयज्ञानाश्रयत्वाध्यासो मनोधर्माध्यास आत्मनि अह-ङ्कारकृतः। 'मनसैवानुद्रष्टव्यमेतदप्रमेयं ध्रुव'मिति बृहदारण्यकात्। अहं पदार्थाञ् जानामीति बुद्ध्यध्यासः। बुद्धिमानयं पदार्थान् जानातीति प्रत्ययात् पदार्थज्ञानं बुद्धिधर्म इति। अत्रावस्थातः स्वतश्चेत्येकेन श्लोकेनोत्कर्षः। द्रव्यकृतो द्वाभ्यामिति विभागः। तथाभूता-दिति तकारागमः। तथाभूता सुखदैः सुखिनीभूता ब्रह्मविद्या देवकी। तथाभूता इति पाठे सुखदत्वेन भूता जाताः सप्तैवेत्यन्वयः। ननु दुःखप्रतिक्रिया सङ्कर्षणकार्यं कुतः पतिः प्रतिक्रियां समारेभ इति। तत्राहुः तदा पतिरिति। भगवदवताराहेतौ स्वल्पक-भक्तदुःखकाले पतिर्वसुदेवो वेदात्मा स्वप्रतिपाद्यज्ञानजनकः कंसबोधनप्रकारेण ब्रह्म-विद्यायां देवक्यां श्रवणद्वारा ज्ञानप्रवेशार्थं प्रतिक्रियां समारेभ इत्यर्थः। नवभिरिति दशमे तु सान्त्वनारम्भ इति प्रतिक्रियातः पदार्थान्तरारम्भः। आरम्भः प्रतिक्रियायां प्रथम-प्रवृत्तिः। चकारात् 'श्लाघनीयगुण' इत्यादिनवभिः प्रतिक्रिया कृता भवति। चकारोनुक्त-समुच्चये। तस्येति सर्वस्य सम्बन्धिनः। सम्बन्धो अंशांशिभावः। पूर्वमिति शूरसेन-देशनिवासात् पूर्वम्। शत्रुघ्नेति तदुक्तं नवमे 'शत्रुघ्नश्च मधोः पुत्रं लवणं नाम राक्षसं हत्वा मधुवने चक्रे मथुरा नाम वै पुरी'मिति। आर्थिकमाहुः तत्रत्यमिति। स चेति शूरसेनश्च। स्वनाम्ना जातदेशावासे हेतुमाहुः अनेनेति। मथुरावासकथनेन हेतुना। अत्र महावाक्यार्थेऽध्यायार्थसङ्गमने आकाशवाणीव्यक्तवचनं न भगवदवतारे हेतुरतोऽव्याप्तिः, तन्निवारणाय 'तत्प्रयोजको हेतुश्चे'ति सूत्रेण भगवदवतारे भक्तदुःखरूपहेतुप्रयोजकस्याकाश-वाणीव्यक्तवचनस्य हेतुसञ्ज्ञत्वान्नाव्याप्तिरवतारहेतुरूपाध्यायार्थ इति बोध्यम्।

१०–१–२८. राजधानीत्यत्र कालभेदेनापीति अयं तत इति पूर्वविधिबोधकं पदं कालत उत्कर्षसमर्पकम्। क्रमस्तच्छब्दार्थः। देशभोगानन्तरम्। देशभोगः कालसाध्य इति कालभेदः। आर्थिकः। 'आर्थिकं तु प्रवक्ष्यामी'ति प्रथमस्कन्धकारिकायाः। अपिना विषयभोगः। विषयभोगो महानिति महती जाता। भेदो विशेषः कालविशेषेण। 'भेदो द्वैधे विशेषे स्या'दिति विश्वः। ततः प्रभृतीति शूरसेनादारभ्य। पूर्वोक्त एव वा तच्छ-ब्दार्थः। यावन्त इति अर्जुनस्य पञ्च पुत्रा उर्वरिताः जयध्वजशूरसेनवृषभमधूर्जिताः, तत्र 'जयध्वजात् तालजङ्घस्तस्य पुत्रशतं त्वभूत्। क्षत्रं यत् तालजङ्घाख्यमौर्वतेजोपसंहृतं

वीर्यं वीरमानी दशाननः गृहीतो लीलया स्त्रीणां समक्षं कृतकिल्बिषः माहिष्मत्यां सन्निरुद्धो मुक्तो येन कपिर्यथे'ति रावणो दिग्विजये माहिष्मत्याः समीपे नर्मदायां देवपूजां कुर्वन् तेन प्रवाहस्यावरोधात् प्रतिस्रोतसः तस्याः तस्याः सरितो जलैः विप्लावितं स्वशिविरमालक्ष्यार्जुनवीर्यं न सेहे। ततश्च कृतकिल्बिषः क्रीडन्तमर्जुनममिभवितुं प्रवृत्तः दशाननोऽर्जुनेन गृहीतः माहिष्मत्यां स्वपुर्यां कपिरिव सन्निरुद्धश्च, पुनश्चावज्ञया येन मुक्त इत्यर्थः। तस्यार्जुनस्य ज्येष्ठपुत्रो जयध्वजः सोपि माहिष्मत्यामेव ज्येष्ठत्वादेवकारः। लोके चोलीमहेश्वर इति पुरीनामेति चोलीग्रामः पृथक् महेश्वरः पृथक् इति द्रष्टव्यम्। माहिष्मती पुरी तस्याम्। सर्वोत्कर्षे त्वित्यादि कारिकार्थस्तु टिप्पण्यां द्रष्टव्यः। टिप्पण्यां तथाकाशवाणीति सर्वोत्कर्षे सति आकाशवाणी व्यक्तवचनयुक्ता वोध्या। भगवदाविर्भावेति श्रीदेवकीति बोध्यम्। यद्दुःखमिति यत् प्रसिद्धम्। स्वल्पक इति सर्वोत्कर्षे सति आकाशवाणीव्यक्तवचनरूपे निमित्ते कारणे सति विरुद्धधर्माश्रयत्वात्। शीघ्रमिति विशुद्धसत्त्वे प्रवेशमन्तरापि। भगवन्मार्ग इति श्रीभागवते। स्कन्दपुराणे श्रीभागवतमाहात्म्ये चतुर्थेध्याये 'यथा कथञ्चित् कर्तव्यं सेवनं भगवन्मत'मिति वाक्यात्। सेव्यतेनेनेति सेवनम्, करणे ल्युट्। शास्त्र इति द्वादशस्कन्धे 'पुष्करे मथुरायां च द्वारवत्यां यतात्मवान् उपोष्यसंहितामेतां पठित्वा मुच्यते भयात्' इतिशास्त्रे। 'भयं' दुःखम्। भक्तदुःखमित्यादितात्पर्यार्थे भक्तदुःखं तपः। भगवन्मार्गः भगवदाज्ञया यत्राऽऽस्थीयते सः द्वितीयस्कन्धनवमाध्यायोक्तः। तत्र तपसा ब्रह्मणो हिरण्यगर्भदर्शनम्। शास्त्रं नारदपञ्चरात्रम्। तत्रेन्द्रस्य तपसा लक्ष्मीदर्शनम्। तयोर्निरूपितमिति टिप्पण्यामर्थः। स्मृतमिति 'स्वशान्तरूपेष्वितरैः स्वरूपैरभ्यर्द्यमानेष्वनुकम्पितात्मा। अजोपि जात' इतिस्मृतम्। तदुक्तं 'भूमिर्दृप्तनृपे'त्यत्र 'सर्वेषां च महद्दुःखं नान्येन विनिवार्यते। यदा तदा हरिः कृष्णः प्रादुरासीदिति क्षिति'रिति। अतोऽल्पकं दुःखं वसुदेवेन निवार्यं न दुःखं महदिति नैतावता भगवदाविर्भाव इति भावः। अन्यथा विशुद्धसत्त्वात्मको वसुदेवः कथं भगवत्प्रादुर्भावप्रतिबन्धिकां प्रतिक्रियां समारभेत। देवकी ब्रह्मविद्या, तस्याः सुखदाः सप्तैव। 'रुद्रो रुद्रश्च दन्तिश्च नन्दिः षण्मुख एव च गरुडो ब्रह्म विष्णुश्च नारसिंहस्तथैव च। आदित्योग्निश्च दुर्गिश्च क्रमेण द्वादशाम्भसी'त्युक्ता द्वादश। अम्भसि जले प्रतिपाद्या अर्थाः, अभिशब्दे इति धातोरम्भःशब्दः तदा ते गौणाः अर्थाः सप्तैव मुख्याः तानवान्तरवाक्यार्थानाहुः देशत इत्यादि। सुबोधिन्याम्। सप्तैव सुखदा इति पुरुषोत्तमजन्मप्रकरणात् पुरुषोत्तमयोमाध्यायोक्ताः सप्तैव सुखदाः अत्रैव भागवते गीताविस्तारे स्मृता ग्राह्याः। सङ्क्षेपे। प्रपञ्चे तु 'भूमिरापोनलो वायुः खं मनो बुद्धिरेव च। अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधे'ति स्मृत्योच्यन्त इति स्मृताः शेषिकोण्। एवकारः द्वादशयोगं व्यवच्छिनत्ति। तत्र त्रिवृत्करणं जीवेषु। पुरुषोत्तमे तु

भूम्यादिदेवताः। भूमिः शरीरम्,आपो लीलाः सर्गरूपाः, अनलः आत्मा, वायुः प्राणः,खं शब्दः षोडशरूपः, मनः मनसो मनः, बुद्धिर्ब्रह्म आनन्दः। अहङ्कारः सप्तसमष्टिः। अहङ्कारेण सप्तानां व्यतिहारात्। यथाहं स्थूल इति भूमिधर्मव्यतिहार आत्मनि अहङ्कारेण। अहं प्राण इति प्राणधर्मदेहधारणाध्यास आत्मनि अहङ्कारकृतः। अहंशब्द इति शब्दाध्यासः शब्द-सृष्ट्यभावकालेऽहङ्कारकृतः। अहं पश्यामि शृणोमि जिघ्रामि स्पृशामि रसामीत्यादयोऽध्यासा अहङ्कारेण। अहं अप्रमेयं पश्यामीत्यप्रमेयज्ञानाश्रयत्वाध्यासो मनोधर्माध्यास आत्मनि अहङ्कारकृतः। 'मनसैवानुद्रष्टव्यमेतदप्रमेयं ध्रुव'मिति बृहदारण्यकात्। अहं पदार्थाञ् जानामीति बुद्ध्यध्यासः। बुद्धिमानयं पदार्थान् जानातीति प्रत्ययात् पदार्थज्ञानं बुद्धिधर्म इति। अत्रावस्थातः स्वतश्चेत्येकेन श्लोकेनोत्कर्षः। द्रव्यकृतो द्वाभ्यामिति विभागः। तथाभूता-दिति तकारागमः। तथाभूता सुखदैः सुखिनीभूता ब्रह्मविद्या देवकी। तथाभूता इति पाठे सुखदत्वेन भूता जाताः सप्तैवेत्यन्वयः। ननु दुःखप्रतिक्रिया सङ्कर्षणकार्यं कुतः पतिः प्रतिक्रियां समारेभ इति। तत्राहुः तदा पतिरिति। भगवदवताराहेतौ स्वल्पक-भक्तदुःखकाले पतिर्वसुदेवो वेदात्मा स्वप्रतिपाद्यज्ञानजनकः कंसबोधनप्रकारेण ब्रह्म-विद्यायां देवक्यां श्रवणद्वारा ज्ञानप्रवेशार्थं प्रतिक्रियां समारेभ इत्यर्थः। नवभिरिति दशमे तु सान्त्वनारम्भ इति प्रतिक्रियातः पदार्थान्तरारम्भः। आरम्भः प्रतिक्रियायां प्रथम-प्रवृत्तिः। चकारात् 'श्लाघनीयगुण' इत्यादिनवभिः प्रतिक्रिया कृता भवति। चकारोऽनुक्त-समुच्चये। तस्येति सर्वस्य सम्बन्धिनः। सम्बन्धो अंशांशिभावः। पूर्वमिति शूरसेन-देशनिवासात् पूर्वम्। शत्रुघ्नेति तदुक्तं नवमे 'शत्रुघ्नश्च मधोः पुत्रं लवणं नाम राक्षसं हत्वा मधुवने चक्रे मथुरा नाम वै पुरी'मिति। आर्थिकमाहुः तत्रत्यमिति। स चेति शूरसेनश्च। स्वनाम्ना जातदेशावासे हेतुमाहुः अनेनेति। मथुरावासकथनेन हेतुना। अत्र महावाक्यार्थेऽध्यायार्थसङ्गमने आकाशवाणीव्यक्तवचनं न भगवदवतारे हेतुरतोऽव्याप्तिः, तन्निवारणाय 'तत्प्रयोजको हेतुश्चे'ति सूत्रेण भगवदवतारे भक्तदुःखरूपहेतुप्रयोजकस्याकाश-वाणीव्यक्तवचनस्य हेतुसञ्ज्ञत्वान्नाव्याप्तिरवतारहेतुरूपाध्यायार्थ इति बोध्यम्।

१०-१-२८. राजधानीत्यत्र कालभेदेनापीति अयं तत इति पूर्वावधिबोधकं पदं कालत उत्कर्षसमर्पकम्। क्रमस्तच्छब्दार्थः। देशभोगानन्तरम्। देशभोगः कालसाध्य इति कालभेदः। आर्थिकः। 'आर्थिकं तु प्रवक्ष्यामी'ति प्रथमस्कन्धकारिकायाः। अपिना विषयभोगः। विषयभोगो महानिति महती जाता। भेदो विशेषः कालविशेषेण। 'भेदो द्वैधे विशेषे स्या'दिति विश्वः। ततः प्रभृतीति शूरसेनादारभ्य। पूर्वोक्त एव वा तच्छ-ब्दार्थः। यावन्त इति अर्जुनस्य पञ्च पुत्रा उर्वरिताः जयध्वजशूरसेनवृषभमधूर्जिताः, तत्र 'जयध्वजात् तालजङ्घस्तस्य पुत्रशतं त्वभूत्। क्षत्रं यत् तालजङ्घाख्यमौर्वतेजोपसंहृतं

तेषां ज्येष्ठो वीतिहोत्र' इतिप्रथमपुत्रवंश उपसंहृतः। तदनु शूरसेनो मधुरायां कनिष्ठः। तद्भ्राता वृषभः तद्भ्राता मधुः तद्वंशः। 'वृष्णिः पुत्रो मधोः स्मृतः,तस्य पुत्रशतं त्वासीद् वृष्णिज्येष्ठं यतः कुलं माधवा वृष्णयो राजन् यादवाश्चेति सञ्ज्ञिताः'। तत्र माधवा वृष्णयश्च स्पष्टाः। यादवानाह यदुपुत्रेषु 'यदोः सहस्रजित् क्रोष्टा नलो रिपुरिति श्रुता' इति यथार्थोक्तेषु 'यदुपुत्रस्य च क्रोष्टुः पुत्रो वृजिनवांस्ततः स्वाहितस्ततो रुशेकुर्वै तस्य चित्ररथस्ततः शतविन्दुर्महायोगी महाभोजो महानभू'दित्याद्युक्त्वा 'कंसः सुनामा न्यग्रोधः कङ्कः शङ्कुः सुहुस्तथा राष्ट्रपालोथ सृष्टिश्च तुष्टिमानौग्रसेनय' इत्येतावन्तो राजानः कंसपर्यन्तम्। स्ववलादिति कनिष्ठभ्रातृपुत्रत्वात् तथा। खण्डमण्डलेति माथुरशूरसेनयोः खण्डमण्डलं मथुरा। मथुरैवेति एवकारः शूरसेनदेशयोगं व्यवच्छिनत्ति। यादवेति तेन माधवा वृष्णयश्च मथुरायां निवृत्ता इत्युक्तम्। तर्हि मथुरायां शूरसेनाभावप्रसक्त्या 'शूरसेनो यदुपतिर्मथुरामावस'न्नित्यस्य विरोध इत्याशङ्क्याहुः शूरसेनेति। तथा च यदुपतित्वाच्छूरसेनोपि यादवभूभुजामित्यत्रास्तीति। तथा च यादवानां भूभुजः यादवभूभुजस्तेषामिति षष्ठीतत्पुरुषः। न तु सर्वे च ते यादवाश्च ते भूभुजः यादवभूभुज इति कर्मधारयं कृत्वा पुनः सर्वपदेन कर्मधारय इतिभावः। प्रीयत इति डुधाञ् धारणपोषणयोः ह्वादिः उ० अ० अत्र पोषणं तर्पणमित्याशयेन लाघवादुक्तम्। प्रीङ् तर्पणे चु० उ० अ० कर्मणि यक्। राजधानीति कारणाधिकरणयोश्चे'तिसूत्रेण अधिकरणे ल्युट्। दधातेर्धारणमर्थमाहुः निधीयत इति। अनेनेति राजधानीपदेन। उक्तमिति व्यञ्जनयोक्तम्। नित्यपदस्वारस्यं कारिकयाहुः सर्वतत्त्वेष्विति। अष्टाविंशतितत्त्वेषु यो विष्टोन्तर्यामिब्राह्मणेन। भूमावपीति तत्त्वान्तर्गतत्वादितिभावः। क्वचिदेवेति यथा पुंसां हृदि। तद्वन्मथुराहृत्पद्मम्। 'मथुरायां विशेषेण मां ध्यायन् मोक्षमश्नुत' इति। अष्टपत्रं विकसितं हृत्पद्मं तत्र संस्थितमिति गोपालतापिनीयात्। 'यत्र ब्रह्म च क्षत्रं चोभे भवत ओदनः मृत्युर्यस्योपसेचनं क इत्थं वेद यत्र स' इति श्रुतेरेवकारः। स्मृतेति अत्र स्मृता द्वादशस्कन्धे च। वेदवेदान्तसारत्वाच्छ्रुतेति नोक्तम्। असारत्वापत्तेः। तथा च कारणरूपेणास्तिभातिप्रियत्वेन सर्वत्र स्थितावप्यनुप्रविष्टरूपेण मथुरायामेव तिष्ठति'। 'त्रयोविंशतितत्त्वानां गणं युगपदाविश'दितिवाक्यात्। अस्याः पृथिव्यास्त्रिवृत्कृतत्वे तस्या भूमेरुपादानतद्वारात्राप्यावेशः। यद्यपि जलादिकमप्युपादानं 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूत' इत्यादिश्रुतेः 'तदात्मानं[१] स्वयमकुरुते'तिश्रुतेश्च, तथापि भूम्यंशस्याधिक्यात् तदाविष्टस्यैव स्थितिरुक्तेति भावः। भगवान् हरिरिति पदद्वयस्यार्थमाहुः द्वयं चक्र इति। भगवान् वासुदेवः प्रथमाध्यायेर्थ इति मोक्षं चक्रे इतिवक्तव्ये भगवतो हरित्वेनोपस्थिते यत् कर्तव्यं तदाहुः सर्वेषामिति। सप्तमस्कन्धे 'समः सुहृद् ब्रह्मे'त्युक्तेः तथा।

१. स्वयं०।

'हरिर्हरति पापानी'ति पापहरणैकदेशः सकलं हितं चक्रे। हरिस्तु सर्वदुःखनिवृत्तिं चक्रे, व्युत्पत्तेः। सर्व एवेति अन्येपि देवकेयाः प्रतिकर्तार इतिभावः। सन्मानबाहुल्यादेवकारः। मर्यादेति वसुदेवो मर्यादास्थापकः। वेदत्वात्। 'निगमो वसुदेवोऽभू'दितिश्रुतेः। 'वेदस्य विद्यमानत्वान् मर्यादापि व्यवस्थिते'ति पुष्टिप्रवाहमर्यादाग्रन्थवाक्यात्। सर्वथेति सर्वे प्रकारा अन्येषामपि वसुदेववत् प्रतीकारकाणां सत्त्वात्। राजत्वादतो न्यूनपूरणम्। निरूपितमिति सान्निध्यं निरूपितम्। क्वान्तं क्लीबमितिपक्षे दुःखसम्भवो निरूपितम्। प्रथमपक्षे दुःखस्य सम्भवो यस्मात् तादृशो भगवत्तिरोभावो नित्यसन्निधिदेशेपि चेज्जात इत्यर्थः। द्वितीये तु भगवदवतारो भवत्विति ज्ञापनार्थं दुःखसम्भवो निरूपितमित्यर्थः। प्रसङ्गाद् भक्तिदशायां तीर्थान्तरसान्निध्यमपि विवृण्वन्ति स्म श्रीरङ्गादिष्विति। आदिना जगन्नाथविठ्ठलेशविङ्कटेशाः। 'जगन्नाथे विठ्ठलेशे श्रीरङ्गे वैङ्कटे तथे'ति निबन्धे बहुप्वनियम इति द्योतितम्। नारायणस्येति श्रीरङ्गे शालग्रामलेप्या मूर्तिः। शालिग्रामास्तु जलेशया इति नारायणत्वम्। जगन्नाथे दारुविग्रहः। औपधिविद्या। 'अदो यद्दारु प्लवत' इतिश्रुतेर्नारायणत्वम्। 'कृष्णस्तु भगवान् स्वय'मितिवाक्याच्च अवतारः। विठ्ठलेशे महाविष्णुः,महत्त्वं भगवत्सम्बन्धादेवेत्याश्रयनारायणत्वम्। वैङ्कटे वैकुण्ठनाथः। नारायणसमत्वान्नारायणत्वम्। 'नारायणसमो गुणै'रितिवाक्यात्, सर्वेषु न महतः स्रष्टुः सान्निध्यं किन्त्वण्डसंस्थितस्य महत्स्रष्टृद्वितीयरूपस्येत्याहुः ब्रह्माण्डेति। ननु भक्तिमतां सत्त्वात् कुतो न महतः स्रष्टुः सान्निध्यमत आहुः देशकालेति। देशकालद्रव्यमध्यस्थो नित्यः सन् षडङ्गत्वं यज्ञत्वं य आगतः। किञ्च षडङ्गत्वं षड्भावविकारत्वं यो ब्रह्माण्डरूप्यागतः देशकालादिः तन्मध्यस्थ इत्येकदेशान्वयः। अन्यत्रेति मथुराया हृत्पद्मस्थानभूतायाः अन्यत्र पृथ्वीदेहेवान्तरदेशेषु ये शालग्रामादयस्तेषु स्थितः सान्निध्यं करोतीत्यर्थः। तेन देशकालमध्यस्थत्वान् न महतः स्रष्टेतिभावः। तथा चाङ्गभूतात् प्रधानभूतोऽधिक इति तेनैव चेन्न सुखं तदा अङ्गभूतात् कुतः सुखं भवतीत्यपि ज्ञापनायेदमुक्तम्। तेन तापिनीयोक्ताभ्यो द्वादशमूर्तिभ्यो न सुखमिति ज्ञापितम्। मथुराकर्णिकास्थानापन्नद्वादशवनस्थत्वात्। किञ्च तर्हि देशान्तरे भगवत्पूजादिकं न स्यादित्याशङ्क्य तदपि व्यवस्थापयन्ति स्म देशेति। तीर्थेभ्योन्यदेशेषु 'देशः कालः पृथग् द्रव्य'मितिवाक्यात् देशादिषडङ्गरूपो यो भगवान् 'यज्ञो वै विष्णु'रितिश्रुतेर्विष्णुः स शालग्रामादिषु स्थितः। ष्ठा गतिनिवृत्तौ। तिरोभावरहिते नित्यसन्निहित इत्यर्थः। अस्थिरायां मूर्तौ विसर्जनविकल्पादाविर्भावतिरोभाववान् इति शालग्रामेत्युक्तम्। शालिग्रामशब्दोपि। आदिपदेनोक्तश्लोकोक्तदेशादिषु देश उक्तः। एकादश्यादिकाले,तुलस्यादिद्रव्ये, शमादिगुणवति कर्तरि, गोपालादिमन्त्रे, पूजादिकर्मणि, तत्तद्रूपो भगवान् विष्णुः स्थित इत्युक्तम्।

१०-१-२९. तस्यां त्वित्यत्र भगवत्कृतेति नित्यसन्निहितभगवत्कृतेत्यर्थः। दुःखपर्यवसानं भगवत्प्राकट्यार्थमैच्छिकम्। तस्यां नित्यसन्निहितायां तु दुःखपर्यवसानेने-त्यर्थात्। एवं चेदान्तीयो भगवान् मानसीनोग्रे वक्तव्यः। वेदीयोत्र 'कृष्णद्युमणिनिम्लोच' इति तृतीयस्कन्धोक्तद्युमणिधर्मेण मानसीनमाहुः सर्वानिति। हरित्वेनाविर्भावात् पूर्वं कृष्ण उक्तः। हरिः शास्त्रप्रतिपाद्यः कृष्णोकारक इतिशास्त्रप्रतिपाद्यत्वार्थे कृष्णस्य। योगेन हरिर्द्युमणिरपि अस्तं गच्छन् सर्वानंशानाकृष्यास्तं गच्छति। आरण्यके प्रसिद्धम्। भगवत्कृतसुखव्यावृत्तेस्त्वर्थत्वान् नित्यसन्निहितभगवतो हरेः सर्वानित्यर्थः। अंशान् षड्गुणान्। भगवतः निरोधकर्तृत्वं हरेः। षडुत्कटदोषाकर्षार्थमाहुः सर्वत इति। गुणदोषेषु समत्वमुक्तम्। समत्वात् सुहृत्त्वाच्च ब्रह्मणः। स्वावतारार्थमिति। अयमर्थः। समाधिभाषा-षोषिकेन्यमतभाषा लौकिकीभाषा वा। अत्र 'निष्कलं निष्क्रियं शान्त'मित्यादिश्रुत्युक्तम्। सिद्धान्ते विरुद्धसर्वधर्माश्रयम्। तत्र ब्रह्मणि 'कृष्णस्तु भगवान् स्वय'मिति वाक्यात् 'कृष्णो ब्रह्मैव शाश्वत'मिति श्रुतेश्च परिदृश्यमानयावद्धर्मवैशिष्ट्येन स्वावतारार्थम्। तथा चान्यमत-भाषा लौकिकीभाषा ताभ्यां भगवत्कृतसुखव्यावृत्त्यर्थकस्तुशब्द इति भावः। तदेतदाहु-ष्टिप्पण्यां सर्वानित्यादीत्यादिना। लीनं कृतवानिति सान्निध्यं लीनं कृतवान्। अत एवा'वजानन्ति मां मूढा मानुषीं तनुमाश्रित'मिति गीता। सर्वाकर्षवत्त्यां स्वावतारार्थे भक्तदुःखाभावसत्तावत्यां 'तस्या'मित्येवम्। एवं त्वर्थमुखेन पूर्वश्लोकसङ्गतिबोधके 'तस्या'-मितिपदे विशेषणे उक्ते। सुबोधिन्याम्। कर्हिचिदिति तस्यामित्यस्य त्वर्थे आधाराधेयभावः सम्बन्धः। भगवत्कृतसुखव्यावृत्तिमत्यां तस्यां मथुरायां स्वसर्वांशाकर्षवत्यां च कर्हिचित् किमः प्रश्नवाचकात् कालेर्हिल्। कुत्सा द्योत्या। तथा च विश्वः 'किं प्रश्नेपि च कुत्साया'-मिति। चित् असाकल्येव्ययम्। तथा चासकले कस्मिंश्चित्काले विशेषणविशेष्यभावे काम-चारो वा। कर्हि च चिच्च तयोः समाहारः कर्हिचित्। पूर्वोक्ते चेति सर्वांशाकर्षणकाले। असाकल्यं किमो द्योत्यायां कुत्सायां चिदव्ययवाच्यायां सुमुहूर्तादिराहित्यमित्याहुः सु-मुहूर्तादिकमिति। साकल्यं सुमुहूर्ततदभावाभ्यां काले भवति। सुमुहूर्ताभावमात्रा-दसाकल्यम्। एतदेवाहुः इति कर्हिचिदित्युक्तमिति। अन्येपीति अष्टवसुसंज्ञकेभ्यो विश्वेभ्यो देवेभ्य इति। पितृनाम्नेति शूरो वसुदेवपिता, शूरस्यापत्यं शौरिः। 'अत इञ्'। प्रकृतिमात्रेण पितृनाम्ना। तन्निवृत्तिरिति विशेषणानां व्यावर्तकत्वादितिभावः। एवं विशेषणकृत्यमुक्त्वा विशेष्यवसुदेवपदकृत्यमाहुः वसुदेवभ्रातर इति। देवभागादयः। 'देवमीढस्य शूरस्य मारिषा नाम पत्न्यभूत्, स तस्यां जनयामास दशपुत्रानकल्मषान्। वसुदेवं देवभागं देवश्रवसमानकम्। सृञ्जयं श्यामकं कंकं शमीकं वत्सकं वृक'मिति नवम-

१. भगवान्।

स्कन्धे। उद्वह इति। षोडशसंस्कारेषु प्रथमः। तेन नान्यसंस्कारोपादानम्। नवोढयेति न वाचा सा ऊढा नवोढा विवाहिता तया। स्वगृहेति पठोनीति लोके तद्दिने। श्वशूरेति देवकदत्तम्। स्वत्त इति 'पितृनाम्ना तु मुख्यत्व'मितिवाक्यात्। अन्यथा देवकीपदमनतिप्रयोजनकं स्यात्। अवस्थोत्कर्षस्य वाक्यार्थत्वे इदमेव हेतुः। देवक्येति सहार्थेऽप्रधान इति तृतीयार्थप्राप्तमर्थमाहुः भर्तृप्राधान्यमिति। अनेन स्वत उत्कर्ष उक्तः। देवक्येतिपदेन देवको ज्येष्ठ इत्युत्कर्षः। देवानां स्थानं ब्रह्मविद्या चेत्यप्युत्कर्षः।

१०–१–३०. उग्रसेनसुत इत्यत्र। व्यावर्तकं हि विशेषणम्। उग्रसेनसुतविशेषणव्यावर्त्याभावात् कंसकृतसुखव्यावर्तकोत्कर्षबोधनाय कंसविशेषणमित्याहुः उग्रसेनसुत इत्यादि। कंसो वेति अस्यां कोटौ बीजं रङ्गादावुत्कर्षप्रतीतिः कंसस्य। एतदेवाहुः मुख्य एवेति। राज्ञ्येव व्यवहारो रंगादौ उपवेशनादिस्तस्मिन्। सम्बन्धश्चासौ हेतुरिति कर्मधारयः। लोकप्रसिद्ध इति पुत्रत्वव्यवहारलक्षणः लोकप्रसिद्धो ग्राह्यः, न त्वेकत्वलक्षणः। 'आत्मा वै पुत्रनामासि संजीव शरदः शत'मितिश्रुत्युक्तः। अन्यजे व्यभिचारात्। अत इति संदिग्धराजत्वात्। राजा चेत् कंसो न गृह्णीयाद्रश्मीन्। अतो अभिमानेन जगृहे, न तु सेवकवत्। 'स्वसुः प्रियचिकीर्षये'तिपाठो व्याकृतः, 'भगिन्याः प्रियकाम्यये'ति पाठे कमनैव कामा स्वार्थे ष्यञ् काम्या। तयेच्छया। जगृह इति आत्मनेपदेन विवरणं ग्रहणस्य फलम्, सन्मानसुखं, तस्य कंसगामित्वात्। देवक्याः स्त्रिया ब्रह्मविद्यात्वेन सुखदुःखसाम्यात्। अतो जग्राहेत्यत्र छान्दसं परस्मैपदमितिभावः। केवलेनेति रथोपविष्टेन। विशेषणमिति अनेकशतेति 'विंशत्याद्याः सदैकत्व' इत्यस्यावयवापेक्षया प्राप्तबहुत्वनिषेधपरत्वादवयविनि शते बहुत्वमन्वेति। अनेकत्वावच्छिन्नं यत् शतं तत् समवेतकानेकरथैरित्यर्थः। एवं च 'रथशतै'रित्यत्र रथानां शतैरिति षष्ठीतत्पुरुषे 'विंशत्याद्याः सदैकत्वे सर्वाः सङ्ख्येयसङ्ख्ययो'रित्यमरात्। शतशब्दस्य सङ्ख्येयवाचकत्वे लक्षणापत्त्या 'लक्षणां नैव वक्ष्यामी'ति प्रतिज्ञाविरोधः। सङ्ख्यावाचकत्वे एकवचनान्ततापत्तिरतो रथशतशब्दस्य समासशक्त्यार्थे वक्तव्ये 'रौक्मै'रिति विशेषणस्यासङ्गतत्वापत्तिरतोनेकं शतं तद्युक्तैरथैरिति मध्यमपदलोपी समासः। 'उपसर्जनं पूर्वं' समासशास्त्रे उपसर्जनं प्राक् प्रयोक्तव्यमिति शतशब्दस्य पूर्वनिपाते प्राप्ते 'छन्दसि विभाषे'तिसूत्रे विभाषेतियोगविभागादु'पसर्जनं पूर्व'मिति सूत्रस्य वैकल्पिकत्वाद् रथशतैरित्युपपन्नमितिभावः। दासभावं प्राप्त इति अभिमानेनेति बोध्यम्। अपेक्षितसमर्पणं वा दासभावः। अन्यत इति कंसतो देवक्या उत्कर्षः उक्तः।

१०–१–३१. चतुःशतमित्यत्र द्रव्यत उत्कर्षे श्लोकद्वयम्। तस्याभासमाहुः पितृकृतमिति। द्रव्यकृतमित्यस्य व्याख्यानम्। आहेति द्वाभ्यामाह। चतुरङ्गिणीमिति चत्वार्यङ्गानि गजाश्वरथपदातयो यस्याः सन्ति सा चतुरङ्गिणी ताम्। पारिबर्हमिति परिबर्ह

तु दाने राजार्हं वस्तु। स्वार्थेण्। प्रयच्छन्तीति दाण दाने। तस्य यच्छादेशः। चत्वार्यङ्गान्याहुः तत्र पदातीनामिति। 'अयुतं सार्ध'मित्यस्यार्थः। पञ्चदशसहस्राणीति अयुतं दशसहस्रं तत् अर्धेन पञ्चसहस्रेण सह वर्तमानं सार्धम्। त्रिपट्शतमित्यत्र त्रिकृत्वः षट् त्रिषट्। कृत्वसुचो लोपः। त्रिषट् च तत् शतं च त्रिषट्शतमित्याशयेनाहुः अष्टादशशतमिति।

१०–१–३२. दासीनामित्यत्र सखित्वेति देवकीसखित्वज्ञापनाय। तेनेति भर्त्रा वसुदेवेन। स्वार्थिककप्रत्ययार्थमाहुः अत्यन्तमिति। देव एव देवकः। असुरयोगव्यवच्छेदकैश्चकारः। दिवु क्रीडेत्यत्र धातुपाठे, द्युत्यर्थो दिव् तस्य प्रयोगोत्र चन्द्रवंशयत्वादित्याहुः भगवानत्रेति। आहुकात्मजौ 'देवकश्चोग्रसेनश्चे'ति न पितृकृतदेवकत्वं किन्तु चन्द्रकृतमेव। 'चत्वारो देवकात्मजाः। देववानुपदेवश्च सुदेवो देववर्धन' इति देवकीसन्माननं भगवानत्रावतरिष्यतीति ज्ञानादेव। तासामिति दासीनाम्। वात्सल्येति स्नेहो वात्सल्यं तेन युक्तः।

१०–१–३३. शङ्खतूर्येति सम्माननमिति मानत इत्यस्यार्थः। टिप्पण्यां प्रथमार्थे वसिलङ्गीकारात्। तूरीति 'स्वार्थे यज्ञायण्'। तूर्यम्। अम् अव्ययं प्रसिद्धार्थकं वा। मृदङ्गानीति बहुवचनं वाद्यस्य भगवत्प्रियत्वात्, कोशेपि बहुवचनम्। देवकत्वाद् राजकस्य। अनेनेति मङ्गलद्रव्यप्रापणेन। पर्यवसानस्येति 'कंसः प्रीतमना राजन् प्रहस्निदमब्रवी'दिति वाक्याद् वरवध्वोः पर्यवसानस्योत्सवसमाप्तेरुत्तमत्वात्। कंसप्रसाद एव जातत्वात् समाप्तेः।

१०–१–३४. पथि प्रग्रहिणमित्यत्र एवं सप्तभिर्महावाक्यार्थहेतूत्कर्षनिरूपणेन महावाक्यार्थरूपाकाशवाणीवचनानुकूलव्यापाररूपाऽवान्तरवाक्यार्थं वक्तुमाहुः कालो हीति। गुणक्षोभकः कालः प्रतिबन्धको दृष्ट इत्यत्रापि गुणक्षोभद्वारा जातः। तस्याधिभौतिक इति तस्य कालशक्तिपदवाच्यस्य अधिभूतभवः आधिभौतिकः तत्र भव इति ठक्। उभयपदवृद्धिः। कालनेमिः नाम्नोधिभूते भवत्वाचाधिभौतिकः कंस इति। कंसोप्याधिभौतिकः कालस्तथापि नित्यलीलास्थकलिरूपत्वात् कालशक्तेर्नाधिभौतिकः। अतो निविष्टः। आसुरसम्पदा ज्ञायते। शेत इति स्वप्नकरणं न कंसकार्यं हरिप्रियाणां कल्यतिरिक्तकार्याभावात् कंसस्य। 'पुरुषो ह वै नारायणः स्वपिते'त्यत्र नारायणस्य सुरासुरसाधारण्यात्। तत्प्रादुरिति कंसस्यावेशित्वात् कंसधर्मैस्तिरोभूतस्य तस्य कालनेमेः प्रादुर्भावार्थम्। तद् वक्ष्यते 'आत्मानमिह सञ्जातं जानन् प्राग्विष्णुना हतं महासुरं कालनेमि'मिति। कंसे देवत्वमपि तत्रैव वक्ष्यते। तस्याधिभौतिकस्यानुगुणाया आसुरसम्पज्जनकत्वेनानुगुणत्वम्। देवतायाः आध्यात्मिक्याः आकाशवाण्याः देवासुरसाधारण्यात् देववाग्वारणार्थं विशेषणम्।

१. ते। २. हेतुर्महावाक्यार्थस्तत्प्रयोजकोपि हेतुर्महावाक्यार्थं आकाशवाणी व्यक्तवचनरूपा। ३. उक्तरूपवाक्यस्यार्थम्।

तदुत्कर्षमसहमानाया इति आसुरवाग्रूपायाः। अकस्मादित्यहैतुकम्। न चोत्कर्षासहनं हेतुरिति वाच्यम्। कालनेमिप्रादुर्भावमात्रकार्ये हेतुत्वात्। अशरीरवाक्त्वात् स्वत एव जातमित्यहैतुकं वा। न तु गृहे इति कंसगृहे रहसि न तु। गमनानन्तरमिति वसुदेवगृहगमनानन्तरं वसुदेवगृहे कंसं प्रत्येव। अनेनेत्यादि अर्थटिप्पण्याम्। तत्र प्रसंगसंगत्याहुः भक्तिमार्गपीत्यादि। भगवत्प्रापकमार्ग इति प्रासंगिको मार्गो ब्रह्मस्तुतौ 'शृण्वन् गृण'न्निति श्लोके व्याकरिष्यते। सुबोधिन्याम्। प्रोपसर्गार्थमाहुः सर्वेति। अत्र सर्वे प्रकारा उपसर्गद्योत्या न तु वाच्याः। सूतत्वमेव स्वस्यांगीकृतवानित्यर्थः। नित्ययोगे मत्वर्थीय इनिप्रत्ययार्थो वा सर्वप्रकारेणेति। आहेत्येतावत्येव वक्तव्ये आभाष्यपदवैयर्थ्यमाशङ्क्य तत्सार्थकत्वायाहुः रे रे कंसेति। रे रे इति संबोधने वीप्सा। संबोधनमारभ्य सावधानपर्यन्तमाङर्थः। अभिविधावाङिति। तथा च स्वहतिश्रवणव्यग्रे आहेत्यस्य सार्थक्यायाभाष्येति पदमितिभावः। न निर्गतेति तथा च शरीरस्य वाक् शरीरवाक्, न शरीरवागशरीरवाक्। वाक्यानीति एकतिङ्वाक्यमिति वाक्यलक्षणमत्र। संख्येति अष्टसंख्या एकत्वसंख्या च। मध्य इति वाक्यमध्ये। प्रेरणस्य भगवद्धर्मत्वात्। 'भोक्ता भोग्यं प्रेरितारं च मत्वे'तिश्रुतेः। गर्भस्य हननानुकूलव्यापारवत्त्वाभावात् 'हन्ते'ति क्रियापदाच्च दृष्टानुसार्यर्थमाहुः स बालक एवेति। अवस्थानां बाल्यादित्वाद्गर्भावस्था बाल्यावस्था। भविष्यदद्यतनकालासंभवात् सामान्यस्यापि क्वचिद्विशेषबाधकत्वाल्लुडंतस्यापि लृडंतार्थमाहुः हनिष्यतीति। प्रेक्षिकास्विति राजोत्सवप्रेक्षिकासु। न जानासीति ज्ञानप्रतिबंधकं राजतमः 'अंधंतमः प्रविशंति ये संभूतिमुपासत' इति शारीरकब्राह्मणात्। इदं तृतीयं वाक्यम्। हितत्वेति लोके स्पष्टम्। स्वरेणेतिबोध्यम्। अत्राकाशवाणीमाया कृपेति यावत्। कृपाया हितत्वम्। तस्य ज्ञापनायेत्यर्थः।

१०-१-३५. इत्युक्त इत्यत्र तत इति आकाशवाणीव्यक्तवागनन्तरम्। क्रमवाची तत इतिशब्दः। आकाशवाणीस्वरूपं द्वितीयस्कन्धनवमाध्याये। 'स चिन्तयन् द्व्यक्षरमेकदाम्भस्युपाशृणो'दिति वाक्योक्तम्, न तु सत्त्वरजस्तमःसाम्यावस्थारूपप्रकृतिरित्याशयेनाभिप्रायमाहुः आकाशवाण्या इति। माायात्वे तु प्रकृतिरूपमायायाः कृपा दंभरूपत्वाभावात्। 'माया दंभे कृपायां च माया पीताम्बरेश्वर' इति विश्वात्। अथवा। तत इत्येतावतैव चारितार्थ्येऽपि इत्युक्त इति पूर्वानुवादस्य तात्पर्यमाहुः आकाशवाण्या इति। तथा च व्यक्तवचनसमय एव कृतवानिति बोधनार्थमनुवाद इतिभावः। स्वगृह एवेति। स्वसात्मनः कंसस्य गृहे, एवकारः प्रतिगृहयोगव्यवच्छेदकः तथा च स्त्रीपुंयोगाभावान्न तव मारकपुत्रोत्पत्तिरितिभावः। अन्यदा वेति हठकाले। किञ्चिदिति दुःखादिकम्। 'आत्मानमिह संजात'मिति वाक्यादाहुः कालनेमिसहित इति। देवत्वपक्षेणार्था-

न्तरमाहुः स प्रसिद्ध इति। सखलपदस्यावृत्तिरभिप्रेतेति ज्ञेयम्। तेन न युगपद्वृत्तिद्वयविरोधः। प्रकृत्येति तमोरूपया। तामिति भगिनीम्। आवृत्त्या योजनीयम्। जात इति तेन द्विग्विजये पापान्येवेति ज्ञापितम्। पापात्मत्वं त्वप्रादुर्भूतम्। अत एव पापान्यस्मिन् संतीति विगृह्य, अर्शाद्यच् न कृतः। न बाधकमिति खलसंचये भ्वा० प० से० संचायकत्वात् प्रातिकूल्याभावेन न बाधकम्। अथवा निरन्तरपापेन दुष्टान्तःकरणत्वाच्छास्त्रं तं निवर्तयितुमसमर्थमित्यर्थः। वंशजा इति भोजवंशजाः। भोजवंशोद्भवा इति भोजानामिति पुराणं प्रमाणम्। 'लक्षणां नैव वक्ष्यामी'ति लक्षणा च नास्ति। तथा च भोजश्च भोजश्च भोजश्च भोजश्च भोजास्तेषामित्यर्थो भवति। तथा च नवमस्कन्धे 'महाभोजोपि धर्मात्मा। भोजा आसंस्तदन्वय' इति पुराणप्रामाण्यान्न लक्षणा। तद्राजस्य लुका वा न लक्षणा। अग्रे 'कंसः सुनामा न्यग्रोध' इति श्लोकः। अत उक्तं 'भोजवंशोद्भवा' इति। य इति 'वृष्णेः सुमित्रः पुत्रोभूत् युधाजिच्च परंतप। शिनिस्तस्यानमित्रश्च निम्नोभूदनमित्रतः। सत्राजितः प्रसेनश्च निम्नस्याप्यासतुः सुता'वित्यादिश्लोकोक्ताः वृष्ण्यादयः। स्वरूपमिति 'कलेर्दोषनिधे राज'न्निति वाक्यात्। कचेषु किंचिदित्यादि अत्र टिप्पण्याम्। ग्रहणक्रियेति ग्रहणानुकूलो व्यापारो ग्रहेरर्थः। ग्रहणक्रिया उपादानं तदाश्रयत्वेन। कर्मत्वेपि धातूपात्तफलाश्रयत्वेपि। इप्सिततमत्वेति इप्सितत्वेपि तथा। तथात्वेति। कालिकसम्बन्धेन। पाण्यौपश्लेषिकाधारेषु कचेषु औपश्लेषिकाधारत्वात् तथात्वज्ञापनाय इप्सिततमत्वाभावज्ञापनाय तथेत्यर्थः। इप्सिततमत्वं उत्पाद्यत्वसंस्कार्यत्वाप्यत्वविकार्यत्वसमानाधिकरणं तच्चतुष्टये एकतमाभावान्नेप्सिततमत्वं कचानामितिभावः। तथा च कचे पाण्याधारत्वं तस्यामुपादानं क्रियाफलं, कंसे तदनुकूलो व्यापारो ज्ञेयः। यदा फलमात्रं धात्वर्थः तदा व्यापारो लकारार्थः। अनुकूलतासम्बन्ध इति मिश्रमतम्। स्वमतेनुकूले घटे जानातीत्यादिस्थलेपि ज्ञानानुकूलो व्यापारो न त्वाश्रये लक्षणा। 'सर्वस्यापि कारणे पुरुषव्यापृति'रिति भाष्यात्। सुबोधिन्याम्। भूते क्तविधानात् पक्षान्तरमाहुः आरब्धवान् चेति। अत्र कर्मणि क्तवतुप्रत्ययप्रयोगः। तत्रोच्यते। कालः कंसमारब्धवानिति विभक्तिभेदेनान्वय इति। कर्तरि प्रयोग इति न चारब्ध इति मूलविरोध इति वाच्यम्, छान्दसस्य क्त च तु स्थाने क्तस्यांगीकारात्। न च रभेर्भावे क्तं विधायार्शआद्यचि न छांदसत्वमिति वाच्यम्, तत्रापि भूतकालनिवेशादत्र च तदभावात् यद्यपि क्तवतुरपि निष्ठा तथापि 'बहुलं छंदसी'त्यत्र छंदसीति योगविभागादत्र बाहुलकान्न निष्ठा संज्ञा। ततो न भूते निष्ठा किंतु वर्तमान इति। यद्वा भूतकालः शुकोक्त्यभिप्रायेण। तस्या ग्रहणमिति ग्रहणस्य तन्निष्ठत्वेन कचे अभावात्। न च दृष्टविरोध इति वाच्यम्। करादिग्रहणे करादावग्रहीदिति न प्रयोगः, किन्तु करादिमग्रहीदित्येवेति। विवक्षातः कारकाणि भवन्तीति त्वगतिकगतिः।

फलाश्रये कर्मत्वे संभवति कर्मद्वारा क्रियाश्रयत्वस्य कचे सत्त्वेनाधारत्वात्। अत उक्तं तस्या ग्रहणमिति।

१०–१–३६. तं जुगुप्सितेत्यत्र शूरोपीति 'विचिन्त्यानकदुंदुभि'रिति वाक्यात्। एतत्समये शूरत्वं विना विशेषेण चिन्तनासम्भवात्। अपिना ज्ञानी। वसुदेवः सत्त्वं सत्त्वं ज्ञानमिति वसुदेवविषयमाहुः कंसचलं चेति। तथा च ज्ञानस्य विषयाविनाभावात् कंसचलस्ततो दोषाभावविषयकं वसुदेवरूपं ज्ञानम्। स्वत इति किंत्वाकाशवाणीतो दोषस्तस्य भवति कालनेमिप्रवेशकृतो वा। निश्चित्येति तेन चतुर्षु ज्ञानेषु निश्चयात्मकं ज्ञानं वसुदेवरूपमित्युक्तम्। प्रवृत्त इति भूते क्तविधानाद्भूतकालः शुकोक्त्यभिप्रायेण। नन्वेवमतिक्रमकर्तुस्तद्धितत्वाज्ज्ञानं नोपदेष्टव्यमित्यत आहुः नायमिति। वसुदेवस्य स्त्रीकंसयोस्तुल्यदृष्टिरतो न कंसस्याहिते तात्पर्यम्। किंत्वनुचितत्वान्मारणं निवारणीयमतः कंसाहिताभावस्त्रीमारणाभावोभयसाधकत्वाज्ज्ञानेन प्रतीकारमुवाचेत्यर्थः। दयाविष्ट इति दया कृपा मायेति यावत्। आकाशवाणीवाक्ये मनोद्वाराविष्टः तेन दयायां विष्टः दयाविष्ट इति। 'सप्तमी शौंडै'रित्यत्र सप्तमीति योगविभागात् 'सहसुपे'ति वा समासः। स्वयमिति कंसः। लज्जा सेति अन्यतो या लज्जा सापत्रपेत्यर्थः। अयुक्त इति ज्ञानरूपत्वादिति भावः। 'जीवाभयप्रदानस्य न कुर्वीरन् कलामपी'तिवाक्यात्। उपेक्षायामिति सतिसप्तमी। तस्यां सत्यां उपेक्षासमानाधिकरणमयुक्तत्वं यत् तद्विशिष्ट इत्यर्थः। सर्वप्रकारेण शुद्धसत्त्वरूपत्वाज्ज्ञानप्रकारेणापि मोचयितुं शक्तेऽयुक्तत्वापरया विशेषणाभावप्रयुक्तोऽयुक्तत्वाभावो युक्त इति भावः। 'वसुर्मयूखाग्निधनाधिपेषु योक्त्रे बके स्याद् वसुहट्टके च वृद्ध्यौषधीस्थानधनेषु रत्ने वसु स्मृतं स्यान् मधुरेऽन्यवच्चे'ति विश्वः। दिवु क्रीडाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिष्विति धातुपाठः। तस्य जन्मनीति नवमस्कन्धे प्रसिद्धम्। समाधानार्थमिति कंसकृतस्त्रीमारणाभावार्थम्। अनेनाकाशवाणी वाण्यपि निमित्तसापेक्षेत्युक्तम्। 'निमित्तमात्रं भव सव्यसाचि'न्नितिवाक्यात् कालेऽर्जुनसापेक्षत्ववत्। तथा च वसुदेवसान्त्वने निमित्ते स्त्रीमारणाभावाद'स्यास्त्वा'मिति स्ववाक्ये आकाशवाण्याः समाधानं कंसशान्तिस्तदर्थम्। वसुदेवोपि मायाभक्तः। 'अर्चिष्यन्ति मनुष्यास्त्वा'मिति वाक्यात्। अनेन कृपारूपाया अपि क्रोधो निमित्ताभाव इति ज्ञापितम्, वसुदेवस्य मायाज्ञानात्।

१०–१–३७. श्लाघनीयगुण इत्यत्र आकाशवाण्याः समाधानार्थं यततेऽयं अतो ज्ञानेच्छे पूर्वं वाच्ये। तत्राकाशवाण्युक्तं स्त्रीमरणप्रतीकारश्च विषये ज्ञाने तादृशं ज्ञानमिच्छाविषयः। तादृशीच्छा यत्नविषयः। तदाहुः आकाशवाणीत्यादिना। अयमिति कंसः। क्रिययेति वेदरूपवसुदेवस्य क्रिया ज्ञानं वा शक्तिः प्रतिपाद्येति द्वयोरुक्तिः। ज्ञानेनैवेति अत्र ज्ञानयत्नावुक्तौ। तत्र श्रुतिः 'यन् मनसा ध्यायति तत् करोती'ति श्रुतिः। अत्रापीच्छा

ज्ञेया। कंसेन क्रियमाणो न प्रतीकारः। देवकीमरणेप्यन्यथा मारयेद् भगवानाकाशवाणी वा। किन्तु वसुदेवोक्तः प्रतीकारः। यदि कंस इदमङ्गीकुर्यात् तदा प्रतीकारः स्यादेवेति भावः। प्राणश्लोकैरिति एकस्य वसुदेवप्राणस्य नव श्लोकाः परिणाम इति स्फुटम्। वायुः शब्दतामापद्यत इति प्राञ्चः। तथा च प्राणात् श्लोकैः प्राणश्लोकैः। सम्बन्धः जन्यजनकभावः। प्राणात् ते श्लोका इतिविग्रहे कर्मधारयः। कुतोत्र प्राणान् नव प्राणश्लोकाः। उच्यते प्रश्नोपनिषदि। 'अथ हैनं भार्गवो वैदर्भिः पप्रच्छ भगवन् कत्येव देवाः प्रजा विधारयन्ते कतर एतत् प्रकाशयन्ते कः पुनरेषां वरिष्ठ इति, तस्मै स होवाचाकाशो ह वा एष देवो वायुरग्निरापः पृथ्वी वाङ् मनश्चक्षुः श्रोत्रं च ते प्रकाश्याभिवदन्ति वयमेतद् बाणमवष्टभ्य विधारयामस्तान् वरिष्ठः प्राण उवाच मा मोहमापद्यथाहमेवैतत् पञ्चधात्मानं प्रविभज्यैतद्वाणमवष्टभ्य विधारयामीती'ति। 'एनं' पिप्पलादम्। 'भार्गवो' गोत्रेण विदर्भस्यापत्यम्।'एतत्' प्रजारूपं कार्यम्। 'स' इति पिप्पलादः। 'त' इति बहुत्वनियमात् वाग्वन्तो द्वन्द्वः। बाणं 'प्रकाश्य'। 'बाण'मिति शरीरम्। 'अहं' वरिष्ठ आसन्यः प्राणः। अत्राकाशादीनि नवैव। यद्यपि दश प्राणाः तथाप्युपदेशाच्छान्दोग्ये नवेति तद्बीजरूपाः प्रश्नोक्ता नवोपात्ताः। 'नव वै पुरुषे प्राणा' इतिश्रुतेः। सर्वं तत्त्वमिति स्वस्य वेदत्वेन मोक्षरूपवासुदेवाविर्भावस्थानत्वेन च पारमार्थिकं लौकिकं च सिद्धान्तम्। नवसु त्रयोविंशतितत्त्वानामन्तर्भावात् सर्वमिति पदम्। जन्मप्रकरणत्वात् सङ्ख्यातात्पर्यम्। जातेष्टौ सङ्ख्यातात्पर्यस्योक्तत्वात्। उपदिशतीति प्राणरूपैः श्लोकैरुपदिशति 'प्राणैर्मनो मनसश्च विज्ञान'मितिश्रुतेर्विज्ञानजनकत्वात्। प्राणश्लोकैरपि तत्त्वोपदेशेप्यपमरणानिवृत्तौ हेतुमाहुः यद्वयमिति। मृत्यावित्यपमृत्यौ सतिसप्तमी। 'अप पुनर्मृत्युं जयती'त्यारण्यकात्। अपमृत्युमिति योजना। श्रुत्यां निष्क्रान्तोभिमानादिति निरभिमानः। अक्लिष्टेति क्लिश तापे दि० आ० से० भावे क्तः। न क्लिष्टं तापरूपं कर्म यस्य। निरभिमानं कंसं वृथा न तापयेत्। तं नेति अतस्तं कंसं न हन्यात्। कंसवधः क्लिष्टकर्म स्यादितिभावः। अत इति साभिमानत्वात्। उपदिश्यमानमिति युक्तत्वकारकम्। 'नैव किञ्चित् करोमी'ति गीतातः,'नायं हन्ति न हन्यत' इति वा गीता। देवगुह्यत्वादिति देवस्य भगवतो गुह्यत्वात्। यथा राजगुह्ययोगाध्याये राजगुह्यं तथेदं देवगुह्यम्। गुह संवरणे भ्वा० उ० वेट् देवसंवरणीयत्वात् असुरावेशिनः कंसस्याज्ञातं सज् ज्ञानप्रतिबन्धकत्वेन फलितम्। मृत्युरूपस्याभावप्रतिबन्धकत्वार्थं न फलितं च। 'श्लाघनीये'त्यादिप्रशंसया तस्याभिमान एवोत्पन्नो येन ज्ञानरूपप्रतीकारानङ्गीकारोऽतोभिमानजनकत्वादिदं मरणनिवृत्त्यर्थमुपदिश्यमानं प्रत्युतापमरणनिवृत्तौ प्रतिबन्धकं जातम्। तथा च श्लोकानां प्राणरूपत्वेप्यस्यानधिकारित्वेन भगवताभिमानजननादपमरण-

१ अतद्गुणसंविज्ञानबहुव्रीहिः।

मिति सूचितम्। तर्हि वसुदेवो विपरीतं फलिष्यतीति ज्ञानात्मा कुत उक्तवानित्यत आहुः वसुदेव इति। भगवतेति तन्निष्ठवासुदेवेन प्रेरित इत्युपदिश्यमानतत्त्वेनानुमीयते। वसुदेवस्य वेदत्वाद् वासुदेवस्य प्रतिपाद्यत्वेन वसुदेवस्य ज्ञानत्वे विषयत्वेनेति ध्येयम्। तेनापीति कंसेनापि। 'दैवमप्यनृतं वक्ती'ति कंसवाक्यात् कंसस्यर्तवचनत्वज्ञानं दैवे आकाशवाण्यां यतः। अत इति हिताया आकाशवाण्या मिथ्यात्वापत्तेः। एतदिति स्त्रीहननम्। नवश्लोकार्थानाहुः महत इति। अन्त्ययोश्च श्लोकयोर्लौकिकत्वेन मध्यस्थितपड्भ्यो भेदसूचनायाहुः किञ्चेति। अष्टमस्यार्थः। यावदन्यस्मा इति मन्निष्ठेनेति मद्धृदयस्थेन वासुदेवेन। इदं निबन्धे स्फुटम्। नन्वस्याः पुत्रो मारयिष्यतीत्याकाशवाण्योक्तमतो नान्यस्मान् मरणमित्यत आहुः आकाशेति। मिथ्यात्वं तु देवकीद्रोहे सति तद्गर्भासम्भवाज् जातमेवेति। 'अमिथ्यात्वा'दिति पाठे स्पष्टम्। मन्निष्ठेत्युक्तस्य देवकीगर्भत्वं भावि। नवमश्लोकार्थमाहुः लोकस्वभावेति। लोकव्यवहारविरुद्धः। आद्यमिति पद्यम्। अन्त्याविति श्लोकौ। 'लौकिका' इतिपाठे आद्यमन्त्यौ च लौकिका इत्यर्थः। द्वन्द्वे परवल्लिङ्गात् पुंस्त्वम्। षडिति श्लोकाः। तन्मारणमिति स्त्रीमारणम्। 'भवान् भोजयशस्कर' इति व्याकुर्वन्ति स किञ्च भोजेति। यशआकारमाहुः भोजवंश इति। विसर्पिगुणो यशः शूरकर्मणः। अतः स्वकर्मकीर्तीति अतः यशोवत्त्वात्, स्वधर्मस्य कर्मणो वा कीर्तिर्यशस्तज्जनकत्वाद् भोजयशस्करत्वादित्यस्यार्थः। वध इति अयशस्करः। 'स कथ'मित्यस्यार्थमाहुः किञ्च एतादृश इति। 'स्त्रिय'मित्यस्यार्थं पुनरुक्त्यभावायाहुः किञ्च स्त्रीति। न पुनरिति भगिनीपदेन तथा। 'उद्वाहपर्वणी'त्यस्यार्थमाहुः किञ्च वध इति। विवाहोत्सव इति पर्वशब्दार्थोयम्। तेन 'पूषा ते ग्रन्थिं ग्रथ्ना'त्वित्यत्र नवाथ्यां 'ग्रन्थिः पर्वणि कौटिल्ये' इति, 'पर्व सन्धौ उत्सवे चे'ति च विश्वः। लौकिका इति एवं वा कर्तव्यमित्यर्थः। भेदमिति साक्षाद्धननम्।

१०–१–३८. मृत्युरित्यत्र नायं च प्रतीकार इति पूर्वभेदेनारभ्यत इत्याहुः किञ्चेति। 'किञ्चारम्भे च साकल्य' इति विश्वः। सहजेति मृत्योः सहजत्वात्। नापीति सहजत्वेपि मृत्योर्विलम्बार्थम्। अयं प्रतीकार इत्यर्थः। वाणीति वाणीवचनादेव नेयं हन्ति। अस्यापीति भागुरिमतेनाकारलोपः। 'वष्टिभागुरिरल्लोपमवाप्योरुपसर्गयो'रिति-वाक्यात्। अस्याः पि। इति न पुनर्विसर्गः। क्लिष्टत्वात्। वाणीशब्दे गर्भपदेन बाल्यावस्थोक्तेः तस्यामेवावस्थायां हनिष्यतीति सूचितमित्याशयेनाहुः शीघ्रमेवेति। अथेत्याकाशवाण्या भिन्नप्रक्रमे। कदाचित् कस्मिंश्चित् कंसलालनादिकाले बालः सार्धद्विवर्षः कुमारः पञ्चवर्षः अज्ञत्वात्। युवा ज्ञः। स्थविरः प्राज्ञः। मज्ञ एव प्राज्ञः। कंसं कदाचिद्धनिष्यति आकाशवाणीप्रामाण्यात्। तन्नित्येति अपमृत्युजनकं हननम्, नित्यमृत्युरग्निः, बृहदारण्यकात्,

तत्सम्बन्धि अत्यन्तविस्मृतिरूपमृत्योरनित्यत्वं औषधादिनाश्यत्वम्। अनेनेत्यादि गर्भावस्था बाल्यावस्थाऽतो बालेन अन्येनापमृत्युकारणेन। नायं प्रतीकार इति किन्तु प्राणश्लोकैर्मृत्य्वतिवहनं प्रतीकारः। 'सा वा एषा देवता दूर्नामा दूरँह्यस्याः मृत्युः दूरँह वा अस्मान्मृत्युर्भवति य एवं वेदे'ति श्रुतेः। तदाहेति तत् तस्मात् प्राणश्लोकमाहेत्यर्थः। जन्म उत्पत्तिरित्याशयेनाहुः उत्पन्नानामिति। इत्युपाख्यान इति बृहदारण्यकेऽस्ति। अत्र 'मृत्यु'र्नित्यमृत्युः। 'इदं' जगत्। 'यथाग्नेः क्षुद्रा विस्फुलिंगा व्युचरन्ती'ति मुण्डकश्रुतेराहुः भगवान् मृत्योरिति। मृत्युरत्र 'यथाग्ने'रितिश्रुत्युक्तोऽग्निः। लोकदृष्ट्याहुः तेषामन्तरिति। अशनयेति 'अशनाया हि मृत्यु'रित्यपि पाठस्तदर्थो वा। अशनाशब्दात्सोर्याद्। अशनयेति पक्षे प्रथमार्थे तृतीया। 'हि'र्निश्चये। मृत्युरिति अशनारूपो न नित्यः, तस्य सर्वतः सत्त्वात्। अशनारूपो मृत्युर्नित्यमृत्योर्देहः। 'यास्ते अग्ने घोरास्तनवः क्षुच पिपासा चे'त्यादिश्रुतेरारण्यके। नित्य इति नित्यधर्मस्य नित्यत्वनियमात्। भगवदैश्वर्यादिवत्। अब्देति अब्दं वर्षम्। सर्वेषामिति। 'शतायुर्वै पुरुष' इतिश्रुतेः। तदैवेति अब्दशतांतकाले। आकाशवाणीत्यादिनान्वयः।

१०-१-३९. देहे पञ्चत्वमित्यत्र इत्याहेति इति हेतोः समाधानमाह। कल्याणतरमिति बृहदारण्यके शारीरकब्राह्मणेऽस्ति। नित्यक्रीडास्थकलित्वात् कल्याणतरं राजत्वेपि। तथेति देहित्वेन। स्वप्नवत्। एवकारेण विद्यापूर्वप्रज्ञयोर्योगं व्यवच्छिनत्ति। तेनात्र वेदसारत्वं श्रीभागवतस्य। कर्मकाण्डार्थत्वात् कर्मणः। 'तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा चे'ति बृहदारण्यके वेदान्ते। कालविलम्ब इति न च गरुडपुराणे 'त्र्यहं वसति तोयेषु त्र्यहं वसति चाग्निषु, एकाहं वायुतो भूत्वे'त्येवं दशाहमृतस्थितिरुक्तेति तस्य विरोध इति शङ्क्यम्। तोयादीनामपि देहत्वात्, दिह उपचय इति धातुपाठात्।

१०-१-४०. व्रजमित्यत्र किञ्चेति पूर्ववत्। बुद्धीति तृणान्तरे बुद्धिप्रयत्नौ। तृणान्तरविषयिणी बुद्धिः प्रयत्नश्च। कर्मगतय इति 'तदेव सक्तस्सह कर्मणैति लिङ्गं मनो यत्र निषक्तमस्ये'तिश्रुतेः कर्मगतय एव बुद्धिप्रयत्नस्थानीया लिङ्गस्य ज्ञानकर्मेन्द्रियरूपत्वादित्यर्थः। कर्मणा गतिः प्राप्तिर्यस्य लिङ्गदेहस्य सविशेषकर्मगतिः। गतिर्ज्ञानेच्छे अनुमापयति। कर्मणा गतिः प्राप्तिर्येषां प्रयत्नज्ञानशब्दादीनामिति कर्मगतय इति सिद्धम्। 'तदेव' जीवस्वरूपं 'सत्' वस्तु कर्तृ 'त'च्छिङ्गं 'कर्मणा सहेति'। 'अथो खल्वाहु'रिति सकामप्रकरणस्य भिन्नप्रक्रमान्मात्र लिङ्गैक्यं निश्चितं सदुपयुज्यते, किन्तु सन्दिग्धम्। किञ्च विद्याकर्मपूर्वप्रज्ञारब्धं लिङ्गान्तरं वक्तुं शक्यते काममयपुरुषप्रकरणात् पूर्वप्रज्ञा विषयानुभवः। अतो लिङ्गस्य सत्त्वात् उत्पन्नत्वाद्वा लिङ्गं मनो मनःप्रधानत्वाल्लिंगस्येति व्याख्यानं टीकोक्तं न

१. उत्सतेः।

सङ्गतम्। अतस्तल्लिङ्गमेतीति सिद्धम्। कर्मगतिमिति गतिः फलम्। कर्मणा गतिः प्राप्तिर्यस्य लिङ्गदेहस्य सविशेषकर्मगतिः ताम्। तिर्यगादीति देहो लिङ्गादिः यथासम्भवम्।

१०-१-४१. स्वप्ने यथेत्यत्र सोपीति तृणजलौकादृष्टान्तेन स्वल्पप्रयासोपि। 'मम माता वन्ध्ये'ति वाक्यवद् बाधितार्थत्वं स्यात् तद्वारणाय शीघ्रमितिशब्दः। कदाचिदेवेति शुभसूचनकाले शुभाशुभयोः असाकल्ये एव न तु साकल्ये। 'असाकल्ये तु चिच्चने'त्यमरात्। स्वशिरोऽदर्शने शुभफलः स्वप्नः,स्वदर्शनेऽशुभफलः स्वप्न इति। अशुभं मरणम्। ईदृशमितीति 'त्यदादिषु दृशेरनालोचने कञ्चेति कञ्'। इममिवेमं पश्यन्ति जनाः सः अयं अयमिव दृश्यमानः इममिवात्मानं पश्यतीति विग्रहः। दृश्यत इति दृश्यमानः कर्म यगन्ताच्छानच्,अत्र दर्शनविषयो दृष्टान्तीयेदमोर्थः द्वितीये दृशेरनालोचनार्थत्वम्। दृष्टान्ते क्षीणशक्तेर्देशेरावृत्त्यनङ्गीकारात्। 'मनसः रथ' इत्यत्र मन इन्द्रियम्। तस्य सजातीयमिन्द्रियं न रथः। रथस्य रथ इतिप्रयोगाभावात्, किन्तु ज्ञानं, तदाहुः तत्तद्वस्तु भावनयेति। भावना स्मृतिः अनुभवस्य तिरोभावात्। तथा च श्वेताश्वतरश्रुतिः 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिण' इति। 'आत्माइन्द्रियमनोयुक्तं' आत्मा मनोयुक्तः, मन इन्द्रिययुक्तं,तदा 'भोक्ता'। नैयायिकानां आत्मा मनसा संयुज्यते, मन इन्द्रियेण,इन्द्रियमर्थेन, ततः प्रत्यक्षमितिप्रक्रिया। न च मनोरथशब्दो हीच्छायां योगरूढ इतिवाच्यम्,वेदान्तसारत्वात् प्राणश्लोके योगमात्रात्। न च ज्ञानानन्तरमिच्छापि मनोरथ इत्यत्र मनोरथपदेनेतीच्छाबोधोपि स्यादिति वाच्यम्। इच्छाशक्त्यधीनत्वाद् बोधस्येत्यदोषात्। मनोगतिस्तया। आभ्यां पूर्वप्रज्ञा विद्या चोक्ते। कर्माहुः कर्मणेति। 'तं विद्याकर्मणी समारभेते[1] पूर्वप्रज्ञा चे'ति शारीरब्राह्मणात्।'तं' देहम्। तथा च कर्मणा जनिता या मनोगतिस्तयेत्यन्वयः, स्वप्नो मनोरथहेतुको मनोरथस्तु कर्मणेति दृष्टान्तेपि तादृश इति। तादृशशब्दस्य व्युत्पत्तिरीदृशशब्दवत्। मनोरथेनापीति अपिशब्दस्य स्वप्न इत्यनेनान्वयः। अन्यदपीत्यपिशब्दार्थः। यद्वा यथास्थितमन्वयः। अपिशब्देन चिन्तादिना। तत्रेति स्वप्ने। मनोरथः पूर्वप्रज्ञास्थानीयः। यथा लोकेति यथा स्वप्नोपि दृश्यत इत्यर्थः। स्वप्नो वेदे, देहो वेदान्त इतिविवेकः। इषेत्वेति शाखां छिनत्ति। शाखा स्वशया। खे हृदयाकाशे शेते स्वपितीत्यर्थः। स्वपिति स्वप्नं करोति। 'तं विद्ये'तिश्रुतिः शारीरकब्राह्मणे, पूर्वप्रज्ञादृष्टश्रुताभ्यां मनसा तयोश्चिन्तनम्। तत्रेति स्वप्ने। स्वप्न इति प्रतिपद्यत इत्यनेनाप्यन्वेति। श्रुतिसूत्रविरोधपरिहारायाहुः तदुदित इति। यः स्वप्नः यदनन्तरः मनोरथानन्तरः स हि स्वप्नः तत् तस्मात् उदितः इति न्यायनिर्देशो लक्ष्ये। अत्र न्याये मृत्तन्त्वादिकारणानन्तरं घटपटादिरुदित इति प्रत्यक्षं मानम्। तथा च लोकान्तरगतिरूपदेहप्रकरणीयायाः 'तं विद्याकर्मणी समन्वारभेते' इति श्रुत्या न विरोधः,

[1] समारभेते।

एकत्र दृष्टः शास्त्रार्थोपरत्रापि तथेतिन्यायात्। सूत्रं तु 'विद्याकर्मणोरिति तु प्रकृतत्वा'दिति तृतीयाध्याये। तस्यापि न विरोधः। यद्वा श्रुतिरपि सूत्रविषयवाक्यरूपा। 'ये वै के चास्मा-ल्लोकात् प्रयान्ति चन्द्रमसमेव ते सर्वे गच्छन्ती'ति कौषीतकिश्रुतिः। अत्र व्यवस्था 'तं विद्याकर्मणी' इत्येनया। 'विद्यया देवयानं कर्मणा सोमभाव' इतिभाष्येण। न तावता तृतीयपममार्गबाधः। एवं विद्याकर्मभ्यां जन्यः स्वप्नस्तद्धेतुको मनोरथेन जन्यः स्वप्नो मनोरथहेतुक इत्यर्थः। तथा च यथेदं तथा देही प्राक्तनं वपुस्त्यजत इति पूर्वेणान्वयः।

१८–१–४२. यतो यत इत्यत्र किश्चेति किश्चेत्यस्यारम्भार्थासम्भवात् प्राणश्लोक-साकल्यमर्थः। अन्यदपि प्राणश्लोकसाकल्यमुच्यत इत्यर्थः। तदध्यासादिति अहं जात इति देहाध्यासाज् जायते। अतस्मिन् तद्वारोपोध्यासः। आत्मनि जातत्वरूपदेहधर्मारोपः। एवमहं मृत इत्यत्र मृतत्वाध्यासः। अस्मिन्निति कंसनिविष्टकालनेम्युपदेशरूपे। मन एवेति एवकार आत्मयोगं व्यवच्छिनत्ति। तस्य दैवी सम्पत् तद्विषयत्वात्। अधुना कंसस्या-सुरसम्पद्विषयत्वात्। नन्वासुरसिद्धान्ते मन एवेत्यत्र किं मानमिति चेन्न। 'मायेत्यसुरा' इति सिद्धान्ते। सर्वं मायेति तर्केणेति, 'मनोमात्रमिदं ज्ञात्वे'त्यत्र मायामये मनो जायत इत्युच्यते। 'माया मनः सृजती'ति सप्तमस्कन्धात्। 'न च तन्मनोकुरुते'ति बृहदारण्यकाद् वाक्यबाधः शङ्क्यः, तस्य दैवसिद्धान्तविषयत्वात्। तच्छब्देनाग्नेः घोरा तनुरूपाशनाया अपि वक्तुं शक्यत्वात्। निमित्तमात्रत्वमाश्रयस्य। 'नैवेह किंचनाग्र आसी'दिति बृहदारण्यक 'इहे'तिपदेनाश्रयोक्तेः। मतभेदेनाश्रयतन्वोः कारणतोपपत्तेः। तत्सिद्धान्ते 'असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् अपरस्परसम्भूतं किमन्यत् कामहेतुक'मितिवाक्यादाहुः तच्चेति। सङ्कल्पविकल्पेति 'कामः सङ्कल्पो विचिकित्से'तिश्रुतिर्दैवसिद्धान्ते। अन्यतरदिति अत्र बहूनां मध्य एकस्यातिशये विवक्षिते तमप् प्राप्तः तथापि महाभाष्ये एतेषु कतरो देवदत्तः कतरो यज्ञदत्त इति तमबुपाधिम् बहुत्वमनादृत्यैव तरब्योगादत्रापि भगवदिच्छाकारण-[illegible]ः कालकर्मणोः अन्यतरदित्येवं बहुत्वमनादृत्यैवमुक्तम्। मायाकार्यमनित्यं मनस्तू-त्कृष्टमेव गृह्णाति सदेत्याशङ्क्य मायाधर्मं मोहमाहुः मोहेनेति। 'पञ्च'स्वित्येव पाञ्चभौतिको देह इति। 'यतो यत' इत्यपादाननिरूपितं विश्लेषं विवृण्वन्ति स यं यमर्थं विहायेति। गुणेषु मध्ये यतो यतः यं यमर्थं विहाय धावति यं यं च आप, नाम यत्र यत्र लग्नं भवति, तत्र तत्रैव। असौ इति विप्रकृष्टो यः कोप्यात्मा देही। अत्र गुणपदेन गुणकार्यमुच्यते। मायारचितेष्विति विशेषणात् 'लक्षणां नैव वक्ष्यामी'ति कारिकायाः। तदेवेति यं यमाप तदेव प्रपद्यमानः तेनैव सह जायत इत्यन्वयः। अत्र तत्र तत्र तदेव प्रतिपद्यमानः तत्र तत्र लोकान्तरे तदेवेति। यत्र लोकान्तरे, यत्र लयं भवति तदेव। यच्छब्दद्वयं यत्र यत्रेति तच्छब्दत्रयं तत्र तत्र तदेवेति। अस्यैवार्थोहमिति मन्यमान इत्यध्यासः।

अध्यासमाहुः तेन सहेति । तेन देहेन । तथा च देहधर्मो जातत्वं न स्वस्य जीवस्य धर्मः। 'मनो यत्र निपक्तमस्मे'तिश्रुत्याहुः मनश्चेति। समा इति मनोभावनाविषयाः समाः विषयत्वेन । एवमपीति समत्वेपि । अस्मादिति परिदृश्यमानात् तत्र देहात् । उत्कृष्टमेवेति भोजानां कुलपांसवत्वज्ञानं तस्य वसुदेवेन ज्ञातम् ।

१०–१–४३. ज्योतिर्यथैवेत्यत्र एवमित्यादि पूर्वोक्तप्रकारेणात्मनो मनोनुसरणे ग्रहणपरित्यागहेतुत्वेन मनोहेतुद्वारा तत्कार्यदेहानुसरणात्तथा। अनुगतपदलभ्योर्थः। मोहादेवेति मोहो मायाधर्मः। एवकारोत्र'प्यात्ममायामृते राजन् परस्यानुभवात्मनः न घटेतार्थसम्बन्धः स्वप्नद्रष्टुरिवाञ्जसे'ति द्वितीयस्कन्धवाक्यात् इदं मायाधर्मेणार्थसम्बन्धं देहसम्बन्धमाह प्रतिबिम्बेति। अयं न्यायोग्रे वाच्यः। तथात्वं देहानुसरणमस्ति। उदकेति मध्यमपदलोपीसमासः। अन्तःकरणमिति तत्र कर्मवेगानुगत आत्मा प्रतिबिम्बमिव विभाव्यत इत्यर्थः। अन्तःकरणस्य मालिन्यात् प्रतिबिम्बासम्भवमालोच्याहुः उदकेष्विति। चांचल्येति दृष्टान्तदार्ष्टान्तिकसाधारणम्। मालिन्यं आसुरबोधनायोपात्तम्, मलिने प्रतिबिम्बासम्भवात्। अत एव सिद्धान्ते जीवो न प्रतिबिम्बः। प्रतिबिम्बः कार्येश्वरः। स्वाधारस्वभावानुविधायित्वे सति सम्मुखस्थितार्थानुविधायित्वं प्रतिबिम्बत्वम्। 'वेगो जवे प्रवाहे च महाकालफलेपि चे'ति विश्वात् समीरवेगा इत्यत्र वेगश्च वेगश्च वेगश्च वेगा इत्यत्र एको वेगो जवः चांचल्यम्। महाकालफलं मालिन्यम्। आदिपदेन प्रवाहः। अनुगतं अनु पश्चाद् गतम्। तत्सम्बन्धोनुगमनसम्बन्धः। अव इति 'अदसस्तु विप्रकृष्ट' इति कोशः। प्रदर्शित इति सूर्यादिः प्रदर्शितः, आदिशब्दस्य नपुंसकत्वाभावात्। स्वमोहेनेति आत्ममोहेन। स्वीयमायाधर्मेण। मायारचितत्वे तु तज्जन्यभोगोन्यस्यापि स्यात्। आत्ममोहस्य तु तदीयकर्मसाहित्यान्नान्यस्य तद्देहजन्यभोगः। अभिमतेष्विति स्वप्न इवाभिमतेष्वहंकारविषयेषु। भगवानित्यात्मा। रागेणेत्यनुरक्त्या। अनुगतः पश्चात् प्राप्तः, किं प्राप्त इत्यपेक्षायामाहुः तेन सहेति। देहेन सहैकत्वं प्राप्तः व्यतिरेकेणानुभवाभावात्। तथापि। प्रतिबिम्बेत्यादि प्रतिबिम्बन्यायेनान्तःकरणे प्रविष्टः, 'स मानसीन आत्मा जनाना'मितिश्रुतेः। विडम्बेनेति मुह वैचित्ये। दि० प० से० परोपि विशेषेण तदैक्येन मनोनिष्ठमोहानुकूलव्यापारवान् भवति। अनुभूतमिदम्। भ्रमादित्यध्यासात्। तद्वशाद्देहवशात्। अपकार इति दयापात्रभगिनीहननेनात्मनोपकारोऽधर्मसम्बन्धः। अधर्मसम्बन्धादात्मनो नरकपातः।

१०–१–४४. तस्मान्न कस्येत्यत्र तत्त्वमिति मध्यमिः पारमार्थिकं तत्त्वम्। अग्रे द्वाभ्यां लौकिकं तत्त्वं वक्तव्यमितिभावः। यदुक्तमिति गतश्लोके। 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीतिश्रुत्युक्तं भयमाहुः भेदात्मकमिति। भेदेन परनिष्ठेनात्मा

स्वरूपं यस्य भयस्य तत्तथोक्तम्। न त्वेकाकिकृतं भयं भवति। 'सो बिभेत्तस्मादेकाकी बिभेती'ति पुरुषविधब्राह्मणश्रुत्युक्तम्। कस्यचिदिति कस्यासकलमपि द्रोहम्। स इति देहः। तादृशः हननधर्मवान्। प्रकृतेस्वार्थस्योपयोगमाहुः अनेनेति। उक्तेन। आत्मनोपीति अपिना देहस्य। ननु अर्थी दोषं न पश्यतीति द्रोग्धाहं कथं क्षेमं विचारयिष्यामीत्यत आहुः सोपीति। द्रोग्धापि। मार्योन्मत्त इति देवक्याः सकाशाद्भयासम्भवात् स्वस्य च पतित्वेन देवक्यर्धत्वादहमपि मार्यस्तस्मादित्यर्थः। श्लोके परशब्देन शत्रुः यो मार्यते सः।

१०–१–४५. एषा तवेत्यत्र अष्टवार्षिकीति अनागतार्तवा, रजोदर्शनात् पूर्वं उद्वाहात्। अष्टवार्षिकीत्वं। 'गौरी तु नग्निकानागतार्तवे'त्यमरः। बाला तस्याः पर्यायः। अनेन वसुदेवोष्टवर्षः। 'त्रिंशद्वर्षोद्वहेत् कन्यां हृद्यां द्वादशवार्षिकीम्। अष्टवर्षोष्टवर्षां वे'ति मनुसरणात्। प्रदर्शनेनेति 'इदमस्तु प्रत्यक्षगे रूप'मितिवाक्यात्। अनाविष्टेति कालनेम्यनाविष्टरूपस्य। स हीति वसुदेवो हि तं कंसं *अनाविष्टं* कालनेमिनेति बोध्यम्। तेन शुद्धसत्त्वरूपज्ञानेन मायाकालनेम्युपमर्दो निरूपितः।

१०–१–४६. एवं स सामभिरित्यत्र एवमिति वैदिकलौकिकतत्त्वप्रकारेण। दयाभयादीति अव्यवहितोक्ताभ्यां श्लोकाभ्यां दयाभये। आदिना वैदिकतत्त्वज्ञानम्। भेदा इति साम नाम प्रियवचनादिभिः क्रोधोपशमनम्। तेन सहितैर्भेदैः पंचविधैः,तदुक्तं 'परस्परोपकाराणां दर्शनं गुणकीर्तनं, सम्बन्धस्य समाख्यानमायत्याः संप्रकाशनम्। वाचा पेशलया साधु तवाहमिति चार्पणम्। इति सामविधानज्ञैः साम पञ्चविधं स्मृत'मिति। प्रथमश्लोके सम्बन्धस्य समाख्यानं 'भोजयशस्करः' 'भगिनीं हन्या'दिति च। द्वितीयस्मिन् आयत्या मृत्योः समयस्य, आगामिकालस्य वा संप्रकाशनम्, 'अद्य वाब्दशतांते वे'ति। अग्रे वाचा पेशलयेत्यादिः षड्भिः श्लोकैः। नवमे परस्परोपकाराणां दर्शनम्। 'आत्मनः क्षेममन्विच्छन् न कस्यचिद् द्रोहमाचरे'दिति। दशमे श्लोके गुणकीर्तनम्।'तवानुजा बाले'ति बालत्वं गुणः, ईश्वरत्वज्ञापनात्। प्रथमश्लोके वा, यशस्कर इतिपदेन। तं चापि सङ्कलीकृत्याहुः आत्मानात्मेति। आत्मानात्मविवेकश्च परमार्थश्च लौकिकभयं च तैः रूप्यन्ते व्यवह्रियन्ते इति तथा। प्रथमे लौकिकम्, द्वितीयस्मिन् परमार्थः, तृतीयचतुर्थाभ्यां श्लोकाभ्यामात्मानात्मविवेकः, अनात्मा देहः, अग्रेप्यात्मानात्मविवेकः, *अन्त्याभ्यां लौकिकं* भयमिति। साम ज्ञानमिति साम सान्त्वप्रयोगे, बाहुलकात् कनिन्, ज्ञानं सामलक्षणमपि भगवत्प्रेरणया अनधिकारिबोधनात् प्राप्तम्। साम्यं दया चेति साम्यं ज्ञानत्वात् दया कृपा मायारूपा आसुरसिद्धान्तवक्तृत्वात्। 'माया दम्भे कृपायां चे'ति विश्वात्। भी तु 'न गतभीः प्रभावबि'दितिवाक्यात्। आविष्ट इति कालनेम्याविष्टः कंसः तथा नाम अनु-

व्रतत्वधर्मेणैव वर्तते। न तु दीनवत्सलत्वेन रूपेण।

१०–१–४७. निर्बन्धं तस्येत्यत्र विफल इति प्राणैः श्लोकैर्मृत्य्वतिवहनाभावात् तथा। देवक्या अपमृत्य्वतिक्रमः प्राणैः कृतः प्रतिबन्धकाभावात्। कंसस्यापमृत्य्वतिक्रमो नास्ति, मृत्यौ साभिमानत्वस्य प्रतिबन्धकत्वात्। अनधिकार्युपदेशे भगवदिच्छारूपं करणमाहुः भगवदिच्छयेति। प्रकारान्तरेणेति प्राणत्वप्रकारादन्येन प्रकारेण बाह्यप्रयत्नेन प्रकारेण वायुनिष्ठेन। यत्नमिति मृत्य्वपोहनार्थं वैखरीयत्नम्। अष्टभिरिति वैखरीरूपैर्न तु प्राणरूपैः। कंसापमृत्य्वपवहने तैः कृते पुत्रमृत्युसम्भवात्। कृपणामृत्य्वपोहनं त्वापाततः। भयादिना मृत्युसम्भवात्। अयमिति परिदृश्यमानोऽसुरो राजा वा। हरिप्रियाणां कलिरूपत्वेपि लौकिकत्वम्। 'जिघांसन्तं जिघांसीयान्न दोषो मनुरब्रवी'दितिस्मृत्या स्मार्तत्वम्। 'लोकवत् तु लीलाकैवल्य'मितिसूत्रात्। परमार्थेनेति भक्त्यभावेन कर्णरन्ध्रद्वारा प्रविष्टेन। उच्यत इति स्फूर्तेर्ज्ञानात्मिकाया विषयीभूतवक्ष्यमाणयुक्त्यविनाभावादिदंपदेन प्रत्यक्षत्वान् मुख्यतयोच्यते। सा चेति युक्तिः। तथा च पुत्रदानात्मिकयुक्तिविषया स्फूर्तिः प्रथमश्लोकार्थः। द्वितीयश्लोकार्थमाहुः तस्याश्चेति। युक्तिस्फूर्तेश्च। अयुक्तत्वमाशङ्क्येति स्वस्यानकदुन्दुभेर्लौकिकत्वापत्त्या स्वयमयुक्तत्वं आ समन्तात् तर्क्य। तर्कस्यान्यथाज्ञानत्वाद् युक्त्या वैदिकया युक्तत्वसमर्थनं वेदाविरोधादन्यथाज्ञानं नेत्येवं समर्थनम्। 'जीवाभयप्रदानस्य न कुर्वीरन् कलामपी'तिवाक्यमूलं वेदः। तस्याविरोधात् 'मृत्युर्बुद्धिमताऽपोह्य' इत्यन्यथाज्ञानम्, 'जातस्य हि ध्रुवो मृत्यु'रितिवाक्यात् तदपि नान्यथाज्ञानम्। ब्रह्मविदि वसुदेवेपराधाभावादपराधज्ञानमन्यथाज्ञानम्। 'एतं ह वाव न तपति किमहं साधु नाकरवं किमहं पापमकरव'मिति श्रुतेः। तृतीयश्लोकार्थमाहुः तत इति। 'मृत्युर्बुद्धिमतापोह्य' इत्यादिसुवेपु सिद्धमेव, तस्य कथनादनुवाद इत्याहुः अनुवाद इति। उत्तरार्धेनोपपत्तिः। उपपत्तिरेवोपपत्तिकः, उपपत्तिकेन सह वर्तमानः सोपपत्तिकः। चतुर्थस्यार्थमाहुः तस्यवेति। अनुवादस्यैव। न तु विचिंतनांतरम्। प्रतिकूलतर्कः पुत्रदानमयुक्तं आत्मत्वा'दात्मार्थे सकलं त्यजे'दिति वाक्यादित्येवम्। तस्य पराहतिः वाणीवाक्ये विपर्ययविचिन्तनेन। पंचमस्यार्थमाहुः अशक्तावदृष्टेति। षष्ठस्यार्थमाहुः तस्याप्युपायस्येति। तस्येत्यदृष्टस्य,कंसस्येति वा। साधनेति 'पूजयामासे'ति पूजनम्। सप्तमस्यार्थमाहुः तत उद्योग इति। वैखरीरूपः। 'अब्रवी'दितिपदात्। अष्टमस्यार्थमाहुः कथनं चेति। हितमिवानुवादकथनम्। पूर्ववदनङ्गीकारमाशङ्क्याहुः अलौकिकेति। अलौकिकस्य वक्ष्यमाणस्य स्फुरणात् तस्यालौकिकस्योपायस्य कंसेनाङ्गीकारः। यद्यप्ययं लौकिकः नालौकिकेन परमार्थेन निवर्तते, तथापि युक्त्या युक्तत्वसमर्थितकस्य(१)लौकिकस्यालौकिकत्वा-

१. वासुदेवाविर्भाववति।

ङ्गीकारात्। यद्वा कंसे वसुदेवेन स्वदेवता समारोपितेति भगवत्यलौकिकस्फूर्तेस्तादृशस्य भक्तिविरुद्धस्य कंसस्याप्युपायस्याङ्गीकार इत्यर्थः। आपातत इति अविचारतः देवक्या अपि भयादिना मृत्युसम्भवात्। सफल इति मृत्युनिवारणफलेन सह वर्तमानः सफलः। अवश्यक्रियेति क्रिया हननम्। तदनुकूलं व्यापारम्। यत्नस्य व्यापाररूपत्वात्। तच्चेष्टयेति कंसस्य खड्गपाणेश्चेष्टा उद्यमननिपतनादिरूपा करणम्। अतस्तृतीया। नन्ववश्यक्रियासाधकयत्नो नैयायिकमते, वैयाकरणमते व्यापारो यत्नः, अतश्चेष्टयेत्यधिकमिति चेन्न। भगवदधिष्ठानत्वेन सर्वाधारत्वाज्जन्यजनकभावसम्बन्धश्चेष्टाव्यापारयोः। तच्चेष्टयावश्यक्रियासाधकयत्नं ज्ञात्वेत्यर्थः। अन्वपद्यतेति प्राप्तवानित्यर्थः। ये गत्यर्थास्ते प्राप्त्यर्था इति। अनेनेति बलवता कंसेन। दृष्टप्रकारेणेति एकत्वमविवक्षितम्। शस्त्रैरस्त्रैश्च। अलौकिकप्रकारः प्राणश्लोकोक्तस्तेन। अन्य इति लौकिका अलौकिकाः च भगवत्प्रेरणया निवर्तिताः। अतः परमिति लौकिकालौकिकोपायेभ्यः परमन्यत्। सामानन्तरं दानरूपं द्वयम्। एवेति स्वगृहे स्थापनयोगव्यवच्छेदक एवकारः। न तु स्वगृहे स्थापयिष्यति। देवद्वारेति यथा सूर्यादिद्वारा कुन्त्याः पुत्रवतीत्वं, तथा। दोष इति क्षात्रधर्मत्यागरूपः। स पुत्र इति अष्टमपुत्रः। आनकदुन्दुभयश्चेति चकारेण शब्दात्मकास्ते। सङ्कट इति सामानन्तरं दानसङ्कटे। उभयोर्दानयोरयुक्तत्वरूपे। आनकदुन्दुभिरिति शब्दसृष्टिरतः स नाम। 'शब्द इति चेन्नातः प्रभवा'दिति व्याससूत्रात्। अयुक्तमिति पुत्रदानम्। अन्वपद्यतेति राजत्वात् सामानु अपद्यतेत्यस्यार्थः। अकस्मादिति कारणं विना। समागतमिति गत्यर्थात् कर्तरि क्तः भूतकाले अतोपद्यतेत्यस्य विवरणमिदम्।

१०–१–४८. मृत्युर्बुद्धिमतेत्यत्र इत्यादीति 'प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वर'मितिन्यायेन। इदानीमित्युपायानङ्गीकारकाले। कथमिति केन प्रकारेण। वसुदेवस्य तूष्णीम्भावो नेति प्रश्नः। पश्चादिभ्यो विशिष्टत्वेनोत्पादितत्वप्रकारेण न तूष्णीम्भाव इत्युत्तरमग्रे। मृत्युः पङ्कस्थानीयः तस्य प्रक्षालनं दूरीकरणं तदपेक्षया दूरान्मृत्योरस्पर्शनं स्पर्शः देवकीविसरणप्रतीकारः तस्यास्तोपप्रतीकारो वा तस्याभावः वरमितिन्यायसमन्वयः। कालान्तरे देवक्यादिमृत्युरनुसन्धेया। तदेति स्वरार्थं तदापीत्यर्थः। नास्तीति अन्यथा तु तदा उपेक्षालक्षणोपराधः स्यादेव। कालादिदण्डमिति सामदानाभ्यां दण्डानुसन्धानान्नाकस्मिकत्वम्। नापराधः कर्तव्य इति किन्तु मृत्युप्रतीकारः कर्तव्यः।

१०–१–४९. प्रत्यर्प्येत्यत्र शास्त्रमिति पूर्वमीमांसाशास्त्रम्। अयमिति बुद्धिस्थो वक्ष्यमाणः। 'प्रतिरत्र प्रतिनिधिप्रतिदानयो'रिति पाणिनिसूत्रात् प्रतिदान इत्याशयेन प्रत्यर्पणं विवृण्वन्ति स मृत्युरयमित्यारभ्य न कोपि दोष इत्यन्तेन। कंसे निविष्ट

१. अग्निः।

इति अत्यन्तविसरणरूपः देवकीमारणरूपनिषिद्धकर्मणा स जन्यते। कंसो मृत्युरित्यपव्याख्यानमित्यादिनात्रैव स्वयं वक्ष्यते। भक्ष्या इति गीतैकादशाध्याये 'केचिद् विलग्ना दशनान्तरे'ष्वित्याद्युक्त्वा 'कालोसि लोकक्षयकृत् प्रवृद्ध' इत्युक्तेः। अप्रतीकार्यश्चेति औषधादिनापमृत्योरेव प्रतीकारात्। स त्विति मृत्युस्तु। स मृत्युः। दोष इति भगवदधिष्ठाने वसुदेवे कथं पुत्रदानदोष इति दोषप्रश्नसम्भवात्। इयमिति देवकी। एतदपीति पुत्रदानेनास्या मोचनम्। बहव इति एकापेक्षया बहूनामनुग्रहो न्याय इति एतदनुचितम्। बालका इति बालकत्वस्यानुचितत्वप्रयोजकत्वं, 'सुप्ता'नित्येतावतैव कर्माकाङ्क्षानिवृत्तेर्बालकानित्यस्य वैयर्थ्यापातात्। 'सुप्तानवधीन् निशि बालका'नित्यत्र प्रथमस्कन्धे। न च विशेष्यं 'बालका'निति। 'माता सुतानां निधनं शिशूना' मित्यत्रैव सुतानां विशेष्यत्वात्। स्वस्यान्तरङ्गा इति आत्मनोंशाः। पत्नी तु अर्धाङ्गी बहिरङ्गा। दोषाधिक्यमिति बहुत्वात् मित्रत्वाच्च। इदानीं पुत्राणामभावादित्ययं हेतुर्देहलीप्रदीपन्यायेनोभयान्वयी। विद्यमानाविद्यमानयोरिति स्त्रीपुत्रयोः। सिद्धवदिति विद्यमानवत्कारेण। करणं कारः तेन। विषयेति देयादेयरूपप्रत्यर्पणविषयविभागः। धर्महानीति क्षात्रधर्महानिप्रसङ्गात्। अयमिति पुत्रदानलक्षणः। नरकेति बालवधान् न श्राद्धादिकर्तृत्वमिति वसुदेवस्य ज्ञानत्वाज् ज्ञानम्। 'यदी'त्यस्यार्थमाहुः पुत्रोत्पादनं त्वित्यारभ्य लौकिक्युपपत्तिरित्यन्तेन। भिन्नतयेति तत्पितृगृहे। एवकारेणैक्ययोगव्यवच्छेदः क्रियते। अनेन सामदानदण्डानन्तरं भेद उक्तः। भेदनम्। भिदिर विदारणे। घञ्, शत्रोरमात्यादीनामुपायेन परतो विश्लिष्यात्मसात्करणं भेदः। अयं भिन्नतया स्थापने भवति तस्याः। न कोपीति पुत्रोत्पादनं स्वाधीनमिति न बहवः पुत्रा उत्पादनीया मयेति न प्रथमदोषः। 'बालका' इत्युक्तदोषोपि न स्यात् तत एव। स्वस्यान्तरङ्गा इत्यपि दोषो न। तथा दोषाधिक्यं दोषो न तत एव। 'अर्पणं च न सम्भवती'त्युक्तदोषोपि न पुत्राणामाहार्यज्ञानविषयबाधकालीनमिच्छाजन्यज्ञानमाहार्यज्ञानम्। अत एव न 'विद्यमानाविद्यमानयो'रित्याद्युक्तदोषः। धर्महानिदोषोपि न, भेदस्य क्षात्रधर्मत्वात्। तत एव लोकापकीर्तिरूपदोषाभाव इत्यर्थः। वसुदेवस्याधिष्ठानत्वादन्यमपि दोषाभावमाहुः प्राणरक्षाया इति। ऋतुकालेति 'ऋतौ भार्यामुपेया'दितिश्रुत्या विहितं ऋतुकालगमनं, तदपेक्षया। अधिकेति 'जीवाभयप्रदानस्य न कुर्वीरन् कलामपी'ति वाक्यात्। 'न हिंस्यात् सर्वा भूतानी'तिश्रुतेश्च। एतदपीति भिन्नतया स्थापनम्। चोदनयेति उक्तश्रुत्युक्तया चोदनया। नैक इति एकः पुत्रः पुत्रो नेत्यत्र। पुत्रे पुत्रत्वावच्छिन्नप्रतियोगिकाभावो नेति समासेन एकपुत्रे पुत्रत्वावच्छिन्नप्रतियोगिताकाभावो ज्ञेयः। एकपुत्रे समासशक्त्यैकपुत्रत्वे सति पुत्रत्वाभावात्। न दोष इति 'एकं द्वौ वा पुत्रमुत्पादये'दितिशास्त्रे मानवे नवमाध्याये 'एकमुत्पादयेत् पुत्रं न द्वितीयं कथञ्चन द्वितीयमेके प्रजनं मन्यन्ते

तेपु तद्विद' इत्यस्ति। भगवन्मते तु 'पुत्रे कृष्णप्रिये रति'रित्युक्तम्। तथेति तथा अलौकिकीति छेदः। आकाशवाणीति 'अस्यास्त्वामष्टमो गर्भ' इत्याकाशवाणीप्रामाण्यात्। बहव एवेति न त्वेको द्वौ वा जायेते। अलौकिकीमुपपत्तिमाहुः तेपीति। उपपत्तिर्न्यायः,सा च लौकिकी एकं द्वौ चोत्पाद्य न कोपि दोष इत्युक्तदोषाभावसम्पादिकोक्ता। अलौकिक्या तु नैको नापि द्वौ पुत्रौ प्राप्तौ किन्तु बहव एव सुताः प्राप्ताः। अतः इयमेका पुत्राश्च बहव इत्याद्युक्तदोषास्तदवस्थाः तदभावाय। तेपि एकः द्वौ वा भवतः। मृत्युं सन्निवेश्य तावता बहुकालेनोत्पादनीयाः। आकाशवाण्यां कालस्याश्रुतत्वात्। अनयोपपत्त्याऽलौकिक्यापि न कोपि दोषो भवेदित्यर्थः। कामान् नोदनयापि वा बहुकालेनोत्पादने भगवदिच्छा न चेत् तदाप्युपपत्तिमाहुः कालेपीति। बहुकालविरुद्धे स्वल्पादिकाले पुत्रोत्पादने भगवदिच्छा चेत् तदा पुनर्दोषापत्तिरित्यर्थः। अस्मिन् पक्षेपि दोषाभावमाहुः तदा पुत्रेति। अन्यद्वारा पुत्ररक्षा देवक्या तु पुत्रसंरक्षा। सा चाकाशवाण्यां 'अस्यास्त्वामष्टम' इत्युक्त्याष्टमत्वस्यापेक्षा-बुद्धिजन्यत्वादपेक्षिता। न चापेक्षाबुद्धिराहार्यज्ञानविषयविषयिणीति शङ्क्यम्। आकाशवाण्यां कंसः पुत्रान् मारयिष्यतीत्यश्रुतत्वात्। तस्याः संरक्षयित्र्या देवक्याः मृत्युमारणं कर्तव्यम्। न पुत्राणां बहूनामिति 'इयमेका पुत्राश्च बहव' इत्याद्युक्तदोषाभावः। भगवदिच्छया पुत्राणां किमप्यस्त्विति हृदयात्, अत्रोपपत्तिः शास्त्रयोजनम्। 'युक्तिर्न्याये च योजन' इति विश्वात्। मृत्युरेवेति देवक्या मृत्युरेवेत्यर्थः। देवक्या 'मृत्युर्वा म्रियेत चे'दित्यस्य 'अत्यर्प्य मृत्यवे पुत्रान् मोचये कृपणामिमा'मिति सम्बन्धो यद्यपि भासते तथापि पूर्वार्धोत्तरार्धयोर्वैपरीत्या-पत्त्या वक्ष्यमाण एव सम्बन्धः। तदा पुत्रसंरक्षार्थं 'मृत्युरेव म्रियेते'त्यत्र 'तदे'ति 'म्रियेते'-त्यनेन सम्बध्यते, तदुपपादयन्ति स्म। किञ्च देवक्या मृत्युमारणेऽलौकिकीमुपपत्तिमाहुः प्राणिमात्र इति। तत्त एवैनमिति तत्र एव एनं मृत्युम्। एनादेशः। अवयजते प्रति-कुरुते। धातूनामनेकार्थत्वाद् बाहुलकाच। इमे कल्पने वसुदेवस्याधिष्ठानस्य प्रतीकारे प्रवृत्त-त्वात्। तस्मादिति मृत्योर्जन्मश्रवणात्। अन्यस्येति सुतमृत्योः। यद्वा द्वितीयदेवकीमृत्योः। एको मृत्युरिति एक एव सर्वमारक इत्यर्थः। बृहदारण्यके 'मृत्युनैवेदमावृतमासी'दित्य-त्रैकत्वविवक्षणात्। नियतकाल इति एकवारं तस्याः कालः 'शतायुर्वै पुरुष' इति 'सञ्जीव शरदः शत'मिति चोक्तः। सा मृत्युस्तदैव शतवर्षानन्तरमायाति, अपमृत्यवोन्याः। तदा चेन् निवृत्ता पुनरपमृत्य्वादिकारणकालाभावान्नायातीत्यर्थः। इदानीमित्यस्य स्वसहकारिणि कालोपाधौ। तं प्रतीति म्रियमाणं प्रतीत्यर्थः। म्रियेतैवेति निवर्तेतैव। अतः शब्द-नित्यत्वेति अत इति सार्वविभक्तिकस्तसिल्। 'आकाशः सम्भूत' इत्यादिवाक्यैः 'सविशेषणे ही'तिन्यायेन शब्दनित्यत्वमेव निवर्तते, न त्वाकाशनित्यत्वं निवर्तते। इदं 'आकाशवत् सर्वगतश्च नित्य' इति गीतायां आकाशवत् सर्वगतत्वमात्रं न तु नित्यत्वमप्याकाशवदिति

व्याख्यानं न तदा बोध्यम्। तद्वदस्या मृत्युरेव गच्छेत्। कंसहननक्रियया विशेषणीभूतो मृत्युरेव गच्छेत् न त्वियं देवकी विशेष्यभूता गच्छेन् मृत्युलोके। यद्वा व्याकरणशास्त्रतः सिद्धमपि शब्दनित्यत्वं यथाभिव्यञ्जकस्य वायोर्नाशाच्छब्दाश्रवणे गतमिव भवति, एवं मृत्युरपि नियताभिव्यञ्जकस्य सहकारिणः कालोपाधेरभावाद् गच्छेदेवेत्यर्थः। म्रियेतेत्यस्य बाहुलकादर्थो निवर्तेतेति कृतः अतो मुख्यार्थं वक्तुमाहुः नन्वेकमृत्स्थितिरिति। लोकाल्लोकादिति लोकात् मृत्युलोकात् लोकाज्जनात्। मृत्युलोकं प्राप्य यो जनस्तस्मादेव मृत्युं अवयजते प्रतिकुरुते। नैनं मृत्युं स्वलोके मृत्युः एकदेशीभूतः विन्दति लभते इत्यर्थः। विद्लृ लाभे। तुदा० आ० अनि०। नियतत्वादिति अस्या मृत्युः कालकारणादस्या एवेति नियतः तस्य भावो नियतत्वं तस्मात्। सुतान् न मारयिष्यत्यतः सुतसमर्पणे न बाधकमित्यर्थः। श्रीधरस्य व्याख्यानमपवदन्ति स कंसो मृत्युरिति। स इति कंसः। ननु तर्हि कंसमृत्युप्रसङ्गः। मैवम्। कंसोप्यष्टमगर्भजन्मपर्यन्तं न मरिष्यत्याकाशवाणीप्रामाण्यादिति। अत्र वाणीप्रामाण्येन मरणाभावनिश्चयाद् यथाकथञ्चित् प्रतीकारार्थं नाना पक्षा उक्ताः। अतो न तथासाधिका युक्तयो विशेषतोऽपेक्ष्यन्त इति बोध्यम्। श्रौतेर्थे कंसमरणापत्त्या लक्षणेति चेत् तत्राहुः लक्षणयेति। शक्यसम्बन्धो लक्षणाधाराधेयभावस्तया। तत्परः मृत्युशब्दः कंसपरः। सिद्ध इति मृत्युमरणे पुनरुन्मज्जनापत्तिः। अतोऽमरणे सिद्धे। अनुवाद इति न म्रियेतेत्यनुवादः। ननु 'भयात् कंस' इति वाक्यान् मृत्युभ्रातृमति कंसे भगिन्या मृत्योः स्थितिरुचिता, सा च 'इत्युक्तः सखलः पाप' इत्यत्र पापशब्दवन् मृत्युशब्दोपि लक्षणया श्रुत्यविरोधेन कंसपरो भवत्वित्याशङ्क्याभ्युपगममाहुः अस्तु वा तथेति। श्रुत्यविरुद्धा लक्षणा, 'लक्षणां नैव वक्ष्यामी'त्यस्य न विषय इति ज्ञापितम्। आश्चर्यरसत्वाद् वा न लक्षणेत्यपि बोध्यम्। कंसमरणापत्तिं वारयन्ति स सोप्याकाशेति। कंसोपि। अपिना मातृचरणाः। बालको वा न मरिष्यत्येव। अत्यन्तायोगव्यवच्छेदकैवकारः। नीलं सरोजं भवत्येवेतिवत्। तथापीति मरणाभावेपि सुतान् पुत्रान् वा नरकपालकानपि। दास्यामीति प्रत्यर्प्येत्यस्य विपरिणामं कृत्वा दास्यामि प्रत्यर्पयिष्यामि मृत्यव इतिसम्बन्ध इत्यर्थः। यावत्कालं त्वं कंसभयात् प्राप्तः सुतान् न मारयिष्यसत उत्तमर्णाय तुभ्यं सुतप्रतिदानम्। अग्रे सुतान् मारयिष्यतीति यावत्कालं मारणाभावः प्रतिदाने हेतुः।

१०–१–५०, विपर्यय इत्यत्र ननु कथमिति ननु कियत्कालं मृत्युः सुतान् न मारयिष्यतीति मृत्यवे प्रत्यर्पणं प्रोक्तं तथा कियत्कालं मह्यं सुता दत्ता इति तथापि षड् भगवद्धर्मा इति केन प्रकारेणायुक्तं मारणार्थं दानं कर्तुं शक्यत इत्यर्थः। तस्येति कंसस्य। तदा तत एवेति वाणीप्रामाण्यादेव विपर्ययः मत्पुत्रादेवास्य मारणमिति। नन्वाकाशवाण्यष्टमगर्भान् मरणे प्रमाणं न तु षड्धर्मैर्मारणे प्रमाणमित्याशङ्क्याहुः एवेति। न

तु धर्मेणामारणं वीर्यकार्यत्वात्। मत्पुत्रादेवेति वीर्यरूपात्। धर्मिणो कारकत्वात् धर्मियोगव्यवच्छेदकैवकारः। तथा च यतो गणने वीर्यस्याष्टमत्वं सोवधिः। अस्य कंसस्य। युक्तिबाधितमिति मारणे कर्तृत्वेन बालयोजनेन बाधितम्। पञ्चविधं कर्म गतावन्तर्भूवमित्याशयेनाहुः उत्पत्तिस्थितीत्यादि। एतेषु दशगण्युक्तक्रियारूपकर्मसमावेशः। दुःखेनेति दुर् दुःखेनाति अतिक्रमितुं मनसाप्याकलयितुमशक्यरचनस्य प्रपञ्चस्य ज्ञानमतिक्रमः इत्याशयेन ज्ञातुमिति विवरणं ज्ञातुं अशक्यत्वात्, दुरत्यया। दुरत्यशक्या। मूलबलाद्व्याख्यानं सामान्यक्रियापरं विशेषक्रियया नीञ् प्रापणे नञ् अदर्शने वा तद्रूपया शक्लृ शक्तौ तद्रूपया च बाध्यत इतीण् गतावित्यस्या य इत्यस्याशक्यक्रियार्थत्वम्। यद्वा। भावाभावरूपक्रिया व्याख्यानं व्याख्येयमपि सैवेति न सामान्यविशेषभावः। पश्चादिति रंगभूमिगमने। एते च ते पुत्रा एतत्पुत्राः तैः एतस्याः पुत्रैरिति वा अयं कंसः वध्यः। कंसवधे यथायोग्यं ऐश्वर्यादिषड्धर्माणां करणत्वं बोध्यम्। एतदेवेति पुत्रदानमेव। वसुदेवस्य ज्ञानत्वादेवकारः। 'ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेर्जुने'ति वाक्यादिदं ज्ञानमक्लिष्टकर्मा भगवान् तद्विषयकम्। वसुदेवरूपम्। एवं कृते इत्यादि कंसवधार्थं निमन्त्रणे कृतेत्यन्तविस्मृतिरूपो मृत्युर्निवर्तेत देवक्या आगतस्मृतिरूपप्रतियोगित्वात् घट आगते घटाभावनिवृत्तिवत्। निवृत्तोपीति 'क्रोधस्यान्तं फलोदया'दिति सप्तमस्कन्धात्। क्रोधे गते वधान् निवृत्तोपि कंस इत्यर्थः। यद्वा निवृत्त इति मृत्युविशेषणम्। मृत्युरिति कंसमृत्युः। एतत्संरक्षायामिति देवकीसंरक्षायां कृतायां तत्पुत्रद्वारा पुनरित्यर्थः। 'न न्यूनादन्यपूरण'मिति कारिकया न्यूनपूरणमाहुः तस्मादिति। उक्तव्याख्यानस्य निर्दुष्टत्वात्। एवेति इतरव्याख्यानयोगव्यवच्छेदकः। एवमिति पूर्वोक्तसुतदानेनेत्यर्थः। मन्त्रणेनेति मन्त्रि सुप्तभाषणे। वसुदेवस्य सत्यकत्वात् मन्त्रणं कंससहितम्। आज्ञया कृतत्वात्। केचिदिति श्रीधर्या श्रीधरस्वामिनः। एतस्य विचारस्य कंसमारणतात्पर्यकत्वे श्रीवसुदेवस्यापि दुराशयत्वं शङ्क्येतेत्यरुच्या। तस्मात् कंसवधार्थमेव एवं संरक्ष्येति शेषपूरणं विनार्थमाहुः एतस्याप्यनङ्गीकार इति। एतस्य यत्नस्येत्यर्थः। निवृत्त इति उपस्थितो मृत्युर्निवृत्तः। पूर्वेणैवेति मण्डूकप्लुत्याऽऽवृत्य पूर्वपूर्वेण पादेन। एवकारः शेषपूरणयोगव्यवच्छेदकः। तेन शेषपूरणापेक्षयाऽऽवृत्तिर्जायसीत्युक्तम्।

१०–१–५१. अग्नेर्यथेत्यत्र अनुचितमिति लोकविरुद्धमनुचितमिति सम्बन्धः। हेतुगर्भं विशेषणम्। उचितमिति पाठे उक्तमुचितम्। पुत्रदाने लोकविरोधस्तु नवमस्कन्धे हरिश्चन्द्रो वरुणमाराध्य तत एव रोहितं पुत्रं प्राप्य स्वपुत्रेण वरुणं नेजे। जातोदरो जातस्ततो 'मुक्तोदरो यजदेवान् वरुणादीन् महत्कथ' इति पुत्रदानात्। अत्र दुःखं विनादानात् बोध्यः। अदृष्टं धर्माधर्मौ। हरिणदर्शने इति सतिसप्तमी। तदानीमपि पार्श्ववर्तिनमात्मज-

मिवानुशोचन्तमभिवीक्ष्यमाणो मृग एवाभिनिवेशितमना विसृज्य लोकमिममिति वाक्याद्धरिणदर्शनसमानाधिकरणं मरणं तद्विषयः। लोकं देहम्। हरिणशरीरेति निमित्तमिति योजना। कालञ्जर इति पर्वते, शालग्रामपुलस्त्यपुलहाश्रमं 'कालञ्जरात् प्रत्याजगामे'तिवाक्यात्। शालवृक्षोपलक्षितं ग्रामम्। दृष्टं सम्भवतीति मनोनिषेकरूपं दृष्टम्। 'मनो यत्र निषक्तमस्ये'तिश्रुतेः। शरीरसंयोगवियोगयोस्त्वदृष्टमेव। जन्तुश्चेत्यादि जायत इति जन्तुः कर्तृप्रयोगः। प्रत्ययः। जनी प्रादुर्भावे धातुः जीवतीति जीव प्राणधारणे धातुः पचाद्यच्। सर्वत्रेति कर्मभूमिषु। जायमान इति जनी प्रादुर्भावे। दि० आ० से० कर्तरि शानच्। ज्ञाजनोर्जाशिति। तत्रेति कर्मभूमिषु। दृष्टस्य मनसः शरीराकृतिविशेषयोर्योगे निमित्तस्य। बाधितत्वात्। कल्पनाया इत्यादि योगे हेतुर्मनः वियोगेपीति कल्पनाया अशक्यत्वात्। प्रारब्धकर्मनिर्वाणवियोगे प्रारब्धकर्मनाशस्य हेतुत्वेन तथा। दुर्विभाव्य इति शरीरे विद्याकर्मपूर्वप्रज्ञाः हेतवः। 'तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा चे'ति श्रुतेः। शरीरसंयोगे मनो हेतुः 'मनो यत्र निषक्तमस्ये'ति श्रुतेः। शरीरसंयोगवियोगयोर्हेतुर्दुर्विभाव्य इत्यर्थः। ननु प्रत्येकं हेतवः समुदायेपीति चेन् न, समासे भिन्नशक्तेरेकार्थीभावात्। न च हेतूनामेकार्थीभावं कृत्वा हेतुः सुविभाव्य इति वाच्यम्। व्यपेक्षालक्षणसामर्थ्याभावात् प्रत्येकं हेतुज्ञानस्य दुर्विभाव्यत्वात्। पश्चादिति सुतदानात् पश्चात्। सुतानां मरणममरणं वा किमप्यस्त्वित्यर्थः।

१०–१–५२. एवं विमृश्येत्यत्र पूर्वश्लोके परमार्थे लोकविरोधः परिहृतः। एवं परमार्थे ह्युपागते देवकी ब्रह्मविद्यैव रक्षणीयेति वेदरूपवसुदेवनिर्धाराज् ज्ञापयन्ति स इयं त्विति। तस्य सिद्धिरित्यादि देवकीमोचनस्य सिद्धिः प्राकाश्यरूपा दुर्घटेति हेतोस्तस्य कंसस्य सिद्धिदुर्घटत्वसाधकानि दिग्विजयित्वपापत्वदृष्टादृष्टभेदेन तावदुपायकरणविषयत्वानि दूषणानि वदन्, प्रयत्ने कृते आधिक्यं भगवत्पूजनरूपं कृतवान्। बलवत्तरविघ्ननिवारणे प्रचुरतरमङ्गलस्य कारणत्वात्। विद्ययाऽऽसुराविद्योपमर्दात्। कंसोङ्गीकरिष्यतीति। 'सुहृद्वधान् निववृते कंसस्तद्वाक्यसारवि'दितिवाक्यात्। भावादिरिति स्वपूज्ये कंसे भेदबुद्धिवारणाय। वासुदेवाधिष्ठानत्वेनैक्यम्। बृहदारण्यके [1] 'पूज्ये भेदबुद्धिवारणात्। अनेन 'विद्यात्मनि भिदाबाध' इतिवाक्यात् भेदाभावरूपमद्वैतं विद्या रक्षिता। देवकी ब्रह्मविद्यात्रैव निविष्टा। आदिनान्तर्यामिज्ञानवाङ्मनांसि। न प्राणः देहरक्षाभावप्रसंगात्। ततः कार्यमिति बृहदारण्यके ततो भावादेः कार्यसिद्धिरुक्ता। सप्तान्नब्राह्मणे 'विज्ञातं विजिज्ञास्यमविज्ञातमेत एव यत्किञ्च विज्ञातं वाचस्तद्रूपं वाग्धि विज्ञाता वागेवेनं तद्भूत्वावति।' यत्किञ्च

१. समारभेते। २ अत्र ग्रन्थकर्त्राविवयं न लिखित तत् तु 'अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुः' बृ० १–४–१० इत्यस्माकं प्रतिभाति।

विजिज्ञास्यं मनसस्तद्रूपं मनो हि विजिज्ञास्यं मन एनं तद्भूत्वावति । यत्किञ्चाविज्ञातम् । प्राणस्य तद्रूपं प्राणो ह्यविज्ञातः प्राण एनं तद्भूत्वावती'ति श्रुतेः। विज्ञातं विजिज्ञास्यं अविज्ञातं च विजिज्ञास्यम् । एत एवेति वाङ्मनःप्राणा एव। वाग्विज्ञाता तावत् विज्ञातं वाचस्तद्रूपम्। एवं वाग्विभूतिविदः फलमाह वागेनमिति । वाक् आ एनं वाग्विदं वाक् तद्भूत्वा विज्ञातस्वरूपं भूत्वावति पालयति विज्ञातस्वरूपेणैवान्नत्वमापद्यत इतियावत्। अग्रेप्येवम्। दृष्टादृष्टेति पूर्वश्रुत्युक्तज्ञाताज्ञातभेदेन। युक्तमिति देवक्या भगवदीयात्वादुपेक्षा नोचिता । मत्वेति उक्तबृहदारण्यकान्मत्वा। दृष्टोपायमाहुः 'न चास्यास्त' इत्यनेन वा वक्ष्यन्तीत्यदृष्टोपायमेवायम्। एवं करणे इति ज्ञानप्राप्तौ प्राकाश्यरूपसिद्धिप्राप्तौ। पितेति पितृनाम्ना तु मुख्यत्वमिति मुख्यत्वात् शूरत्वाच्च। अत इञ्।

१०–१–५३. प्रसार्येत्यत्र दुष्टत्वादिति नृशंसत्वनिरपत्रपत्वाभ्यां दुष्टत्वात्। संदेहात् दूयमानेनेति न तु भयात् दूयमानेन,'गतभीः प्रभाववि'दिति वाक्यात्। वदन्निवेति 'हासो जनोन्मादकरी च माये'ति वाक्यादुन्मादशब्दं कुर्वन्निव। हासान्तर्गतः शब्दः। क्रोधकामेति क्रोधकामाभ्यां निधानं ययोस्तौ क्रोधकामनिधानौ । तथा भूतौ। कामसेवका इति कामसेवानन्तरं निरपत्रपत्वम्। 'लज्जा सापत्रपान्यत' इत्यमरः। क्रूरात्मेति तामसक्रोधयुक्तत्वानंतरं क्रूरात्मत्वम्। आर्थक्रमः। नृशंसपदसूचितं क्रोधविशेषणं तामसेति।

१०–१–५४. न चास्यास्ते इत्यत्र भविष्यति वेति द्वितीया कोटिः। मत्तोस्ति भविष्यति वेति द्वितीया कोटिः। सौम्यो भवेति 'सौम्ये'त्यस्य दिग्विजयिनि पापे चानन्वयाद्भवेत्यध्याहृत्य वाक्यान्तरं न बाधकम्। सम्बोधनार्थमिति सम्बोधनं च सम्यक्बोधः तत्प्रकृत्यर्थं प्रति विशेष्यं, क्रियां प्रति विशेषणमिति मनोरमायां सिद्धान्तः । राम मां पाहीति वाक्यस्य रामसम्बन्धिसम्बोधनविषयो मत्कर्मकं रक्षणमर्थः। एवं प्रकृते सौम्यसम्बन्धिविज्ञापनाविषयः करणमर्थः। एवं च रामसम्बन्धीत्यादौ स्वविषयरक्षणादिकर्तृत्वं सम्बन्धः। स्वं सम्बोधनम् । यद्वै त्वाहेतीति स्याहेत्यपि पाठः, त्वाहेति पाठः । एतदिति वाक्यम्। उभयत्रेति पुत्रवाक्याभ्यां भययोः। सम्यगुत्थितमिति सम्यगिति कंसस्याश्रयकथनमात्रम्, न तु मूलस्थपदस्यार्थः। तथा च न्यूनपूरणं ज्ञेयम्। 'न न्यूनादन्यपूरण'मिति प्रथमस्कन्धसुबोधिनीकारिकायाः, 'लक्षणां नैव वक्ष्यामी'ति च कारिका। निवेदित इति निवेदिते पुत्रे पुत्रस्त्वदीयः। कापट्येति यस्मात् पुत्राद् भयं तस्याष्टमस्य समर्पणाभावात् कापट्यं व्याजः शाठ्यं अनृजत्वमितियावत्। बहुवचनमिति 'पुत्रा'निति बहुवचनम्।

१०–१–५५. सुहृद्वधादित्यत्र दृष्टादृष्टेति सामदानदंडभेदशास्त्रे दृष्टं दानात्मकम्। प्रतारयतीति प्रतारको धूर्तः। न्यूनादन्यत्पूरयन्ति स्म निवृत्तो रथमिति। नन्विदमार्थिकं कुतो नेति चेन्न। प्रस्तावार्थस्तत्र भययोरेकतरस्य न्यूनादन्यपूरणस्यार्थिकस्य वेति।

प्रपञ्चो दृष्टः। उत्क्षेपणापक्षेपणाकुंचनप्रसारणगमनानीति गमनस्य न्यायशास्त्रे यथा। यद्वा 'जगुः किन्नरगंधर्वा' इत्यत्र नार्थापत्तिप्राप्तिस्तो न्यूनपूरणं पृथग्वक्तव्यम्। न हि 'जगुः किन्नरे'त्यत्र पीनो देवदत्तो दिवा न भुंक्त इत्यत्र पीनत्वानुपपत्तिवदनुपपत्तिरस्ति। अतो न्यूनपूरणं किन्नरगंधर्वविशेषणं स्वत एवोल्लसितहृदया इति। अध्यवसीयत इति अन्यथा मार्गगच्छदित्युक्तं स्यादिति भावः। मार्ग उत्तरदेशं प्राविशदिति गृहस्य कर्मतानुपपत्त्या च। पुनः स्तुत्वेति 'पूजयामास तं शौरि'रिति पूजनस्य स्तवनरूपस्य कृतत्वात्। गृहप्रवेशकर्तृककर्तृकप्रशंसनं दृष्टोपायानंतर प्रशंसन पुनःस्तवनम्।

१०-१-५६. अथ काल इत्यत्र एवमनर्थेति पूर्वोक्तप्रकारेणानर्थस्य वधार्थ प्रवृत्तेः समाधानं कथञ्चित् परमार्थोपदेशप्रकारेणासकलं कृतम्। असाकल्यं च क्रोधस्यावशिष्टत्वात्। 'क्रोधस्यान्तं फलोदयात्'। शान्तिरूपं फलं युद्धाकरणान्न जातम्। भगवतैवेति वसुदेवेवतीर्णेन वासुदेवेनैवेत्यर्थः। मनसि सर्वतो निवृत्तव्यापारे स्वयमुपलब्धनिजसुखानुभव इदमेव ब्रह्मज्ञानमिति सर्वत्रप्रसिद्धोपदेशाधिकरणभाष्ये ब्रह्मज्ञान ज्ञानिनामिवात्र वसुदेवे विशुद्धसत्त्व स्वस्वरूपं, तृतीयोत्पन्ने जीवाभाववन्मात्र विशुद्धसत्त्वान्तर्गत आत्मा। परमार्थः तु भगवत्प्रेरणया प्राप्तो न स्वरूपं किन्तु भगवान्, स च वसुदेवे वासुदेव इत्युच्यते, अत एवैवकारः। विशुद्धसत्त्वशरीर तु ब्रह्माण्ड आगमनेन शरीरत्वेन कार्यकारणभावात्। एवं च विशुद्धसत्त्वानुभवो न तु परमार्थस्य स्वत्वेन। समीचीनमेवेति ननु षड्बालकवधः अग्रे कंसवध इति कथं कार्यं समीचीनमिति चेन्न। षड्बालकवधः स्वस्य भगवत्त्वायान्यथा ब्रह्मत्वं परमात्मत्वं वा स्यात्। वेदे ब्रह्मेति पठ्यते स्मृतौ परमात्मेति पुराणे भगवानित्युपपादितत्वं समीचीनस्येति। किञ्च ब्रह्माण्डे आगमनेन शरीरित्वेन कार्यकारणभावात् षण्णां बालकाना शरीरित्वे सिद्धे शरीरस्याशाकर्षणे प्रतिबन्धकत्वात् षड्बालकवधः। अध्यायार्थत्वाच्च। कंसवधस्तु वासुदेवे नित्यक्रीडास्थकलेः प्रतिबन्धकशरीरनाशेनाग्रिमलीलार्थं मुक्तिः, 'भयात् कंस' इतिवाक्यात्। 'वासुदेवः परं ब्रह्म एष छन्दसि पठ्यत' इति ज्योतिषोक्तेः। एवं वेदे वासुदेवः वेदान्ते चतुर्व्यूह' इति सङ्कर्षणे मुक्तिः। भूभारहरणस्य सङ्कर्षणकार्यत्वात्। वेदवेदान्तसारे श्रीभागवते रूपद्वये मुक्तिरुक्ता। एवकारस्तु नित्यक्रीडानिविष्टानां धर्मकल्पादेरप्यभीष्टत्वात्। षड्भिरिति जातेष्व्युक्तस्य सङ्ख्यातात्पर्यस्य जन्मप्रकरण आवश्यकत्वात् *षट्श्लोकतात्पर्यार्थः। वसुदेवप्राणश्लोकैर्यः परमार्थः शुकेनोक्तः स षड्गुण इति।* शुकस्य 'सभगवा'नित्यत्र भगवत्साहित्योक्तेरिदानीं शुकोक्तौ वसुदेवोक्त्यैक्यं भवति प्राणश्लोकपरमार्थो भगवान् 'अत एव प्राण' इतिव्यासमूत्रादिति शुभम्। आसक्तिर्जातेति। बृहदारण्यकसमाप्तौ 'अथ य इच्छेद् दुहिता मे पण्डिता जायेत सर्वमायुरियादिति तिलौदनं पाचयित्वा सर्पिष्मन्तमश्नीयात् तामीश्वरौ जनयितवा' इतिश्रुतेः। 'ता' दुहितर 'जनयितवै'

जनयितुं 'ईश्वरौ'। प्रथमचकारार्थः। अनुक्तसमुच्चये चकारः। प्रोपसर्गार्थमाहुः पूर्णेति। सर्वेति सर्वा देवता यत्रेति विग्रहः सप्तान्नब्राह्मणोक्ताः वाङ्मनःप्राणाः, 'एवं विमृश्ये'ति-श्लोकव्याख्याने उक्ताः, ब्रह्मविद्यात्वाद् वा देवक्या ब्रह्मविष्णुशिवरूपा देवता प्रतिपाद्यत्वेन यत्र। चकार इति द्वितीयचकारः। तज्ज्ञापक इति 'पुत्रान् कन्यां चाष्टौ प्रसुपुवे' इत्यन्वपाभावद्योतकः। अष्टपुत्रप्रतिपादकवाक्यविरोधात्। सुभद्राज्ञापक इति वा प्रतिभाति। इत्युपसर्ग इति इत्यनूपसर्ग इत्यर्थः।

१०–१–५७. कीर्तिमन्तमित्यत्र यथैतयेति यथा नाम देवक्याः सर्वदेवतेति विशेषणात् रक्षार्थं भगवत्कृतसर्वदेवतासांनिध्येन येन प्रकारेणेत्यर्थः। तथैवेति तेनैव प्रकारेणार्पणं कृतवानत एव 'दृष्ट्वे'त्यस्याभासे 'भगवत्कृतत्वा'दिति वक्ष्यन्ति। देवतासु ब्रह्मविष्णुशिवेषु परमार्थरूपभगवत्सन्निधाने वसुदेवस्यार्पणकर्तृत्वाभावात्, उपदेशवत्। ज्येष्ठो हीति सर्वेषामिति सर्वैः कृद्योगे कर्तरि षष्ठी। न तु दत्तकविधाने दातुः पितुरदेयः। वसुदेवस्तु पुत्रप्रत्यर्पणकर्ता पिताऽपविद्धेन पुत्रेणापुत्रकंसपुत्रित्वकामी। 'मातापितृभ्यामुत्सृष्टं तयोरन्यतरेण वा। यं पुत्रं प्रतिगृह्णीयादपविद्धः स उच्यत' इति मनुस्मरणात्। अत्रोत्सर्जनं स्वयं गृहीत्वार्पणम्। अत्र कलियुगाभावादपविद्धोपि कर्मलोपाभावाय भवति। भगवत्प्रयाणानंतरं कलेः प्रवृत्तेः।[1] ननु एतस्मिन् समये धर्मविचारो नोचितः स्वास्थ्याभावात्, पथि शूद्रवदाचरेदितिवदिति चेन्न। 'श्लाघनीयगुणः शूरै'रित्यत्र वसुदेवोपि भगवता प्रेरित इत्यनधिकारिणमप्यनवसरे बोधयतीति सुबोधिन्याः। परमार्थमोक्षद्वितीया कोटिः धर्मरूपा उक्ता भगवत्प्रेरितत्वात्, धर्ममोक्षावेका कोटिः अर्थकामावपरेति। महानिति कीर्तियुक्तत्वान्महत्त्वम्। दत्तवानिति त्वदीयस्त्वां न मारयिष्यतीत्यपविद्धं पुत्रं कंसाय कर्मलोपाभावाय दत्तवान्, अत एव ज्येष्ठपुत्रो न देय इति दत्तकविधानवाक्यस्यात्रोक्तिः। धर्मनिष्ठतामिति परमार्थमोक्षानंतर द्वितीयकोटिनिष्ठताम्। कौर्यमिति कसि गतिशासनयोः अदा० आ० से० इदित्वान्नुम्। पचाद्यच्। अतो ज्ञापितम्। हेतुरिति मङ्गलवाद्यनामानृताद्विह्वलस्य भवतीति हेतुः। अर्पणं दानविशेषस्त्रिविधं तत्रेदं कायिकमित्याहुः स्वयं गृहीत्वेति। अनृतकथनमिति 'पुत्रान् समर्पयिष्येस्या' इत्यनृतकथनमसमर्पणे। भगवत्प्रापकमिति 'सत्येन लभ्य' इति श्रुतेः।

१०–१–५८. किं दुःसहमित्यत्र विपरीत इति संभवति दृष्टफलेऽदृष्टफलकल्पनाया अन्याय्यत्वं विश्वजिता यजेतेत्यत्र सिद्धम्। स्वर्गे फले दृष्टे संभवत्यदृष्टं फलं न कल्पनीयमिति। अत्र विपरीतः। मोह इति तमो मायाधर्मः। शास्त्रमिति 'पुत्रेण जयत' इति शास्त्रम्। 'साधनः[2] ममदर्शना' इति वाक्यादाहुः शत्रुमित्रेति। तदभाव इति भक्तिधर्म-

[1] अत्र ग्रन्थकारैरेक पंक्ति पश्चाल्लिखितुमवकाशः रक्षितः। [2] साधु।

तुल्यत्वज्ञानेन मायाधर्ममोहाभावे। अथेति लौकिकहेतुभिन्नशास्त्रहेतुप्रक्रमेथशब्दः। पुत्रोपयोगित्वादाश्रमद्वयस्याः श्रुतीराहुः पुत्रेणेति। पित्रर्णापाकरणेन तथा। वसुतां धनसत्ताम्। पुन्नाम्न इति पुत्रशब्दव्युत्पत्तिः। 'त्वं यज्ञ' इत्यादि महानारायणश्रुतिः। पिता संन्यसन् पुत्रं प्रत्याह 'त्वं यज्ञ' इत्यादि। ज्ञानयुक्तानामिति 'मय्येव सकलं जातं मयि सर्वं प्रतिष्ठित'मिति ज्ञानवताम्। अज्ञमिति असंतमिवात्मानं मन्यमानम्। भगवानेवैवमवस्थो जात इति सुबोधिन्याम्। सर्वाः षट्। पुत्राः भगवद्धर्माः तान् भार्याः ब्रह्मविद्याः ब्रह्मविद्यका मां निगमम्। कुलस्येति ब्रह्मात्मककुलस्यापि। एतदिति मारणम्। अलौकिकविग्रहमाहुः कुत्सितायामिति। हृदयाकाशे जीवस्य संभव उत्पत्तिर्न सम्भवतीति पक्षान्तरमाहुः स्थितिर्वेति। अत्र कोः कदादेशः दकारलोपः समासांतः। लौकिकविग्रहस्तु कुत्स गतौ, अचो यत्। कदर्यः। स प्रकृते न सम्भवति। अलौकिकविग्रहः निरुक्तादपि। 'अप्यक्षरसामान्येन निर्ब्रूयान्न संस्कारमाद्रियेते'तिवाक्यात्। एवमन्यत्रापि। अतोर्थे निरुक्तव्याकरणयोरर्थनियामकत्वान्न व्याकरणविरोधः। पलायनादिकमिति आदिना कंसगृहे सा स्थापनीया कामेन्याः संग्राह्याः पत्न्यः, किं चापविद्धपुत्रेण कंसपुत्रित्वकरणानंतरं निग्रहे स्थापनीयः पुत्र इति। अज्ञस्येति असंतमिवात्मानं मन्यमानस्येत्यर्थः। हरिरिति सर्वत्र गीतहरेः सामानाधिकरण्याय वासुदेवो वेदे आत्मा हरिरक्षरो वेदान्ते इति। सर्वनाशकमिति पुत्रभार्यावसुदेवनाशकम्। भगवद्बाधकमिति देवकीबाधाद्वसुदेववरत्वेन प्रापयिष्यमाणभगवद्बाधकम्।

१०–१–५९. दृष्ट्वा समत्वमित्यत्र भगवदीयानामिति एकादशेस्ति गुणः पुत्रत्वं दोषः मारकत्वं कंसे। कर्मठानां तु गुणदोषदृष्टिरस्ति। पुत्रः संरक्ष्यः। द्वेषी मार्य इति। पूर्वप्रतीति पूर्वप्रतिज्ञापुत्रसमर्पणस्य तद्विषयस्य पुत्रस्य। 'पूर्वप्रतिज्ञातस्ये'त्यत्र विषयः क्तस्यार्थः। विचारस्य कृतत्वादेवकारः। न त्वयुक्तमित्यर्थः। भगवत्कृतत्वादिति परमार्थरूपभगवत्कृतत्वादित्यर्थः। भगवत्संनिधाने वसुदेवकृतत्वस्यायुक्तत्वात्। अनिष्टमिति कंसक्रोधरूपम्। औदासीन्येनेति ताटस्थ्येन। उभयेनेति उभयशब्दस्य द्विवचनं नास्तीति कैयटः। समतासत्यव्यवस्थितिभ्याम्। तथैवेति गुणवत् संतोषप्रकारेण। प्रकर्षेणेति पुत्रपूरणेन हास्यं जनोन्मादकमायावत्त्वम्। माया कृपा। मुग्ध इति अष्टमे गर्भार्पणीये प्रथमसमर्पणे मोहः कारणमिति।

१०–१–६०. प्रतियात्वित्यत्र अनेन पञ्चवार्षिक इत्यादि, टिप्पण्याम्, पञ्चवार्षिको नीतः 'प्रतिया'त्विति वक्ष्यमाणत्वात्, जातमात्रो वा नीतः 'जातं जात'मितिवाक्यादेवं सन्देहे 'कीर्तिमन्त'मित्यत्र जातमात्रनयनेप्यर्पणं सम्भवति 'प्रतिया'त्वित्यस्य वसुदेवद्वारा प्रतियात्वित्यर्थस्यापि सम्भवात् 'पञ्चवार्षिक' इत्यस्यानुपपत्तिरित्याशयेनाहुः

अत्रायं भाव इति। अग्रे 'नन्दाद्या' इत्यादिवाक्येषु। तन्नोचितमिति 'जातं जात'-मितिवाक्योक्तं हननं ततोऽहननं नोचितम्। तथा कथनादिति सर्वेषां नन्दादीनां कालनेमिविरोध्यदेवतात्वेन कथनात्। एतदनुपदम् आनकदुन्दुभियानानन्तरमेव तस्य कालनेमिविरोध्यदेवतात्वस्य कथनम्। अनुपपत्त्यन्तरं नेत्याहुः तथा चेति। बीजजत्वे च इतिः समाप्तौ। अत एवेति निग्रहे गर्भासम्भवादेव।'न कालभेदे'ति भूतकाले क्तप्रत्यय इति न भूतकालप्रकारज्ञापकम्। तथा च भूतकालाविवक्षणेन भूतकालस्य अनुपपत्त्यन्तरं नेत्यर्थः। 'किन्तु मारणे देवक्या'मित्यादि। तथा च सुबोधिनी। 'मारणे देवक्यां जननमेवं निमित्तमिति ज्ञापयितु'मिति। अग्र इति तत्रैव श्लोके। अतः पञ्चवार्षिक इतिभावः। 'षड्वार्षिको नीतः,' 'प्रतियातु किशोरोयमिति कंसप्रत्ययः,' 'पुत्रानिति बहुवचना'दिति तु नापादनीयम्। 'सोऽनृतादतिविह्वल' इतिवाक्यात्, षष्ठस्य वैराग्यरूपस्य भगवदात्मकत्वाननुसन्धानापत्तेः, अतो मातापितरौ रामकृष्णौ प्रति मेधाविनौ न पितरौ, तद्वद् वैराग्यरूपषष्ठपुत्रं प्रत्यपि मेधाविनौ मातापितरौ न पितराविति, किञ्च 'पुत्रान् समर्पयिष्येऽस्मै' इति बहुवचनादपि पञ्चवार्षिक इति वक्ष्यन्ति 'पुत्रानिति बहुवचनानुरोधेने'त्यादिना। ननु निग्रहानन्तरं गर्भासंभवेऽ'स्यास्त्वामष्टमो गर्भ' इत्यत्र कथं गर्भपदप्रयोग इति चेत्तत्राहुः भगवतस्त्विति। अलौकिकी रीतिः प्रद्युम्नांशस्य गर्भसम्बन्धात्। नानुपपत्तिरिति पञ्चवार्षिकत्वभूतकालगर्भपदप्रयोगानुपपत्तिर्नेत्यर्थः। सुबोधिन्याम्। षष्ठश्चेति 'पुत्रान् प्रसुषुवे चाष्टौ, कन्यां चैवानुवत्सर'मितिवाक्यात्। पञ्चसु वर्षेषु पञ्च पुत्राः, षष्ठे वर्षे षष्ठः, चकारात्तदाधारः प्रद्युम्नः। 'अष्टमो गर्भ' इति वाक्यात्। तावत्कालमिति पञ्चवर्षाणि। सुबोधिन्यनुसरणे तु प्रतियात्वित्यत्र अनेनेति पूर्वोक्तसत्यसमत्वेन कुमारोयमिति कंसप्रत्ययेन कुमारप्रतियातुपदसमभिव्याहारेण चेत्यर्थः। पञ्चवार्षिक इति जातः कुतो नेति चेन्न, कुमारपदात्, अत एव न द्विवार्षिकस्त्रिवार्षिकश्चतुर्वार्षिकश्च,'प्रतिया'त्वित्यत्र तादृशज्ञानाभावात्, षष्ठे वर्षे कौमारत्वाभावात्। 'पुत्रा'नितिवाक्ये पुत्रपदादाहुः षष्ठश्चेति। सप्तमाष्टमौ न पुत्रौ, 'तस्य माता न माता पिता न पिते'तिश्रुतौ मात्राद्यभावात्। तर्हि मातापितरौ सप्तमाष्टमयोः मेधाविनौ। मातापितृपदस्य मेधाविनि शक्त्यङ्गीकारात्। निरुक्ते निघंटौ वा न वेदा इत्यस्य मेधाविनामसु पाठात्। नशब्दे घटितपदस्य मेधाविनि शक्त्युक्तेः। 'सोनृतादतिविह्वल' इतिवाक्यात् पञ्चवर्षपर्यन्तं स्थापनमनुचितमित्यत आहुः पुत्रानितीति। टिप्पण्यनुसारेण। प्रतियात्वित्यत्र। समयबंध इति समयः पुत्रदानकालः। तस्मिन् बंधः 'पुत्रान् समर्पयिष्येऽस्मै' इति कृतो निर्बन्धः अवश्यक्रियासाधकयत्नः। अत एवेति समयबंधस्य गतत्वात् सत्यत्वादेव। नारदादीनामिति आदिना हरिश्चन्द्रप्रभृतयः। असम्मतम् प्राणसङ्कटे

१. न तु मूल जननम्।

सत्यस्याप्रामाणिकत्वादमम्मतम्। अन्यनिष्ठेति भगवद्व्यतिरिक्ते प्राणसङ्कटेऽप्रामाणिके-सत्ये निष्ठा। अत इति 'स्त्रीपु नर्मविवाहे च वृत्त्यर्थे प्राणसङ्कटे गोब्राह्मणार्थे हिंसायां नानृतं स्याज् जुगुप्सित'मिति शुक्राचार्यवाक्यात्। यद्वा अत एवेति मारकाष्टमगर्भदाना-ज्ञापनादेव। नारदादीनामित्यत्रादिना वसुदेवदेवक्यादयः। तर्हि अनयहननमभिप्रेतं स्यान्नारदादीनामत आहुः नहीति। अन्यनिष्ठेति राजान्येपु राज्ञा मारकत्वेन शङ्कितेपु धर्मेपु निष्ठा भक्तिः। ज्ञानित्वान्न राजमारकविरोधो दोपः। अत इत्यादि 'राज्ञः पट्टाभि-पिक्तस्य वधो ब्रह्मवधाद्गुरु'रितिवाक्येन राजहितत्वात्, अन्यथाकरणम्। जातजातसमर्पणं मारकगर्भस्यासमर्पणमन्यत्रनयनम्। इदं समर्पणं सर्वपुत्रदानसमर्पणम्। किलेति निश्चयेऽव्य-यम्। आकाशवाणीति आकाशवाण्याः। प्रतिसन्धानम् राजनीतिप्रतिनिधितया संधानं योजनम्।

१०–१–६१. तथेति सुतमित्यत्र आदायेत्यस्यार्थमाहुः स्वयमेव गृहीत्वेति। अविश्वास इति तेन मङ्गलरूपभगवदवतारविरुद्धे योऽविश्वासस्तस्मिन् हेतुरित्युक्तम्। अतिक्लेश एवेति ननु भक्तित्वेन भगवदागमनत्वेन कार्यकारणभावात् कुत एवमिति चेन्न, समाधिभापापोपकलौकिकभापात्वात्। लोके महाराजागमनस्य तथात्वात्। किञ्च, भक्तवसुदेवे नन्दादौ च शाब्दसंयोगवति अतिक्लेशाभावे संयोगेऽर्धयुगल इति भगवदा-गमनहेतुर्न, किंत्वतिक्लेशरूपविप्रयोगसंमेलनेन पूर्णभक्तौ। 'धारयन्त्यतिकृच्छ्रेण प्रायः प्राणान् कथञ्चने'ति व्रजभक्तपूर्णभक्तिवत्। अत एवैवकारः। संतापः सिद्धान्तोक्तो द्वितीय-स्कन्धनवमाध्याये यः स तु निःकिञ्चनधनम्। प्रायश्चित्तरूपम्। 'अतप्ततनुर्न तदामोश्नुत' इतिश्रुतेः। न स्वास्थ्ये इति स्वास्थ्यं हि बहिर्मुखतासम्पादकम्। अत एव 'दोपा हरौ न सन्त्येव तथा भक्ताहिताः क्रियाः स्फुरन्ति बुद्धिदोपेण मूलं तस्य बहिर्दृशि'रितिवाक्यम्, 'तपो मे हृदय'मिति वाक्यं च। तदुभयमिति अतिक्लेशानकदुंदुभिवादनं उभयम्। देव-कृतस्येति नारदकृतस्यासत्यस्य। कंसकृतमिति राजकीयं सत्यम्। हेतुद्वयमिति हेतुगर्भित-विशेपणद्वयम्। 'असन्मृत्यु'रितिश्रुतेः 'असन्नेव स भवति असद्ब्रह्मेति वेद चे'दितिश्रुतेश्चाहुः असादित्यादि। द्वितीयश्रुत्यनुसारिण'मविजितात्मन' इत्यस्यार्थमाहुः स्वतो युक्तीति। प्रथम एवाष्टम इति द्वितीयाद्गणने एवं भवति। एवेत्यत्यंतायोगव्यवच्छेदे।

१०–१–६२. नन्दाद्या इत्यत्र तस्येति कंसस्य। 'पुरुपादानुव्रत' इति वाक्यादाहुः यदैवेति। एतानिति सुतान्। क्रोधोद्गमेति यथा रहूगणस्य विशमशिविकावहनं ब्राह्मण-कृतम्। 'अविजितात्मन' इत्युक्तविशेपणादाहुः अजितांतरिति। एकदेशविकृतत्वादवि-जितान्तःकरणत्वादित्यर्थः। महतामित्यादि वसुदेवादीनाम्। ननु मनसः प्रामाण्य-

१. सुतान्।

मिन्द्रियद्वारकमिति चाक्षुषं श्रावणं प्रत्यक्षमित्युच्यते, मानसं तु कथमिति चेन्न,बृहदारण्यके 'मनसैवानुद्रष्टव्यमेतदप्रमेयं ध्रुव'मित्यप्रमेयदर्शने मन एव करणमित्युक्तत्वात्। अप्रमेयदर्शनं सर्वस्य स्यात्, अत उक्तं महतामिति। एवकारेण प्रमेयाप्रमेयसाधारणमन्तःकरणं प्रमाणम्, प्रमास्थले तथैवेति। कंसवाक्यं सत्यमप्यसत्यत्वेन जातम्। कंसकृतमिति सत्यं 'प्रतिया'त्विविवाक्योक्तम्। देवानां हितेति छांदोग्ये 'देवासुरा वै यत्र संयेतिरे उभये प्राजापत्याः तद्ध देवा उद्गीथमाजह्रुरनेनैनानभिभविष्याम' इत्यादिनोद्गीथाहरणेनासुराभिभवकर्तृत्वं देवानामुक्तम्। 'सताँ हि सत्य'मिति श्रुतेः सत्यं देवानामुक्तम्। 'उद्गीथं' सोमयागं 'आजह्रुः' कृतवंत इति व्याख्याने 'उद्गीथ'मक्षरं सत्यप्रधानं सोमयागस्य सत्यत्वादंशद्वयाप्राधान्यात्। अतो देवानां हितकारि न भवतीति देवानां गुह्यं संवरणीयम्। गुह संवरण इति धातुपाठात् तत्कर्ता नारद इत्यर्थः,'शशंसाभ्येत्य नारद' इतिवाक्यात्। पर्यवसानेति अष्टमगर्भस्य नयनेन कस्यापि पुत्रस्यामारणादनिष्टदेवभक्तानिष्टकंसक्रोधकरणात्। पीडने कृते तु कृतपीडनकेन वसुदेवेन कृष्णान्यत्रनयनं न कंसक्रोधे हेतुः। यद्वा देवानां हितेति अष्टमगर्भे नीते तेनाकाशवाणीप्रामाण्यात् कंसवधेऽसुरैः सह संग्रामापक्षपातिभगवदाविर्भावाभावाद् देवानां हितकारि न भवतीत्यर्थः। देवभक्तानिष्टे वाक्यत्रयमिति श्लोकत्रयम्। वृष्णिवंशेति नवमस्कन्धे'वृष्णेः सुमित्रः पुत्रोभू'दित्यारभ्य 'देवदुंदुभयो नेदुरानका यस्य जन्मनि। वसुदेवं हरेः स्थानं वदन्त्यानकदुंदुभि'मितिवाक्यात्। यदुवंशेति 'यदोर्वंशं नरः श्रुत्वा सर्वपापैः प्रमुच्यते, यत्रावतीर्णो भगवान् परमात्मा नराकृति'रितिवाक्यात्। यादवत्वं वसुदेवादौ सामान्यम्।

१०–१–६३. सर्वे चा इत्यत्र सर्वानिति नंदादीन्। विधत्त इति यथा दध्ना जुहोतीत्यनेनाग्निहोत्रे दधिगुणः। ईषदसमाप्तेति मायशब्दस्तुल्यपर्यायः। तथा चेषदसमाप्ताविल्यत्रासमाप्तिर्न्यूनतेत्यभिप्रेत्येषदूनो विद्वानित्युदाहृतत्वादीषन्न्यूनदेवा इत्यर्थः। यथा चन्द्रतुल्यं मुखं चन्द्रादीषन्न्यूनमित्यर्थः। न्यूनतांशं विशदयन्ति स मानुषेति। उभयोरिति यमुनापारयोः। एतदाहेति 'एतत् कंसाय भगवान् शशंसे'त्यस्यार्थः। अमन्वानस्य परीक्षितः। भक्तत्वान्नारदस्येति भावः। अष्टश्लोककथायां विश्वासजनकम्। देवानां गुह्यं वरणीयम्। सम्बन्धिन इति सुनामन्यग्रोधकंकादयः कंसभ्रातरः।

१०–१–६४. एतत् कंसायेत्यत्र दुष्टत्वमिति बालकघातकत्वम्। 'ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुने'तिस्मृतेः। 'कलौ कर्तैव लिप्यत' इति पराशरस्मृतेः। 'कलिमागतमाज्ञाय क्षेत्रेऽस्मिन् वैष्णवे वयं आसीना दीर्घसत्रेण कथायां सक्षणा हरे'रितिवाक्यात् कलिकालः। शंस कथन इत्यत्र कथनं कथनविशेष इत्याहुः एकान्ते कथनमिति। शंस कथने,कथ वाक्यप्रबन्धे इत्याशयेनाहुः युक्तिपूर्वकमिति। एष एकान्तशब्दार्थः।

उपाख्यानेत्यादि प्रबंधार्थः। कथनं भावल्युडर्थः। किमुपाख्यानमित्याकाङ्क्षायामाहुः तत्रैवोपेति। अत्रेत्यष्टश्लोक्याम्। आनुपूर्वीति 'आत्मानमिह संजात'मिति विरोधः पूर्वं, 'मातरं पितर'मिति हननज्ञानं विरोधानन्तरं,पश्चा'द्देवकीं वसुदेवं चे'ति निगडनिग्रह इत्यानुपूर्वी तस्या जानातीच्छति यतत इति न्यायसिद्धाया अभाव इत्यर्थः। एतावतैवेति इच्छाभावसहितेनोपनिबन्धेनैव। छांदोग्योक्तोद्गीथाहरणमाहुः नाकपृष्ठ इति। 'देवासुराः' सात्त्विककरणवृत्तयो देवाः। 'असुराः' असुरेष्वेव रमणाद् राजसस्तामसश्च करणवृत्तयः 'यत्र' यागे सत्यरूपेन्योन्यविषयापहारलक्षणे निमित्ते।'संयेतिरे'प्रतिदेहमन्योन्यस्य वृत्त्युभयाभिभवलक्षणं संग्रामं कृतवन्तः। 'उभये' एते 'प्राजापत्याः' यजमानावस्थस्य कर्मिणः प्रजापतेरन्त्यवस्थिताः, 'तत्'तत्र 'ह' प्रसिद्धे स्वर्गपृष्ठ 'देवा उद्गीथमाजह्रुः' सोमयागं कृतवन्तः। 'अनेना'सुरा'नभिभविष्याम' इतिश्रुत्यर्थः। अत्र यागाधिकारो देवानां नाकपृष्ठे इति नाकपृष्ठ इत्युक्तम्। 'अंभस्य पारे भुवनस्य मध्ये नाकस्य पृष्ठ' इति महानारायणे उपक्रम्य 'यस्मिन् देवा अधिविश्वे निषेदु'रिति श्रूयते। तत्र 'यस्मिन्' प्रजापतौ 'विश्व'स्मिन् नाकपृष्ठरूपे 'देवा निषेदु' र्देवत्वात्,एतदग्रे 'तदेव भूतं तदुभव्यमानमिदं तदक्षरे परमे व्योमन्,येनावृतं खं च दिवं महीं च येनादित्यस्तपति तेजसा भ्राजसा च। यदन्तःसमुद्रे कवयोवयन्ति यदक्षरे परमे प्रजा' इत्युक्तम्। अत्र 'प्रजा' इति प्रकर्षेण जायन्त इति प्रजाशब्दव्युत्पत्तिः। तत्र प्रकर्षश्चानेकधा। प्रकृते प्रकर्षः स उक्तः। नाकपृष्ठे देवानां मन्त्रणमित्यादि कृष्णोपनिषदि चाहुः'ते होचुस्तं सुराः सर्वे भगवंतं सनातनं,नोवद्यमवतारान् वै गृह्यन्ते नैव भूतले। आज्ञयावतारांस्ते हि गोपांश्च नो कुरु स्त्रीश्च नो कुरु' इति। अत्र संग्रामोक्तेस्तत्र त्यदेवगुह्यकर्ता नारदादिरार्थिकः। एवं च 'यन्मनसा ध्यायति तद्वाचा वदति, यद्वदति तत् करोती'तिश्रुतेर्नारदेन देवगुह्यकर्त्रा देवानां मन्त्रणं ऋषयो मन्त्रद्रष्टार इति मनसा ध्यातं तदुत्तरार्धेन वाचोक्तमित्याशयेनोत्तरार्धं विवृण्वन्ति स भूमेर्भारायमाणा इत्यादिना। देवानां मन्त्रणं जातमित्यस्यार्थोयम्। देवागमनमिति कृष्णोपनिषदि 'तं होचुः सुराः सर्वे भगवन्तं सनातनम्। नोवद्यमवतारान् वै गृह्यन्ते नैव भूतल' इतिश्रुतेः। देवप्राया अक्रूरादयोपि। वधोद्यमरूपमिति वधोद्यमं रूपयति तादृशं देवागमनं दैत्यहननार्थं जातम्। अत्र देवागमनपदाभावेपि नारदेनोपाख्याने तथोक्तमित्यार्थिकं देवागमनपदमादाय वधोद्यमपदस्य विशेषणत्वम्। तथा च मूले वधस्योद्यमो येन देवागमनेन तादृशं देवागमनं च शशंसेत्यन्वयः। वधोद्यममिति तादृशं देवागमनं यथा भवति सम्भवति तथा सात्त्विकत्वप्रकारेणैते देवताप्रायाः, एतेषां सात्त्विकत्वेन देवतातुल्यत्वे एतेषु देवानामागमनमंशतोवतरणम्। 'भवद्भिरंशैर्यदुषूपजन्यता'मित्युक्तं सम्भवतीत्यर्थः। उत् अधिकं यमः शरीरसाधनापेक्ष उद्यमस्तम्। 'यमो दंडधरे

१ वदन्ति।

ध्वांक्षे संयमे यमजेपि च, शरीरसाधनापेक्षे नित्यकर्मणि चोच्यत' इति विश्वः। वाक्यमिति एकमेवेतिशेषः। देवागमनसिद्ध्यर्थं पूर्ववाक्ये तत्तुल्यत्वबोधनमिति सर्वमेकवाक्यमेव। अत्र पूर्वतत्रेऽर्थैकत्वादेकं वाक्यं 'साकाङ्क्षं चेद्विभागे स्या'दित्येकवाक्यलक्षणादित्यर्थः। एतत्पदात् पूर्वोत्तरयोः श्लोकयोर्विभागे साकाङ्क्षत्वम्।

१०-१-६५. ऋषेर्विनिर्गम इत्यत्र अनुवादेपीति 'एतत् सर्वं समाचष्टे कंस आहूय मन्त्रिणः अन्यथानुपपन्नं स्यान्निग्रहादिकमग्रिमम्'। अतः कंसकृते नारदशंसितस्य मन्त्रिणः प्रत्यनुवादे। अनुक्तत्वादननुवादोपिशब्दार्थः। पूर्वमिति पूर्वपद्योत्तरार्धे । ननु सत्यं त्यक्तवर्ष्युक्तं कुतोनूदितवान् कंस इति चेत्, तत्राहुः ऋषिणैवेति,इतरयोगव्यवच्छेद-कैवकारः। निवारितमिति सत्यं राजकीयम्। निवारितं असत्यीकृतम् । नेति 'ऋषेर्वि-निर्गम' इतिवाक्यात्। चतुष्टयमिति अग्रेतनचतुःश्लोकोक्तं चतुष्टयं निगडनिग्रहादिकम्। यदूनिति यादवान् । बहुषु तद्राजस्य लुक्। तादृशं चेति कंसस्य राजत्वाद्बुद्धिः। विष्ण्वंशं 'स्ववधं प्रति' स्वस्य वधं प्रतीति स्पष्टम्। एवं 'देवक्या गर्भसम्भूति'मितिपाठे व्याख्यानमुक्तम्। चकारात् 'देवक्या गर्भसम्बन्ध'मितिपाठे श्रीशुकबुद्धिस्थं देवक्या गर्भे प्रद्युम्ने सम्बन्ध आधाराधेयभावो यस्य सङ्कर्षणस्य तं विष्णोर्ज्ञानस्य वेदमतेऽनिरुद्धस्य धर्मस्यांशं स्वस्य कंसस्य वधं प्रत्येव अपि न तु भूभारहरणमात्राय। वासुदेवस्तु मोक्षमात्रदाता कंसस्य। किञ्च विष्णोरंशं तावतीं मायां दूरीकृत्य प्रकटोंशस्तम्। विष्णुं अंशेऽवाङ्निवृत्तेर्विष्णुमात्र-मुक्तम्, न त्वंशः। 'मत्वे'ति सम्बन्धः। 'ग्रही'दिति उत्तरश्लोके मुख्यक्रियापदम्।

१०-१-६६. देवकीं वसुदेवं चेत्यत्र विदित्वेति पूर्वानुवादः। ग्रहीदिति सम्बन्धः। लुङ्। अडभावश्छांदसः। एवं ग्रहीदिति पूर्वश्लोकान्वयि सूचयित्वान्यपदाना-मर्थानाहुः प्रथमत इति। तदन्तर्गतानिति स्मृत्युक्तसूचकालुमोदकादीन् वसुदेवान्त-र्गतान्। कलेः प्रवृत्त्यभावान्नैकस्य हन्तुरेव दोष इति, 'कलौ कर्तैव लिप्यत' इति। स्वगृह एवेति 'भोजेन्द्रगेहेग्निशिखेव रुद्धे'ति वक्ष्यमाणत्वात्। 'ग्रही'दित्यत्र णिजभावादिति भावः। एकवचनाच्च।अजनशङ्कायां हेतुमाहुः अष्टमेति। अयमेकोयमेक इत्यपेक्षाबुद्धिः। तज्जन्य-त्वमयमष्टम इत्यष्टमत्वसङ्ख्यायाम्। तस्मात्। द्वितीयाद्यारभ्यगणनायाम्। अजनशङ्कया-जनतर्केणान्यथाज्ञानरूपेण। वासनया च एवं संदेहबीजाभ्यां विष्णुसंदेहादित्यर्थः। षट् पुत्रानहनदिति ननु भगवदैश्वर्यरूपानहनदिति किं सामर्थ्यं कंसस्येति चेच्छृणु। ब्रह्माण्डसमायातस्वैश्वर्यादितिरोधानजपरिदृश्यमानलोकनाशदुःखादिषूपपत्तिरुक्ता। तथा हि अत्र षड् धर्मा हताः, ते प्रद्युम्ने उपयुज्यन्ते। कृष्णे तु 'युक्तं भगैः स्वैरितरत्र चाध्रुवै'रिति-वाक्यात्, नित्याः। ते च 'विराड्जीवस्तु भोगभुगि'ति विराड्जीवे तिरोहिताः, कृष्णे समायाते उत्पन्नाः। 'जातस्य हि ध्रुवो मृत्यु'रितिवाक्यात् ते कंसेन हता इति लीलामर्यादा।

कालभेदेति प्रथमसङ्गमिकालभेदस्य शरीरस्वीकरणकालभेदस्य वा ज्ञापकम्। जननमेवेति एवकारेण जननविषयव्यवच्छेदः। 'जातं जात'मिति भावे क्तो वा षड्धर्माणां नित्यानां जातं जननमहनदिति। न च प्रत्यक्षविरोधः। आश्चर्यत्वादतो न जातपदस्य जनने लक्षणा।

१०–१–६७. मातरमित्यत्र एपैवेति लुब्धा मन्त्येवेत्यर्थः। अम्बरीपादयस्तु लोभाभावान्न तथेतिभावः। यत्रैव मरणसन्देह इति यन्निमित्तो मरणसंदेहः। निमित्तमिह कारणम्। पञ्चविधानिति'तद्भार्या'इत्यत्र 'तरसर्वा'नितिपाठे।'सुहृद' इति सखिविशेषणं वा।

१०–१–६८. आत्मानमिहेत्यत्र देवत्वसम्भावनयेति कलिः कंसो नित्यक्रीडास्थ इति तथा। यद्वा, वसुदेवेन स्वभावादिः कंसे स्थापित इति 'पूजयामास तं शौरि'-रित्यत्र निरूपितम्। तेन देवत्वसम्भावना तया। तद्धिताचरणं भगवतः षड्धर्महिताचरणम्। नित्यलीलास्थत्वात्। पार्ष्णिग्राहेणेति प्रष्णिग्रहेण। पार्ष्णिग्राहस्यानुग्राहकत्वात्।

१०–१–६९. उग्रसेनं चेत्यत्र निरूपितमिति उग्रा सेना यस्येति नामविग्रहान् निरूपितम्। सर्वसहायेति कंसस्यापि सहायत्वात् सर्वसहायत्वम्। षड्विधानामिति यदुभोजांधकमधुवृष्णिप्रभृतीनां, यद्वा यदुवंशानुकथने त्रयोविंशेध्याये 'तेषां तु षट्प्रधानाना'मितिवाक्यात् 'पृथुकीर्तिः पृथुश्रवा' इत्यादयः षट् प्रधानानि श्रेष्ठा येषां दशलक्षसहस्रमहाभोजपुत्राणां तेषां षट्प्रधानानां षड्विधानाम्। न च लक्षणाप्रसङ्गः। काकेभ्यो दधि रक्ष्यतामित्यत्र तात्पर्यवत् तात्पर्यात्। व्यञ्जनावृत्तेरिष्टत्वात्, वृत्तेस्त्रैविध्यात्। तदाज्ञयेति उग्रसेनाज्ञया। ते षड्विधाः। तस्येत्युग्रसेनस्य। स्थित इति माथुरशूरसेनयोर्मध्ये। माथुरस्तु शूरसेननिवासस्थानम्। अत इति शूरसेनमाथुरयोर्विभज्यार्थात्, तस्येति शूरसेनदेशस्य। अध्यायार्थमाहुः एवमिति। हेतुभूत इति भक्तदुःखरूपः हेतुभूतः। ततोपि मुख्यः षड्धर्मवधः सोत्राध्यायार्थ उक्तः। षड्बालकवधो नाम प्रथमोध्याय इति। इतिश्री भागवत इत्यादि भागवतलक्षणं प्रथमस्कन्धसुबोधिन्यामुक्तम्। महापुराण इति पुराणं 'सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च। वंशानुचरितं चैव पुराणं पञ्चलक्षण'-मित्युक्तम्। महत्त्वं दशलक्षणत्वम्। तस्मिन् महापुराणे। अध्यायः इङ् स्मरणे,एरच् कर्मणि। इङिकावध्युपसर्गं न व्यभिचरत इति आयः, आङ्पूर्वकोऽयः। वाक्यस्मरणविषयः। पारमहंस्यां संहितायामितीति श्रियां दर्शनात् परमहंसः शुकः, तेनाधीता पारमहंसी 'तदधीते तद्वेदे'ति अः। हिरण्यगर्भस्यैकप्राणयोगिकायामिति संहितायामित्यर्थः। 'वायुः शब्दतामापद्यत' इति प्राचां प्रवादात्। सम्यग्घिता संहिता ॥१॥

इति श्रीमद्वल्लभचरणकृतानश्रीगोपेश्वरविरचितायां शास्त्ररीत्या बुभुत्सुबोधिकायां प्रथमाध्यायव्याख्यानम्॥

द्वितीयोध्यायः।

१०–२–० एवमिति पूर्वाध्यायोक्तप्रकारेण। तथा चाध्याययोर्हेतुतासङ्गतिरुक्ता। भक्तदुःखं विना कृष्णोद्यमाभावात् कृष्णोद्यमः कार्यम्। भगवदाविर्भावश्च। महत्त्वेति टिप्पण्यामन्यत्रेति प्रह्लादेपीत्यर्थः। अक्षरप्राकट्यात्। तथा चैवं भक्तवात्सल्यस्वभावं भगवतो ज्ञापयितुं हेतोर्महत्त्वज्ञापनमित्यर्थः। भक्त्याहुरथवेति। वसुदेवादीति आदिना देवकी। पुरुषोत्तमत्वं भक्तवश्यत्वमत्र। तज्ज्ञापनायेति महत्त्वज्ञापनाय। तज्ज्ञापनायेति वक्तव्ये स्मार्तः प्रयोगः। सविशेषण इति मायाज्ञापनविशेषणेन सह वर्तमानः। एते त्रयोपि पक्षा मूलश्लोकेभ्य एव स्फुटं प्रतीयन्त इति त्रयाणां समुच्चय एव न तु विकल्पः। तेनाथवेत्यत्र वाशब्दोवधारणे ज्ञेयः। तथा च पूर्वं हेतुमहत्त्वं ज्ञात्वा तदनन्तरमुक्तमहत्त्वमवधारणीयमिति बोधयितुमिदं गोस्वामिभिर्वाशब्दद्वयं प्रयुक्तमिति बोध्यम्। सुबोधिन्याम्। एतदेव स्फुटीकुर्वन्ति दुःखं हेतुरिति। यद्वा 'प्रलम्बबके'त्यादिमक्रमज्ञापितार्थमाहुः दुःखं हेतुरिति। अयमर्थः। दुःखं कृष्णागमने हेतुरुक्तः। स सव्यापारो निर्व्यापारश्च,उद्यमादीनां व्यापारत्वे हेतुः सव्यापारः उद्यमस्यागमने महादुःखस्य हेतावन्तर्भावे निर्व्यापारश्चेतिबोधाय प्रथमाध्यायोक्त'प्रलम्बबके'त्यादिकथा। प्रलम्बादीनां नित्यलीलास्थक्रोधादिरूपत्वेन कृष्णोपनिपद्युक्तत्वात् तादात्म्याद्वैतेन परम्परया प्रद्युम्नप्रादुर्भावे योग्यता भक्तदुःखहेतुत्वात्।'प्रलम्बबके'ति प्रक्रम इतिभावः। अत एवाहुः पुनर्निरूप्यत इति। प्रथमाध्याये निरूपणात् पुनरित्युक्तम्। शीघ्रागमनेति नित्यक्रीडास्थत्वाद् भक्तदुःखहेतूनां शीघ्रपदम्। कृष्णाविर्भावहेतुत्वात्। एवं हेतुं निरूप्येति श्लोकार्धार्थमुक्त्वा सर्वेषामित्यादिनोत्तरार्धार्थमाहुः सर्वेषामित्यादि। सर्वेषां दैत्यानां भगवदवतारज्ञापनार्थं 'माहैष मे प्राणहरो हरिर्गुहा'मित्यादि कंसवाक्यमवतारेभ्यः कृष्ण आधिक्यबोधकमित्यर्थः। तृतीयार्थं स्फुटीकुर्वन्ति तथा स्तुतिरिति। स्तुतिर्ब्रह्मादिकर्तृका तथा पुरुषोत्तमत्वज्ञापिका। अन्यथेत्यादि स्तुत्यादिकं न कृतं स्यात् तदा एतद्द्वयाभावे पुरुषोत्तम एव प्रादुर्भूत इति कथं निश्चितं (ज्ञातं) भवेत्। स्वसन्निधिमात्रेण [1]दैत्यस्य कंसस्यापि तथाविधं ज्ञानम्। 'अवतारो हरेर्यावांस्तत्र ब्रह्मा स्वयं व्रजेत् वरादनुक्तेप्येवं हि स्तुतिः पूर्णे तु सर्वत' इति तृतीयस्कन्धनिबन्धवाक्यात् स्तुतिः।

१०–२–१. विरोधमिति उपद्रवणोत्सुकानां भयाविष्टानां च विरोधम्। उक्तानां निरोधकम्। चाणूरवदिति मनुष्य इत्यर्थः। पूर्वार्धोत्तरार्धप्रक्रमाभिप्रायमाहुः यथा प्रलम्ब इति। मुष्टिकोपीति बलभद्रहतः उत्तरार्धे प्रथमनिर्दिष्ट इत्यर्थः। प्रलम्बशब्देनोपक्रमः सङ्कर्षणप्राकट्यार्थं सङ्कर्षणः प्रलम्बघ्न इति। उद्यमोध्यायार्थः।

१. गर्भसवधे।

१०-२-२. अन्यैश्चेत्यत्र जरासन्धादय इति आदिना यवनादयः। गुप्तानिति कुरुपाञ्चालादिदेशैर्गुप्तान्। प्रलम्बादयो नित्यक्रीडास्थत्वादधिकज्ञाना इति बाधन्ते। स्तुते इति अस्तिः प्राप्तिश्च। अन्यतरेणेति महाभाष्यप्रयोगाद् द्वयोर्निर्धारे उतरच् बहूनां निर्धारणेपि। आश्रय इति मागधः संश्रय आश्रयो यस्य। श्रयतीति श्रयः एरच्।

१०-२-३. ते पीडिता इत्यत्र तीरभुक्तदेशानिति तीरं भुक्तं यैः तान् देशान्। तीरसम्बद्धदेशान्। 'नितर'मित्यस्यार्थमाहुः शुसतयेत्यादि। धर्मात्मान इति 'आत्मार्थे सकलं त्यजे'दितिवाक्योक्तो धर्म आत्मन्यन्तःकरणे येषां ते। तत्रैव देशान्तर एव। आ समन्तात् स्थिताः।

१०-२-४. एके तमित्यत्र एवेति परीत्यस्यार्थः। अक्रूरादय इति आदिना सुनामन्यग्रोधादयः कंसभ्रातरः। तं संवेष्ट्येति रुधिर् आवरण इति धात्वर्थः। भावे क्त्वो ल्यप् अनुः समीपेर्थे सम्यक् समीपे क्रोधानुत्पादकं वेष्टनं कृत्वा। वेष्ट वेष्टने। भ्वा० आ० से० एतस्यैवार्थः। सेवकत्वेनेति सेवनं समीपे कर्तरि ण्वुल्। संवेष्ट्य स्थिताः, संवेष्टनकर्तारः। संवेष्ट्येत्यत्र वेष्टनं कृत्वेत्यत्र करणं प्रकृतिः पुनःकरणं प्रत्ययार्थः। करणं कृतिः, कृत्रिमत्वं कर्तृत्वम्। कृत्रिमत्वं च कृतिरेव। सा स्वाश्रयं कर्तारमाक्षिपति। तथा च संवेष्टनकरणकृत्याश्रयाः संवेष्ट्येत्यस्यार्थः। स्थिता इत्यत्र 'गत्यर्था कर्मके'ति सूत्रेण कर्तरि क्तः। संवेष्ट्य तिष्ठन्तीति स्थिताः। अनुरुन्धाना रोधे तिष्ठन्तीति रुन्धानाः करोतिना विवरणस्य बहुषु स्थलेष्वभावात्। नोत्पद्यत इत्यस्य नोत्पत्तुमर्हतीति गदाधर्यां विग्रहदर्शनात्। न च रोधं तिष्ठन्तीति प्रयोगापत्तिः। धातोः फलसमानाधिकरणव्यापारवाचकत्वेन फलस्य ज्ञातिरूपकर्तृनिष्ठत्वात्। तत्सेवकत्वेनेति तत्सेवकत्वेन स्थिता इतियावत्। गोत्रिण इति प्रधानकुलमस्त्येषां ते गोत्रिणः। परित इति भीतत्वात् सर्वतः। हतेषु षट्स्वित्यत्र देवक्या बन्धनावधीति टिप्पण्यां स्फुटम्। तथा भविष्यतीति शोकविवर्धनो भविष्यति। तथेति हर्षशोकविवर्धनो बभूव। चरित्रमिति सङ्कर्षणगर्भभवनादि। अग्र इति 'ततो जगन्मङ्गल'मितिश्लोके। आसुरहननमिति षट्पुत्रासुरहननम्। 'तेषां हिरण्यकशिपुपुत्रत्वेनासुरत्वा'दिति पुरुषोत्तमाः लेखे। सुबोधिन्याम्। पितृनाम्नेति राजधर्मत्वात् 'पितृनाम्ना तु मुख्यत्व'मितिवाक्यान् मुख्यत्वार्थे पितृनाम्ना निर्देशः। अन्येषामिति ज्ञातीनाम्। यदूनां वा 'ज्ञातयो बन्धुसुहृदो ये च कंसमनुव्रता' इत्युक्तनारदवाक्यात्। अतिमान्य इति भगिन्या दयापात्रत्वादन्येभ्यो मान्येभ्योतिमान्यः।

१०-२-५. बुद्ध्येति अजनशङ्कया हताः। राजभ्रमबुद्ध्या हताः। श्रीशुको वक्ति बुद्ध्येति। बुद्धिमानयं पदार्थान् जानातीत्यादिप्रतीत्या कंसबुद्धौ पदार्था हन्तव्यत्वेनोक्ताः। प्रतियोग्यभावयोः सामानाधिकरण्याद् धर्मस्थानभूतो व्यापकधर्मेषु गतेषु तदभावात्मा

दर्शनाविषयः धर्मस्थानभूतः अशेषविशेषशून्यः अक्षरः शब्दात्मा। परमावधिरिति आनन्दमीमांसोक्तोत्कर्षस्यापि परमावधिः। शब्दार्थयोर्नित्यसम्बद्धयोर्वैलक्षण्यमाहुः पुरुषोत्तमस्त्विति। तत इति शब्दात्मकादक्षरात्। महान्, 'उत्तमः पुरुषस्त्वन्य' इतिवाक्यात्। कालात्मकमिति काल उपदेशे, काल आत्मा देहो यस्य। पर्याय इति निर्माणे। 'पर्यायस्तु प्रकारे स्यात्, निर्माणेवसरे क्रमे' इति विश्वः। स चार्धेति टिप्पण्यां स्फुटम्। एवेति अक्षरयोगव्यवच्छेदक एवकारः। परं तादृशीति आनन्दमयी। वक्ष्यत इति 'सा देवकी'-तिवाक्ये। अस्येति अक्षरस्य। प्रभुसङ्गम एवेति न तु विरहे। विप्रलम्भस्य विरहेर्ष्या-प्रवासोपालम्भादिपञ्चभावात्मकत्वात्। गणितानन्दप्राकट्यकरणमेव। तथेति अर्धप्रकटितानन्द इत्यर्थः। सुबोधिन्यां, प्रभावस्येति सर्वरक्षकस्य स्वरक्षायां सन्देहो नास्तीति प्रभावस्य देवक्याऽदर्शनात्।

१०-२-६. भगवानित्यत्र एवं सतीति सप्तमस्य शब्दस्य हर्षशोकविवर्धनत्वेन भूभारहरणावश्यकत्वे सति, अर्थात्मा भगवानपीत्यन्वयः। ईक्षामनोहङ्कारातिरिक्तमायायाः श्रुतिविरुद्धत्वात् तद्ग्रहणं विना शरीराभावस्या'त्ममायामृते राजन् परस्यानुभवात्मनः न घटेतार्थसम्बन्धः स्वप्नद्रष्टुरिवाञ्जसे'तिवाक्ये सिद्धान्ते मायाभावेर्थस्य देहस्य सम्बन्धाभावोक्ते'र्न यत्र माये'त्यनेन 'प्रवर्तते यत्र रज' इत्यनेन च तत्र मायाभावादुभयसमाधानार्थं कृपात्वेन मायाविवक्षणात् तद्ग्रहणप्रकारमाहुः भक्तेष्विति। दयात्वेन माया भक्तेष्विति तत्र स्थापिता। अपहतपाप्मत्वाद्यतिरिक्तधर्माणां तत्र तत्र नियतत्वात्। 'प्रपन्नेर्पितया भृश'-मिति तृतीयस्कन्धे स्पष्टम्। भक्तनिष्ठा माया बुभूषणा वैकुण्ठे गृहीता। 'यदा यदा हि धर्मस्ये'ति-वाक्यात्। 'स्वशान्तरूपेष्वितरैः स्वरूपैरभ्यर्द्यमानेष्वनुकम्पितात्मे'तिवाक्याच्च। अथ'मायाशबलितं ब्रह्मासी'दितिश्रुतेः। एवं दयापरीतो भगवान्। देहग्रहणार्थमितिमर्यादा। शीघ्रमिति कृपाविष्टः साधनमिति तथा। षड्गुणैश्वर्येति षड्गुणदानार्थमैश्वर्यम्। तेन सम्पन्नः। किमर्थं सम्पन्न इत्यत आहुः पूर्वापराध इति। पूर्वेषां कीर्तिमदादीनां मारणे कृते प्रतीकारं तद्धन्तुः कंसस्य वधं कृत्वा'म्ब ताते'तिसम्बोधनपूर्वकवाक्यान्युक्त्वा 'मोहितावङ्कमारोप्य परिष्वज्यापतुर्मुद'मितिश्लोकोक्तपुत्रपरिष्वङ्गादिमुञ्जननं कर्तुं योगमायां समादिशदित्यन्वयः। स्पष्ट इति जन्मना स्पष्टे कृते। प्रतीकारो न भविष्यतीति परमानन्दप्राकट्याभावे सर्वदुःखनिवृत्तेरभावादितिभावः। या जगत्कारणेति द्वितीयस्कन्धनवमाध्यायसुबोधिन्यां स्पष्टमिदम्। दयात्वेन चिच्छक्तिः। 'सत्यं ज्ञानमनन्तं ब्रह्मे'ति स्वरूपलक्षणे निविष्टा वनमाला। तस्य चिद्रूपस्य माया या सा व्यामोहिका मिश्रा। सदंशस्य क्रियारूपा शक्तिः। आनन्दस्य जगत्कारणभूतेति भगवत आनन्दशक्तिः जगत्कारणभूता योगमाया। तेनाजस्यानन्दस्याविर्भाव इत्युक्तम्। आनन्द उपाधिर्जननेऽजस्य। योगमायेति तेन युजिर योग

इत्यस्य रूपं योग इति । दुःखपरिज्ञानार्थमिति दुःखपरिज्ञानमुद्यमान्तर्गतम्। भयं विदित्वेति भयेन कश्चिद् भगवन्मयतां गतस्तत्र कारणभयसत्तया भक्तैः सह निगूढभावकरणं कर्तुर्ज्ञानं विश्वभयस्य। विश्वात्मपदादक्षराभिन्नरूपेण वा विश्वभयज्ञानम्। 'अक्षराद् विविधसौम्यभावाः प्रजायन्त' इति। 'यथाग्नेः क्षुद्रा' इति मुण्डकोपनिषदश्च। सर्वं न भवतीति आनन्दलीलायां न भवतीति। क्वचित् पुस्तके केवलमिच्छयैव सर्वं भवतीति पाठः। अर्थस्तु स एव। सर्वमित्यस्येच्छारूपादृष्टकारणकमित्यर्थात्। अत्र साक्षात्सृष्टिरिति भेदः। 'निजनाथाना'मित्यत्र निजपदादिच्छया श्रुत्युक्तेक्षया नारदपञ्चरात्रोक्तमहालक्ष्मीरूपयैव न त्वक्षरशक्त्या भगवद्रूपाधारे इत्यर्थश्च। योगमाययेति आनन्दशक्त्यादेशः।

१०–२–७. गच्छ देवीत्यत्र आज्ञामेवाहेति शुकनिर्देशमेवाहेत्यर्थः। 'सन्दिष्टैवं भगवते'तिवक्ष्यमाणवाक्यात्। आज्ञा तत्कार्यं सन्देशः सनिर्देश इति। 'गर्भं' इतिश्लोकोक्ताक्रोशोप्य'थाह'मित्यत्रोक्ताथशब्दविवरणमिति टिप्पण्यां विवृतत्वादाज्ञामेवेत्येवकारः। 'मध्ये अर्धं'मिति तु तत्रैव वक्ष्यते। अत्र प्रथमश्लोकः षट्पदीरूपो ज्ञेयः। तथा च शुको नवभिः श्लोकैः भगवत्कृतामाज्ञामेवाहेत्यर्थः। तत्र गतेति द्वितीयचरणस्य तात्पर्यार्थः सामान्यत उक्तः। इममर्थमग्रे विशदयिष्यन्ति तदर्थमाहेत्यादिना। दैत्यावेशादिति 'शत्रुघ्नश्च मधोः पुत्रं लवणं नाम राक्षसं हत्वा मधुवने चक्रे मथुरा नाम वै पुरी'मिति नवमस्कन्धाल्लवणावेशात् तथा। अत एव कंसे कालनेमिः। गोकुलमेवेति गोपगोभिर्मुख्यतयालङ्कृतमितिविशेषणाद् व्रजं गोकुलमितिभावः। व्रजं गच्छ गोस्थानमिति संहितयैवकारः। सम्बोधयतीति 'देवी'तिपदेन। व्रजतीति व्रज इति व्युत्पत्त्याहुः जङ्गमत्वमिति। व्रज गतौ। गोकुलाष्टके 'श्रीमद्गोकुलजीवात्मे'त्युक्त्या देहत्वात् तेन भक्तानां वैकुण्ठेऽक्षरात्मका ब्राह्मदेहाः। आधिदैविकवैकुण्ठस्य गोपगोकुलस्य वा जातित्वेन तत्र गमनसम्भवात् जनपदस्याकृतौ शक्तेः। अत इति उक्तशक्यतावच्छेदकात्। स्थावरादिति टिप्पण्यां स्पष्टम्। स्तब्ध एवेति व्रजो भगवच्छरीरत्वात् स्तब्धः पिप्पलादिवृक्ष इव। तथेति उत्कर्षेण वर्तत इति। सुबोधिन्यां, तत्रेति गोकुले। मुग्धैरिति मायाकार्यमोहाश्रयैः। गोपा गोप्यश्च गोपा इति 'पुमान् स्त्रिये'त्यनुशासनात् सएकशेषः। चकाराद् भगवद्देहत्वेन गोकुलाष्टकात्, चकारेण गोपा वा। द्वन्द्वस्यैकत्वात् चकारेणैकेन चारितार्थ्यात्। गोपैर्गोपीभिः स्वदेहत्वेन गोभिश्चालङ्कृतमित्यर्थः। लौकिकी भाषा। ते उभय इति पुंस्त्वाद् गोभिरित्यत्राप्येकशेषः। गावश्च गावश्च वृषाः गावः तैर्गोभिरिति। उभये। गोगोपाः। शोभेति यथा घटो घटत्वेन शोभते। मा जातिः सा महानात्मा तामाहुस्त्वतलादय इति वाक्यपदीयात्। व्रजे नान्या जातिः। वैकुण्ठो गोलोक इति पर्यायशब्दौ। जीवरहितो देहो न शोभत इति घटत्वादिभिरेव घटादीनां शोभेति तैरेवेत्यत्रैवकारः पूर्वोक्तः। तदनुगुण एवेति गोप-

गोपीगवानुगुणः। यमुनाजलं पानार्थं वृक्षाश्छायार्थं तृणा भक्षणार्थं स्थलमुपवेशनार्थमित्येवम्। 'गोपा गोप्यश्च नः कु'र्विति कृष्णं प्रति सुरश्रुतिवाक्यादेवकारः। तेषामिति तत्रस्थानाम्। अत इति शक्यतावच्छेदकबलात् मुग्धानां तत्र स्थितत्वात् तद्दर्शनादेव सुखं स्वास्थ्यं तव भविष्यतीति निरूपितमित्यर्थः। अनेनेति नन्दस्य राजविरोधिसङ्ग्राहकत्वेनेत्यर्थः। 'उत्पथेन तु गच्छन्तं सोदरोपि विमुञ्चती'तिवाक्यात्। 'भ्रातरं नन्दमागत'मिति पञ्चमाध्यायीयवाक्यात्। वसुदेवपुत्रो नन्द इति नवमस्कन्धे। तत्त्वं न द्योतितम्। विशेषणस्य 'भ्रातर'मित्यस्य व्यावर्तकत्वात्। ननु 'नवभि'रित्यत्र सार्धनवभिरितिवक्तव्ये प्रतिज्ञाहानिरूपनिग्रहस्थानमिति चेत् तत्राहुः अत्र पादद्वयमिति। अत्रेति श्लोके, नवश्लोकीत्वात्। [1]पादद्वयमिति नवसङ्ख्यातोधिमुक्। किमित्तीति रोहिणी किमिति तिष्ठतीत्याकाङ्क्षानिवृत्तिर्यथा भवति तथा। निवृत्त्यर्थेर्थशब्दः। अन्या वसन्तीति रोहिण्यपि तिष्ठतीति किमिति तिष्ठतीत्याकाङ्क्षानिवृत्तिः। आकाङ्क्षार्थं वा, अग्रे प्रासङ्गिकमुक्तं, तत्र आकाङ्क्षानिवृत्तिः।

१०–२–८. अन्याश्चेत्यत्र गुप्तस्थानेष्विति गुप्तेषु स्थानेषु। 'गुप्तं रक्षितगूढयो'रिति विश्वः। स्थितिरिति वसन्ति स्थितिं कुर्वन्ति। ततः किमिति वासकथनस्याकाङ्क्षायाः -किं प्रयोजनम्। अतः प्रयोजनकथनाद्धेतोः प्रयोजनमाहेत्यर्थः। इतरगर्भेति इतरेषां पद्मगर्भाणां जरायौ स्थितिरस्य त्वाकाशेन्तर्वर्तिनि जठरे निर्लेपतया स्थितिरितिवैलक्षण्यबोधनार्थं विकृतजठरपदमुक्तम्। एवं विकृतत्वं, जायतेत्र जन्तुरिति जठरः। 'जने ररष्ठ चे'तिसूत्रेणान्त्यस्य नकारस्या'लोन्त्यस्ये'तिसूत्रेण ठादेशः अरप्रत्ययश्चेति प्रकृतिविकृतिरिति। यद्वा जठर इतरगर्भवैलक्षण्यार्थं तदित्यव्ययमित्यर्थः। प्रसिद्धमिति धामत्वेन प्रसिद्धिविषयम्। धाम तेजः स्थानं वेत्याशयेनाहुः भगवत्तेज इति। स्थानभूतमिति शब्दार्थयोर्नित्यसम्बन्धान् नान्य आश्रयः।

१०–२–९. अथाहमित्यत्र तर्हीति यदूनां भयभञ्जनं वैकुण्ठस्थितौ सत्यामेव कंसकृतस्य भयस्य यदूनामीश्वरसम्बन्धित्वज्ञानेऽभावाद् भवति न तु यदुषु मानुषीं तनुमाश्रितस्य सम्बन्धिज्ञानेतः स्थितौ को दोष इत्यर्थः। यद्वा स्थितौ रोहिण्या गोकुले स्थितौ। कंसभयेति अष्टमगर्भस्य कंसाद् भयम्। 'अन्याश्चे'त्यत्रान्येषां वेतिपक्षोक्तो 'रोहिणीवसुदेवस्ये'ति पादद्वयमधिकम्। को दोष इति पादद्वयमधिकमित्यत्र को दोषः। 'अन्याश्चे'त्यत्र भेदमतियोगिनिरूपणार्थमपि न पादद्वयापेक्षेति पादद्वयमधिकं को दोष इत्यर्थः। तत्राह ताद्दशविषये वागतीतपुरुषोत्तमाविर्भावं स्वसेवार्थमाह। अयमित्यादि माया योगमायानन्दशक्तिः स्वयं दयापरीत इति कृपात्वेन मायेन्द्रियाणि अतो दयापरीतो

[1] शोधपत्रमत्रे'तिग्रन्थकारैर्लिखितं परन्तु ग्रन्थपत्रेषु तथ प्राप्तम्।

गोविन्दः। संसारदुःखं बहिरुत्क्षिपतां सेवया स्थिरप्रज्ञाद्वारा भगवत्प्रेप्सूनां दैत्यस्थानापन्नः संसारस्तज्जदुःखनिबर्हणभक्तियोगवितानार्थं तदाविर्भावस्यावश्यकत्वात्। पृथावाक्यात्। तदुक्तं भक्तिमार्ग इत्यादिना। एवकारेणाक्षरयोगव्यवच्छेदः। 'य एवासि स सन् यजे', 'मुक्तोपसृप्यव्यपदेशात्', 'मुक्तानामपि सिद्धानां नारायणपरायणः सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुन' इति वाक्याच्च। अक्षरात्मकं जगत् सेवकम्। यदूनां निजेति यादवत्वेन यादवोपस्थितौ 'यदुषु संसारदुःख'मित्याद्युक्तानां सन्निवेशो ज्ञेयः। निजनाथत्वस्यावान्तरभेदैर्बहुविधत्वात्। स चेति पुरुषोत्तमस्य चतूरूपत्वात् पुरुषोत्तमश्चेत्यर्थः। समायास्यतीति सम्यक्त्वं वेदोक्तप्रकारेण दयापरीत एवायास्यति योनुभवात्मा वेदान्त उक्तः। 'आत्ममायामृत' इतिवाक्ये अनुभवात्मन इत्यस्य प्रकृतजीवपरतया तत्त्वेपि भगवतो देहपरिग्रहे आत्ममायेन्द्रियाणीति पक्षेनुभवपदस्य सत्यज्ञानानन्तानन्दपरत्वेपि बाधकाभावात्। कारणगुणाः कार्यगुणानारभन्त इति। 'भगवानपी'तिश्लोके ज्ञानशक्तिद्वारा पुरुषोत्तमाविर्भावार्थमुक्तम्। अत्र कर्मद्वारा पुरुषोत्तमाविर्भावार्थं प्रद्युम्नाविर्भावः सङ्ख्यातात्पर्यार्थमुच्यते। भक्तार्चनकर्मणा पुरुषोत्तमाविर्भावः। 'कर्मणा जायते जन्तुः कर्मणैव प्रलीयते' इति 'कर्मैव गुरुरीश्वर' इति चोक्तेः। 'ज्ञानशक्तिक्रियाशक्ती सन्दिह्येते परस्थिते' इति भाष्यात्। यद्वा। 'भगवानपी'त्यत्र कर्मद्वारा पुरुषोत्तमाविर्भावः। 'अथाह'मित्यत्र अहङ्कारेण पुरुषविधस्योपस्थितेः पुरुषविधब्राह्मणोक्तज्ञानशक्तिद्वारा पुरुषोत्तमाविर्भावार्थमुक्तम्। तदा समायातीत्यत्र सम्यक्त्वं वेदान्तोक्तप्रकारेणेत्यर्थो ज्ञेयः। तदनन्तरमिति रोहिण्युदरसन्निवेशानन्तरम्। अत्र शीघ्रमिति क्रियाविशेषणेनानन्तर्ये शीघ्रत्वबोधनेन व्यवहितानन्तर्यनिवारणा'दाविवेशांशभागेने'तिश्लोकसुबोधिन्युक्ताथशब्दार्थसङ्ग्रहाय। तत्त्रैव स्फुटिष्यति। तादृशानन्तरमत्राथशब्दार्थ इत्युक्तम्। विभागेनेति चतुर्विधकार्याचरणकृतो यः स्वरूपव्यूहविभागस्तेनेत्यर्थः। एवेति 'तस्य माता न माता पिता न पिते'तिश्रुतेरेचकारः। प्रद्युम्नस्तु कर्मप्रधान इति मात्रादिकं सम्भवति। अत्र सङ्कर्षणाविर्भाव इति निबन्धे सङ्ख्यातात्पर्यार्थं प्रद्युम्नाविर्भाव इत्युक्तम्। 'न माते'त्यस्य मेधावीति निघण्टावर्थः। एकरसत्वाद् वैकुण्ठस्यस्य तस्यात्रागतौ ह्येकरसत्वभङ्गमाशङ्क्यानुकरणधर्मेणाभङ्गमाहुः अथाहमिति। तथाहमपीति तथा अहमेकरसोप्यनुकरणधर्मेण गमिष्यामीत्यर्थः। 'अनुकृतेस्तस्य चे'ति व्याससूत्रात्। न त्वहमिति प्रद्युम्नस्तु पुत्रो भविष्यति च। अग्रिमेति 'त्वं यशोदाया'मित्याग्रिमाज्ञापने। आज्ञामध्यपात्यपि सर्वमाज्ञैव। नवधाभक्तिमध्यपात्यर्चनं भक्तिरितिवत्। तस्या इत्यादि आनन्दशक्तिभूताया योगमायायाः। तेनेयं वैकुण्ठे तिष्ठति। कृपात्वेन मायेन्द्रियरूपापि। गोविन्दत्वोपयोगिनी। मोहिका तमोरूपा 'न यत्र माये'त्यनेन 'प्रवर्तते यत्र रजस्तमस्तयोः

१. भा।

सत्त्वं च मिश्र'मित्यनेन द्वितीयस्कन्धनवमाध्याये निषिध्यते। आज्ञापयतीति साज्ञां करोति तामाज्ञापयति। भविष्यसीत्याज्ञयेतिशेषः। स्तन्येत्यादि अष्टमे मासेऽपत्यस्नेहेन स्तन्यमिति लोकः। मोहेति मोहभिन्नमोहसदृशजननार्थम्। योगमायाया नित्यक्रीडास्थत्वेन तमोमोहाभावात्। मारणार्थमिति अवस्तुत्वेन क्लिष्टकर्मत्वाभावात्।

१०-२-१०. अर्चिष्यन्तीत्यत्र उत्पाद्यत इति 'नन्दपत्न्यां भविष्यसी'त्यत्रोत्पादनार्थकभवतेः प्रयोगात्। 'परो भवती'त्यत्रेव। तस्या इति योगमायायाः। तत् उत्पादनं अनिष्टं भगवदेकशरणत्वात्। 'सकृदेव प्रपन्नो यस्तवास्मीति च यो वदेत् अभयं सर्वभूतेभ्यो ददाम्येतद् व्रतं हरे'रिति अभयं फलम्। भगवतोऽनिष्टम्। न हि शरणागता आवर्तन्त इति भावः। 'त्रया ह प्राजापत्या' इति बृहदारण्यकादाहुः देवांशा इत्यादि। काम्या इति उक्तकामनासु पुत्र्यहं स्यामित्यादिरूपास्विच्छासु योग्या विषया इति काम्याः पुत्रादयः सोपायाः उपाया अर्चनादयस्तैः सह वर्तमानाः। विषयाः। वरा इति अनुपाया विषयाः। यथा हिरण्यकशिपोर्वरः। क्रिया इति स्वरूपभूतायाः वरदानार्थं वक्ष्यमाणमन्त्रैः प्रकटायाः साक्षात्स्नापनादिरूपा सेवा तस्याः। अपिशब्दात् मनुष्याणां च बाधिका वाममार्गवद् विकारसम्भवेन सेव्यसेवकभावविघातिकेति हेतोस्तादृशबाधनिवृत्त्यर्थं दूरसेवासाधकं धूपादिसाधनत्रयं निर्दिष्टमित्यर्थः। दीपस्त्विति स्वप्रकाशत्वोक्तेरियमानन्दशक्तिरूपा जगत्करणे प्रकाशयुक्ता। दीपापेक्षा तु प्रतिमायामितिभावः। दानमिति स्वसत्त्वध्वंसपूर्वकपरस्वत्वोत्पादनं दानम्। न तु हिंसनम्। अत एव पुरुषपशुदानानन्तरं हिंसने भद्रकाली उच्चचाट। 'पशुना रुद्रं यजत' इत्यादिस्थले पशुं रुद्राय ददातीत्यन्तमेव। 'छागस्य वपां मेदो जुहुधी'त्यादिस्थले होमो दानमेव। हु दानादनयोरिति धातुपाठात्। पूर्वं काम्यादीनामिति पूर्वं 'सर्वकामवरेश्वरी'मितिपदे। आदिना वरः। तद्दातृत्वं च कामशब्दात् परस्य यकारस्य वर्णस्य लोपश्छान्दसः। यतः काम इच्छा न तु पुत्रादयः लक्षणाप्रसङ्गात्।

१०-२-११. नामधेयानीत्यत्र मन्त्ररूपाणीति मत्रि गुप्तभाषणे। गुप्तभाषणरूपाणि। मन्त्रैः रूप्यन्ते व्यवह्रियन्ते तानि मन्त्ररूपाणि। वर्तमानसामीप्य इति भविष्यत्काले। करिष्यन्तीत्यर्थः। भविष्यत्काले वर्तमानत्वम्। अधिष्ठानानीति प्रतिमारूपाणि। पूर्ववदिति देवांशा दैत्यांशाश्च निवारिताः 'मनुष्या' इत्यत्रेव। सर्वत्रेतिशब्द इति इतिः प्रसिद्धे। 'इति प्रकरणे हेतौ प्रकाशादिसमाप्ति'ष्विति विश्वं, आदिपदार्थः प्रसिद्धिः। तथा च दुर्गेतिनामधेयं करिष्यन्तीत्यत्र। 'दुर्गां देवीं शरणमहं प्रपद्य' इति मन्त्रकाशीभूदेशाभ्यां इतरमन्त्रभूमेदेन दुर्गायाः प्रसिद्ध्या नामधेयम्। करिष्यन्ति। ताभ्यां दुर्गासान्निध्यमधिष्ठानेत्रेतिशब्दः प्रसिद्धिवाचकः सान्निध्यतात्पर्यकः। 'इति स्वरूपे सान्निध्ये विवक्षानियमे मते' इति विश्वः। स्थाने देवालये, एवमन्यत्र।

१०-२-१२. कुमुदेत्यत्र कन्यकेति अम्बिकायाः पूर्वं व्याख्यानं भूदेशमन्त्राधिष्ठानस्थानव्याख्यानप्रायपाठात्। प्रसिद्धानीति अयमर्थः। आनन्दशक्तियोगमायाया नामानि। कृष्णा नारायणी माधवी भद्रकाली योगमायाया एव नामानि। 'देवः सुवेधने राज्ञी'त्युक्त्वा 'देवी भट्टारिकायां चे'ति विश्वः। अत्र 'गच्छ देवी'त्यत्र देवीपदं राज्यां, ईश्वरस्य राजाधिराजत्वात्। साऽनन्दशक्तिर्जगत्कारणभूता योगमाया। कुमुदा मूलदेवीनाम सती वायुमायानाम 'अत एव प्राण' इति वैयासस्त्रात्। कन्यका मूलदेवीनाम सती नन्दगोकुलस्त्रीणां नाम। शारदा तथा सती हिरण्यगर्भमायानाम। परिशेषात्। माया तथा सती(=रुद्र=शङ्कराचार्यमाया)बुद्धावतारमायानाम। दुर्गा चण्डिकाम्बिका-ईशानी च तथा सत्यः रुद्रस्य मायानामानि। विजयावैष्णव्यौ तथा सत्यौ विष्णुमाया नामनी। विजयार्जुनस्य नरावतारस्य वा। तथा भद्रकाली। सुभद्रा। भद्रा काली भद्रकाली। सत्यभामेत्यत्रैव अत्र कृष्णा तथा सती कृष्णतुर्यमायानाम। नारायणी नारायणमायानाम। माधवी माधवमायानाम। एतानि नामानि सान्निध्यार्थं मन्त्ररूपाणि। मन्त्रि गुप्तभाषणे। व्युत्पत्तिभिर्नामानि गुप्तभाषणरूपमन्त्राः। अथ मन्त्रदेशौ। सान्निध्यातिरिक्तफले यत्राभियुक्तानां मन्त्र इति समाख्या स मन्त्रः। अस्यन्तत्कान्तोत्तमपुरुषान्ता वा मन्त्राः। अत्र कृष्णायाः मन्त्रदेशौ भुवि। उदयास्ताचलौ। लोकालोकाद्रिशिखरं वा। अत्र मन्त्रलक्षणं वेदत्वम्। 'मन्त्रब्राह्मणयोर्वेदनामधेय'मिति पूर्वमीमांसायाम्। 'इतिहासपुराणं वेदानां पञ्चमो वेद' इति छान्दोग्यश्रुतेः। पुराणानामपि वेदत्वम्। तत्र मन्त्रस्तु 'ऋगावर्ता यजुर्वेदा सामस्तोमोर्मिमालिनी'त्याद्युक्त्वा'सुपर्णपत्राशुगतिर्द्विजस्कन्धममाश्रिता,साङ्गोपाङ्गद्विजा औघप्रादुष्कृतपदक्रमा। समन्त्रब्राह्मणा सूक्तकल्पकल्पितसत्क्रिये'ति। पद्मपुराणे मारीचिसर्गे यमुनामाहात्म्ये स्फुटम्। नारायणी 'नारायणममो गुणै'रितिवाक्यात् पुरुषविधब्राह्मणोक्तपुरुषविधे निविष्टा। नारायणमन्त्रदेशौ। प्रसिद्धौ। माधवीत्यत्र पुंयोगलक्षणङीप्। अवतारमन्त्रदेशौ। भद्रकालीत्यत्र मन्त्रः 'कात्यायनि महामाये महायोगिन्यधीश्वरि नन्दगोपसुतं देवि पतिं मे कुरु ते नम' इति। देशोनन्ती। कुमुदा कौ[1] मोदते। कर्तरि क्विप्,टाप्। वायुमाया। कौमोदिकी गदा वायुतत्त्वम्। अन्तरिक्षदेशः। 'वायवः स्थोपायवः स्थे'तिमन्त्रः। उत्तमपुरुषान्तत्वात् उपायवो मनुष्याः। कन्यकेत्यत्र 'कन्यकुमारि धीमही'तिमन्त्रः। माथुरो देशः। शारदेत्यत्र शारदस्य स्त्रीत्वविवक्षायां टाप्। शरदोयं शारदः शरदृतुसम्बन्धिनयः प्रजापतिः। 'संवत्सरो वै प्रजापति'रितिश्रुतेः। 'शारदः पीतमुद्गे स्यात् शालीने प्रतिमे नवे वर्षेथ जलपिप्पल्या'मिति विश्वः। मन्त्रः भद्रकाल्याः। भद्रा काली भद्रकालीतिप्रयोगत्रयात्। देशः उत्तरः। मायेत्यत्र मन्त्र उक्तेषु कश्चित्। देश उत्तरः। दुर्गेत्यत्र 'दुर्गां देवीं शरणमहं प्रपद्ये' इति मन्त्रः

१. कु। २ पत्र।

उत्तमपुरुषान्तत्वात्। देशः काशी। दुःखेन गम्यते ज्ञायतेस्याम्। 'सुदुरोरधिकरणे' इति डः। दुःखेन दुष्टैर्वा गीयते,गैशब्दे। आतोनुपसर्गे कः। 'दुर्गं कोटे दुर्गमे च दुर्गा तु नीलिकोमयो'-रिति हेमचन्द्रः। दुर्गा उमा सती क्रोधे तस्याः स्वरूपं ज्ञातमिति। चण्डिकेत्यत्र चडि कोपे। ण्वुल्। टाप् पचाद्यचि, बाह्वादिभ्यश्चेति ङीप्। 'चण्डी कात्यायनी देव्या'मिति कोशात्। 'कात्यायनि महामाये'ति मन्त्रः। कामरूपदेशः। अम्बिकेत्यत्र अम्बैवाम्बिका। अबि शब्दे। भ्वा०आ०से० अम्बते इत्यम्बा। पचाद्यच्,टाप्। 'अम्बिका पार्वती मात्रोर्धृतराष्ट्रस्य मातरि'। मन्त्रः पार्वत्याः। शिवस्तुतिः पर्वतस्येयं पार्वती। तस्येदमित्यण्। 'पर्वते राध्यास'मिति संहितायाः। देशोम्बिकावनम्। ईशानीत्यत्र ईशस्य स्त्री। इन्द्रवरुणेति ङीषानुकौ। 'जाने त्वामीश विश्वस्ये'ति परशिवस्य स्तुतिर्मन्त्रः। स्तुतौ ईशपदात्। देशो वैकुण्ठः। 'ज्ञानेन भक्ते'-त्यथर्वश्रुतेः। भक्ता शिवः। विजयेत्यत्र जयतीति जयः, विशेषेण जयो विजयो विष्णु-स्त्रीत्वविवक्षायां टाप्। मन्त्र उत्कलदेशे। देश उत्कलः। वैष्णवीत्यत्र विष्णोरियं वैष्णवी। तस्येदमित्यण्। कुल्लापुरे मन्त्रः। देशः कुल्लापुरम्। विजयोर्जुनः तस्य विजया। मन्त्रदेशौ द्रष्टव्यौ। सुभद्रेत्यत्र मन्त्रः 'यया सृजस्यसि जगन्ति नाथ वक्षःसरोजाश्रयया स्वशक्त्या तां भद्ररूपां जगदाश्रयां ते देवारणिं पादयुगं नतोस्मी'ति स्कन्दपुराणे पुरुषोत्तम-क्षेत्रमाहात्म्ये। उत्कलदेशः पुरुषोत्तमक्षेत्रम्। भद्रकाल्या अप्ययं मन्त्रः। अत्रत्यकाल्या अपि।

१०–२–१३. गर्भसङ्कर्षणादित्यत्र तस्या इति योगमायायाः। प्रमाणमिति ऐतिह्यं प्रमाणम्। यद्वा महान्तः प्राहुः महतामन्तःकरणं प्रमाणम्। जानातीच्छति यतत इति। एवेति अनवतारदशायोगव्यवच्छेदक एवकारः। सोप्यत्रेति अत्र शेषे सङ्कर्षणः। अपि-शब्दाद् वासुदेवांशश्चाविष्टः। 'वासुदेवकलानन्त' इतिश्लोके वासुदेवांशाविष्टत्वोक्तेः। देवक्यां स्थितिकाले वासुदेवांशाभावेपि विविक्तव्यूहप्रकरणात्। लोकव्यवहारकाले 'वासुदेव-कलानन्त' इतिश्लोकादस्त्येव। अत एव बलहतानां मोक्षः। मोक्षस्य वासुदेवकार्यत्वात्। वदन्तीति शास्त्राभावेन लोकदृष्टं नाम वदन्ति। लोकस्येति 'लोकरमणा'दित्यस्य विग्रहः। रामशब्दविग्रहमाहुः रमयतीति। रञ्जयतीति राजेति राजपदस्य मनुप्रसङ्गे विग्रहवत्। 'राम-क्रीडा रमणात्मिके'त्युक्तम्। अत्राग्रिमनामहेतुः। प्रयोजकहेतौ णिजन्ताद् घञ्। बाहुलकात्। असम्मत्यर्थ इति रमयतीत्यलौकिकविग्रहे प्रयोजककर्तर्यसम्मत्यर्थः। प्रयोजकहेतौ तु सम्मत्यर्थः। स्वरमणस्थानत्वेनानन्तत्वेनैव प्रयोजकहेतौ घञि कृते रामः तत्र रामत्वं न तु प्रयोजककर्तरि घञा रामत्वं भगवत्सम्मतम्। न वा लोकस्य रमणात् इत्येवमसम्मत्यर्थः। रामशब्दस्य भगवद्रमणसाधकत्वमर्थोग्रे वाच्यः। प्रयोजकहेतोरधिकरणस्य हेतुत्वविवक्षाङ्गी-कारात्। आश्चर्याभावमाशङ्क्याहुः सम्बुद्धीति। व्यवहारार्थ इति हे रामेति व्यवहारार्थः। शुकव्यवहारः। पूर्वनाम्नि हेतुभूतं नामेत्याहुः बलभद्रमिति। एवं च भद्रः, भगवद्रमणे

प्रयोजकहेतुः। उच्छ्रूय उद्गमः तस्मात्। भद्रः। शयनमपि बलेनैव बलेन भद्र इत्युक्तविग्रहात्।

१०-२-१४. सन्दिष्टैवमित्यत्र पूजाद्यर्थमिति सन्देशपूजाद्यर्थम्। सन्देशे वेदत्वज्ञापनं पूजा। आदिना सन्देशप्रवर्तनम्। 'तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिना'मिति सप्तदशाध्यायगीतायाः। तदर्थमित्यर्थः। 'त'दिति मूलस्यार्थः। तत्सर्वमित्यादि।

१०-२-१५. गर्भे प्रणीत इत्यत्र तत्कार्यमिति योगमायाकार्यम्। 'निद्रयापगतस्मृति'रितिवाक्यात् निद्रायाः स्मृतिनाशकत्वेन सर्वे न गर्भाकर्षणं पश्यन्ति। योगनिद्रात्वेन योगमाया यदा कर्षन्ती जाता तदा तत्कार्यं सर्वस्मृतिनाशो जात इत्याहुः कर्षणेति। तेनेति अधःपतनकथनेन। पञ्चम इति अधःपतनज्ञापितः। 'चतुर्थेन तु पिण्डेन अस्थिमज्जा प्रजायते पञ्चमेन तु पिण्डेन हस्ताङ्गुल्यः शिरोमुखम्। षष्ठेन कृतुपिण्डेन हृत् कण्ठं तालु जायत' इति पिण्डोपनिषच्छ्रुतेः। मासि मासि पिण्डाः। विशब्दार्थमाहुः अतीति। क्रुश आक्रोशे। हैमधातुपाठे तु क्रुश रोदनाह्वानयोः भ्वादिः परस्मैपदी अनिट्। 'नानुध्यायान् बहून् छब्दा'निति श्रुतेर्निषिद्धः।

१०-२-१६. आविवेशेत्यत्र अथाक्रोशानन्तरमित्यादि अत्र टिप्पण्यां भावानवेति अत्र हि श्रीशुको'थाहमंशभागेने'ति भगवद्वाक्यमनननिष्ठः। 'ज्ञानेन भक्त्ये'तिश्रुतेः। तन्मनने सामान्यप्रकारकजिज्ञासाया विशेषप्रकारकजिज्ञासाजनकत्वं स्फुरितं सद् रसपरवशदशायां शुकमुखादमृतद्रवसंयुतं विगलित'मंशभागेने'तिपद'मथ'शब्दस्मारकम्। पदजन्यपदार्थोपस्थितेः शाब्दबोधे कारणत्वात्। तदुक्तं 'संयोगो विप्रयोगश्च साहचर्यं विरोधिते'त्युक्त्वा 'विशेषस्मृतिहेतव' इति काव्यप्रकाशे। 'एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारक'मिति च। तथा 'चांशभागेने'ति पद'मथ'पदस्मारकमि'त्यनागतमतीतं चे'तिवाक्याद् दृष्ट्वा'थ'पदमेव मण्डूकप्लुत्यावर्त्योपनिबबन्धुरिति भावस्तस्यानवबोधात्। तदपि दर्शयन्ति स तथा हीति। निदर्शनार्थ इदमव्ययम्। इह हीति ग्रन्थे हि। 'अथाहमंशभागेने'तिश्लोकैकवाक्यतायै आहुः शीघ्रं स्वागमनार्थमित्यादि। एवेति अन्यथा सङ्कर्षणाविर्भावानन्तरमाविवेशांशभागः स्यात् विलम्बेन। प्रकृत उपयोगं वक्तुमाहुः आक्रोशस्त्विवति। प्रकृतेति शीघ्रागमनेनुपयुक्तः। भगवद्वाक्यस्याथशब्दार्थतात्पर्येति 'अथाहमंशभागेने'ति भगवद्वाक्यम्। आनन्तर्यमथशब्दस्य वाच्योर्थः। शीघ्रं तात्पर्यार्थः। तस्य कथनाय। तदित्यम्। आनन्तर्य'मथाहमंशभागेने'त्यत्राव्यवहितानन्तर्यं न विवक्षितम्। 'अथाह'मितिश्लोकसुबोधिन्याम'थ शीघ्रं तदनन्तरमेवे'त्युक्तेः। तेन शीघ्रं आक्रोशानन्तरं विस्रंसनज्ञानानन्तरमेवेति तात्पर्यार्थः। सोत्र 'गर्भे प्रणीत' इति श्लोकेस्ति। अतस्तत्कथनायेति ज्ञापत इत्यर्थः। प्रभुबुद्धीति अभिधाप्रतिपाद्यं तात्पर्यप्रतिपाद्यं च। स पदार्थ इति

तात्पर्यमात्रप्रतिपाद्यः। श्रीशुकेनेति रसपरवशेन जन्मोत्सवे। पौरविक्रोशनतात्पर्यमाहुः अयमर्थ इति। जन्मरूपः। 'जन्म गुह्यं भगवत' इति 'गूढं ब्रह्मणि वाङ्मये'-इति च। तत्सम्पत्तिरिति जन्मनो गूढत्वस्य सम्पत्तिः। तत एवेति अन्यथाज्ञानादेव। जन्माज्ञानसूचनेन। सुबोधिन्यां आक्रोशानन्तरमिति विशेष्यत्वादितिभावः। विशेष्यं विस्रंसनज्ञानं भगवन्निष्ठमपि। प्रकारान्तरेण मङ्कर्षणज्ञानात् प्रकारान्तरेण विस्रंसनज्ञानत्वेन भ्रमविषयेन। एवकारस्तु जानातीच्छति यतत इति प्रणाड्या। देवक्यामागत इति यद्यपि मूले देवकीकर्तृकं धारणमुक्तं तथापि तत्सर्वमल्पज्ञानां प्रतीत्यर्थमुक्तं, वस्तुतस्तु भगवान् स्वयमेवागत इति तत्रैवा'त्मभूत'मित्यस्य व्याख्याने वक्ष्यते। अतोत्र भगवत्कर्तृकत्वमेव मुख्यमिति तथोक्तम्। नृसिंहेत्यादि नृसिंहः काष्ठजः, हंस एकादशस्कन्धत्रयोदशाध्यायेऽङ्कस्मात्। आदिना नारदः 'उत्सङ्गान् नारदो जज्ञ' इति। तस्येति शरीरस्य। तथोत्पत्तिरिति 'अथाहमंशभागेने'तिश्लोके प्रद्युम्नभागेनोत्पत्तिरुच्यते इत्यर्थः। तथोच्येतेति प्राकट्यत्वेन आविर्भाव उच्येत। आनकदुन्दुभेरित्यादि शब्दात्मकस्य विशुद्धसत्त्वस्य मनः आविवेश। भगवत्प्राप्तिरुक्ता साऽजुष्टग्राम्यविषयस्य वरहेतुकी वेदत्वात्। 'यत्र वेदा न वेदा'-इति श्रुतेः न वेदाः मेधाविनः। अतः प्रद्युम्नांशप्राधान्येन प्राप्तिः। भूमविद्यां विनापि। भक्तित्वेन पुरुषोत्तमप्राप्तित्वेन कार्यकारणभावात्। अतो भक्तानां भूम्यादीनां दुःखनिवारणे भक्तिः कारणमिति भूम्यादिभक्त्या भूमविद्यया च भगवानाविवेश। आनन्दरूपः। 'मन आनन्द'मितिश्रुतेः। आनन्दोस्यास्तीत्यानन्दं अर्शआद्यच्। अत एवां- 'शानां भागेन विभागेने'त्यर्थं 'अंशभागेने'त्यस्य वक्ष्यन्ति। मन आनन्दं आनन्दोस्यास्ती- त्यानन्दमित्युक्तम्। स आनन्दो ब्रह्मेति, 'ब्रह्म तर्हि' अग्नि'रितिश्रुत्यभिप्रेताग्निरित्यग्निदृष्टान्तेन स्वरूपमाहुः अयोगोलक इति। अन्यथेति उक्तव्याख्यानाभावे। 'अंशभागेने'त्यत्र षष्ठीतत्पुरुषं व्याख्याय कर्मधारयं व्याकुर्वन्ति स केचित् त्विति। आहुरित्यस्वरसस्तु प्रसिद्धसमासत्यागः। पुरुषोत्तमस्त्विति अकारकः भक्तैः सह निगूढभावकरणं करोति यः सोर्थः परं ब्रह्म। भूमविद्यावत्त्वान् नन्दसेत्येवकारः। माययेति मायेन्द्रियाणि कृपा वा तद्द्वारा कारकत्वाय। 'मायया सह जात' इत्यत्रोपपत्तिः। 'योगमायाऽजनि नन्दजायये'तिवाक्ये मायाजनिरुक्ता, पुरुषोत्तमाविर्भावस्तु 'अदृश्यतानुजा विष्णो'रिति वाक्ये'नुजा'पदेन प्रकाशे साधितः। तथाहि यद्यपि मुहूर्तानन्तरं सा जातेत्यनुजात्वमस्त्येव तथापि स शब्दः सोदरानुजायां योगरूढ इति सोदरत्वलक्षणसामानाधिकरण्यमन्तरेणानुपपद्यमानस्तत्सोदराग्रजत्वेन भगवन्तं गमयति। यतो यदिदमनुजात्वं शुकेनोक्तं तन् नन्दगृहे भगवतो मायाश्च मायारूपशक्तिसाहित्येन प्रादुर्भावबोधनार्थमेवोक्तमिति निश्चय इति। अत्र तुना वेदवेदान्तसारे श्रीभागवतेयोगोलके वह्निरिवेति दृष्टान्तेन वेदे वसुदेवे-

ग्निर्वासुदेव उक्तः। अग्निर्गतावित्यस्माद्धातोर्निष्पन्नोग्निशब्दः। अतः क्रियाकर्त्वेन वह्नि-व्यवच्छेदः। यो वेदे ब्रह्मत्वेनोच्यते, व्यूहचतुष्टयश्च। पुरुषोत्तमस्तु अग्निरूपक्रियाश्रयः। आनन्दात्मा वेदान्तोक्तः। सुन्दरः पुरुषः पुरुषोत्तमः सर्वात्मभावगम्यः। पूर्वोक्तस्तु प्रति-पादकगम्यो वररूपसत्यवाग्गम्यश्च। पुरुषोत्तमस्तु ज्ञानाश्रयत्वेन। ज्ञानं सर्वात्मभावरूपं ज्ञेयम्। 'ज्ञानशक्तिक्रियाशक्ती सन्दिह्येते परस्थिते' इतिभाष्यात्। शास्त्रद्वयार्थौ ज्ञानक्रिये। स्वरूपलक्षणे 'सत्यज्ञानपदाभ्यां तत्प्रधानाभ्यां' प्रतिपाद्ये। अत्र टिप्पण्यां उक्तवाक्येति 'अथाहमंशभागेने'त्युक्तवाक्ये'ह'मितिशब्दस्य व्यूहतद्विशिष्टपुरुषोत्तमवाचकत्वेन साधन-व्यवस्थया नन्दवसुदेवगृहयोराविर्भाव उक्तः। यदि तूक्तवाक्ये 'देवकीजठरभू'रिति 'तव सुत' इतिवाक्ये तदा तयोरनुरोधादित्यर्थः। अनुरोधस्तु श्रुतित्वाद् वाक्यवक्त्रीणाम्। अवश्यमिति नन्दस्य सर्वात्मभाववत्त्वाच्च। नैयायिकाशङ्कामाहुः तत्र स्वरूपेति। उभयत इति नन्दगृहे पुरुषोत्तमाविर्भावे रूपद्वयापत्तिः। 'प्रागयं वसुदेवस्य क्वचिज्जात-स्तवात्मज'इति गर्गवाक्यादुभयत्राविर्भावानङ्गीकारे वाक्यविरोधापत्तिरित्युभयतः पाशो दूषणं तत्साधनं वाक्यरूपा रज्जुः। नन्दगेह इति सर्वात्मभाववत्त्वेन सदाऽऽविर्भूतस्य भगवान् गृह एव तिष्ठतीति सुबोधिन्यां गृह्या देवता पुरुषोत्तम इत्यर्थः। अस्यैव वसुदेव-गृहे प्रादुर्भावो 'अदृष्ट्वान्यतमं लोके शीलौदार्यगुणैः समं अहं सुतो वामभवं पृश्निगर्भ इतिश्रुत' इत्यत्रास्मच्छब्दार्थपुरुषस्याहङ्कारस्य वा मूलरूपे वाच्यस्य 'बभूव प्राकृतः शिशु'-रितिरूपं दर्शनमित्यर्थः, गर्भबालकपदयोः सामानाधिकरण्यात् पृश्णिगर्भो जातः। वसु-देवेन भक्त्या च परिभावितोप्यजुष्टग्राम्यविषयपरिभूतभक्त्या भावित इति। पर्यनर्थकः। अतः पुरुषोत्तमस्तु नन्दगृह एव जात इत्यर्थः। कार्यमस्तीति उक्तवाक्यविरोधाभावरूपं कार्यं अविहितं भक्तिरसानुभावनरूपं नाट्यरूपं च कार्यं 'तमद्भुत'मित्यनेनोक्तस्य रूपस्य स्वस्मिन् स्थापनं च कार्यं ज्ञेयम्। एतत्संवादानन्तरं नन्दगृहाविर्भावस्तस्यैव 'बभूव प्राकृतः शिशु'रिति दर्शनं, तदैव मायाविर्भावः, एतेषामानन्तर्यं शतपत्रवेधवत् दुर्लक्ष्यमिति त्रयम-प्येककालिकमेव ज्ञेयम्। ज्ञायत इति पश्चात् पुरुषोत्तमो मायया सहितस्तु नन्दगृह एव जात इत्यर्थः। अग्रिमकार्यार्थमिति उत्तरार्धे रुक्मिण्युत्थापनादि कार्यम्। सर्वेषां चरि-त्राणा'मित्यस्यार्थः। यतो मुक्तीत्यादि तृतीयान्तेन व्यूहत्रयकार्यमुक्तम्। द्वन्द्वान्ते श्रूयमाणं 'सम्बन्धित्वेने'तिपदं प्रत्येकं सम्बध्यते। आविर्भावकरणम्। अनिरुद्धकार्येण सह त्रयाणां कार्याण्याहुः पित्रादीति। मुक्तिसम्बन्धित्वेनेत्यत्र सम्बन्धो जन्यजनकभावः। भूभारहरण-सम्बन्धित्वेनेत्यत्र वध्यघातकभावसम्बन्धः। वंशसम्बन्धित्वेनेत्यत्राधाराधेयभावः। मनस आधारत्वात्। पित्रादिसुखदानं पञ्चमाध्याये उत्तरार्धेपि। अनिरुद्धकार्यम्। षष्ठाध्याये पूतनाविधानाशनमुत्तरार्धे आसुरचमूसंहरणं मद्धर्पणकार्यम्। दशमाध्याये यमलार्जुनमोक्षः

उत्तरार्धे चैद्यादिमोक्षो वासुदेवकार्यं, द्विजसम्मानं गर्गसम्माननं अष्टमाध्याये, उत्तरार्धे विप्रार्चनाज्ञया। प्रद्युम्नकार्यं परिशेषात्। आदिना कृष्णकेशकार्यम्। असत्कुलसंहरणम्। पुरुषोत्तमसहस्रनामस्तोत्रे दशमस्कन्धनामसु स्पष्टम्। एवं च सर्वेषां वासुदेवादिमूर्तिकृतानां चरित्राणामित्यर्थः। अत्र श्रुतेति 'नन्दगेह' इत्यादिनोक्तेर्थे। वाक्यश्रुतस्य अर्थस्य आपत्तिः आसमन्तात् प्राप्तिरर्थान्तरकल्पनेन। अर्थापत्तिलक्षणं तु 'प्रत्यक्षेण शब्देन वा प्रमितस्यार्थस्यार्थान्तरं विनानुपपद्यमानस्योपपत्तयेऽर्थान्तरकल्पना'। दृष्टार्थापत्तौ जीवन् देवदत्तो गृहे नास्तीत्युदाहरणम्। पीनो देवदत्तो दिवा न भुङ्क्ते इत्यत्रैव। इयं मानान्तरमिति मीमांसकाः। अनुपपत्तिरिति उक्तेर्थे काल्पनिकत्वसम्भावनया मानानुपपत्तिः। तन्नियतेति मायाया नियतकार्यं रूपान्तरं तद्विषयमानुपत्वस्वीकरणस्यानिरुद्धस्याप्युत्पत्तिः। पित्रादिसुखदानरूपानिरुद्धकार्यात्। अत्र माया कृपा। 'बभूव प्राकृतः शिशु'रित्यत्र 'प्रकृतिः स्वरूप'मितिव्याख्यानात्। सुबोधिन्यां,मानाकाङ्क्षायां श्रुतार्थापत्तिं प्रमाणयन्ति स उभयत्र प्राकट्ये अन्यथेत्यादि। तव सुत इतीति व्रजे देवकीसुतत्वाप्रसिद्धावपि देवकीजठरभूतत्वस्य श्रुतित्वेन यथार्थज्ञानसत्त्वात् कथनम्। तादृशीभिरेव तव यशोदायाः सुत इत्युक्तत्वादुभयत्र प्राकट्यं मन्तव्यमितिभावः। श्रुतस्य वाक्याभ्यामुभयत्र प्राकट्यरूपार्थस्यापत्तिरासमन्तात् प्राप्तिरर्थान्तरस्य टिप्पण्युक्तस्य कल्पनेन। नन्वत्र प्रादुर्भावो नोच्यते प्रकरणाभावात्। किन्तु श्रीयशोदादिप्रतीतिरेवानूद्यतेतो नेदमत्र मानमित्याकाङ्क्षायामाहुः माययेत्यादि। तृतीयाध्याये रूपान्तरं यदुक्तं तत्कृपारूपमायाकरणकम्। तस्य करणभूता माया च चतुर्थाध्याये निरूपितेति मायानिरूपणेनैव चतुर्थाध्याये तस्य मायानियतकार्यरूपरूपान्तरविषयमानुपत्वस्वीकरणस्यानिरुद्धस्योत्पत्तिर्निरूपितेत्यर्थः। तृतीयाध्यायपर्यन्तं न मानुपत्वस्वीकारः किन्तु व्रजगमनानन्तरं मायायां मिलितायां तत्कार्यविषयस्य मानुपत्वस्य स्वीकार इत्याशयेनाहुः उत्पत्तेरित्यादि। योगमायोत्पत्तेः सम्भ्रमोऽजस्य मानुपत्वेन ज्ञानम्। मायायाः सङ्कर्षकत्वात्। तमोरूपायाः परस्मिन् ब्रह्मणि निषेधात्। मानुपत्वाश्रयपुरुषोत्तमोत्पत्तेर्निरोधः सफल इति ज्ञेयम्। सम्भ्रम इति उत्सवः। अनात्मजे आत्मजत्वेन ज्ञानमिति सम्यक् भ्रमः। अन्यथा उत्सवस्य राज्ञाऽपृष्टत्वाच्चतुर्थाध्यायोत्तरं 'व्रजे वसन् किमकरो'दित्यस्योत्तरभूतं पूतनामोक्षादिकमेव वदेत् न तु सम्भ्रममिति। जननं मनस इति भगवदधिष्ठानस्य। 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठती'ति गीतावाक्यात्। 'मनोमात्रमिदं ज्ञात्वे'ति वाक्याज् जननं मनसः। मायया सह जात इति 'माया मनः सृजती'तिचतुर्थस्कन्धः। 'तन्मनोकुरुते'ति बृहदारण्यके। 'मायाद्वारा मनःसृष्टि'रिति पुराणमतम्। अत एव माया भीष्मस्तुतौ क्षवादि दर्शयतीति।

१०–२–१७. आत्मनीति मनसि। स्वतोपीति विशुद्धसत्त्वस्य ज्ञानत्वादितिभावः।

प्रतीत्यर्थमेवेति रविदृष्टान्तः प्रातीतिको न तु प्रियव्रतवद् रजन्याः दिनत्वकरणमित्येवकारः। प्रतीत्यर्थापेक्षयोत्कृष्टार्थमाहुः अथ चेति। द्वादशेति 'द्वादशादित्या' इतिश्रुतेर्द्वादशत्वम्। 'द्वादशाङ्गः पुरुष' इतिश्रुतेर्द्वादशत्वम्। विम्बान्युदयास्तमयकालिकानि। एवेति न तु प्रविष्टो ध्येयः। 'ध्येयः सदा सवितृमण्डलमध्यवर्ती' तिवाक्योक्तः। यदेति कालत्वेनोपस्थिते विम्बे यदा यस्मिन् काले। तेन नात्र येष्वित्यत्र यस्मिन्नित्यध्याहारः। प्रकाशत्त इति 'यच् चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामक' मितिवाक्यात्। भयं निवृत्तमिति 'भीरपि यद् बिभेती' तिवाक्यात्। आश्चर्यं प्रपश्चयन्ति स सर्वेष्विति।

१०–२–१८. ततो जगन्मङ्गलमित्यत्र आर्थिकमाहुः पद्मुत्रेति। 'आर्थिकं तु प्रवक्ष्यामी' ति प्रथमस्कन्धे प्रतिज्ञायाः। निगडनिगृहीता एवेति निगडनिगृहीतौ एवेत्यत्रै 'चोयवायाव' इतिसूत्रेणाविकृते 'लोपः शाकल्यस्ये' तिसूत्रेण वकारलोपः। अत्त इति निगडगृहीताभ्यां गर्भासम्भवात्। प्रकारान्तरेण वैधदीक्षाप्रकारेणेत्यर्थः। अत्र धारणानुकूलव्यापारवती देवी अत्र धातूपात्तव्यापारो गौणः 'शूरसुतेने' त्यत्र व्यापारनियतं करणत्वमिति करणनिविष्टव्यापारो मुख्यः। यद्व्यापारानन्तरं फलनिष्पत्तिस्तत्त्वं करणत्वमिति। मुख्यकरणनिष्ठो व्यापार इत्याशयेन वसुदेवकर्तृकं देवक्यामानयनमुक्तम्। एतादृशे मुख्ये व्यापारे करणत्वमिति 'शूरसुतेने' तिकरणे तृतीया। ननु तथाप्याहेत्यनेन तु धातुक्रियान्वयः न तु करणक्रियान्वय इति चेन्न। करणक्रियान्वयाभावस्य दुरुपपादत्वात्। अतो गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्यय इति वसुदेव 'आनीतवा' नित्युक्तम्। मुख्यत्वेपि धातूपात्तव्यापारविशेष्यको बोधः। एकदेशविकृतस्यानन्यत्वादन्यथा 'जराया जरसन्यतरस्या' मितिसूत्रेण निर्जरसाविति न स्यात्। निर्जरशब्दस्य जराशब्दत्वाभावात्। यद्वा, करणव्यापारो विवक्षितः। काष्ठानि पचन्तीतिवत् सुबोधिन्याम्। न चैवमन्यदूषणार्थमाचार्यप्रवृत्तिरिति शङ्क्यम्। 'स्वादु स्वादु पदे पद' इति प्रथमस्कन्धात्। उचितमिति 'हेयत्वावचनाच्चे' तिव्याससूत्रात्। सर्वलोकेति वेदे वसुदेवे स्थितौ वसुदेवमात्ररक्षा। नारायणकवचवत्। सर्वलोकरक्षा तु ब्रह्मविद्यायां सर्वदेवताप्रचुरायां देवक्यां स्थापने। सर्वलोकपदेन दैवीसम्पद्वतां ग्रहणम्। जगतामिति जगच्च जगच्च जगच्च जगन्ति तेषामाधिदैविकादीनाम्। नन्वेवमिति आगमनं वैकुण्ठादवतरणम्। आवेशो वसुदेवमनसि। प्रवेशो देवक्यां ततो निर्गमनं च। तेष्वित्यर्थः। अन्यथाभाव इति वैकुण्ठस्थत्वाभावः। षष्ठ्यर्थ इति षष्ठीतत्पुरुषे। अच्युतस्यांशमच्युतांशमित्येवम्। तदर्थमिति अच्युतत्वार्थमित्यर्थः। सम्यक् अच्युतं यथा भवति तथा। वैधदीक्षेति विध्युक्तमन्त्रोपदेशे गुरुः स्वस्मिन् देवतामावाह्य शिष्ये स्थापयति तेन प्रकारेणेत्यर्थः। एतेन समुपसर्गस्यार्थ उक्तः। सम्यक् वैधदीक्षाप्रकारेणाहितं स्थापितम्। 'समाहित' पदं समाधौ स्थापिते विषये यौगिकम्। सं आहितम्। क्ते कर्मणि दधातेर्हिवादौ क्तीति

हितमिति जातम्। तथा च समाधिविषयमिति 'ममाहित'मित्यस्यार्थः तमर्थान्तरमाहुः वस्तुतस्त्विति। वेदत्वात् प्रत्याहारस्थले भावनामाहुः भावयित्वेति। ज्ञानकाण्डत्वेनानुभवस्य जातत्वात् संस्कारेण स्मरणात्मकं ज्ञानमुक्तं भावयित्वेति। मनस्त इति सार्वविभक्तिकस्तसिलिति मनसेत्युक्तम्। एवकारः 'स मानसीन आत्मा जनाना'मितिश्रुत्या 'युञ्जानः प्रथमं मनस्तत्त्वाय सविता धिय' इति चतुर्थाष्टकाद् वेदवेदान्तसारे श्रीभागवत उपायान्तरयोगव्यवच्छेदकः। तत्र देवक्यां साक्षात्तेजःस्वरूपलक्षणान्तर्गतज्ञानं स्थापितवान्। 'आत्मभूत'मित्यच्युतांश'विशेषणात्।स्त्रीणां चिदंशप्राधान्यात्। उपलक्षणं सदानन्दयोः।'वसुदेवगृहे साक्षाद्भगवान् पुरुषः पर'इति। अजुष्टग्राम्यविषयत्वेन भक्तिप्रतिबन्धाद् विषश्चित्त्वविशिष्टः पुरुषोत्तमस्तु नन्दगृह एव। नन्दस्य सर्वात्मभाववत्त्वाज् जडमायांशोद्घाटनाय कृपापरीतत्वात्,'किं मया हतया मन्द जातः खलु तवान्तकृत् यत्र क्वचित् पूर्वशत्रु'रित्यत्र पुरुषोत्तमाविर्भावो 'जात' इत्यनेनोक्तः। यतो माया व्यापिका। आत्मभूतातिरिक्तं तेजस्तु कुक्षौ। 'कुक्षिगतः परः पुमा'नितिवाक्यात्। भगवन्मार्गीयत्वाद् वा तेजः कुक्षिगतम्। अविषयत्वाद् वेदानां 'नाहं वेदै'रितिवाक्यात्, अतः कुक्षिगतः। अत एवेति सामर्थ्यादेव दधार। न तु लौकिकसम्बन्धरीत्येत्येवकारः। चैतन्यमिति जीवम्। 'यस्यात्मा शरीर'मित्यन्तर्यामिब्राह्मणाच्चैतन्ये प्रवेशः सम्भवतीति बीजं वेति द्वितीया कोटिः। अत्र रेतोरूपबीजासम्भवात् 'मानस'मिति बीजविशेषणमुक्तम्। सनकादिवदित्यर्थः। तिष्ठतीति तेजः। दूषणमिति बृहत्त्वाद् बृंहणत्वाच्चेति ब्रह्मेतिलक्षणे दूषणम्। बीज इत्यादि बीजे मानसे सनकादिवत् चैतन्ये जीवे छान्दोग्योक्तवत्। तत्र प्रविष्ट इति देवकीजीवे प्रविश्य तस्या उदरे प्रविष्ट इत्यर्थः। आत्मधारणे ज्ञानी दृष्टान्तत्वेन ध्वनितः तं दृष्टान्तमाहुः यथा ज्ञानेनेति। ज्ञानमत्रा'यमहमात्माधार' इत्याकारकम्। देहजीवविशेष्यकमात्माधारत्वप्रकारकम्। विषयाविनाभूतं ज्ञानं तेनेत्यर्थः। 'अयमहमस्मी'ति बृहदारण्यके। अनेनेति सर्वात्मकमात्मभूतमिति पदद्वयसमभिव्याहारेण। शुद्धमेवेति 'अहं सुतो वामभवम् प्रश्निगर्भ इतिश्रुत'इति भगवद्वाक्योक्ताहङ्कारात्मकम्। पुरुषोत्तमरूपं वा। प्रश्निगर्भस्तु ममाधाने मन एव हेतुरिति मनसः। शुद्धमेवेत्येवकारव्यावर्त्यमाहुः चैतन्यबीजेति। देवकीकर्तृकधारणकथनेन चैतन्यपक्ष उक्तः। मानसमन्त्रपक्षयोर्वसुदेवस्यैव प्राधान्यं न देवकीप्रयत्नापेक्षेति भावः। समाहितपदस्य द्वितीयव्याख्याने मानसपक्षः। प्रथमव्याख्याने मन्त्रपक्ष इति ज्ञेयम्। तथा च सञ्जातभूतस्यात्मभूतमेव दधार न त्वात्मनि प्रविष्टमित्यर्थः। तादृशस्य धारणं तु 'यथा ज्ञानेने'त्यनेन विवृतमेव। वृद्धिराकाशस्येवेति अत्र टिप्पण्याम् भित्त्यादीति भित्तिघटमृत्पिण्डनौकामहापटादिरूपाकाशावरणस्यापसारणं भित्तेरन्तर्देशस्यापसारणं घटमृत्पिण्डस्यापि तथा नौकामहापटस्यापि। अत्र यः प्रकारः खातचक्रचीवरवायुरूपाः। तैः

प्रकारैरपसारणं बोध्यम् । यावदिति कात्स्न्र्यपरिमाणम् । येनेति ज्ञानभेदेन । मकृते प्रभुरेव ज्ञानधर्मप्रधानः षट्सु धर्मेषु । ज्ञानत्वेनावरणभङ्गत्वेन कार्यकारणभावात् । गर्भ-लक्षणेति गर्भः लक्षणं स्वरूपं यस्य भगवत्स्वरूपस्य मायास्वरूपस्य च तस्याविर्भावः । षड्भावविकारा न सन्तीत्याहुः तेनेतरेति । वृद्धिरूपविकारस्य निषेधेन । अविलक्षणेति न विलक्षणाऽलौकिकसामग्रीविलक्षणा अविकृतोपपन्नेत्यर्थः । यशोदेति योगमायाया यशोदोदरे उद्भूतायाः अन्यत्र यशोदोदरे स्थापनं स्वधर्म इति तथा । तथेत्यर्थ इति यथा देवक्यास्तथा यशोदाया इत्यर्थः । विकृतेति वृद्धिरूपविकारविषया । किन्त्वलौकिकसामग्री निविष्टवृद्धिविषया । लीलेति ज्ञात्वा परपुरुषे निरोधलीला । तथैवेति अविकृतबुद्धि-रित्येवमेव ज्ञेयमित्यर्थः । तत्प्राकट्य इति स्थापनेन योगमायाप्राकट्ये । सुबोधिन्यां तसिलिति अव्ययम् । जननं मनस इति मन उक्तमिति सुबोधिन्यामाहुः समाधान इति । आधानं गर्भः । हेतुरिति 'मनोमात्रमिदं ज्ञात्वे'तिवाक्यात् । 'स मानसीन आत्मा जनाना'-मितिश्रुतेश्च । 'मनस्त' इति कथनाच्चन्द्रोपि । 'चन्द्रमा मनसो जात' इतिश्रुतेः । चन्द्रवंशीयः । 'सर्वात्मकमात्मभूत'मित्यनेना'यमहमात्माधार' इत्यत्रा'यमह'मित्यसच्छब्दार्थस्याक्षरात्म-कत्वे जाते आत्मा पुरुषोत्तमो'हं सुतो वा'मित्यत्राहङ्कारादेशेन तत्सहचरितगीतासप्तमाध्या-योक्तभूम्यादीनामाश्रयस्य पुरुषोत्तमयोगाध्याये 'यो मामेवमसम्मूढो जानाति पुरुषोत्तमं स सर्वविद् भजति मां सर्वभावेन भारते'त्यत्र सर्वभावत्वात् । गीताविस्तारे श्रीभागवते सर्वभावः सर्वात्मभावः । मध्यमपदलोपी समासः । 'सर्वात्मभावोधिकृत' इतिवाक्याद् विस्तारः कृतः । पुरुषोत्तमाविर्भावे सर्वात्मभावस्य तात्पर्यविषयस्य वेदब्रह्मविद्ययोर्वसुदेव-योरावश्यकत्वात् ।

१०-२-१९. सा देवकीत्यत्र स्वतन्त्रमिति द्वादशबिम्बगतं पौरुषम् । अन्यत्रापि पौरुषम् । 'सूर्य आत्मा जगतस्तस्थुषश्चे'तिश्रुतेः । परतन्त्रमिति पुरुषतन्त्रम् । विवेकादि-रहितमिति आदिना साहसः । विवेकादयो मनोधर्माः तद्राहित्यं तदभावरूपं मनसि, तेजसि तु तद्राहित्यं सहभावात्, सामानाधिकरण्यात् । तेजोत्र मनःस्थम् । ननु नितरा-मितिपदं निरर्थकम् । जगन्निवासो वराहो न रेजे शेषोपि परन्तु सत्तामात्रजगन्निवास-निवासभूता कुतो न रेज इत्यत्र नितरामिति 'नितरां रेजे ने'त्यत्र भगवच्चिन्ता हेतुत्वेनोक्ता वेदे वसुदेवे ब्रह्मविद्यायां देवक्यां भयाभावात् । तथापि भोजेन्द्रगेहे रुद्धेति भयं कुतो नेत्यत्र किञ्चिदाहुः न हीत्यादि मालिन्यादित्यन्तम् । लोमभ्य इति कृष्णकेशस्य भूभारहरणकर्तृत्वाद् भयहेतुत्वम् । न तु कृष्णकेशसत्तायाः न तु तत्सजातीयकेशानाम् । तदुक्तं न हीत्यादिना । स्वस्येति देवक्याः । भगवन्निमित्तमिति भगवान् निमित्तं कारणं यस्मिन् भये । ब्रह्मविद्यात्वात् । तथापि भक्तिमार्गीयसामग्र्या ज्ञानमार्गीयसामग्र्या

बलीयस्त्वेन भगवन्निमित्तं भयं सम्भावितम्। भगवच्चिन्तयेति चिति स्मृत्याम्। चु० प० से० ब्रह्मविद्यात्वादेव। भगवद्धेतोः समुद्वेगाद् या चिन्ता तया। पूर्वं भगवत्कारणकं भयं नास्त्यस्या इत्युक्तं ब्रह्मविद्यात्वात्। अधुना तु समुद्वेगः समुद्धयमुक्तं तदपि ब्रह्मविद्यात्वादेव, तेन ब्रह्मविद्यायां देवक्यां ज्ञानसामग्र्याः भक्तिस्नेहसामग्र्या बलवतीत्वमुक्तम्। ज्ञानसामग्र्या भक्तिसामग्र्या बाधो ब्रह्मविद्यायामिति। चिन्तादिनेति आदिना भक्तिमार्गीयं भयम्। हेत्वन्तरमिति 'नितरां न रेज' इत्यत्रैव हेत्वन्तरम्। भागवतादीति आदिना वेदवेदान्तादिरूपा। असतीतिपदच्छेदे दोषमाहुः असती त्विति। कुतो ज्ञानखल इति तत्पदवैयर्थ्यं दोषः। असतीतिपदच्छेदे। सूच्यत इति तेन दत्तात्रेयादिगुरुवद्गुरुत्वात् तथा।

१०–१–२० तां वीक्ष्येत्यत्र तस्यापीति कंसस्यापि। 'वीक्ष्ये'त्यत्र विशेषस्तं विवरितुं प्रभारूपं विशेषं द्रव्यचाक्षुषं प्रत्यालोकसंयोगस्य कारणत्वात् प्रभैव विशेषः प्रभया विरोचयन्तीत्युक्तेस्तं विशब्दार्थे विशेषमाहुः प्रभयोपलक्षितामिति। ज्ञापिकयेति हेतुभूतया। देवकी अजितान्तरा प्रभावत्त्वात् ज्ञानिवदित्यनुमानम्। दृष्ट्वेति 'तां'मित्युक्तायाश्चाक्षुषं ज्ञानम्। मध्येऽजितज्ञानमनुमितिरूपम्। भवनं वीति अन्तर्बहिः पुरुषोत्तमो व्याप्तः प्रभयेति तथा। दर्शने ज्ञातमिति देवकीदर्शने मध्येऽजितत्वं ज्ञातमनुमितम्। अधृष्यत्वेति अधृष्यत्वानुगमश्चाक्षुषः। अधृष्यत्वज्ञानेऽजितत्वमनुमितं दृढं भवति। निश्चितवानिति शब्दानन्तरं प्रत्यक्षानन्तरमनुमानसत्त्वात्। यद् यज्जनकं तत् तद्गुणकं यद् यद्गुणकं तत् तदात्मकमिति व्याप्तेः। आकाशवाणीशब्दश्च। बहिर्निःसृतेति। तेजःप्रधानत्वात् भगवतः। अत एव सत्त्वे प्रवृद्धे सकलदेहप्रकाशो गीतोक्तः। प्रकरणेनेति जन्मप्रकरणेन। पुरे वनेति पुरा सादृश्यं नेति प्रथमान्तसादृश्येन नञर्थाभावान्वयः। रूपेण सन्तोषादिना च पूर्वसादृश्यं नेत्यर्थः। न्यायादिति वैयासस्रत्रात्।

१०–२–२१. किमद्येत्यत्र ततः किमिति निश्चयात् किं वृत्तं अतः कारणात् विचारं वृत्तमाह। हरिष्यत्येवेति अत्यन्तायोगव्यवच्छेदकैवकारः। नीलं सरोजं भवत्येवेत्यत्रेव। तदभाव इति अदृष्टाभावे। एतद्द्रोहो देवकीद्रोहः। जीवनहेताविति आगन्तुकेन नाशहेतुना जीवनादृष्टे सत्येव नाशसम्भवो न तु जीवनादृष्टाभावे। तदभावे मृत्युरेव नागन्तुकेन नाशहेतुनापमृत्युरतः तत्प्रतीकारे नाशहेतुप्रतीकारे। प्रदीपस्येव प्रकृष्टो वर्तितैलशरावसहितो दीपः तस्य जीवनादृष्टसहितस्य आगन्तुकनाशहेतुः वायुतत्पुष्पादिः। तत्प्रतीकारे उपरोधे पातने च कृते जीवनसम्भवः न तु जीवनादृष्टरहितस्य, तस्मिन् कृतेपि जीवनसम्भवस्तस्मात्। एवकारस्तु जीवनहेत्वभावयोगव्यवच्छेदकः। अस्या इति आगन्तुकनाशहेतुगर्भायाः। मारणं नाशप्रतीकाररूपम्। तथा चागन्तुकेन नाश-

हेतुना नाशोपस्थितौ जीवनाहष्टं वर्तत इति निर्धारो भवतीति भावः। अन्यथाऽदृष्टाभावान् नष्टो न त्वागन्तुकेनाष्टमगर्भवायुतत्पुष्पादिरूपेण हेतुना नष्ट इति प्रतीतिः स्यात्। सोमात्मक इति प्रकृते जननं मनस इत्युक्ते तत्कारणकः पुरुषः सोमात्मकः। 'चन्द्रमा मनसो जात' इति श्रुतेः। भगिनीति एकसमुद्रोत्पन्नत्वात् सोमलक्ष्म्योर्भ्रातृत्वभगिनीत्वे। भगिनीवध इति लक्ष्म्यात्मकभगिनीवधः। स्त्रीणां लक्ष्म्यात्मकत्वात् 'भूर्लक्ष्मीः भुवर्लक्ष्मीः सुवः कालकर्णी तस्रा महालक्ष्मी'रिति श्रुतेः। धनादीति पक्षपातादितिभावः। नश्यतीति पोषकाभावान् नश्यति। अनुकालमित्यत्यन्तसंयोगे द्वितीया काल: क्षणः अनु हीने। हीनकालं तत्क्षणं हीनक्षणम्। हन्तीति अत्युत्कटदुःकर्मत्वादितिभावः।

१०-२-२२. स एष इत्यत्र अदृष्टे प्राबल्याप्राबल्ययोः कार्यैकोन्नेयत्वादाहुः अस्तु वेति। तथा चागन्तुकनाशहेतुर्यद्यपि मारणीयः आगन्तुकहेतुना कंसो नष्ट इति प्रत्ययवारणाय तथापीत्यर्थः। जीवन्नेवेति खलुरवधारणे व्याख्यातः। 'खलुः स्याद् वाक्यभूषायां जिज्ञासादौ च सान्त्वन' इति विश्वकोशे आदिपदार्थः। जीवन्नेवेति मरणतुल्यजीवनकर्ता। सम्परेतः मृतक इत्यर्थः। सादृश्ये कन्। परेतः प्रेतः स सम्,वैक्लव्याश्रयः इत्यर्थात्। षम वैक्लव्ये क्विप्। सम् वैक्लव्याश्रयः परेतः मृतको भवत्येव। अतो न सम्परेतशब्दस्य मृत(सम्परेत)सदृशे लक्षणा। स 'जीवच्छव' इति सत्यमित्यन्वयः। यदिति यस्मात्। परलोक इति असुराणां परलोके। शारीरब्राह्मणे विभूतिरतानामन्धन्तम उक्तम्। अवश्यमिति ध्रुवमित्यस्यार्थः। सर्वेषां ज्ञापनार्थाय कंसवाक्यमित्यध्यायारम्भे कारिकायामुक्तमुपसंहारे विशदयन्ति स भगवत्सान्निध्यादित्यारभ्य निश्चित इत्यन्तेन। तथा ज्ञानमिति दैवसम्पदीयत्वेन दैवसम्पदीयं ज्ञानमुत्पन्नं, देवकयमारणविषयकम्। सर्वेषां ज्ञानमिति देवक्यमारणविषयं ज्ञानम्। प्रकारविशेषः पुत्रमारणलक्षणस्तमेवाहुः देवक्या इति। न ज्ञानोदय इति तत्रैवोक्तः। तथा बुद्धिरिति असत्त्वेनाविजितात्मत्वेन च कंससम्बन्धिनी बुद्धिः। 'नाभ्यनन्दत तद्वाक्यमसतोऽविजितात्मन' इति वाक्यात्। अत इति कालभेदेन दैवासुरज्ञानदर्शनात्। सर्वेति सदसज्ज्ञानजनकः। इति कृष्ण इति इति हेतोः कृष्णो भगवानेव न तु कृष्णवर्णमात्रः। 'कृषेर्वर्णे' इति पाणिनिसूत्रात् ,नक्। एवं वाक्यैरिति प्रथमोपदेशरूपै'स्तां वीक्ष्य कंस' इत्यादिभिश्च। तदर्थमेवेति सर्वेषां ज्ञापनार्थमेवेत्यर्थः। न तु कालनेमिवैशिष्ट्यतदभावबोधनार्थम्। भगवदिच्छां विना कालनेम्यपसारणाभावात्। एतानीति समीपतरवर्तीनि त्रीणि।

१०-२-२३. इति घोरतमादित्यत्र युद्धं कर्तव्यमिति घोरतमभावान् निवृत्तत्वात्। बालवधोपि घोरतम इति हेतोः युद्धं कर्तव्यम्। पूर्वजन्मेति कालनेमिजन्मनि

१. नुर्लक्षणे। 'लक्षणेत्थंभूताख्यानभागे'तिसूत्रेण कर्मप्रवचनीययोगे द्वितीया। काल लक्षीकृत्य। तदर्थ. तत्क्षणमिति।

मारणलक्षणेत्यादि। अनुबन्धं निमित्तमिति अनुबध्यतेऽनेनेति करणे घञ्। येन वैरमनुबध्यते दृढीक्रियते तादृशं निमित्तं कारणमित्यर्थः। तत्सम्बन्धिवधेन वैरं दृढं भवतीति भावः। 'अनुबन्धः प्रकृत्यादेर्दोषोत्पादे विनश्वरे मुख्यानुपायिनि शिशौ प्रवृत्तस्यानुवर्तन' इति विश्वः। आद्यन्तयोरेकतरोर्थः। प्रकृतेस्तममस्तत्सम्बन्धिवधादिदोषोत्पादे प्रवृत्तस्य वैरस्यानुवर्तनेनुबन्धपदम्। वधादीति आदिना पीडादि। वधस्य दुःकरत्वादादिपदम्। तथेति वैरानुबन्धकृत्। करोतेः कर्तरि क्विप्।

१०–२–२४. आसीन इत्यत्र प्रमाणबलेति 'कामाद् गोप्यो भयात् कंस' इति प्रमाणं वर्तते परन्तु बलाभावः 'यथा भक्त्येश्वरे मन' इतिवाक्यात्। 'भक्त्या वयं विभो' इत्यत्रैव 'कामाद् गोप्यो भयात् कंस' इत्यस्य प्रमाणस्य बलमतः 'प्रमाणबलाभावेपी'त्युक्तम्। प्रमेयो भगवान्। तस्येति कंसस्य। ज्ञानं सर्वभूतेषु मन्मतिरूपं भक्तिकारणम्। अवस्था इति गमनं नावस्था क्रियायां पर्यटनेन्तर्भावात्। भुञ्जान इत्यादि गृहस्थस्य क्रिया, अन्येषां भोजनं गौणं, पर्यटनं यतेः क्रिया, अपां पानं ब्रह्मचारिवानप्रस्थयोः। सर्वक्रियास्विति कंसगृहस्थक्रियास्वन्तर्भूतासु। हृषीकाणामिन्द्रियाणामीशः हृषीकेशः तस्य चिन्तनस्य फलं प्रेरणाद्वारा भक्तिकारणं ज्ञानमित्याहुः स्वदर्शनेति। अत इति प्रेरणात्। अपश्यदिति भक्तिकारणां सर्वभूतेषु मन्मतिमकरोत्। एकादशैकोनविंशाध्याये वर्तते।

१०–२–२५. ब्रह्मा भवश्चेत्यत्र अर्थादिति 'विपदः सन्तु नः शश्व'दितिवाक्ये दुःखस्य भगवच्चिन्तनहेतुत्वमुक्तमतस्तथेत्यर्थः। कंसादीनां भगवच्चिन्तनमर्थादुक्तमित्यन्वयः। वक्तुमिति दुःखेन भगवच्चिन्तनं वक्तुम्। अनेनेति देवासुरचिन्तनकथनेन। ज्ञातमभूदिति भगवतो व्यापकत्वाद् व्यापकयोगमायया ज्ञानसङ्कर्षणात् तथा। कंसादीति देवक्याः शत्रुत्वात्। अनेन ब्रह्मविद्याऽऽसुराणां हितकारिणी न भवतीत्युक्तम्। गुणाभिमानिन इति प्रथमस्कन्धतृतीयाध्याय उक्ताः। स्वानुकूलेति स्वपक्षपातिनीभिर्वाणीभिः कामवर्षणमिति काम्यन्त इति कामाः पक्षपातादयः। वृषु सेचने, बाहुलकात् क्युः। पुल्लिङ्गशब्दः द्वितीयान्तः। वृषणोण्डकोशः। 'आण्डावानन्दा'वितिश्रुतिः तयोः कोषः पात्रम्। कोषशब्दः मूर्धन्यान्तः। भगवदिच्छया तालव्यान्तः प्रयुज्यते। अलौकिकव्युत्पत्तिमाहुः वृषमिति। नीञ् प्रापणे डः। सहोक्तानामिति नारदादीनाम्। व्याख्यानद्वयेन कामस्य धर्मात्मकस्य प्रापणकर्ता वृषण इत्युक्तम्। तदुक्तं बृहद्वामनपुराणे 'यथा त्वल्लोकवासिन्यः कामतत्त्वेन गोपिकाः भजन्ति रमणं मत्वा चिकीर्षाजनि नस्तथे'ति।

१०–२–२६. सत्यव्रतमित्यत्र स्तुतिश्लोकसङ्ख्यातात्पर्यं जातेष्टिन्यायेन मुख्यतो वदन्तो निबन्धे सङ्कर्षणोत्पत्तिर्द्वितीयाध्यायार्थो दैत्यवधार्थत्वस्य स्फुटत्वादिति यदुक्तं तदत्र 'प्राहैष मे प्राणहरो हरिर्गुहा'मित्यनेन कंसस्यापि ज्ञानकथनाद् यथा स्फुटं तथा स्वरक्षकत्वं देवानां

ज्ञानादपीति ज्ञापयितुमाहुः कालात्मेत्यादि। कालात्मा कालदेहोनन्तः कालस्यात्मा कालात्मा। सोनन्तः पुरुषोत्तमः कृष्णः प्रकाशाश्रयन्यायेन। नित्यसम्बन्धाच्च शब्दार्थयोरौत्पत्तिकसूत्रात्। ब्रह्मादिस्तुतिभिर्ज्ञायते। यद्वा काल उपदेशकशब्दो 'वेदात्मा सङ्कर्षण आत्मेति यस्य तादृशः सन् जातः प्रतिपादकसहितो जातः प्रतिपाद्यः। पक्षपातिनी स्तुतिरतः कालात्मत्वेन पुरुषोत्तमस्तुतिः। 'चतुर्धा स्वीकृतिश्चापि काले मूलस्वरूपत' इति निबन्धात्। तथा च प्रश्नोपनिषदि 'षोडशकल' इति श्रावणात् कलाभिः षोडशभिः कालात्मा जात इति ज्ञापयितुं तथा स्तुतिः षोडशभिः श्लोकैः स्तुतिरित्यर्थः। अत्र प्रकारमाहुः पञ्चदशभिरित्यादि। स्वपक्षख्यापकैः पञ्चदशभिर्हि एषा देवानां हितकारिणी पक्षपातस्तुतिरित्यर्थः। ध्रुवा त्विति षोडशी तु ध्रुवा मनःकलेति प्रश्नोपनिषदुक्ता। स्वाभाविकत्वात् निश्चलेति भक्तहितकारिणी। ननु भवत्वेवं तथाप्ययनादिकं विहाय षोडशकलत्वेन कथं कालात्मत्वस्य देहेवगमः आत्मनोनन्तस्य पुरुषोत्तमत्वेन षोडशकलत्वस्य पुरुषोत्तमेवगमश्च कथं इत्यत आहुः वृद्धौ वा तादृश इति। अयनादिग्रहणे कृष्णपक्षस्य सङ्ग्रहापत्तेस्तिथिवृद्धौ षोडशकलत्वेन कालत्वावगमो देहे तथात्मनि मनःकलाया अनिन्द्रियभूताया वृद्धौ तादृशः षोडशकलः पुरुषोत्तमो भवेत्। मानुषतन्वाश्रयणात् पुरुषपदं प्रश्नोपनिषदि। वाशब्दोऽवधारणे। तथा च वृद्ध्या तदवगम इत्यर्थः। एतदेव स्फुटीकुर्वन्ति स अत्रेत्यादिना। तथा च स्तुतिसान्त्वनरूपद्विधाभेदाद् द्वैविध्येपि सान्त्वनश्लोके 'परः पुमा'नित्यादिकथनात् षोडशानामपि भगवत्स्तुतित्वमेव, उत्कर्षाधायकगुणवर्णनस्य स्तुतित्वात्। यदि च पुरुषोत्तमस्य गर्भसम्बन्धाभावात् नैतेषां साक्षात्पुरुषोत्तमस्तुतित्वं तदा तु कालदेहानन्तात्मनोरेव स्तुतिरिति सिध्यति। तत्र पञ्चदशभिः कालदेहानन्तात्मनोः स्तुतिं व्युत्पादयन्ति स काल इत्यादि अर्धेन निरूप्यत इत्यन्तम्। काल इति देहः स एव न त्वनन्तः। तैरिति विबुधैः। ज्ञात इत्यनन्तात्मन उत्पत्त्यभावाज् ज्ञातः। काल आत्मनि यस्येति व्युत्पत्तिपक्षे कालः सङ्कर्षणः स एवेति। अत्र पुरुषोत्तमे भूभारहरणार्थं प्रार्थितत्वादवतीर्ण इति प्रकारेण तैः सङ्कर्षणो ज्ञात इत्यर्थः। अर्धेनेति त्रिंशदर्धेन। तर्हि षोडशभिः कथं स्तुतिरित्यतस्ता व्युत्पादयन्ति स स चेत्यादि चतुर्धेत्यन्तम्। कालकृत इति देहकृतः न तु पुरुषोत्तमकृतः। तस्य समत्वात् भक्तैः सह निगूढभावकरणाच्च। कालोत्र विश्वरूपप्रदर्शनाध्यायगीतोक्तः। तृतीयस्कन्धे कालकर्मस्वभावेषु क्षोभकः कालोयमेव। चतुर्धेति 'चतुष्पाद् ब्रह्म विभाती'तिश्रुतेः चतुष्पाद् ब्रह्मणः षोडशकलानां मध्ये चतसृणां चतसृणां कलानामेकैकपादत्वम्। चतुष्कल एकपाद इति। लोककृत इति लोकादिसन्मार्गद्वारा कालात्मकृतः। स्मृतिकृत इति उक्तोर्थः। लोकवेदात्मिकेति 'ऋषीणां

१, अत. षष्ठस्कन्धे चित्रकेतूपाख्याने'नन्त उवाचे'ति वक्तव्ये 'भगवानुवाचे'त्युक्तम्। २. गीतावक्ता तु न पूर्ण.

पूर्वचरितस्मरणात् स्मृतिरुच्यत' इति लौकिकी। ऋषीणां लोकोद्भवत्वेन तत्पूर्वचरितस्य लोकोद्भवत्वात्। उत्सन्नप्रच्छन्नशाखामूलत्वेन वेदत्वाद् वेदरूपा। अतो लोकवेदौ आत्मनि स्वरूपे यस्याः सा शब्दरूपा लोकवेदात्मिका। भगवन्मार्गकृत इति श्रीभागवतमार्गकृतः। 'कृष्णवाक्यानुसारेण शास्त्रार्थं ये वदन्ति हि ते हि भागवताः प्रोक्ताः शुद्धास्ते ब्रह्मवादिन' इति निबन्धात्। 'कृष्णवाक्यं गीता तद्विस्तारो भागवतम्'। तत्र द्वितीयस्कन्धनवमाध्यायोक्तः। पुष्टिमार्गश्च। प्रमेयबलसाध्यः स्वयं प्रमेयं निःसाधनानां ज्ञानभक्ती बलरूपे दत्वापि मोचयतीति। 'भक्त्याहमेकया ग्राह्य' इतिवाक्यात्। 'भगवान् ब्रह्मकार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया तदध्यवस्यत् कूटस्थो रतिरात्मन्यतो भवे'दितिवाक्येन ज्ञानक्रियाकाण्डयोस्तद्वाचकयो रतौ तात्पर्यमुक्तम्। रतिराध्यात्मिकी भक्तिः। 'श्रद्धा रतिर्भक्तिरनुक्रमिष्यती'ति वाक्योक्तेषु श्रद्धायामाधिभौतिकभक्तिरूपायां आधिदैविकभक्तिमेलने आध्यात्मिकभक्तिरूपरतिपदवाच्यत्वमिति। सन्मार्गेण पक्षपात इति छान्दोग्ये देवासुरस्पर्धायामुद्गीथविद्ययाऽसुरात्यये सिद्धः। एवं च लोकादिसन्मार्गद्वारा कृतः पक्षपात इत्युक्तम्, एवमत्र भगवन्मार्गकृत इत्युपसंहारेणार्थनिर्णयात्। एवं च प्रमेयबले ज्ञानशक्तिक्रियाशक्तिभक्तिभिर्मोक्षः स न भवति भगवद्धर्मत्वेन मार्गत्वाभावात्। अतो मार्गरूपज्ञानादिभिर्मुक्तिः। अत एतेषामंशानामाकर्षः। ते च तैत्तिरीयोक्ताः षोडश। तेनेदं सिध्यति आध्यात्मिके द्वापरादिरूपे काले विपक्षे सति कलिकार्यप्रतिबन्धार्थं कृपया भगवानाधिदैविककालरूपो भवंस्तदंशैर्लोकादिभिः न्यायशास्त्रसिद्धैः लोकादिविभाजकप्रमाणाद्युपाधिभिश्च पक्षपाती जात इति। एवं षोडशधा विभागमुपपाद्य तत्कृतं प्रयोजनमाहुः दैत्यकृतादिति। दैत्येषु कृतादुपकारात् स्वपक्षपातस्याधिक्यं वक्तुमत्र षोडशधोच्यत इत्यर्थः। लोककृतं चातुर्विध्यं विभजन्ते स तत्रेत्यादि। तत्र षोडशेषु एतस्यैव विवरणं लोकसिद्धानीत्यादि। लोके सत्यमेव प्रमाणमिति लोके भवो भगवान् सत्यरूपः प्रमाणम्। 'अत्र प्रमाणं भगवा'निति वाक्यात्। अनेनाप्यस्माकमस्तु केवलमिति पक्षपातार्थं स्तौति स। बाल्ये महाजनत्वाल्लौकिकत्वम्। ततोतिशयाधाने लोकवेदात्मकस्मार्तत्वम्। ततोप्यतिशयाधाने वैदिकत्वम्। ततोप्यतिशयाधाने भगवन्मार्गीयत्वमिति। लोके सत्यभाषणमित्यादिस्थले सत्यं भाषणमिति भानात् सत्यशब्दः प्रमाणम्। प्रमाकरणं प्रमाणम्। सत्यस्यापि शाब्दप्रमाविषयत्वेन विषयविधया कारणत्वमात्रम्। एवकारस्तु लोके प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि न भवन्ति किन्तु तत्प्रेरको भगवानिति। सत्यं भाषणं वा। शब्दात्मकं प्रमाणं(तद्विषयश्च)इति प्रकाशे, प्रमाणस्य प्रवर्तकत्वेन ग्रहणे प्रमाणं भगवानिति पितृचरणाः। सत्यपदस्य यथार्थत्वं शक्यतावच्छेदकम्। लौकिकशब्दानां शक्तिरस्ति। तादृशप्रमाणेन यादृशं प्रमेयं सिध्यति तदाहुः परिदृश्यमानं जगदेवेति। दैवसृष्टौ परिदृश्यमानं जगदेव

प्रमेयम् । पूर्वश्लोकोक्तषोडशविधसत्यात्मकप्रमाणज्ञानवासनासहकृतचक्षुरादिप्रमाणजन्यप्रमितिविषयत्वात् प्रमेयमित्यर्थः। 'तेनैकायनोसा'विति श्लोकप्रतिपाद्याधिदैविकवृक्षात्मकसत्यरूपप्रमाणपादाक्षरज्ञानविषयत्वेन सद्रूपतयैवेह जगत् प्रमेयमित्युक्तं भवति । ननु वृक्षत्वेन न लोको जगत् प्रत्येतीति चेत्, ब्रह्मादिः प्रत्येतु न लोकः। जगदेवेति एवकारेण वैदिकादिप्रमेययोगव्यवच्छेदः। लोके जगदतिरिक्ताज्ञानात् । न कदाचिदनीदृशं जगदिति-मीमांसकानामुत्पत्त्याद्यज्ञानवत्। प्रमेयमिति प्रमाविषयं प्रमेयम् । एवंभूते प्रमेये तत्र सुखदुःखयोरुभयोरपि श्रवणे सति दुःखनिवृत्तिपूर्वकक्षेमफलसाधनविषय उत्कटोभिलाप उदेति कथं मे क्षेमफलं स्यादिति ततस्तत्पूर्वं साधनं निर्दिशन्ति स्माचार्यास्तृतीयश्लोके गुणाभिमानिन इत्यादि। लोकस्य त्रिगुणप्रधानत्वात् तत्तद्गुणप्रधाना लोके तं तं ब्रह्मादिकं देवं फलार्थं सेवन्त इतिभावः। यथा नन्दस्येन्द्रयागः। साधनानीति क्षेमसाधनानि। गुणाभिमानिदेवानां प्रमेयत्वेपि। कृपाविशिष्टत्वावच्छिन्नं प्रमेयत्वं साधनत्वम्। ब्रह्मविष्णुशिवातिरिक्तवस्त्वज्ञानाल्लोके एवकारः। ननु हिरण्याक्षबाणप्रभृतयोसुरा अपि ब्रह्मविष्णुशिवोपासनया प्रभूतबलाः श्रूयन्त इति कथमेकान्ततो दैवसृष्टावेव गुणाभिमानिदेवानां साधनत्वोक्तिः सङ्गच्छतामिति चेत्, सत्यम्। श्रूयन्ते यद्यपि तथापि तदुपासनं क्षेमार्थं न भवति, किन्तु स्वपरोपद्रावणार्थमेवेति फलभेदादपि साधनभेदस्तत्रावश्यमङ्गीकार्य इत्याशयेन देवसृष्टावभिमतं फलं निर्दिशन्ति स क्षेम एवेत्यादि। क्षेमः कुशलं वर्तत इत्येवागतं पृच्छन्ति। अतः क्षेम एव न तु तत्,तद्देवतासायुज्यमपि फलम् । उद्देशाभावात् । फलं आनन्दाविष्टो भगवान् तस्य लोके क्षेमः कार्यमिति क्षेमः फलम् । आनन्दाविष्टो भगवान् फलमिति फललक्षणम्। अतो न प्रमेयसाधनयोः फललक्षणातिव्याप्तिः। वदन्ति च। 'नमोस्तु राजपद्मक्षाय षड्गुण्यगुरुशाखिने।सामादिचारुपुष्पाय त्रिवर्गफलदायिने' इति। तथा च देवसृष्टौ गुणाभिमानिनां देवानां यत् साधनत्वमुक्तं तच्च स्वरूपसत्तामात्रेण न निर्वहति किन्तु यागादिवद् वैदिकादिमार्गेण श्रद्धापूर्वकं उपासनादिव्यापाराविष्टा एव तथा। एवं च हिरण्याक्षबाणप्रभृतयो हि स्वेष्टदेवत्वज्ञानेन श्रद्धापूर्वकं सदुपदेशान् न भजन्ति स्म, किन्तु कौतुकार्थमेव। कथमन्यथा 'दोःसहस्रं त्वया दत्तं परं भाराय मेभव'दितिनिर्मर्यादवचनं व्याहरेयुः। न ह्युपास्यं लक्षीकृत्य संयुगप्रार्थनादिरुन्मत्तव्यवहार उपासकस्य योग्यः, तस्मान्नेदमुपासनं मर्यादया प्रेम्णा वेति, किन्तु केवलदम्भ एव, कथमन्यथा तत्रेश्वरः कुप्येत, वृकादीनामुपास्ये विरुद्धाचरणं स्पष्टमेवेति। किञ्चासुरा हि मायादेवताः सर्वे, माया हि व्यामोहिका कापट्यप्रधानेति तत्सेवका अपि तथेत्यपि कापट्ययुक्ता इति । उक्तपक्षपातस्तुतित्वं सङ्गमयितुमाहुः तत्रापीत्यादि। चतुर्षु। तत्रेति चतुर्षु प्रमाणादिषु। अनृतमिति राज-

१ स्वपरोपद्रावणम् ।

समनृतं स्थाणुर्वा पुरुषो वेत्यत्र पुरुषः तामसज्ञानविषयः। व्यावहारिकं गुणसन्निपातकार्यम्। शम्बरादिदर्शिता मायाऽनृतं प्रमाणं भगवत्स्थानापन्नत्वात् प्रवर्तकमित्यर्थः। 'ज्ञानकाशये'ति मायाविशेषणात्।'माया च तमोरूपे'ति श्रुतेस्तमोरूपापि। सत्त्वरजस्तमसां साम्यावस्था प्रकृतिरितिपक्षे रजसः संशयस्तमसो विपर्यासः सत्त्वान्निश्चयः। माया शब्दात्मिका प्रमाणं स्पष्टम्। अर्थात्मिकापि प्रमाणं दैत्यप्रवर्तकत्वात्। तेन द्वितीयस्कन्धनवमाध्याये 'आत्ममायामृते राज'न्नित्यत्र राजसतामसज्ञानरूपिका स्वयम्। सत्त्वं ज्ञानं व्यावहारिकम्। अत्र दैत्यपदेन लक्षणतो ये दैत्यास्त एव विवक्षिताः। अतो प्रह्लादादौ न नियमभङ्गः। तल्लक्षणं च 'भूमिर्दृप्तनृपव्याजे'त्यत्र निरूपितम्। उच्छास्त्रवर्तित्वम्। दित्युपाख्याने दयाभाव एवमन्यत्रापि हिंसाविहारभगवत्प्रत्यनीकत्वादितत्तत्प्रकरणादूह्यम्। प्रह्लादादीनां दैत्यवंशोत्पत्तिस्तु तद्वंशोद्धारार्थं, एकविंशतिपुत्रपौत्रादिरूपवंशोत्र। अत इति प्रमाणप्रकरणात् देवपक्षपातात्, यत इयं पक्षनिरूपिका स्तुतिरतो हेतोः। अत्रेदं ज्ञेयम्। पुरुषोत्तमपक्षे पक्षपातो न घटते,'सत्यं चानृतं च सत्यमभव'दितिश्रुतेर्भगवतः सर्वरूपत्वात् तथापि ब्रह्मादिभक्तैः सर्वरूपेणैव स्तूयेत न तु सत्यरूपतामात्रेणेति स्तुतस्तद्वशः सन्नम्बरीषमसङ्केम्बरीषपक्षपातो दुर्वासाः स्वशङ्करांशोऽपि न पक्षे पातितः भक्तवश्यत्वात्। एवं श्लोकतात्पर्यमुक्त्वा तत्र स्थितानामष्टविशेषणानां तात्पर्यं वदन्तः 'सत्यं पर'मिति वक्ष्यमाणश्रुतिनिरूपितपञ्चविधसत्येन सहैतच्छ्लोकोक्ताष्टपदनिरूपणीयसत्यस्यैकार्थतां दर्शयितुमाहुः सत्यमपीत्यारभ्य वेदे सत्यं पञ्चविधं निरूपितमित्यन्तेन। 'सत्यं पर'मित्यादिश्रौतवाक्यैः प्रमाणप्रमेयसाधनफलधर्मिभेदेन पञ्चविधं सत्यं वेदे यत् निरूपितं तदत्र श्लोके देवानां हितकार्यष्टविधं निरूपितं भवति। अत्र टिप्पण्याम्। अत्र इति विशेषणत्रयव्याख्यानोत्तरमष्टविधत्वं, चकारात् 'सत्यस्य सत्य'मित्यस्य व्याख्यानोत्तरं प्रमाणादिचतूरूपमित्यादिना त्रयोदशविधत्वत्रिविधत्वाभ्यां च षोडशविधत्वं च स्फुटीभविष्यतीत्यर्थः। सुबोधिन्याम्। तर्ह्येकैकेनैव विशेषणेनैकैकं सत्यं प्रतिपादनीयमित्यष्टभिर्विशेषणैरष्टविधं सत्यमत्र निरूपितंभविष्यतीत्युपस्थितामाकाङ्क्षां निरसितुमाहुः अंशतः षोडशविधमित्यादि। वेदे यत् पञ्चविधमुक्तं तदत्र सत्यमंशतः षोडशविधं निरूपितं भवतीत्यर्थः। अंशत इति उत्पत्त्याश्रितधर्मादिचतुष्टयस्य तथा धर्मिणश्च विचारेणेत्यर्थः। तथा च यद्यत्राष्टविधमेव सत्यं प्रतिपादितुमिष्टं स्यात् तदा त्वेकैकेन विशेषणेनैकैका विधोच्येत, तत् तु नास्ति किन्तु षोडशानां विधानामत्रांशतः सत्ये प्रतिपिपादयिषितत्वाद् यथासम्भवं प्रथमेन पदेन विधाद्वयं द्वितीयेन विधाचतुष्टयं तृतीयेन विधाद्वयं तुरीयेणैका विधा। ततः पञ्चमादित्रिभिः प्रत्येकं विधाद्वयमष्टमेन चैका विधेत्येवं षोडशविधानां प्रतिपादनीयत्वान्नोक्ताशङ्केति भावः। अत्र पञ्चविधं सत्यं तैत्तिरीये महानारायणे तच्छान्दोग्ये उद्गीथविद्यायामष्टविधमुक्तं तत् प्रश्नोपनिषदि षोडश-

विषमुक्तमिति सुबोधिन्यामपि तथा निरूपितम्, पक्षपाते स्वस्मिन्नाकर्षणार्थम्। पञ्चविधं सत्यं 'आत्मना प्रथमा लीले'ति कारिकया पञ्चाध्याय्यां प्रोक्तं तस्मात्षड्विधत्वं छान्दोग्ये तत्र छान्दोग्यीयषोडशविधानामवतारकाल उद्दिष्टाभिः षोडशविधाभिः प्रश्नोक्तषोडशविधानामतिदिष्टानामवतारिसम्बन्धिनीनां कासांचिद् बाधः। एवं च 'पुरुषत्वे च मां धीराः साङ्ख्ययोगविशारदाः आविस्तरां प्रपश्यन्ती'ति वाक्यमत्र। पञ्चविधसत्यनिरूपकं वेदमाहुः सत्यं परमित्यत्रेति। श्रुतिद्वयं महानारायणोपनिषदि। प्राजापत्यो गोत्रतः 'दित्यदित्यौदित्यपत्युत्तरपदाण्ण्यः' हेति प्रसिद्धे। प्रजापतिर्भगवान् वा, तथा च गीता 'अहं बीजप्रदः पिते'ति। अरुणस्यापत्यं आरुणिः 'अत इञ्'। श्रुत्युक्तं पञ्चविधत्वं स्फोरयन्तः श्रुतिं व्याकुर्वन्ति स यत् सत्यमिति। अत्र टिप्पणी वक्ष्यमाणेति वक्ष्यमाणो यः श्रुत्यर्थः 'सत्यव्रत'-पदेन तन्निरूपकं श्रुतिवाक्यमित्यर्थः। 'प्राजापत्यो ह्यारुणि'रित्यत्र 'सत्येन वायुरावाती'-त्यादिपञ्चविधं सत्यं 'सत्यं पर'मितिव्याख्यानोत्तरं व्याकृतं भविष्यति 'अत्र श्रुतिरनुसन्धेये'ति सुबोधिन्या। परत्वं सर्वोत्कृष्टत्वं, 'ब्रह्मविदाप्नोति पर'मित्यादिश्रुतिदृष्टमत्रापीत्याहुः सर्वेभ्य इति। यद्वेति अत्र टिप्पणी वाशब्द एवकारार्थो वाक्यालङ्कारे इति यद्वा सर्वोत्कृष्टमित्यत्र वाशब्द इति व्याख्येयम्। यदेव सर्वोत्कृष्टं तत् सत्यमिति व्याख्या। अत्र सर्वोत्कृष्टत्वस्य विधेयत्वयोगव्यवच्छेदकैवकारो न किन्तु वाक्यालङ्कार इत्यर्थः। एवं सत्यत्वेत्यादिनेति व्यतिहारेणैक्यं प्रतिपादनीयमित्यर्थः। यथा कृष्णोऽहमहं कृष्ण इति। 'परं सत्य'मितिश्रुतौ वाशब्दाभावात्, अस्य चोक्त 'परं सत्य'मितिश्रुतिव्याख्यानत्वादितिभावः। श्रुताविवेति अत्र प्रतिपादनीयमित्यस्य प्रकृतार्थत्वादाहुः स्तुतावपीति। सुबोधिन्याम्। एवं विधाद्वयं व्याख्याय तृतीयां व्याकुर्वन्ति स अत एवेति। यतः सत्यपरयोरैक्यं अतः साधनफलयोरैक्यादेव न तु भिन्नत्वात्।'सत्येन स्वर्गलोकात्'परशब्दार्थात् आत्मसुखरूपात्। कदापीति आत्मसुखैकीभावात् तथा। तुरीयां व्याकुर्वन्ति स ऐहिकेपीत्यादि। अत्र 'सतां हि सत्य'मिति श्रुतं वाक्यं साकाङ्क्षं तत् 'मूलं फल'मितिपदद्वयेन पूरितम्। मूलं प्रवृत्तिकारणम्। पञ्चमीं व्याकुर्वन्ति स अत इत्यादि। प्रमाणप्रमेयेति सर्वोत्कृष्टं प्रमाणं भगवान्'सत्यं पर'मित्यनेनोक्तम्। प्रथमोपस्थितत्वाद'त्र प्रमाणं भगवा'नितिवाक्योपस्थित्या न फलं भगवान्। कार्यकारणयोरभेदाच्छन्दव्यत्ययेन प्रमेयं कार्यं 'परं सत्य'-मित्यनेनोच्यते। 'सत्येने'ति तृतीयया साधनम्'सत्य'मिति फलम्। साधनानन्तरं तस्यौचित्यात्। सत्य एवेति समूलभूते धर्मिणि। उपलक्षणं सत्यपदं ज्ञानानन्तयोरिति वक्ष्यन्ति। न त्वनृते रमन्ते। तदत्रापीति स्तुतावपि। वेदान्तसारत्वात् श्रीभागवतस्य। स्तुतिवाक्यं व्याकुर्वन्ति लोके हीत्यादि। अत्र टिप्पणी स्पष्टा। पर इत्युच्यत इति लोकोक्तिः यद्वा परमस्यास्येयत्वेनास्तीति'परः। अग्रे आद्यच्। तथा सत्यमपीति अत्र आतिर्वृत्ती-

त्यन्तमावर्तते। तथा चैतयोरास्थानाच्छ्लोके परत्वकथनेन श्रुतौ 'सत्यं पर'मित्यत्र स्वविशेष्यव्रतबोधकसत्यव्रतमिति पुराणोपष्टब्धं सत्यपदं सत् सत्यं व्रतं च प्रतिपादयत्युपलक्षणविधया एवं प्रतिपाद्यपरमित्यनेन परैक्यं प्रतिपाद्यत इति 'सत्य'शब्देन सत्यं व्रतं चेत्युभयं सङ्गृह्यत इति भावः। तदेतत् प्रकृते योजयन्ति स भगवतस्त्वति। उभयं सत्यं व्रतं च अत्रोभयत्वं परत्वं वा शक्यतावच्छेदकं उद्देश्यतावच्छेकं च न तु सत्यत्वसमानाधिकरणं व्रतत्वम्। शरीरगौरवात्। अतो नोद्देश्यतावच्छेदकविधेययोः सत्यत्वयोरैक्यं प्रयोगबाधकम्। घटो घट इति प्रयोगाभावात् उद्देश्यतावच्छेदकविधेययोरैक्यात्। घटे घटत्वमिति तु भवत्येव प्रयोगः। तुना लौकिकव्रतसत्ययोर्व्यावृत्तिः क्रियते। उभयं सत्यमित्यस्य योजना यत् सत्यं यथार्थं, तत् उभयं सत्यं व्रतं चेति द्वयमिति। यद्वा उभयं सत्यमित्यस्यैवं योजना यत् सत्यं त्रैकालिकाबाधितं न तु यथार्थम्। यथार्थमित्यस्य 'परं सत्य'मित्यत्रैवार्थत्वं अन्यत् पूर्ववत्। इदं द्वयं भगवद्देवताकं, यत् पुनर्दम्भादिना कृतमयथार्थं तद् भगवत्स्वामिकं भगवदाज्ञया प्रवृत्तं न। यदभावे तत्र भगवत्स्वामिकत्वाभावः इति व्यतिरेकः न तु यदभावे भगवदभाव इति व्यतिरेकः। ननु श्रुतौ परशब्दसत्त्वेपि 'सत्यव्रत'मित्यत्र 'पर'पदाभावात् कथमुभयोरेकवाक्यतेति चेत् सत्यम्। 'सत्यव्रत'मित्यत्र सत्यं सर्वोत्कृष्टरूपं परं व्रतं व्रतसत्योभयार्थकं उपलक्षणविधया। श्रुतौ सत्यपदं सत्यव्रतार्थकं यथा तथा स्तुतौ व्रतशब्दः व्रतसत्योभयपर एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमिति। अत्र 'सत्यं पर'मित्यत्र परत्वं विधेयम्। 'सत्यव्रत'मित्यत्र सत्यत्वं परत्वं विधेयम्। 'कुटादिर्ब्राह्मणादयः शूद्रदाशोत्तराः प्रजा' इतिवदुत्तरस्य विधेयत्वम्। उत्तरस्योद्देश्यत्वं वा। एवं सत्यं व्याख्याय 'तस्मात् सत्ये रमन्त' इतिश्रुतितात्पर्यबोधनाय पदसम्बन्धमाहुः सत्यमेवेति। एवकारो न विग्रहघटकः किन्तु दम्भादिकृतसत्ययोगव्यवच्छेदकः। तथा च सत्ये रताः रमणयुक्ताः शरणं प्रपन्नाः न तु भयादिनेति ब्रह्मरुद्रमात्रपरम्। सजातीयदेवानां भयादिसत्त्वात्। एतेन सत्ये प्रमाणे रता इति वाक्यार्थ उक्तः। यद्वा सत्ये फले प्रवर्तके रता इत्यर्थः। एवं पदसम्बन्धमुक्त्वा 'लोके हि व्रत'मित्यादिना यदुक्त तन्निगमयन्ति एवमित्यादि। उभयोरिति अत्र टिप्पण्याम्। तदुभयेति व्रतसत्योभयप्राप्तौ। तथा च व्रतपदं स्वशक्यस्य नियमस्य परत्वेनैव सम्बन्धेनाजहत्स्वार्थया वृत्त्या सत्यमपि प्रापयतीत्यर्थः। सुबोधिन्याम्। एवं 'सत्यव्रत'मितिपदं व्याख्याय 'सत्यपर'मितिपदं व्याकुर्वन्ति अतः परमिति। अत्र टिप्पण्यां अत्रापीत्यादि। सत्यपरमिति पदेपि। लोके लौकिकं नियामकं तप्ततैलादौ शपथादिरूपम्। वैदिक द्वादशविधं चेति योजनया द्वैविध्यं निरूपितमित्यर्थः। परत्वसर्वोत्कृष्टत्वयोरैक्योक्तेः। 'पर सत्य'मितिश्रुत्यनुरोधेन परपदव्याख्यानम्। परपदार्थस्तूत्कृष्टत्वं पूर्ववत्। अभेदे सति प्रमाणे निरूपणीये उत्कृष्टे सत्यत्वं विधेयम्।

प्रमेये उत्कृष्टे सत्यत्वं विधेयमिति। प्रमाणे तु सत्ये उत्कृष्टत्वं विधेयं परन्तु परत्वोत्कृष्टत्वयोरैक्यमेव। प्रमाणं भगवान् प्रमेयकार्याभिन्नम्। यद्वा परपदार्थो लोके नियामकत्वं, तच यथाशास्त्रं तप्ततैलादौ शपथप्रणीयमानदण्डनीत्यादिरूपम्। राजादिनिष्ठम्। 'दण्डो दमयतामसि नीतिरसि जिगीषता'मिति गीतावाक्यात्। अयमुक्तार्थान्नातिरिच्यते। सुबोधिन्याम्। 'सत्यं तप' इति महानारायणस्था श्रुतिः। सत्यं प्रथमाष्टके औपधिसान्नाय्यरूपं विद्यात्वे सति वेदप्रतिपाद्यत्वात्। तपो द्वितीयाष्टके यज्ञः, वायूपधावनरूपः। वायव्यं श्वेतमालमेते'तिश्रुतेः। दमः तृतीयाष्टके इन्द्रियदमनरूपः 'प्रजाः सृजेये'ति 'स तपोतप्यते'ति श्रुतेः। तप ऐश्वर्ये दि० आ० अनि० लङ्। शमः चतुर्थाष्टके 'युञ्जानः प्रथमं मनस्तत्त्वाय सविता धिय' इति श्रुत्या मनोयोगोक्तेः। दानं पञ्चमाष्टके होमरूपम्। 'सावित्राणि जुहोती'तिश्रुतेः। सवितृदेवताकद्रव्याणां दानम्। हु दानादनयोः। धर्मः षष्ठाष्टके प्राचीनवंशकरणपूर्वकः 'प्राचीनवंशं करोती'तिश्रुतेः। प्रजननं सप्तमाष्टके कामरूपम्। 'प्रजननं ज्योति'रिति श्रुतेः। अग्नयो ब्रह्मचारिणः। अग्निहोत्रं गृहस्थस्य। यज्ञो वानप्रस्थस्य। 'वन्यैः चरुपुरोडाशै'रितिवाक्यात्। मनःसन्न्यासश्च यतेः। 'मनः पूतं समाचरे'दिति वाक्यान् मनः। 'आश्रमादाश्रमं गच्छेन्नान्यथा मरपरश्चरे'दितिवाक्यात्। वैदिके धर्म 'आश्रमादाश्रमं गच्छे'दित्युक्तम्। परत्वमुत्कृष्टत्वं स्पष्टं,द्वादशविधपरस्मिन् श्रुतिरपि महानारायण एव,'किं भगवन्तः परमं वदन्ती'तिप्रश्नेन तदुत्तरेण च परमत्वेनोक्तत्वम्। परमित्यत्र मवर्णागमः परमित्यर्थः। एवं परपदं व्याख्याय 'सत्य'पदं श्रुतिस्थं व्याकुर्वन्ति तत्सर्वमिति।आकर्षणान्तः। यथार्थमिति अर्थमनतिक्रम्येति यथार्थम्। अव्ययीभावः। यद्रूपं तदेवैतत् सर्वरूपेण जातमाकृष्टं च। अयथार्थं यद्रूपं तदिदं न भवति मायाकार्यत्वादित्यर्थः। एवं सत्यपदार्थ एक उक्तः द्वितीयः व्रतरूपोग्रे वक्तव्यः। अनेन श्रुतिस्थं 'सत्यपर'मितिपदं व्याख्यातप्रायम्। तदेतत् परत्वं स्मारयन्ति अत्र श्रुतिरिति। 'प्राजापत्यो हारुणिः सुपर्णेयः प्रजापतिं पितरमुपससार किं भगवन्तः परमं वदन्तीति तस्मै प्रोवाच सत्येन वायुरावाति सत्येनादित्यो रोचते दिवं सत्यं वाचः प्रतिष्ठा सत्ये सर्वं प्रतिष्ठितं, तस्मात् सत्यं परमं वदन्ति'। एवं तपो दमः शमो दानं धर्मः प्रजननश्रुतयः। अग्न्यग्निहोत्रयज्ञमनःसन्न्यासश्रुतयश्च। अर्थस्तु 'सत्येन' पूर्वजन्मीनसत्यभाषणेन मनुष्यत्वाद् देवतारूपत्वं प्राप्य लोकोपकारार्थं 'वायु'र्भूत्वा 'आवाति'। एव'मादित्यो'पि 'दिवं' दिवि वा 'रोचते' प्रकाशं करोति। 'सत्य'मेव 'वाचः' वागिन्द्रियस्य 'प्रतिष्ठा' स्थिरं स्थानं, अनृतं तु न स्थिरं स्थानम्। 'सत्ये' यथार्थभाषणे 'सर्वं' व्यवहारजातं 'प्रतिष्ठितम्'। 'तस्मात् सत्यं' 'परम'मुत्कृष्टं साधनं 'वदन्ति' इति। अत्र प्रथमे वाक्यद्वये आमुष्मिकफलोत्कर्षः सिध्यति। तदग्रिमवाक्यद्वये चैहिकफलोत्कर्षः सिध्यति। एतदभिप्रेत्यैव प्रथमायां 'सत्यं पर'मिति श्रुतौ 'सतां हि सत्य'मिति श्रुतावैहिकं फलं व्याख्यातम्।

भगवतो व्रतानीति। अत्र टिप्पण्याम्। भगवद्व्रतानां परत्वं तु असाधारणत्वादेव स्फुटम्। शेषस्य भगवन्नियामकस्य यथार्थरूपसत्यस्य पूर्वोक्तस्य परत्वं 'अत्र श्रुतिरनुसन्धेया पूर्वनिर्दिष्टे'ति सुबोधिन्यामेवोपपादितमित्याशयेन सत्यस्यार्थद्वये शक्तस्य यथार्थरूपमर्थमुक्त्वा व्रतरूपमर्थमाहुः भगवतो व्रतमित्यादि। 'भगवतो व्रतानी'त्यारभ्य 'प्रतिपादितानी'त्यन्तसुबोधिन्योक्तम्। पूर्वोक्तं सत्यस्यार्थं सारयन्ति स लोकानुसारेणेति। देवहितकारिणो भगवतः नियामकमिति सत्यं यथार्थरूपं पूर्वोक्तम्। सत्यमेवेति' सत्यसङ्कल्पतो विष्णुर्नान्यथा तु करिष्यती'ति। एवकारेण तस्य परयोगव्यवच्छेदः क्रियते। यद्वा 'सत्यव्रत'मित्यत्र व्रतपदं सत्यव्रतोभयवाचकमुक्तं तथाप्यत्र प्रमेयनिरूपणे यथा प्रमाणनिरूपणे सत्ये परत्वेनोपस्थिते व्रतसत्यत्वयोर्विधानं तथा प्रमेयनिरूपणे परस्मिन्नर्थचतुष्टयरूपे सत्यत्वस्य यथार्थत्वस्य विधानमत्र सुबोधिन्यां बोध्यं टिप्पण्यां तद्विवृतं बोध्यम्। तथा सति परपदेन विधाचतुष्कसङ्ग्रह इतिभावः। एवं च स्तुतौ सत्यपरपदे सत्यं परं यस्येति बहुव्रीहौ लम्बकर्णादिवत् पूर्वनिर्दिष्टस्य विशेषणभूतस्य सत्यस्य विधेयत्वम्। परपदोक्तस्य चतुर्विधस्य नियामकादेरुद्देश्यत्वं बोध्यम्। एवमत्र श्रुत्युक्तव्यतिहारबोधकं मूलस्थं पदद्वयं विवृतम्। व्यतिहारफलमैक्यं त्वग्रे विवेचनीयम्। सुबोधिन्याम्। 'कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यती'ति गीतायाम्। 'द्विःशरं नाभिसन्धत्ते रामो द्विर्नैव भाषते द्विर्ददाति न चार्थिभ्यो द्विः स्थापयन्ति नाश्रिता'निति वाल्मिकीये। अर्थस्तु। एकेनैव शरेण प्रतिपक्षो निराकरणीयः शरान्तरं च नैव योजनीयमित्यर्थे श्रीरामचन्द्रं नियमयति स। 'द्वासुपर्णा सयुजा सखाया समाने वृक्षे परिषस्वजाते तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीती'ति श्रुतिः। द्वाइत्यादि द्विवचनान्तम्। आवोडा। 'सुपां सुलु'गिति सूत्रेण। 'वृक्षे' शरीरे। 'परि'पूर्वकः 'ष्वञ्ज' सङ्गे धातुः तु० आ० अनि० लिड्द्विवचनान्तम्। 'पिप्पलं' कर्मफलम्। 'अभिचाकशीति' पश्यति। 'साधवो हृदयं मह्यं साधूनां हृदयं त्वह'मितिवाक्यम्। हृदयत्वं चिन्तनवशात्। आदिपदेन 'मदन्यत् ते न जानन्ति नाहं तेभ्यो मनागपी'तिवाक्यम्। भक्तैः सह निगूढभावकरणात् तथा। सर्वत्र नियमो ज्ञातव्यः। सुबोधिन्याम्। लोके हि त्रय इति। अत्र टिप्पण्याम्। त्रिसत्यमितीति। अष्टविधत्वं प्रथमे विधाद्वयं व्रतसत्यरूपं द्वितीये विधाचतुष्टयम्। द्वयं परशब्दार्थः लोके लौकिकं नियामकं वैदिकं द्वादशविधम्। सत्यपदार्थद्वयम्। सत्यं व्रतं च। यद्वा चतुष्कं परपदार्थः सत्यत्वं विधेयं भूरादित्रयं कायादित्रयमिति द्वयमित्यष्टविधत्वं सत्यस्येत्यर्थः। सुबोधिन्याम्। लोके हीति लोकास्त्रयो व्याहृतिरूपाः। कायादय इति आत्मोपनिषदि बाह्यात्मान्तरात्मा परमात्मेत्युक्तम्। बाह्य आत्मा कायः। अन्तरात्मालिङ्गम्। परमात्मा जीवः। सत्या यस्येति व्याहृतिलोकानां सत्यत्वम्। अनेनेति व्याहृतिरूपलोकग्रहणेन। त्रिसत्यपदेन वा। साधनफले 'सत्येन न सुवर्गा-

श्लोकाच्च्यवन्ते कदाचने'तिश्रुत्युक्तं साधनम्, 'सतां हि सत्य'मितिश्रुत्युक्तं फलं कार्यकारणवस्त्वैक्यमर्शनेनैकीकृत्य । कार्यकारणभावस्तु'एतन्नानावताराणां निधानं बीजमव्यय'मितिवाक्यात् । एवं चतुर्धेति अत्र टिप्पण्यां उपपत्तिरूपपदमष्टविधपदं चतुर्धापदं प्रतिलोमक्रमेण व्याख्यातम् । तत्र प्रथमं उपपत्तिरूप इति पदं व्याकुर्वन्ति स भगवतः कालरूपस्येति । कालदेहोनन्तः कृष्णः कालात्मा कालः सङ्कर्षणः स आत्मनि स्वरूपे यस्य स कालात्मेति व्याकृतं 'कालात्मा भगवाञ्जात'इति कारिकाव्याख्याने कालात्मपदम् । तथा च कालरूपस्य कालदेहस्य । कालं सङ्कर्षणं गृहीत्वावतीर्णस्य पुरुषोत्तमस्येति च । तत्र कालः प्रकृतिक्षोभकोपि देहः । अथ कालयोर्देहसङ्कर्षणयोरात्मापि काल इति पक्षो न सम्भवति । सङ्कर्षणोत्पत्तेर्द्वितीयाध्याये निरूपणादिति । तत्र सङ्कर्षणनिरूपणं जन्मप्रकरणार्थं न त्वध्यायार्थत्वार्थमतोयमपि पक्षः साधुः। छान्दोग्येऽष्टमप्रपाठके श्वेतकेतूपाख्याने प्रथमोपदेशे परदेवतात्मकोणिमोक्तः । द्वितीयोपदेशे काल उक्तः । सोत्र वक्तुं शक्य इति । तत्र कालात्मकोणिमोक्तः । यदा भवन्ति तदा भवन्ति 'स य एषोणिमे'तिश्रुतेः । तदेति काले दाप्रत्ययान्तं पदम् । तत्र नाना रसाः दृष्टान्तेत्र सर्वांशाकर्ष इति । भगवतः कालरूपस्येत्यर्थो वा । उपपत्तिरन्यथाज्ञानमित्याशयेनाहुः यदि सत्यरूपत्वमिति । सत्येनाष्टविधेन रूप्यते व्यवह्रियत इति सत्यरूपं तस्य भावः सत्यरूपत्वम् । इदं सत्त्वं विधेयम् । व्रतादिकमिति आदिना सत्यम् । सत्यव्रतमित्यत्र व्रतपदार्थौ, नियामकं लौकिकम् । वैदिकं च द्वादशविधम् । व्रतानि चेति चकारेण भगवन्नियामकसत्यं,अन्यथाज्ञानमेतत् । सप्तमस्कन्धे 'समः सुहृत् अविकृतं ब्रह्मे'तिपक्षपाते । तथा चोपपत्त्या रूप्यते व्यवह्रियते इत्युपपत्तिरूपो भगवान् । अष्टविध इति सुबोधिनीं व्याकुर्वन्तः 'सत्यव्रत'पदव्याख्याने 'सत्यपर'पदव्याख्याने च व्रतसत्यपदव्याख्याने च व्रतसत्ययोः प्रतिष्ठत्वात् तयोरभेदे, परपदोक्तनियामकयोश्चाभेदे, विधाष्टकपूर्तिर्दुर्घटेति तदभावाय स्पष्टयन्ति स व्रतं हीति । इत्यादीत्यन्तं 'सत्यव्रत'पदं विवृतम् । यत्र सिद्धं यद् व्रतं सत्यं च तत्प्रमाणभूतं बोध्यम् । भगवत्सम्बन्धिना तादृशेन लौकिकव्रतेन सत्येन च कर्तृनिष्ठधर्मप्रमितिजननात् । अन्यत् स्पष्टमिति 'यत् परं लोक' इत्यादिसुबोधिनीस्थं 'लोके लौकिकं नियामक'मित्यादिना विवृतत्वात् स्फुटमित्यर्थः । तदेतद् सङ्गृह्णन्ति लौकिकमित्यादि । लौकिकमिति नियामकमितिशेषः । नियामकं चेति देवहितकारिणो भगवतो नियामकं च । इदं चतुर्विधं सत्यं प्रमेयभूतं बोध्यम् । स्मार्तवैदिकभगवद्वाक्यैः प्रमितत्वात् । एवं षड्भेदैर्द्वे अपि परसत्यरूपे श्रौते विधेयकोटी ज्ञापिते । 'त्रिसत्य'पदोक्तं विधाद्वयं व्याकुर्वन्ति लोका भूर्भुव इत्यादि । कायजीवेति जीवो लिङ्गम् । 'जीवो जीवमजीवय'दितिवाक्यात् । लोकाः फलरूपा इति पुरुषार्थत्वेन प्राप्यत्वात् फलरूपाः। इतरे त्वितराणीति इतरे कायादय इतराणि साधनानि । इदं चेति 'त्रिसत्य'-

पदे त्रिसत्येनोक्तं द्विप्रकारकमित्यर्थः। चतुर्धेति सुबोधिनीं व्याकुर्वन्ति स पदद्वये इति। 'सत्यव्रतं सत्यपर'मिति पदद्वये यो विधेयभेदस्तेन द्वैविध्यमित्यर्थः। प्रमाणप्रमेयत्वाभ्यां द्विविधत्वम्। त्र्यमिति त्रिसत्यपदे त्रिशब्देनोक्तं द्विविधम्। फलसाधनभेदेन द्विप्रकारकम्। तथा चैवं मूलस्थैस्त्रिभिः पदैः श्रौतं प्रमाणप्रमेयसाधनफलरूपं सत्यं समर्थितं ज्ञेयमित्यर्थः। एवं चतुर्धा निरूपितो धर्मीति पञ्चविधः 'स वा एष पुरुषः पञ्चधा पञ्चात्मेति प्राजापत्यो हारुणि'रित्यत्र श्रुतेरत एवा'त्मना प्रथमा लीले'त्यत्र फलप्रकरणे पञ्चधा गणितः। सोष्टधा छान्दोग्यप्रथमप्रपाठके स षोडशधा प्रश्नछान्दोग्याभ्यां यद्यपि 'स वा एष पुरुषः पञ्चधा पञ्चात्मेति प्राजापत्यो हारुणि'रित्यत्रत्य'संवत्सरोसावादित्यो य एष आदित्ये पुरुषः स परमेष्ठी ब्रह्मे'ति परमेष्ठिनमुक्त्वोक्ता तथाप्यादित्यान्तःस्थः परमेष्ठी ब्रह्मैव(परमात्मैव),'अन्तस्तद्धर्मोपदेशा'दित्यधिकरणादिति पुरुषोत्तमपरत्वमक्षुण्णम्। सुबोधिन्याम्। नन्वेवं श्रौते चातुर्विध्ये स्वोक्तेष्टविधत्वे च समर्थिते शेषाणां पञ्चानां विशेषणानां किं प्रयोजनमित्याकाङ्क्षायां पक्षपातार्थं स्वोक्तषोडशविधापूरणं श्रौतव्यतिहारफलभूताभेदसाधनं च प्रयोजनमित्याशयेनाहुः उत्पत्तिरूपमित्यादि। उत्पत्त्यावतारेवतारिधर्मसत्योत्पत्तिधर्मपुरःसरधमप्रथमज्ञप्तिरूपया रूप्यते निरूप्यत इति तादृशं पञ्चभिर्विशेषणैर्निरूपयतीत्यर्थः।. योनिः कारणमिति कालात्मनो देहरूपकालस्य समवायित्वाभावात् प्रसिद्धं निमित्तमात्रत्वमुक्तम्। तेनाभिन्ननिमित्तोपादानत्वमुक्तं भवति। ननु भगवानेवेति निरोधलक्षणग्रन्थे एवकारेण कालरूपदेहयोगव्यवच्छेदः स्यादत आहुः कालात्मेति। श्वो न भवेदिति द्वितीयदिनात्मकः कालो भगवता यदि नोत्पादितो भवेत् वागसत्यैष स्यात्, श्वो दास्यामीति प्रतिज्ञायां कालोपि विशेषणत्वेन प्रविष्ट आगामिदिनाधिकरणकभविष्यत्कालीनदानानुकूलो व्यापार इत्येवम्। एवं च द्वितीयदिनात्मकः कालो नाविर्भवेत् तदा तु विशेषणाभावप्रयुक्तस्य विशिष्टदानस्याप्यसिद्ध्या श्वो दास्यामीति प्रतिज्ञावागसत्यैव स्यादित्यर्थः। इदं सत्यं श्रुत्युक्तद्वादशविधप्रमेयेषु प्रथमोद्दिष्टसत्यमुदाहृतम्। तस्यैव प्रमाविषयत्वात्। त्रिषु सत्यज्ञानानन्तेषु स्वरूपेषु पक्षपातस्तुतौ। तेन व्रतशपथादिरूपप्रमाणे कारणत्वं प्रथममुदाहार्यमिति कुचोद्यमपास्तम्। लाघवात्। तेन कालात्मनि गर्भनिविष्टे कारणत्वं ज्ञेयम्। एवं चाष्टविधसत्यनिरूपिता कारणता काले या निरूपिता सा नान्यन्यायसाधारणत्वेन किन्तु कालोत्र साक्षादेव विशेषणतया प्रविष्ट इति विशिष्टैव कारणता प्रतिपाद्यत इति। एवं सर्वत्रेति तथा चाष्टविधं सत्यं भगवदुपादानकारणकत्वाद् वाक्यसत्यत्वप्रयोजकं न तु मायोपादानकं सत्यं दम्भादिरूपं वाक्सत्यत्वप्रयोजकं कारणं चेत्यर्थः। एवं सत्यं प्रति कालो निमित्तं कारणम्। अग्रिमविशेषणेष्वप्यतिदिशन्ति स एवं सर्वत्रेति। सत्यवागात्मकप्रमेयवदन्यत्रापि तपःप्रभृतिषु श्रुत्युक्तेषु प्रमेयेषु राजनीतिदण्डादिरूपेषु

लौकिकेषु प्रमेयेष्वभगवद्व्रतरूपेषु प्रकीर्णवाक्योक्तप्रमेयेषु तथा प्रस्तुतदेवहितकारिभगवदवतारप्रयोजकस्ववाक्यादिरूपे च प्रमेये तथा 'सत्यव्रत'मिति विशेषणोक्तद्विविधे प्रमाणे तथा 'त्रिसत्य'पदोक्ते साधने फले च सर्वत्र कालस्य हेतुत्वं ज्ञेयमित्यर्थः। अन्यथा कालसत्यत्व उपपत्तिरूपत्वमेषां सत्यानां न स्यादितिभावः। प्रकाशे तु एवं सर्वत्रेत्यस्य 'निहितं च सत्य' इत्यादिविशेषणेष्वप्यष्टविधं सत्यं तत्तदुक्तेन यथा 'मत्यस्य योनि'मित्यत्र सत्यकारणत्वेन तथा सत्यपालकत्वेन सत्यप्रलायकत्वेन नेत्रत्वेन आत्मत्वेन धर्मेण वा तत्तत्कार्याणि पालनादीनि तेषां प्रयोजकं ज्ञेयमित्युक्तम्। यदि पालनकालो न भवेत् तदा स्थितौ पालयतीतिवागसत्यैव स्यादित्यादि। अग्रिममवतारयन्ति स न केवलमिति। सत्यस्येत्यष्टविधस्येति ज्ञेयं सर्वत्र। यथा ब्रह्मा जगदुत्पाद्य कृतार्थो रक्षणादिक्रियायामुदासीनस्तथा भगवतो रक्षणादिक्रियायामौदासीन्यं वारितम्। सर्वसामर्थ्यसहितत्वात्। तेन नित्यमेव सत्यस्यावेक्षां कृत्वा पालयतीति सत्यस्योत्कर्षो दर्शितः। 'ननु निहित'पदस्याधेयपरतया रक्षणप्राप्तिः कथमित्यत आहुर्नितरामिति। तथा च योगेन रक्षणप्राप्तिरित्यर्थः। अत्र हि केवलयोगेन रक्षणक्रियाप्रतिपादने रूढार्थस्य सर्वथात्यागादरुच्या रूढोर्थोपि यथा सङ्गृहीतो भवति तथा प्रकारान्तरेण व्याकुर्वन्ति स स्वयं तत्र स्थित इति। तथा च यथा पङ्कजपदं रूढ्या पङ्कजत्वेन रूपेण पद्ममुपस्थापयति, योगेन पङ्कजनिकर्तृत्वं च बोधयति तथात्र सप्तम्यन्तसत्यपदसमभिव्याहृतनिहितपदं रूढ्या सत्यानुयोगिकां स्थितिं भगवति बोधयद् योगेन सत्यप्रतियोगिकहितकर्तृत्वं च दर्शयतीतिभावः। समुदायार्थ इति अवयवशक्तिविशिष्टरूढार्थ इत्यर्थः। उपपत्तिनिरूपकाष्टविधसत्येषु यथा प्रमाणादिरूपत्वं दर्शितं तथोत्पत्तिप्रसङ्गेऽपि दर्शयन्ति स अनेनेत्याद्याहेत्यन्तेन। 'निहितं च सत्य', इति विशेषणेन। अष्टविधसत्यकारणत्वस्य कालात्मनि उत्पत्तिविचारे प्रथमज्ञप्तिविचारेऽष्टविधं सत्यं भगवद्रक्षितत्वेन प्रमेयं निहितपदप्रथमार्थे। न ह्यरक्षितं प्रमातुं शक्यते। द्वितीयार्थे भगवदधिष्ठितत्वेन वाश्यादिवत् स्वस्वकार्यसाधनं चोक्तम्। न हि भगवदनधिष्ठितं सत्यं स्वस्वकार्यं साधयितुं शक्नोति। 'गामाविश्य च भूतानि धारयाम्यहमोजसे'तिवाक्यात्। ननु यद्येवं तर्हि प्रमाणफले कुत्रोक्ते इति चेत् तत्राहुः इतरावाद्यन्तयोरिति। अत्र टिप्पण्याम्। 'सत्यात्मक'मित्यन्तिमेन पदेन फलम्। एतस्मादाद्येन'तंसत्यनेत्र'मित्यनेन प्रमाणमित्यर्थः। भगवत्स्वरूपज्ञानशक्त्योः फलत्वप्रमाणत्वे प्रसिद्धे। आद्यं फलबोधकापेक्षया न तु प्रकृत'निहितं च सत्य' इत्यस्यापेक्षयेत्यरुच्या पक्षान्तरमाहुः अथ वेति। फलमिति सत्यस्याष्टविधसत्यस्य कर्मासम्बद्धस्य लयस्थानं अतो लयः तत्स्थानं च फलम्। ननु योनिशब्दस्य कारणवाचकत्वादत्र प्रमाणनिरूपणं कथं सङ्गच्छत इत्याकाङ्क्षया 'सत्यस्य योनि'मित्यनेन प्रमाणनिरूपणे प्रकारमाहुः मानेत्यारभ्य मानमित्यन्वम्। 'योनि'शब्दस्य

प्रमाणपरत्वं 'शास्त्रयोनित्वा'दिति व्याससूत्रे भास्कररामानुजाचार्याभ्यामादृतम्। इति तथेति इतरौ भगवन्तावाद्यन्तयोरित्यर्थः। क्वचिद् भगवद्ज्ञानस्यैवौचित्यादिति भावः। मेयसिद्धिरित्युक्ते मेयज्ञानसिद्धिरितिलक्षणां वारयन्ति स्म पूर्वमज्ञस्येति। लौकिकाधिभौतिकसत्यज्ञानसत्त्वेप्याधिदैविकस्याज्ञस्येत्यर्थः। ज्ञानेन आधिदैविकज्ञानेन। तदैवेति ज्ञानकाल एव सिद्धमभूत् ज्ञानस्य विषयाविनाभावात्। एवकार आधिभौतिककालयोगव्यवच्छेदकः। तच्च ज्ञानं आधिदैविकं सत्यं भगवानित्याकारकम्। भानं फलं विवृतौ सुबोधिन्यामेव स्फुटं सत्य एवेत्यादिना। सुबोधिन्यां नन्वितरावाद्यन्तयोरित्यत्र किं गमकमित्यत आहुः चकार इत्यादि। 'निहितं च सत्य' इत्यत्र चकार उक्तं समुच्चिन्वन्नित्यर्थकः स्यादित्यनुक्तं प्रमाणफलसमुच्चयरूपमाहेत्यर्थः। तथा च चकार एतद्गमक इति भावः। अत्रैवेति स्वसमवाय्याधिदैविकसत्य एव। एवकारश्चिदानन्दयोगं व्यवच्छिनत्ति। सत्यस्य 'सत्यमितीति। सत्यस्याष्टविधस्य सत्यं आधिदैविकमित्यर्थः। 'सत्यस्य सत्य'मित्यनेन कथं लयस्य बोध इत्याकाङ्क्षायामाहुः यथेत्यादि। बृहदारण्यके 'पूर्णमदः' पूर्णमिदं पूर्णात् पूर्णमुदच्यते पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यत' इत्यत्र पूर्णशब्दवाच्यस्य प्रपञ्चस्य 'पूर्णात् पूर्णमुदच्यत' इति पदच्छेद उत्पत्तिः, 'पूर्णमुत् अच्यत' इति पदच्छेदे स्थितिं चोक्त्वा 'पूर्णस्य पूर्णमादाये'त्यनेन स्वजनके आधिदैविके पूर्णे ब्रह्मणि कार्यस्य लय उच्यते। तथात्रापि सत्यस्योत्पत्तिस्थिती पूर्वविशेषणाभ्यामुक्त्वात्र सत्यस्याधिदैविकं सत्यमितिबोधनेनोत्पत्तिस्थितिप्रसङ्गादेवात्र लय उच्यत इत्यर्थः। सत्यमिति अष्टविधम्। तर्ह्यत्र कथं 'इतरावाद्यन्तयो'रितिसुबोधिन्युक्तस्य फलस्य 'सत्यस्य सत्य'मित्यस्य टिप्पणीद्वितीयव्याख्यानोक्तस्य बोध इत्यत आहुः सत्य एवेत्यादि। उक्तटिप्पणीदिशापूर्वमज्ञस्य लौकिकस्याधिभौतिके सत्येष्टविधे एव प्रतिष्ठितं सत्यं स्वाधिदैविकं फलमित्यर्थः'। तस्य चाधिदैविकसत्यस्य भगवत्त्वेन ज्ञानेन विषयस्वरूपमपि तदैव सिद्धं भूतमिति भानं फलमित्याहुः तच्चाधिदैविकमिति। 'मनस उतये मनो विदु'रितिश्रुत्या तथा सिद्धत्वात्। तथा चाष्टविधे सत्ये भगवत्त्वेन भाते सत्ये भगवत्त्वेन ज्ञानेन ज्ञानस्य विषयाविनाभावात् विषयस्वरूपमपि तदैव सिद्धं भूतं फलमित्यर्थः। भगवानेवेत्येवकारस्तु 'अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशा'दिति सूत्रात्। तथा च प्रलयो हि कारणे प्रवेशरूप इति कार्यं सत्यं कारणभूते सत्ये प्रतिष्ठितं भवति तच्च भगवानेवेति तेन भगवत्त्वेन रूपेण सत्यं फलमित्युक्तम्। तदुपपादयन्ति स्म अनेनेत्यादि। भगवतीति आधिदैविकसत्यरूपे इत्यर्थः। प्रतिष्ठितः प्रतिष्ठां भक्तिं इतः प्राप्तः तारकादिभ्य इतच्। स सायुज्ये फले सति सत्यः। यः सत्य इति आधिभौतिकेष्टविधे सत्ये प्रतिष्ठितपदार्थः पूर्वोक्तः। स आधिभौतिकसत्यद्वारा भगवति स्वाधिदैविकसत्यरूपे प्रतिष्ठित इति पूर्ववत्। उक्तमिति अनेन प्रकारेण फलमुक्तमित्यर्थः।

पञ्चविधमिति अत्र टिप्पण्याम् प्रमाणादिचतूरूपं भगवति प्रतिष्ठितं भक्तरूपं सत्यं चेति पञ्चविधमिति। प्रतिष्ठितमित्यस्य भक्तरूपं सत्यमित्यर्थः। उक्तमितिशेषः। अष्टविधस्य सत्यस्यानेन प्रकारेणोत्पत्त्यादिप्रसङ्गे प्रतिष्ठितत्वस्यापि सिद्ध्या तदादाय पञ्चविधं सत्यमुक्तमित्यर्थः। उत्पत्तिः प्रथमविशेषणेन, द्वितीयविशेषणेन प्रमेयं साधनं चोक्तम्। तृतीयविशेषणेन स्थितिः प्रलयश्चेति श्रीवल्लभजितः। इदं पूर्वान् नातिरिच्यते। प्रथमेन प्रमाणता। द्वितीयेन प्रमेयसाधनत्वे। तृतीयेन फलत्वं भगवति प्रतिष्ठितत्वं चेत्येतैः धर्मैः सत्यं पञ्चविधमिति पितृचरणाः। अनेनैव त्रयोदशत्वस्यापि सिद्धिमाहुः एतावतेत्यादि। अत्र टिप्पण्याम् पूर्वोक्तमष्टविधमेतत् पञ्चविधं चेति त्रयोदशधा, तर्हि पूर्वप्रतिज्ञातषोडशविधत्वं कथमित्याकाङ्क्षायामाहुः अग्रे ज्ञानशक्तिद्वयं धर्मी चेति षोडशधेति। सुबोधिन्याम्। क्रियाशक्तिरिति क्रियाजनककृतिरूपं क्रियात्मकं च भगवत्सामर्थ्यम्। अत्र क्रियाशक्तेस्त्रयोदशविधत्वमेवं ज्ञेयम्। कर्मकाण्ड इति प्रसिद्धेः क्रियाशक्तिर्वेदार्थः स च प्रमेयनिरूपणे लौकिको द्वादशधा वैदिक उक्त इति त्रयोदशधा। भगवान् वा तत्र निविष्टस्त्रयोदशः। ननु वेदार्थत्वेपि प्रकृतसत्यव्रतादिषड्विशेषणैः प्रतिपाद्या कथमिति चेच्छृणु। पक्षपातिस्तुतित्वाद् गौणक्रियात्वेन व्रतसत्ययोर्धर्मानुमापकत्वात् प्रमाणकोटिपातेपि कर्मरूपत्वात् क्रियारूपत्वम्। प्रमेयरूपाणां तप्ततैलादौ शपथरूपं सत्यादिद्वादशविधं वैदिकं भगवद्व्रतानि भगवतो नियामकं सत्यवाक्यं चेत्येषां नियामकानां यथासम्भवं क्रियारूपत्वात् क्रियाजनकत्वाच्च स्पष्टमेव। साधनफलयोश्च कर्मप्रधानकत्वात् तथात्वं तृतीयविशेषणे। चतुर्थविशेषणे प्रमाणस्यापि उत्पत्तिक्रियान्तःपातित्वात् तथात्वम्। पञ्चमे साधनस्य प्रमेयस्यापि तथात्वादेव क्रियारूपत्वम्। षष्ठे विशेषणे उत्पत्त्यादिक्रियान्तःपातित्वादेव च प्रतिष्ठितफलरूपयोरपीति तथा। गौणकर्मत्वेपि भगवच्छक्तित्वं तु भगवदाधारकत्वात् स्फुटम्। गीतायां त्रिविधं कर्मोक्तं 'करणं कर्म कर्तेति त्रिविधः कर्मसङ्ग्रह' इत्यष्टादशेध्याये। सप्तमं विशेषणं क्रियाशक्तिनिरूपणानन्तरं ज्ञानशक्तेः स्मरणाद् व्याकुर्वन्ति स ज्ञानशक्तिमित्यादि। वेदवेदान्तसारत्वादितिभावः। ऋतसत्यनेत्रे यस्येति नेत्रे ऋतसत्ये इत्यर्थः॥ 'चित्रगुमानये'त्यत्र 'शूद्रदाशान्ताः प्रजा' इत्यत्र वा पूर्वपदार्थस्य विधेयत्वदर्शनाच्च। ज्ञानजनिकां भगवच्छक्तिं सत्यत्वेन निरूपयतीत्यर्थः। नन्वत्र ऋतसत्ययोर्द्वयोर्निरूपणस्य किं प्रयोजनमित्यतस्तदुपपादयन्ति स ज्ञानशक्तिरित्यादि। ज्ञानप्रधाना शक्तिर्ज्ञानशक्तिः ज्ञानजनिका भगवच्छक्तिरिति यावत्। ज्ञानरूपा। 'ज्ञानशक्तिक्रियाशक्ती सन्दिह्येते परस्थिते' इति भाष्यात्। द्विविधेति द्विप्रकारिका। 'उद्यमश्च तथा प्रोक्तः सामग्रीरल उच्यत' इति निबन्धात्। तत्रर्तसत्यनेत्रपदे समासवर्तिपदार्थानु समास एकार्थीभावसामर्थ्यात्। तत्र प्रथमपदार्थः प्रमाणत्वावच्छिन्नं ज्ञातम्। द्वितीयपदार्थः प्रमेयत्वावच्छिन्नं सत्यम्।

बलपदार्थः। सामग्रीरूपज्ञानस्य प्रमाणस्य बलं सत्यप्रतिपादकत्वेन ज्ञानरूपवेदस्य स्फूर्तिः। वेदस्यात्मत्वात् तज्ज्ञानस्य मनोमयविषयस्य ज्ञाने भगवत्प्राप्तिः। 'ऋते ज्ञानान् न मुक्ति'-रित्यत्र वेदात्मज्ञानस्यापि वक्तव्यत्वात्। शब्दार्थयोर्नित्यसम्बन्धेन ब्रह्मज्ञानकाले वेदज्ञान-स्यावर्जनीयत्वात्। तदेतदुक्तं प्रमाणबलेनेति। 'प्रकृत्यादिभ्य उपसङ्ख्यान'मिति वार्तिकेन तृतीयाऽभेदे। प्रमाणबलाभिन्ना ज्ञानशक्तिरित्यर्थः। द्वितीयपदार्थः प्रमेयत्वावच्छिन्नं सत्यम्। तस्य सामग्रीरूपज्ञानस्य प्रमेयस्य बलं भक्तिर्ज्ञानं च ताभ्यां भगवत्प्राप्तिः प्रसिद्धा। वक्ष्यन्ति च 'प्रमाणानां बलं दग्ध्वा मोहयामास गोपिका'मित्यादि। तदेतदुक्तं प्रमेय-बलेनेति। प्रमेयबलाभिन्ना ज्ञानशक्तिरित्यर्थः। एवं प्रमाणप्रमेयबलपदार्थेषु निश्चितेषु तदर्थयोर्ज्ञानशक्तिपदयोः षष्ठीतत्पुरुषः। तदेतद् विशदयन्ति स्म प्रमाणं वेद इति। अनधिगतार्थगन्तृत्वलक्षणं प्रमाणम्। ऋतसत्यरूपधर्मनिरूपणे भगवतः प्रमेयत्वाभावादाहुः प्रमेयं भगवद्धर्मा इति। तदुक्तम'थातो धर्मजिज्ञासे'ति प्रतिज्ञाय 'चोदनालक्षणोर्थो धर्म' इति। अत्रापि नोदनालक्षणसत्त्वात्। 'ये वै भगवता प्रोक्ता' इत्यादिवाक्यैः प्रमितत्वात्। ऐश्वर्यधर्माणां चोपलक्षणमित्याशयेन प्रमेयं भगवद्धर्मा इति सामान्यनिर्देशः। यद्वा प्रमा-णस्य बलं भक्तिः प्रमेयस्यापि बलं भक्तिरुभयोः करणत्वेन व्यापारावश्यकत्वात्। तेन प्रमाण-प्रमेययो ऋतसत्ययोः स्वव्यापारबलविशिष्टे शक्तिः। ऋतसत्ययोर्भगवत्प्रापकत्वरूपनेत्र-त्वाभावेन समासेनन्वयापत्तेः। ननु सत्यप्रसङ्गऋतनिरूपणमप्रसक्तम्। तथा च ऋतमिति विहाय 'सत्यव्रत'मित्यादिवत् सत्यनेत्रमित्येव वक्तव्यमित्याशङ्कां वारयितुमाहुः ऋतं सूनृतेति। सूनृता सत्यप्रतिपादिका। 'ऋतं च सूनृता वाणी कविभिः परिकीर्तिते'तिभगव-द्वाक्यात्। वेद इति वाणीविशेष्यमिदम्। सत्यप्रतीति तेन सत्येन प्रतिपाद्यप्रतिपादक-*भावसम्बन्धात् सत्यप्रसङ्गऋतनिरूपणमितिभावः। ऋत इति सत्यप्रतिपादकत्वात्।* ऋत-निरूपणमिति 'अग्निर्वाग् भूत्वा मुखं प्राविश'दितिश्रुते ऋतं अग्निरूपा सूनृता वाक् वेदः ज्ञानमिति यावत्, वेदपदेन वेदान्तस्यापि वेदने ऋते कारणदृष्टिः कर्तव्या। तस्योभय-विधस्य निरूपणं कृतमित्यर्थः। ननु ज्ञानशक्तेर्द्वेधा निरूपणे किं प्रयोजनमित्यतस्तत्प्रयो-जनमाहुः भगवत्प्राप्तिरिति। द्वेधापीति शब्दार्थयोर्ज्ञानेन। वेदः शब्दः सत्योर्थः। उक्तमिति द्वयमुक्तम्। ज्ञानक्रियारूपं प्रतिपाद्यप्रतिपादकरूपं च। शक्तिद्वयमिति अत्र न फलसाधनयोः प्राप्तिः प्रमाणप्रमेयनिरूपणप्रसङ्गे क्रियाज्ञानशक्त्योरन्तर्गडुत्वाच् चतुर्णाम्। 'कर्मणैव तु संसिद्धिमास्थिता जनकादयः' 'तमेव विदित्वातिमृत्युमेती'त्यादिषु कर्मज्ञानयो-र्भगवत्प्राप्तिसाधनत्वमुक्तम्। तन्मात्रोपबृंहणत्वात् प्रमाणप्रमेयमात्रोक्तेः। सत्य एवेति सत्ये पञ्चदशविधे पूर्वोक्त एव। सत्यमेवात्मा स्वरूपं यस्येत्यपि पाठः। अतति व्याप्नो-तीत्यात्मेत्याहुः यः सर्वानेवेति। धर्मानिति पञ्चदशसत्यरूपानपि। 'सत्यात्मक'पदं

प्रकारान्तरेण व्याकुर्वन्ति कं फलं चेति। अत्र आत्मा च कं च तयोः समाहार आत्मकम्। सत्यं आत्मकं यस्येति विग्रहः। एतदेवाहुः सत्यमात्मा कमिति। सुखं फलम्। अत्र चकार एक उक्तः तस्याभिप्रायः। कर्मधारये पूर्वपदान्ते चकारः प्रयोक्तव्यः, द्वन्द्वे तु चरमपदान्ते चकारः समासार्थस्यैकत्वात्। चकारद्वये समासार्थद्वयापत्तिः। अत्र 'सत्य'मिति-विधायकं पदम्। 'आत्मक'मुद्देश्यं पदम्। एवं प्रतिपादनस्य प्रयोजनमाहुः सच्चिदिति। सत्यरूपतेति ननु सच्चिद्रूपतानन्दस्येति कुतो नोक्तमिति चेन्न। पक्षपातस्तुतित्वेन सत्य एव भरात्। अत एव छान्दोग्ये 'सदेव सोम्येदमग्र आसी'दितिश्रुतिः। 'सत्तामात्रं निर्विशेष'मिति देवक्या ब्रह्मविद्यायाः स्मृतिः। सत्यरूपता तूभयोरेवम्। आत्मा चित् कमानन्द इति। 'सत्यात्मक'मित्यत्रेति 'सत्यं ज्ञानमनन्तं ब्रह्मे'ति स्वरूपलक्षणात्। तत्र तत्र सत्यादि-रूपप्राधान्यात् सत्यादिरूपेण व्यवहारः। तादृश इति वैकुण्ठस्थे जीवैः वैकुण्ठद्वारस्थैः 'तीरं क्षीरपयोनिधे'रित्यस्य व्याख्याने वैकुण्ठस्य द्वारं क्षीरपयोनिधेस्तीरे उक्तम्। भगवद्गृहे शरणमार्गः स्वगृहे भक्तिमार्ग इति। 'मुमुक्षुर्वै शरणमनुव्रजे'दिति गोपालतापिनीयश्रुतेरेवकारः भक्तिमार्गयोगव्यवच्छेदकः। देवानामिति तेन ब्रह्मण ईश्वरत्वेपि देवानामन्येषां बहुत्वात् तदनुरोधेन पूर्वं जीवैरित्युक्तम्। सत्यतयेति 'तं यथा यथोपासते तद्वैनं भूत्वावती'ति-बृहदारण्यकोक्तेः। अथ तैत्तिरीयप्रश्नछान्दोग्योक्तेषु चतुष्केषु षोडशकलासु च कः कोंशोत्र श्लोके उच्यत इत्याकांक्षायामुच्यते। तत्र तैत्तिरीये [1]शीक्षायां पृथिवी पूर्वरूपम्, द्यौरुत्तररूपम्, आकाशः सन्धिः, वायुः सन्धानम्, इत्यधिलोकम्, अग्निः पूर्वरूपम्, आदित्य उत्तररूपम्, आपः सन्धिः, वैद्युतः सन्धानम्, इत्यधिज्यौतिषम्, आचार्यः पूर्व-रूपम्, अन्तेवास्युत्तररूपम्, विद्या सन्धिः, प्रवचनꣳसन्धानम्, इत्यधिविद्यम्, माता पूर्वरूपम्, पितोत्तररूपम्, प्रजा सन्धिः, प्रजननꣳसन्धानम्, इत्यधिप्रजम्, अधरा हनुः पूर्वरूपम्, उत्तरा हनुरुत्तररूपम्, वाक् सन्धिः, जिह्वा सन्धानम्, इत्यध्यात्ममिति चतुष्क-पञ्चकमुक्तम्। पूर्वद्विकं स्मार्तकृतपक्षपातस्तुतौ। तृतीयं वैदिककृतपक्षपातस्तुतौ। चतुर्थं लोककृतपक्षपातस्तुतौ। पञ्चमं भगवन्मार्गकृतपक्षपातस्तुतौ। एवं च माता पूर्वरूपमित्यंशः। सत्यस्य मातृवद्रक्षकत्वात्। सुबोधिन्यामग्रिम[2]श्लोके 'पितराविवोत्पादकत्वं सूचित'मिति वक्ष्यते। अत्र प्रकाशे श्रीपुरुषोत्तमोपन्यस्तप्रश्ने 'इहैवान्तःशरीरे सौम्य स पुरुषो यस्मि-न्नेताः षोडशकलाः प्रभवन्ती'तिश्रुतिः अवतारिपरा। 'सुकेशा च भारद्वाज' इत्यारभ्य 'ते हैते ब्रह्मपरा ब्रह्मनिष्ठाः परं ब्रह्मान्वेषमाणा' इतिश्रुतेः। अभेदादत्रापि षोडशकला नोक्ताः। छान्दोग्ये मधुविद्यायां तु वक्ष्यमाणाः अवतारपराः। 'तद्धैतद् घोर आङ्गिरसः कृष्णाय देवकीपुत्रायोक्त्वोवाचे'तिश्रुतेः। अग्रे'ऽच्युतमस्यक्षितमसि प्राणसꣳसितमसीत्युक्त-

१. 'शिक्षायां' इति स्यात्। २. अष्टाविंशतितमे।

मुवाचे'त्यर्थः। 'अच्युतमसी'त्यत्र हे आदित्य 'अक्षितं' अक्षीण अक्षतं वा स्वरूप'मसि,' 'अच्युतं' स्वरूपादच्युतं स्वरूपं 'असि' 'प्राण'श्वासौ 'संशितं' तनूकृतमसीति। मन्त्रत्रयार्थः। छान्दोग्यीयाः षोडशकला 'जानश्रुतिर्ह पौत्रायणः' इत्यारम्भके प्रपाठके उक्ताः 'प्राचीदिक्कला प्रतीचीदिक्कला दक्षिणादिक्कलोदीचीदिक्कलैष वै सोम्य चतुष्कलः पादो ब्रह्मणः प्रकाशवान् नाम'। प्रमाणं चतुष्कमिदं 'अत्र प्रमाणं भगवा'नित्यत्र 'तत्सम्बन्धात् कृतिस्तस्य प्रमाण'मिति। तत्तद्दिग्देवानां भगवत्त्वात् प्रामाण्यम्। 'पृथिवी कलान्तरिक्षं कला द्यौः कला समुद्रः कलैष वै चतुष्कलः पादः ब्रह्मणोनन्तवान् नाम,' कृत्या पृथिवी, पृथिवीति प्रमाविषयं प्रमेयं भवति। 'अग्निः कला सूर्यः कला चन्द्रः कला विद्युत्कलैष वै सोम्य चतुष्कलः पादो ब्रह्मणो ज्योतिष्मान् नाम', ब्रह्मत्वात् फलत्वं स्पष्टम्। 'प्राणः कला चक्षुष्कला श्रोत्रं कला मनः कलैष वै सोम्य चतुष्कलः पादो ब्रह्मण आयतनवान् नाम', 'प्राण' इन्द्रियवाचकोपीति साधनत्वं स्फुटं इत्युक्तास्ता उच्यन्ते। उपक्रमस्य सञ्जातविरोधित्वादुपसंहारोक्ता मनःकला। 'स मानसीन आत्मा जनाना'मितिश्रुतेः 'ईश्वरः सर्वभूतानां हृद्देशेर्जुन तिष्ठती'ति गीतायाः। स्वस्थित्यर्थं मनःकलां मनोरूपमंशमाचकर्ष। कला धर्मो यद्यपि तथापि व्यापकत्वमपेक्ष्य धर्मत्वमस्त्येव।

१०-२-२७. एकायनोसावित्यत्र एवं प्रमाणेति पूर्वश्लोके सत्यस्य प्रमाणत्वकथने 'सत्यात्मक'मित्यनेन प्रमाणरूपतां भगवत उक्त्वाग्रे 'त्वमेक एवास्ये'त्यनेन श्लोकेन साधनरूपतां वदिष्यन् तदुभयसंदष्टेनै'कायन'श्लोकेन भगवतो जगद्रूपतया जगत्त्वेन जगतो लोकप्रमेयतां शास्त्रपुरःसरं स्तुतिपाठार्थमाहेत्यर्थः। ननु ब्रह्माण्डस्य वृक्षत्वमत्र निरूप्यतेतः कथमत्र भगवतः प्रमेयत्वप्रपत्तिरित्याकाङ्क्षायामाहुः वृक्ष इवेत्यादि। वृक्षरूप इति न पक्षी नापि वृषभः वेदे। वेदान्ते तु 'यदेकमव्यक्तमनन्तरूप'मितिश्रुते'रेकं' मुख्यं रूपं वृक्षः। वेदवेदान्तसारत्वात्। इदं जगदित्यादि लोके घटपटकुड्यकुसूलानीत्यस्मिन् प्रमेये न सर्वं जगत् प्रमेयं भवति, अत इदं जगदित्युक्तम्। समष्टिरूपम्। एतावतापि न सर्वं जगन्निरूपितम्। गच्छतीति जगदिति व्युत्पत्तेस्तो योगरूढ्या जडमपि, तेन चिज्जडात्मकं ब्रह्माण्डरूपम्, तदपि न लोके पक्षिरूपं वृषभरूपं वा। पक्षिणश्चित्त्वात्। 'ततो ह जातो भुवनस्य गोपा हिरण्मयः शकुनिर्ब्रह्म नामे'ति श्रुतेः। 'ब्रह्म' चित्। वृषभो धर्मरूपत्वात् क्रिया सद्रूपातो वृक्षत्वेन निरूप्यते लोक इत्यर्थः। ननु लोके श्रुतेः किं प्रयोजनं शक्तिग्रहे भाषाया अपि कारणत्वादिति चेन्न स्तोतुर्वेदगर्भत्वाद् वेदो वृक्ष इवेति। तेनादिवृक्षोसावित्यपि मूलान्वयो बोधितः। एवेति 'समानाः प्रजाः प्रजायन्त' इति संहिताया एवकारः। अनेनेति उभयोर्वृक्षतानिरूपणेन। महत्त्वं फलसहितत्वम्। परममहत्परिमाणवत्त्वं वा, कार्येभ्यो महत्त्वात् कारणस्य। विष्णुरूपं वृक्षं दृष्टान्तयन्ति स यथाश्वत्थेति। आदिना

वटः। किंशुकश्च। कोटिश इति दीर्घायुष्ट्वेन वर्षावृत्त्या च कोटिसङ्ख्यां ददातीति कोटिशः। फलानीति दार्ष्टान्तिके कार्याणि। सोपीति भगवानपि। तादृश इत्यस्य तं भगवन्तमिवेमं जगद्वृक्षं पश्यन्ति जना इति दृश्यत इत्यर्थः।'त्यदादिषु दृशेरनालोचने कञ्चे'ति सूत्रेण कञ्। एवकारस्तु 'ऊर्ध्वमूलमवाक्छाखं वृक्षं यो वेद सश्चन। न स जातु स नः श्रद्दध्यान् मृत्युर्मा मारये'दितिश्रुतेः। पश्च गतौ भ्वा०प० से० सश्चतीति'सश्चनः' नन्द्यादित्वाल्ल्युः। हे 'सश्चन'। अस्माभिः सह वर्तमानाः सवयं तेषां स नः षष्ठ्या बहुवचनस्य नस्।'मा' माम्। तथा च मृत्युमारणाभावश्रद्धारूपफलेन तस्य वृक्षस्य भगवद्रूपतावगमात्। ननु सत्यरूपस्य तथात्वमस्तु, कालात्मनस्तु 'कालात्मा भगवाञ् जात' इति कारिकोक्तस्य कथमिति चेन् न। कालात्मनः कालदेहस्य कृष्णस्य जगदभिन्ननिमित्तोपादानत्वात्।'गुणव्यतिकराकारो निर्विशेषो प्रतिष्ठितः पुरुषस्तदुपादानमात्मानं लीलयासृज'दिति तृतीयस्कन्धे तथा सिद्धत्वात्। उपादेयस्योपादानात्मकत्वेन काले तथात्वसिद्धेरमत्यूहत्वात्। क्वचिदिति काले। ब्रह्माण्डनिर्माणमिति जगदात्मकब्रह्माण्डनिर्माणम्। 'तस्माद् विराडजायते'तिश्रुतेः। 'तस्मात्'कालात्मनः 'सहस्रशीर्षा पुरुष' इत्युपक्रमात्। भगवत एवेति कालात्मनः। एवकारस्तत्त्वयोगव्यवच्छेदकः। क्वचिदिति पूर्ववत्। तत्त्वद्वारेति तृतीयस्कन्धषष्ठाध्याये। 'जनयत् स्वाभिर्मात्राभिरधिपूरुष'मिति वचनात्। 'अधिपूरुषं' ब्रह्माण्डम्। अधिपूरुषपदस्य 'तस्माद् विराडजायत विराजो अधिपूरुषः स जातो अत्यरिच्यते'ति पुरुषसूक्ते तथोक्तेः स्वराजि शक्तिः। तथापि देवदत्तपदस्य जीवदेहोभयत्र शक्तेस्तथात्रापि ब्रह्माण्डपदस्योभयत्र शक्तेः। अधिपूरुषपदे पक्षान्तरमपि सुबोधिन्यां 'पुरुषादप्यधिकं वे'ति तत्त्वयोगव्यवच्छेदं कृत्वा तत्त्वद्वारा ब्रह्माण्डनिर्माणमुक्तं, तत्र तत्त्वनिवेशमाहुः अक्षरमत्रेति। अक्षरात् सृष्टावक्षरमुपादानं, अत्र कालात्मनः सृष्टौ अक्षरं फलम्। कार्यत्वेन ग्राह्यं न तु अक्षरत्वेन। घटः पृथिवीत्यत्रेव, अन्यथा तत्त्वाकारणतापत्तेरक्षरस्य। तथा चाक्षरद्वारा तत्त्वानि यानि तानि नैवकारव्यवच्छेद्यानि। अकारणत्वापत्तेः। फलतावच्छेदकमाहुः तस्य तत्त्वानीति। तत्त्वत्वं फलतायाः कार्यताया अवच्छेदकम्। तस्य कालात्मनः अपि तत्त्वानि फलानि कार्याणीत्यर्थः। बीजमिति उपादानकारणम्। 'एतन् नानावताराणां निधानं बीजमव्यय'मिति। कृष्णस्यावतारत्वात्। तर्ह्यवतारेऽक्षरस्य क्वोपयोग इत्याकाङ्क्षायामाहुः शकुनीत्यादि। 'द्वा सुपर्णा सयुजा सखाया समाने वृक्षे परिषस्वजाते, तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योभिचाकशीती'तिश्रुतेः शकुनिः स्वराट् तेन भक्षितं कर्मफलं सुखदुःखसाक्षात्काररूपं विषयीकृतम्। तन्मध्ये किञ्चित् कर्म निर्गमनस्वभावकं निर्गतमवतारे गतं स्वफलं सुखदुःखसाक्षात्काररूपं करोतीति फलतीत्यस्यार्थः। कृष्णे फलत्यक्षरं कर्म। फलमक्षरमुक्तं तद्ग्रहणे मनसि सर्वतो निवृत्तव्यापारे स्वयमुपलब्धनिजसुखानुभवो भवति ब्रह्मज्ञानरूपः, तदा गर्भो मानसीनः मनोंशेऽक्षरात्मके मनसि

स्थितः तदा हृदयं भवति। हृदि अयं हृदयमिति छान्दोग्यव्युत्पत्तेः, हृदो मनसोक्षरात्मकत्वे जातेऽयं पुरुषोत्तमः कालात्मेति युक्तम्। क्षेमः फलं लोके। किञ्च 'तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा चे'ति बृहदारण्यकात्, ततः शकुनेर्निर्गतं विद्याकर्मपूर्वप्रज्ञं फलति कृष्ण इति। ततश्च 'नैव किञ्चित् करोमीति युक्तो मन्येत तत्त्ववि'दित्युक्त्वा 'इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारय'न्निति भाष्यीयगीतायाः। अस्य विनियोग उत्तरार्धे नारदकर्तृकदर्शने 'ध्यायन्तं ब्रह्म परम'मित्यत्र। अधुनाक्षरांशानां विनियोगं वदन्ति स इति तत्त्वानामिति। इति हेतोस्तत्त्वानां ब्रह्माण्डनिर्मातॄणां तृतीयस्कन्धे पञ्चमाध्याये 'एते देवाः कला विष्णो'रित्यादिना निरूपिता। तथा च शकुनिभक्षितमेकैकं भूतं ततः शकुनेर्निर्गतं सत् तत्त्वरूपं कृष्णे फलति देहत्वे। अस्मदादिदेहेषु पाञ्चभौतिकत्वदर्शनात्। प्रभुदेहश्चेतनपाञ्चभौतिक इत्यर्थः, दैत्यपक्षव्यतिरेकं साधयन्ति स तत्र दैत्यादिकल्प इत्यादि। 'दैत्यानामादिकल्पे मुख्यसिद्धान्त इत्यर्थः'। एको वृक्ष इति वृक्षपदेनातादृश्यो लतौषधयो व्यावृत्ताः। 'प्रवृत्तिं च निवृत्तिं चे'तिवाक्यादेवमुक्तम्। चाद्यादीति आदिना नैयायिकाः। बहुभ्य इति अत्रस्थविष्टांशविष्टान्तर्गतबहुभ्योंऽशेभ्यः। अण्डमिति ब्रह्मणोऽण्डं ब्रह्माण्डमित्यत्र ब्रह्मकर्तृकमण्डमित्यत्र ब्रह्म वृक्षः कार्यमण्डं वृक्षः। तत्र कारणवृक्षनिरूपणं वृत्तम्। कार्यवृक्षोण्डमित्यर्थः। 'एतन्नानावताराणां निधानं बीजमव्यय'मितिवाक्यात् कृष्णावतारे बीजमण्डमयनं बीजं यस्य जगतः। तेनारम्भे ब्रह्माण्डात्मकं जगत् वृक्षत्वेन निरूप्यत इत्यत्र ब्रह्मणोण्ड आत्मा स्वरूपं यस्य जगत इतिविग्रहः। पुराणमतेनाहुः प्रकृतिरिति। माया। 'आत्ममायामृते राजन् परस्यानुभवात्मनः न घटेतार्थसम्बन्धः स्वप्नद्रष्टुरिवाञ्जसे'तिवाक्यात्। श्रौतमतेनाहुः अक्षरमिति। 'अक्षरात् सौम्य विविधाः भावाः प्रजायन्त' इतिश्रुतेः। बीजमिति ज्ञेयम्। अन्य इति उपनिषच्चिन्तकाः। श्वेताश्वतरे 'कालः स्वभावो नियतिर्यदृच्छे'तिश्रुतौ 'चिन्त्य'मित्यस्वरसादन्य इति। अनेनेति दैत्यपक्षव्यावर्त्यै[1] एकायनत्त्वकथनेन। अयमिति प्रपञ्चः जगत्पदार्थो वा ब्रह्माण्डो वा। सद्वृक्ष इति औषधिविद्यात्वेपि बहुबीजफलवृक्षाणां मायिककामहैतुकजगदितिसिद्धान्तपातित्वेन सुराविन्दुस्पृष्टगङ्गाम्भोवदसद्वृक्षत्वम्। एकबीजयुक्तफलवृक्षत्वात् सद्वृक्ष इत्यर्थः। आवरणभङ्गे बहुबीजत्वमेकबीजत्वं ज्ञेयम्। 'आदिवृक्ष'स्यैकत्वलिङ्गेनाद्वितीयब्रह्मणि समावेशात्, किञ्च 'यदेकमव्यक्तमनन्तरूप'मितिश्रुतौ 'तमसः परस्ता'दितिकथनाच्च वैदिकवृक्षस्य धर्मत्वात् वृत्तत्वाचानेकरूपकार्यवदादिकार्यवृक्ष इत्याशयेनाहुः अत इति। कार्यसद्वृक्षत्वात्। 'असा'विति विप्रकृष्टे व्याख्यातमपि पदं प्रत्यक्षे छान्दसं मत्वाहुः असाविति परिदृश्यमान इति। अत एव लोको वक्ति। 'नमोस्तु राज्यवृक्षाये'ति, परं वृक्षत्वेन न प्रत्येति। न 'रूपमस्येह तथोपलभ्यत' इति गीता-

१. 'व्यावर्त्यै' इतिमूलपाठः। 'व्यावृत्त्यै' इति स्यात्।

वाक्यात्। विदुषां शाब्दी प्रतीतिस्तु वृक्षत्वेन वर्तत एव। फले इति श्रुतौ कर्माकर्मविकर्मणामुक्तत्वादितिभावः। कर्मणः सुखं फलम्। अकर्मविकर्मणोः दुःखम्। दुःखमेवेति विषयासक्त्या दुःखम्। 'प्रसक्ताः कामभोगेषु पतन्ति नरकेशुचा'विति वाक्यादेवकारः। दैत्यफलाद् व्यतिरेकं साधयितुं दुःखफलोपादानम्। पुनर्दैत्यपक्षाद् व्यतिरेकं साधयितुमाहुः सृष्ट्यन्तर इति। अनीश्वरवादेन कामहैतुके सृष्ट्यन्तरे। अत्र त्विति दैत्यपक्षव्यतिरिक्तायां ब्राह्म्यां सृष्टौ। द्विविधाः विषयिणो विरक्ताश्च। ईश्वरप्राप्त्यर्थं विरक्ताः। 'नमाम ते देव पदारविन्दं प्रपन्नतापोपशमातपत्रम्। यन्मूलकेता यतय' इतिवाक्यात्। 'पानेन ते देव कथासुधाया' इतिवाक्याच्च। विशेषणद्वयं व्याख्याय तृतीयं व्याकुर्वन्ति स त्रयो गुणा इति। 'आत्ममायामृते राजन् परस्यानुभवात्मनः न घटेतार्थसम्बन्धः स्वप्नद्रष्टुरिवाञ्जसे'तिवाक्यात्। 'त्वं देवशक्त्यां गुणकर्मयोनौ रेतस्त्वजायां कविमादधेजः' इतिवाक्यात्। 'कविं' महत्तत्त्वम्। अधःप्ररोहाः अधःशिफाः। अन्यत्रेति दैत्यपक्षे। तामसान्येवेति 'प्रवृत्तिं च निवृत्तिं च जना न विदुरासुरा' इतिवाक्यात्। एवकारो गुणद्वययोगं व्यवच्छिनत्ति। क्वचिदिति वृषभासुरादौ राजसप्रकरणगतत्वात्। न भवन्तीति प्रह्लादादयस्तु नासुराः किन्तूद्धारार्थमासुरेषु प्रकटाः। रसा इति सुखास्वादकाः। रस आस्वादने। अन्यत्रेति दैत्यपक्षे। विषयोर्थमन्तरा न सिध्यतीति कामवादिनामर्थोपि पुरुषार्थः। एवकारेण धर्ममोक्षयोगव्यवच्छेदः। पञ्चेति पाणिवाङ्मेण्ढ्राङ्घ्रिपायवः इन्द्रियाणि। गमनमङ्घ्रिजन्यं कर्म। आकुञ्चनं पायुजन्यम्। प्रसारणं मेण्ढ्रजन्यम्। अपक्षेपणं परिशेषाद् वाग्जन्यम्। क्षिप प्रेरणे। वाचा प्रेर्यत इति। उत्क्षेपणं पाणिजन्यम्। अत्र वदन्ति। पञ्चानां गमनेन्तर्भाव इति। तत्र दोर्भ्यां गच्छतीतिप्रयोगापत्तिः। अन्यत्रेति दैत्यपक्षे। उत्क्षेपणाभावः 'अधो गच्छन्ति तामसा'इतिवाक्यात्। हस्तजन्यं कर्म तु वर्तत एव। श्रौतं मतमाहुः अथ चेति। अन्नमयादय इति अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयास्तैत्तिरीयोक्ताः। 'स वा एष' इति श्रुतिः महानारायणे। पुरुषोत्तमपरापि तदन्तःस्वजगत्सहितपुरुषोत्तमपरेति जगदात्मकवृक्षपरा। तदेतदुक्तं ब्रह्माण्डविग्रहोपि तथेति। अन्यत्रेति दैत्यपक्षे। तमोरूपमायोपासकत्वादानन्दाभावः। षडिति पञ्चज्ञानेन्द्रियाणि मनश्च। दैत्यपक्षव्यतिरेकमाहुः अयमात्मेति। दैत्यपक्षे मायिको जीवः चतुर्थस्कन्धोक्तः। षड्विधमिति जन्यं, अत उत्पत्त्या दैत्यपक्षे भिन्नम्। षड्विधज्ञानस्याप्याविर्भावतिरोभावौ देवपक्षे। त्वगादय इति नृवर्गे त्वक् मांसं शुष्कमांसं हृदयान्तर्गतमांसं वपा रुधिरं एकान्या। इति त्वगादयः सप्त। त्वच इति बहुवचनेनोपलक्षणसूचनाद् बोध्याः। वृक्षे वल्कलादीनि 'त्वक् स्त्री चर्मणि वल्के च मृदुत्वचि विशेषत' इति कोशः। आदिना मांसादिस्थानीयानि।

१.=शुद्रमासस्नेहः।

रुधिरं रक्तरूपम्। सप्तब्रह्माण्डावरणानि। अष्टधेति पुरुषोत्तमयोगाध्याये गीतायामस्ति। देहछिद्राणीति विराजि सप्तदिवि। द्वे भुवर्लोके। 'भुवर्लोकोस्य नाभित' इतिवाक्यात्। मेण्ढ्रपायुछिद्रे। छदानीति 'पत्राणि छदः पुमा'नित्यमरः। नपुंसकत्वं सार्तम्।'द्वा सुपर्णे'ति-श्रुत्याहुः द्वौ जीवेति। जीवः स्वराट्। अन्तर्यामिणो नानावताराः। 'एतन् नानावताराणां निधानं बीजमव्यय'मितिवाक्यात्। एतस्मादित्यादि एतस्मात् ब्राह्मात् वैलक्षण्यं मायिकत्वम्। अन्यत्रेति दैत्यपक्षे। युक्तय इति 'युक्तयः सन्ति सर्वत्रे'त्येकादशस्कन्धवाक्यम्। समष्टिरूप इति असाविति विप्रकृष्टः असाविति परिदृश्यमान इतिपक्षद्वयेपि समष्टिरूपः,व्यष्टयस्त्वन्ये वृक्षाः। अथ तैत्तिरीयप्रश्नछान्दोग्योक्तेषु चतुष्केषु षोडशकलासु च कः कोंशोत्र श्लोक उच्यत इत्याकाङ्क्षायामुच्यते। विस्तरः पूर्वश्लोक उक्तः। तैत्तिरीयेत्र पितोत्तररूपम्। वृक्षस्य पालकत्वात्। सुबोधिन्यां च 'पितराविवोत्पादकत्वं सूचित'मिति प्रश्ने कला। विशेषाभावात्। छान्दोग्ये प्राची दिक् कला, प्राच्यां दिशि देवताप्रत्यक्षाकाशशरीराकाशे च दिगन्तर्भावात् प्रत्यक्षदिग्देहका। दिव्यादिवृक्ष इति। यद्यपि प्राची दिक् आधारस्तथापि कार्यवृक्षमपेक्ष्य कलाधर्मोस्त्येव।

१०–२–२८. त्वमेक एवास्येत्यत्र प्रमेयमिति प्रमाविषयं प्रमेयम्। प्रमात्र विद्वत्ता शाब्दी,लोकानां प्रत्यक्षम्। भगवदात्मकमिति अन्यथा 'भगवानिति शब्द्यत' इतिवाक्योक्तप्रतिज्ञासन्न्यासाख्यनिग्रहस्थानापत्तेः। अत्रेत्यादि जगतो भगवदात्मकत्वे। उपपत्तिं जगत् सन्न स्याद् भगवतः प्रसूतित्वादि न स्यादित्यन्यथाज्ञानरूपाम्। साधनरूपं देवतात्रिकं समाप्तौ वाच्यम्। 'सामादिचारुपुष्पाये'तिश्लोकतृतीयचरणं सामादिषु दानरूपं सेवासमर्पणं साधनम्। मायावादादीति आदिना बाह्याः 'सत' इतिपदकथनस्यावश्यकत्वमाहुः अन्यथेति। जगतः सत्त्वाभावे जगत्कर्तृत्वेनोच्यमानो भगवान् को ब्रह्मा वा असतः कर्ता स्यात्। आत्मसृष्ट्यभावात् सृष्ट्यन्तरवद् ब्रह्मद्वारकः कर्ता स्यादित्यर्थः। ब्रह्मणो रजउपाधित्वाद् रजसश्च मायैकदेशत्वादसदुत्पादकत्वम्। अस्मिन्निति अधिकरणे ल्युडित्युक्तम्। अनेनेति करणे घञुक्तः। कार्यलक्षणसन्निवेशोक्तेः'कृष्णस्तु भगवान् स्वय'मितिवाक्योक्तं स्मारितम्। वक्ष्यन्ति च सुबोधिन्यां 'नैश्चिन्त्यं वाचि पूर्वव'दिति। न नश्यतीति अनुग्रहशब्दात् अत्यन्तानुग्रहे यं मृत्योरपि रक्षतीति तथा। प्रह्लादमिव। चेतः प्रति मायायाः करणत्वाभावादाहुः चेतो मतिरिति चिती संज्ञाने मतु अवबोधन इत्येकार्थता। मायारूपतमसो ज्ञानावरकत्वं न चेतआवरकत्वमिति चेतोत्र मतिः। सार्ती योगरूढ्यादिषु काचिच्छक्तिः बाहुलकम्। सर्वे सर्वार्थवाचका इति वा। त इति माया च तमोरूपेति मायावृता मतिस्तामसी अखण्डे नानात्वप्रकारिका भवति। अतस्मिन् तत्प्रकारिका। अखण्डे एके नानात्वप्रकारिका। 'अधर्मं धर्ममिति या मन्यते तमसा वृता सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ तामसी'ति

गीता। 'मनसैवानुद्रष्टव्यमेतदप्रमेयं ध्रुव'मिति बृहदारण्यकमप्रमेयविषयकं, न तु लौकिकप्रमेयविषयकम्। चेतसः सुषुप्तिग्राहकत्वान् नात्र मुख्यवृत्तत्वम्। तथा च ते मायावृतमतयस्तामसा इत्यर्थः। न तु विपश्चित इति सात्त्विकज्ञानेन विविधपश्यचित्त्वं तद्विशिष्टा विपश्चितः। पश्यतीति पश् क्विप् सर्वापहारिलोपः विपश् चासौ चित् चिती संज्ञाने। क्विप्। सात्त्विकज्ञानेन पश्यति ततः सम्यक् ज्ञानवन्त इत्यर्थः। लौकिकसाधने योजयन्ति स त एवेति। लौकिका एवेत्यर्थः। अल्पेनैवेति अणुना अल्पं परिच्छिन्नम्। यावत् तद्ग्राह्यं 'यत् तु कृत्स्नवदेकस्मिन् कार्ये सक्तमहैतुकं अतत्त्वार्थवदल्पं च तत् तामस-मुदाहृत'मिति गीतायाः। अनुभयादेवकारो परिच्छिन्नयोगव्यवच्छेदकः। चित्तं पुष्कलमिति व्यापकसृष्टं पुष्कलं भवति। 'तन्मनोकुरुते'ति बृहदारण्यके 'मन' इत्येकवचनात्। सङ्कोचा-भाव इति सत्त्वेन रजसा तमसा तदवान्तरभेदैश्च सङ्कोचस्याणुत्वस्याभावे। 'अणवश्चे'ति व्याससूत्रं अन्नमयमनःपरम्। अत एवेति लौकिकानां सङ्कुचितबुद्धित्वादेव। भिन्नतयेति अभिन्ने भिन्नतया तामसबुद्ध्या स्वीक्रियत इत्यर्थः। मोहस्तमःकार्यम्। विपश्चित इति व्याख्यातम्। तत्तत्कार्येति सत्त्वरजस्तमसां कार्याणि जननस्थितिसंयमाः तदनुरोधेन तथा विलक्षणान् नाना पश्यन्तीत्यर्थः। त्वामेव मन्यन्ते न तु भिन्नं पश्यन्तीति साधनैर्भेदापगमादितिभावः। भेदः सत्त्वादिगुणकृतः। एवकारस्तु 'प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये। बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी'ति गीतायाः। सात्त्विकया बुद्ध्या सत्त्वादिगुणोपमर्दात्। 'सर्वभूतेषु येनैकं भावमव्ययमीक्षते। अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विक'मिति गीतावाक्यात्। न तु भिन्नमिति साधनैर्भेदापगमात्। अन्त इति श्लोकस्य माहात्म्यबोधकस्यान्ते। माहात्म्येति त्यदादीनामुत्सर्गतः पूर्वपरामर्षि-त्वात् तथा। गुणैरिति लौकिकानाम्। एत इति ब्रह्मविष्णुशिवाः। एवकारेण हरियोगव्यव-च्छेदः। भगवद्रूपा इति गुरुमुखाच्छ्रुत्वा सेवा लौकिकैरपि कार्येत्युक्तम्। तेन जगज्जन्मादि-कर्तृत्वरूपब्रह्मलक्षणस्य नातिव्याप्तिः, त्रयाणां भगवद्रूपत्वात्। साधनमिति कृपाविशिष्टो भगवान् प्रमेयरूपः साधनमित्युच्यते। कृपावेशस्तु कृपया सत्त्वादिगुणयुक्तानां जीवाना-मर्थे सत्त्वादिगुणैर्ब्रह्मविष्णुशिवादिरूपाङ्गीकारात्। स्वभावस्यान्यथाभावाभावात्। कृपा-पात्राणि जनाः। इदं यथारुचिपदेन ज्ञाप्यते। देवसेवोक्त्या देवेषु पक्षपातो बोधितो ज्ञेयः। अथ तैत्तिरीयप्रश्नछान्दोग्योक्तेषु चतुष्केषु षोडशकलासु च कः कोंशोत्र श्लोक उच्यत इत्याकाङ्क्षायामुच्यते। तैत्तिरीये विद्या सन्धिरत्र। 'ब्रह्मविद्यां प्रवक्ष्यामि सर्वज्ञानमनुत्तमां यत्रोत्पत्तिं लयं चैव ब्रह्मविष्णुमहेश्वरा'दितिश्रुतेः। सुबोधिन्यामपि ब्रह्मविष्णुशिवसेवोक्तात्र, तथापि प्रजा सन्धिः एकचतुष्कगतत्वात्। 'अस्य सत' इति प्रजोक्तेः। प्रश्ने कला काचित्। विशेषानुल्लेखात्। छान्दोग्ये 'कले'ति श्रुतिः। भूमौ ब्रह्मादिदेवाः पार्थिवशरीरप्रजाः शब्द-

प्रतिकृतिलिङ्गद्वारा प्राणप्रतिष्ठया सेव्या इत्युक्तम्। यद्यपि वायुः आधारस्त्रयाणां देवानां तथापि व्यापकत्वांशकला धर्मरूपा भवत्येव।

१०-२-२९. विभर्षीत्यत्र फलमाहेति लौकिकसाधनयुक्तेषु लौकिकेषु ये भक्तास्तेषां सायुज्यं फलम्। 'त्रिवर्गफलदायिन' इति बालबोधटीकायां श्रीपुरुषोत्तमैर्लिखितं वाक्यं तत्र त्रिवर्गे क्षेमः फलम्, 'क्षेमाये'ति तादर्थ्ये चतुर्थ्या क्षेमप्रयुक्तफलत्वात् त्रिवर्गस्य च। तं क्षेमफलं चाहेत्यर्थः। आनन्दाविष्टो भगवान् प्रमेयरूपः फलम्। क्षेमरूपानन्दांशः त्रिवर्गनिविष्टः फलम्। लौकिके साक्षादानन्दाभावात्। 'लौकिकं नैव मनुत' इति श्रीमदाचार्योक्तेः। अनेन क्षेमार्थमवतारोक्त्या देवेषु पक्षपातो बोधितः। न च तृतीयमार्गोक्तजन्ममरणे फले, प्रवर्तकत्वाभावात्। प्रवर्तकं फलं बलवदनिष्टाननुबन्धीष्टसाधनताज्ञानप्रवर्तकं तस्य जन्ममरणयोरभावात्। स्वाधिकारानुसारि फलं प्रवर्तकम्। तत्र प्रथमं सायुज्यमाहुः त्वं अवबोध इत्यादिना। 'आत्म'न्नित्यत्र ङेर्लुगित्याशयेनाहुः आत्मनीति। पूर्वोक्तेति पूर्वश्लोकोक्तप्रकारेण। तेषां सेवकानां रूपाणां ज्ञानरूपे आत्मनि भरणस्वरूपमाहुः सायुज्यमिति। तेभ्य इति ब्रह्मविष्णुशिवसेवकेभ्यो विपश्चिद्भ्यो नानात्वापश्यद्भ्यः सायुज्यं ज्ञानात्मनि भरणेन सयुजो भावं प्रयच्छतीत्यर्थः। 'सायुज्यं कृष्णदेवेन शीघ्रमेव ध्रुवं फल'मिति वाक्यात्। एवं विपश्चिद्व्यवस्थामुक्त्वा भगवन्मायासंवृतमतीनां नानात्वं पश्यतां भक्तानां व्यवस्थां वक्तुं पक्षान्तरमाहुः अथ वेति। अस्मिन् पक्षे अवबोध इत्यत्र सप्तम्या अभेदसम्बन्धोर्थः। निरर्थकविशेषणविभक्त्यपेक्षया सम्बन्धार्थकत्वस्य विभक्तेर्ज्यायस्त्वात्। आत्मनीति विशेष्यविभक्तेरर्थमाहुः शुद्धात्मेति। 'निमित्तात् कर्मयोग' इति सूत्रेण सप्तमी। निमित्तमिह फलम्। कर्मणा 'योगः' संयोगसमवायान्यतरसम्बन्धः, अत्र 'आत्मनि रूपाणि विभर्षी'त्यत्र फलस्यात्मनः कर्मणा रूपैः 'योगः' संयोगः। आत्मरूपयोर्द्रव्यत्वात्। अवयवावयवित्वे समवायः। अवयवावयविनोः समवायात्। अवतारेति गुणावताररूपाण्यपि। भक्ता इति स्वस्वामिभावसम्बन्धेनावतारसेवकाः लौकिकाः। चिद्रूपमात्मानं लभन्ते, न तु सच्चिदानन्दरूपम्। लौकिकत्वात्। 'लौकिकं नैव मनुत' इतिवाक्यात्। पश्यन्ति नाना ये तेषां क्षेमफलार्थं रूपाणां भरणस्य फलान्तरमाहुरित्याहुः रूपाणां ग्रहणस्येति। अन्यदपि निमित्तमिति निमित्तान्तरं क्षेमरूपफलान्तरमितियावत्। चराचरशब्देनेत्यादि अत्र टिप्पण्याम् चराचरशब्देनेति चरान्तर्गतोचरशब्दः चराचरशब्दस्तेन। मध्यमपदलोपी समासः। द्वन्द्वगर्भितकर्मधारयस्तु न। 'चरशब्देन सर्वत्रभ्रमन् मृत्यु'रिति भाष्ये व्याख्यानात्। इति तथेति इत्येवं चराचरशब्देन ब्राह्मणाः क्षत्रियाश्चेति न्यायविद इत्यर्थः। न्यायः सूत्रं तद्विदो व्यासादयः। सुबोधिन्यां हिरण्यगर्भाभिप्रेतचराचरशब्दार्थमाहुः चराः प्राणिन इति। इतीति पूर्वार्धार्थसमाप्तौ।

इत्युक्तमिति वा। गुणैरिति भगवद्दत्तैरैश्वर्यादिभिः। सत्त्वोपपन्नानि सत्त्वेन युक्तानि न तु सात्त्विकानि सत्त्वोपाधौ 'तत्र भव' इति ठक्। लोकेति लोकस्त्रिगुणोपि श्रेयआकाङ्क्षी अतस्तदनुसारीणि।रजउपपन्नानि तमउपपन्नानि तु न भवन्ति।'सत्त्वं रजस्तम इति प्रकृतेर्गुणा स्तैर्युक्तः परः पुरुष एक इहास्य धत्ते। स्थित्यादये हरिविरञ्चिहरेति संज्ञाः श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां स्यु'रिति प्रथमस्कन्धात्। मत्स्यादीनीति तामसपुराणोक्तान्यपि सत्त्वेनोपपन्नानि भवन्ति। वने वासात्। 'वनं तु सात्त्विको वास'इतिवाक्यात्। वनं जलमपि ब्रह्ममहेति राजसतामसयोः। आधिदैविकयोरिति चिद्धर्मो रजः, आनन्दधर्मस्तमः, एतदुभयरूपयोः। तथा च तादृशो भगवानेवेति ते नृसिंहवराहहंसा राजसाः मत्स्याश्वकच्छपास्तामसाश्च 'मत्स्याश्वकच्छपवराहे'ति श्लोके वक्ष्यमाणा भगवदवतारा एवेति भावः। भगवदवतारेषु यत्र सत्त्वरजस्तमोभेद उच्यते तत्रैते रजस्तमसी ज्ञेये। चन्द्रदुर्वाससौ त्वाधिभौतिकयोरवतारावित्यर्थः। दैत्यानां नैतत् फलम्, किन्त्वन्धंतम इति दैत्यपक्षव्यतिरेको ज्ञेयः। तत्रेत्यादि सत्त्वोपपन्नत्वे निदर्शनं हेतुः। यतः सुखावहान्यतः सत्त्वोपपन्नानीत्यर्थः। पक्षपातस्तोत्रत्वादिति पक्षपातस्तोत्रत्वात् सतामेव सुखदानीत्याहेत्याहेत्यनेनान्वयः। सर्वदोषनिधानमिति सर्वदोषनिधानं वस्तु, सर्वदोषनिधानं खला इत्यादि खललक्षणप्रवेशार्थं नपुंसकनिर्देशः सामान्ये। अथ तैत्तिरीयप्रश्नछान्दोग्योक्तेषु चतुष्केषु षोडशकलासु च कः कोंशोत्र श्लोके उच्यत इत्याकाङ्क्षायामुच्यते, तैत्तिरीये प्रजननं संधानमिति। प्रजननं कंदर्पः। 'प्रजनश्चास्मि कन्दर्प' इति गीतायाः। 'सायुज्यं तेभ्यः प्रयच्छती'ति सुबोधिन्या अक्षरात्मकजीवसायुज्ये कन्दर्पः। जीवानामक्षरात्मकत्वात् अक्षरस्य गर्भाधानयोनित्वात् कन्दर्पेण गर्भाधानमिति। माता पिता प्रजाः प्रजननमन्तरा न भवन्ति। प्रश्ने कला काचित्। छान्दोग्ये 'विद्युत् कले'ति श्रुतिः। तथा च विद्युद्रूपात्मनि बिभर्षि। 'विद्युद् ब्रह्मेत्याहु'रिति बृहदारण्यकात्। लोका अपि केचन वदन्तीति लोका 'आहु'रित्यपि श्रुतौ कर्त्राकाङ्क्षापूरणात्। ब्रह्मत्वात् फलत्वम्। अथवा लोककृतपक्षपाते चतुर्षु श्लोकेषु प्राची दिक् कला, द्यौः कला, चक्षुः कला विद्युत् कलाः निरूप्यन्ते प्रमाणादिरूपाः। तत्र 'प्राची दिक् कले'ति श्रुतिर्वा 'सत्यव्रत'श्लोके प्रमाणम्। लौकिकपक्षपाते प्रमाकरणं प्रमाणम्, न त्वनधिगतार्थगन्तृत्वम्। तस्य वेदकृतपक्षपातमात्रविषयत्वात्। तदत्र प्राची दिक् देवतेन्द्रः भगवत्कृतिरूपः, तस्य प्रमाणत्वं तृतीयस्कन्धे द्वाविंशेध्याये 'यतोभवद् विश्व'मित्यत्र 'सर्वथादरणीयो यः स प्रमाण'मित्युच्यते। 'तत्सम्बन्धात् कृतिस्तस्य प्रमाणं वाक्यमेव चे'ति कारिकायां कृतेः प्रमाणत्वोक्तेरुक्तम्। तदित्थम्। विश्वकर्तुर्भगवतः प्रमाणत्वे तत्कृतेरपि प्रमाणत्वं प्रमाणान्तःपातात्, प्रमा उत्पत्तिः प्रथमज्ञप्तिरूपा, तस्याः करणं कृतिर्भगवन्निष्ठेतीन्द्रः प्रमाणम्। भगवान् विश्वमुत्पादयतीत्यत्र 'यतोभवद् विश्व'मित्यत्र तु न। अधिष्ठानकारणत्वात्

'सत्यव्रत'मित्यत्र 'सत्येन सुवर्गाल्लोकान्न च्यवन्ते कदाचने'तिश्रुतौ स्वर्गस्येन्द्रस्य सुवर्गपदेन स्मरणात्।'एकायनोसा'वित्यत्र 'द्यौः कले'तिश्रुतिर्वा,द्योर्विश्वान्तर्गतत्वाद् विश्वमुत्पादयतीत्यत्र प्रमाविषयत्वेन प्रमेयत्वम्। 'त्वमेक एवास्ये'त्यत्र 'चक्षुः (प्राण)कले'तिश्रुतिर्वा। 'पश्यन्ति नाने'ति मूलोक्तेः। प्राणरूपेण त्वद्दर्शनम्। कृपाविष्टो भगवान् 'पश्यन्ती'ति ज्ञानविषयत्वेनोक्तः साधनं, ज्ञानविषयस्य फलानुकूलस्य साधनत्वात्। 'बिभर्षी'त्यत्र श्रुत्यादिकं स्पष्टम्।

१०-२-३०. त्वय्यम्बुजाक्षेत्यत्र निरूपणमिति परपक्षनिराकरणपूर्वकस्वपक्षस्थापनं निरूपणम्, तच्चतुर्णां प्रमाणादीनां भगवत्त्वनिरूपणेस्त्येवाचार्याणां सर्वत्र भगवत्स्फूर्तेरावश्यकत्वात्। 'सर्वभूतेषु मन्मति'रितिवाक्यात्। विगाढभावेन सर्वत्र भगवत्स्फूर्तिः सर्वात्मभावादिति वा। निरूपणमिति पूर्ववत्। स्मृतिष्विति कपिलोक्तासु तृतीयस्कन्धे। कपिलोक्तसाङ्ख्यप्रवचनसूत्रवृत्तिरपि न, भगवन्मार्गोपयोगाभावात्। योगो धर्म इति 'अयं हि परमो धर्मो यद् योगेनात्मदर्शन'मिति स्मृतेः आत्मदर्शनं परमो धर्मः, योगो धर्म इति। 'तस्माद् योगी भवार्जुने'ति गीतायां योगस्य चोदनाविषयत्वात्। बहुविध इति 'भक्तिलक्षणो योगः। उपनिषदि षडङ्गः। योगस्मृतावष्टाङ्गः' इत्येवं बालबोधे। सुबोधिन्यां तु 'योग आध्यात्मिकः पुंसा'मित्यत्र तृतीयस्कन्धे 'योगो बहुविधः। भगवत्साक्षात्कारे य उपयुज्यते स आधिदैविकः, आत्मसाक्षात्कारे आध्यात्मिकः आधिभौतिकस्त्रिविधः। अणिमादिसाधकः शरीरसाधकः,प्राणसाधकश्च। आद्यस्तु शास्त्रान्तरङ्गम्,द्वितीयोत्र मुख्य'इति। कठिनत्वात् पदसम्बन्धमाहुः हे अम्बुजाक्षेति। आवेशितचेतसेति समाधिविशेषणम्। आ समन्तात् वेशितं चित्तं यस्मिन् तादृशेन समाधिनेत्येवमग्रे महद्भिः पादस्य पोतत्वकरणे समाधेरेव करणत्वस्य व्युत्पादनात्। प्रमाणत्वं चेतस एव,आवेशितचेतस्त्वेन रूपेण समाध्युपस्थितेः। घटः पृथ्वीत्यत्र पृथ्वीत्वेन घटोपस्थितिवत्। समाधेस्तु'त्वत्पादपोतेने'त्यत्र कारणत्वमित्याशयेन समाधेरधिकरणत्वमाहुः योग इति। समाधौ। प्रत्यक्ष इति चेतसेति ज्ञेयम्। 'एषोणुरात्मा चेतसा वेदितव्यो यस्मिन् प्राणः पञ्चधा संविवेशे'ति श्रुतेः।लोके योगमातिष्ठति स पर इत्युच्यत इति लोकवेदात्मिकस्मृतिकृतपक्षपात उक्तः,'तं यथा यथोपासते तद्धैनं भूत्वावती'ति बृहदारण्यकात्। योगे समाधौ भगवत्प्रत्यक्षं प्रति चेतसः प्रमाणत्वं प्रमाकरणत्वरूपं लौकिकं,अनधिगतार्थगन्तृत्वरूपं वैदिकम्। संसारादिति अहन्ताममतात्मकात्। 'व्यवहारः सन्निपातो मनोमात्रेन्द्रियासुभिः'। 'सन्निपातस्त्वहमिति ममेत्युद्धव या मति'रितिवाक्याभ्याम्। सिद्धमिति श्लोकेन सिद्धम्। पदकृत्यमाहुः अम्बुजाक्षेतीति। पापं तापकं अज्ञानात्। 'एतꣳह वाव न तपती'तिश्रुतेः तादृशं पापं दर्शनेन ज्ञानेन नश्यति। अम्बुजवदिति विशेषणेन तापकाज्ञाननाशकत्वमुक्तम्। पापं लोके वेदे च नाश्यम्। लोकेऽनुत्कृष्टत्वावेदकम्। वेदे भगव-

त्प्रत्यक्षं प्रतिबन्धकम्। योगेन च दहेद्देहं' इतिवाक्यात्। श्रीभागवतस्य वेदवेदान्तसारत्वादन्यद् विहाय तदीययोगमाहुः यो योगस्तृतीयस्कन्ध इति। सर्वात्मक इति सर्व आत्मा यत्र। यस्मिन् योगे सर्वः प्रपञ्च आत्मत्वेन भासत इत्यर्थः। भगवद्विषयक इति चित्तवृत्तेरन्यतो निरोधेन भगवति स्थापनरूप इत्यर्थः। तदाहेति भवतीत्यन्तस्याभासोयम्। चेतसो भगवत्यावेशकथनेन चित्तवृत्तेर्भगवति योजनमाहेत्यर्थः। उक्तस्थानमक्षरं 'कृष्णस्तु भगवान् स्वय'मि'त्यखिलसत्त्वधाम्नी'तिपदेन कृष्णस्तुतिर्नैत्यरूप्या पक्षान्तरमाहुः सर्वसत्त्वगुणेति। 'विशुद्धसत्त्वं वसुदेवशब्दितं' सत्त्वं विष्णूपाधिः। सत्त्वं मायिकम्। विशुद्धसत्त्वं सङ्कमणार्थं तस्य स्थानम्। विष्णूपाधिसत्त्वस्य स्थानं तद्गुणैर्नागगोचरस्य स्वस्य ज्ञापनार्थम्। 'विष्णुराविरासी'दित्यत्र यथा। मायिकसत्त्वस्य स्थानं साहित्यार्थम्। 'पुरुषोत्तमस्तु नन्दगृह एव मायया सह जात' इत्यत्र यथा। करणेनेति चेतो भगवत्प्रत्यक्षे करणं समाधिस्तु त्वत्पादस्य पोतत्वे करणमिति विवेकः। यस्मिन्निति समाधौ। कृत्वेति पूर्वमीमांसकसरण्योक्तम्। उपपादयन्ति स्म समुद्रेति। संसारः समुद्रः। संसारे तत् समवायि मायिकान्तरालिकसृष्टिजलं तद्दृष्टिः कर्तव्या। तस्य तरणसाधनमित्यर्थः। पृथ्वीरूपस्येति व्याहृतित्वगुणोपसंहारे समाधौ भावितस्य पादः पृथ्व्या रूप्यते व्यवह्रियत इति पृथ्वीरूपः तस्येत्यर्थः। आकाशेति वियतो विष्णुपदत्वप्रसिद्धे'र्येन्य' इतिश्लोके व्युत्पाद्यत्वादितिभावः। अक्षररूपस्येति। पुरुषाकृतित्वे पादत्वमक्षरस्य निबन्ध उक्तम्। पृथिव्यादित्रयाणां चरणत्वेपि कथं पोतत्वमित्याकाङ्क्षायामाहुः भूमिश्चेदित्यादि। सर्वजनीनेति सर्वजनेषु विदितत्वात् भूमेः सर्वान् जनान् प्रति पोतत्वं स्यान् न तु समाधिकृतः प्रत्येवेत्यर्थः। पूर्वं भगवांस्तारयतीत्युक्तम्। तत्र पादस्य पोतत्वं सम्पाद्येति शेषो ज्ञेयः। आकाशं चेति सर्वजनीनमिति सर्वान् जनान् प्रति पोतं स्यान् न तु समाधिकृतः प्रत्येवेत्यर्थः। भगवद्भावकेत्यादि अत्र टिप्पण्यां भगवतैवेति प्रमेयबलेनेति भगवतः पोतत्वं, एवकारेण चरणस्य पोतत्वयोगो व्यवच्छिद्यते। तावन्मात्रस्येति पादमात्रस्येत्यर्थः। तथात्वं पोतत्वम्। एतेन पादस्य पोतत्वाभावादिति सुबोधिनी विवृता। तेन पुरुषरूपेणेति समाधिकल्पितपुरुषरूपेणेत्यर्थः। तत्सम्भव इति पोतत्वसम्भवोऽक्षरपादस्य। सुबोधिन्याम्। संसारेति तथा च संसारवत् संसरणसाधकत्वेन तरणसाधनपोतत्वं कथमितिप्रश्नः। न युक्तीति यथा स्वाप्निकपदार्थस्य मायाकल्पितत्वेपि न भगवदाज्ञादेर्मायाकल्पितत्वं तद्वन् न युक्तिविरोध इत्यर्थः। समाधिकल्पितस्यापि तारकत्वे उपपत्तिमाहुः अयं त्वित्यादि। तथा च समाधिकल्पितस्यापि दर्शनस्य मानसधर्मत्वात् पोतत्वम्। अकल्पितेपि रूप इयं स्मृतिरत्र मुख्या। अदृष्टद्वारेति पूर्वमीमांसका वदन्ति। आशङ्क्येति पूर्वमीमांसकाशङ्कां कृत्वा। महत्कृतेनेत्युक्तमिति महान्तो हि यथा यागादीनामेव स्वर्गोत्पत्तिपर्यन्तं

सतां सूक्ष्मरूपेण स्वीकुर्वन्ति पूर्वमीमांसकव्यतिरिक्ताः तथा योगेनात्मदर्शनस्य त्रिक्षणावस्थायित्वमनङ्गीकृत्य संसारतरणपर्यन्तं साधनत्वमङ्गीकुर्वन्तीति महत्कृतेन त्वत्पादपोतेनेत्युक्तमित्यर्थः। महान् कृत इति 'महत्कृत'शब्दावयवस्य 'कृत'शब्दस्य तात्पर्यमिदम्। यद्वा 'महद्' यथा भवति तथा 'कृतेने'ति 'महत्' क्रियाविशेषणम्। एतदेवाहुः हृदयमित्यादिना। संसारपारमिति सेव्यसेवकभावसंसारम्। निरीश्वरसाङ्ख्यमनीश्वरसाङ्ख्यं च योगोप्येवम्। निरीश्वरयोः साङ्ख्ययोगयोः। 'यश्चायं पुरुषे यश्चासावादित्ये स एक' इतिश्रुतेरादित्यसेव्यसेवकभावः। सेश्वरयोस्तु आत्मनः सेव्यसेवकभावः। तीर्णसंसारस्येति साङ्ख्ययोगयोरपि 'सेवातपःसमाधिप्रणिधानानि क्रियायोग' इति तत्सूत्रात्। सूत्रे 'प्रणिधानं' यत्नः। तुच्छं मन्यन्त इति एतेन गोवत्सपदं कृत्वा तरन्तीत्यर्थः। अनतीति गोपदं कुर्वन्तीति नोक्तमितिभावः। अनतिगम्भीरेर्थे तात्पर्यवृत्तिः वत्सपदस्य। शोषयित्वेति संसारस्यावुपादानकत्वान् नान्वयानुपपत्तिः। तूष्णीं तिष्ठन्तीति उत्तरश्लोके'ऽदभ्रसौहृदा' इत्यस्य व्याख्याने स्पष्टम्। कुर्वन्तीति न तु वत्सपदं कृत्वा तरन्ति तारयन्तीति पर्यन्तं श्लोक उक्तम्। 'गोवत्सपद'मित्यस्यायमभिधेयोर्थः। गावः किरणाः तेषां मुख्यः वत्सपदेनोच्यते, चतुर्थस्कन्धे मनुप्रसङ्गे तथा दर्शनात्। सूर्य एव तस्य पदं पदनीयं तावन्मात्रं संसारं कुर्वन्तीति। अत एवाग्रे'द्युमदि'ति सम्बोधनम्। तथा चारण्यकश्रुतिः 'स्मृतिः प्रत्यक्षमैतिह्यमनुमानश्चतुष्टयम्। एतैः सर्वैरादित्यमण्डलमेव विधास्यत' इति। प्रमाणसमाप्तिरिति समाधिविशेषणावेशितचेतोरूपे भगवत्प्रत्यक्षजनकत्वेन प्रमाणस्य समाप्तिः पर्यवसानमित्यर्थः। त्वत्पादपोतत्वकरणे समाधिः करणमिति स प्रमाणम्। पोतत्वोत्पत्तिः प्रथमज्ञप्तिरूपा। तथा च पोतत्वकरणे एव तत्समाप्तिः। तरणं त्वनुग्रहसाध्यमत एवाग्रिमश्लोके वक्ष्यत इति भावः। दैत्यानां विमार्गपरिपोषितो निरीश्वरयोग इति तद्व्यतिरेकः पक्षपातस्तुतौ। अथ तैत्तिरीयप्रश्नछान्दोग्योक्तेषु चतुष्केषु षोडशकलासु च कः कोंशोत्र श्लोक उच्यत इत्याकाङ्क्षायामुच्यते। तैत्तिरीये चतुष्कद्वयं सार्तकृतपक्षपात उक्तम्। तत्र पृथिवी पूर्वरूपम्। आदित्य उत्तररूपं चात्र। पूर्वस्या'प्याधिलोक'मित्युपक्रम्य पाठात्। द्वितीयस्या'प्याधिज्यौतिष'मित्युपक्रम्य पाठाल्लोकवेदात्मकत्वं स्मृतेरिति। चरणस्य पृथ्वीरूपस्य समाधौ ध्यातरूपावयवत्वेन तत्प्रामाण्यात् प्रामाण्यम्। आदित्यस्य गोवत्सपदानभिधेयार्थ उक्तेः कालत्वेन चेष्टारूपस्य प्रामाण्यम्। 'तत्सम्बन्धात् कृतिस्तस्ये'ति कारिकायाः। प्रश्ने विशेषाभावः। छान्दोग्ये दक्षिणा दिक् कलात्र। तस्याः स्वामी यमः तस्य प्रामाण्यं 'यो यच्छ्रद्धः स एव स' इतिवाक्यात् भगवत्त्वेन प्रामाण्यम्।

१०-२-३१. स्वयं समुत्तीर्येत्यत्र तादृशेनेति समाधिविशेषणचेतोरूपेणेत्यर्थः।

१. गोवत्सपद।

प्रमेयमिति योगे प्रत्यक्षो भगवान् संसारात् तारयतीति सिद्धमिति पूर्वश्लोकसुबोधिन्यां प्रमा भगवद्विषयिणी तारकत्वप्रकारिका, संसारात् तारयतीत्यत्र योगिनः संसारात् तरन्ति तान् भगवान् संसारात् तारयतीति विग्रहात् तद्विषयिणी च। अतः प्रमेयं तारकत्व-प्रकारको भगवान्, पादनौकारूपः प्रमेयम्। मोक्षसम्प्रदायरूपः। तत्रादभ्रसौहृदरूपं च। प्रमाविषयस्य प्रमेयत्वात्। तदत्र 'सदनुग्रहो भवा'नित्यनेन तारकत्वविशिष्टो भगवान्। अन्यग्रन्थेन तत्। सुदुस्तरवत्सपदकरणपदयोर्विरोधं परिहरन्ति स्म तीर्णस्येति। सम्पूर्ण-स्येति अन्यं मति सम्पूर्णस्य सुदुस्तरभवार्णवस्यानुवादे। किमत्र श्लोके प्रमेयं योगविशेषण-चेतःप्रमाणेन प्रमितं भवतीत्यत आहुः मोक्षेत्यादि। मोक्षः सम्प्रदायश्चेति 'स्वयं समुत्तीर्ये'ति मोक्षः। 'भवत्पदाम्भोरुहनावमत्र ते निधाय याता' इति सम्प्रदायो भक्ति-मार्गरूपः। फलत्वेन साधनत्वेन चेति शेषः। तथा चैतद् द्वयमिह योगजधर्मेण प्रमितं भव-तीत्यतस्तथेत्यर्थः। सर्वशास्त्राणां शब्दरूपत्वात् मोक्षः सम्प्रदायश्च शाब्दीप्रमाविषयौ भवत इति प्रमेये। कृत्वेति प्राचां शैली। भवार्णवे नक्रादीनाहुः व्यसनेति। व्यसनं दुःखम्। अलौकिकेति समाधिकरणसामर्थ्यघातकः। द्युमन्तितीति द्युमत् चक्षुस्तदधिष्ठाता सूर्यो वा, तद्वान् द्युमान्, तत्सम्बोधने द्युमन्। द्युमान् सूर्यो वा। 'कृष्णद्युमणिनिम्लोच' इतिवाक्यात्। योगरूढः शब्दः। चरणस्त्रिविधेति चरणस्त्रिषु आकाशरूपो द्युमतः पूर्वोक्तः। 'कृष्णद्युमणी'तिवाक्योक्तसूर्यरूपोपसंहारप्रयोजकमाहुः त्रिविधेति। युगलगीते भक्ते-ष्वाविश्य भक्तान्धकारं निवारयति। उद्धवाय ज्ञानोपदेशेन जगत्पूर्णजाड्यं,भक्तानां भयं च,'मा भैष्टेत्यभयाराव'मितिवाक्यात्। समर्थ इति 'आकाशशरीरं ब्रह्मे'तिश्रुतेराकाशस्य शरीरत्वात् सामर्थ्यम्। निवारयतीति अनुभवाज् ज्ञेयम्। तेपीति पूर्वश्लोकोक्तप्रकारेण कृतगोवत्सपदत्वा अपि सर्वांशेनोत्तीर्णाः प्रसादादेव। कपिलादिस्मृतिषु सेश्वरसार्तात् तत्कृतपक्षपातात्। न तु योगबलमात्रेणैव तरन्तीत्यपिशब्दः। अन्येषामिति योगारुरु-क्षूणाम्। तेषामिति आरूढयोगानाम्। अच्छिद्रं सफलमिति अच्छिद्रसौहृदत्वादन्येषामुद्धारः सुखेन, सफलसौहृदत्वादन्योद्धारापेक्षेति भावः। आभासोक्तशङ्काद्वयपरिहार इति। छिद्रं जीवप्रत्ययजनकं तददर्शकं सौहृदं येषां ते'ऽदभ्रसौहृदाः'। आकाशकार्यच्छिद्रे गते जीवमात्र-मुद्धृतं मुक्तमित्यर्थः। 'छिद्रा व्योम्नीव चेतना' इति सिद्धान्तमुक्तावल्यामाचार्योक्तेः। यद्वा, उपाधिमात्रे गते जीवमात्रमुद्धृतमित्यर्थः। द्वितीयमर्थं विवृण्वन्ति स्म अनेनेति। 'अदभ्र'पदेन। पूर्वमेव कृतमिति 'अदभ्र'पदार्थः सफलं, तादृशं फलं द्विविधं, दुःखाभावः सुखं च, तत्र पूर्वं दुःखाभावार्थमेव कृतं सौहृदं सार्थकं सुखरूपफलेन सफलम्। जीवानन्दाविर्भाव-सहितमित्यर्थः। सौहृदस्यानन्दजनकत्वादेवकारः। सौहृदेन कृपालूनामन्येषामुद्धारे तेषा-मपेक्षेतिभावः। तथा च पूर्वं पूर्वश्लोके 'महत्कृतं' महद्भिः कृतं पादपोतत्त्वप्रयुक्तं सौहृदमर्थः।

तेषामित्यादि आरूढयोगानां स्वार्थमन्येषामर्थे च। तमिति सौहृदरूपम्। ननु श्लोकद्वयेपि संसारस्य समुद्रत्वकथनात् प्रत्युतास्मिन् दुस्तरत्वाद्युक्तेरत्र चरणस्य पोतत्वकथनमेव युक्तं, तदपहाय किमिति नौत्वादिकमुच्यत इत्याकाङ्क्षायामाहुः तेष्वित्यादि। तेष्विति योगारूढेषु। गत इत्यन्येषाम्। पोतरूप इति पूर्वश्लोकोक्तः पादः आकाशरूपः। सुखदो भगवदीयत्वात्। सर्वप्रदर्शक इति 'बहिरन्तरमेव चे'तिवाक्या'दाकाशो ह वै नामरूपयोर्निर्वहिते'ति छान्दोग्याच्च कूपजलपरिच्छिन्नतया सर्वसंसारप्रदर्शकः। 'सर्वाणि ह वा इमानि भूतानि आकाशादेव समुत्पद्यन्त' इति श्रुतेः। तत्कृपयेति अत्र लोकवेदात्मकत्वमनुसन्धेयम्। अम्भोरुहस्य पादस्य समाधिकल्पितस्य लौकिकत्वम्, वैदिकत्वं समाधिकल्पितस्याक्षात्मनारायणस्य। वेदेवात्मनारायण इति। गम्भीरत्वं नारायणपादस्याब्रूपस्य वागगोचरत्वं जलनौकास्तम्भनसाधनलोहशृङ्खलानौकाचालनसाधनदीर्घवंशायगम्यत्वं तत्तत्कृपया तद् गच्छति, न तु भक्त्या, समाधौ दार्ष्टान्तिकमानसीसेवाया आभासात्। 'तानाविदन् मय्यनुषङ्गबद्धधिय' इतिवाक्यात्। इदं महत्त्व उपयोक्ष्यते। मानस्याः सेवाया आभासेन तद्वशभगवत्सम्बन्धात्। महत्त्वं भगवत्सम्बन्धात्। अतस्तत्कृपायाः करणत्वम्। महत्कृपयेत्यर्थः। अनतिगम्भीरं क्रियाविशेषणं समुद्रश्चेत्यादिनान्वेति। महत्कृपया वेदज्ञानेऽक्षात्मनारायणत्वेन सत्यज्ञानानन्तत्वेन च वेदवेदान्तसारे श्रीभागवते ज्ञानात् अनन्तीति। कल्पितपादस्य संसारसमुद्रस्य च मायिकत्वात्। तत्र व्यसनमृत्युजरादिसत्त्वात् गम्भीरं यथा भवति तथा इति समुद्रश्चेत्यनेनाग्रेन्वयः। अम्भोरुहनौकारूपः पादपोतो जातः। आकाशस्य वृद्धिह्रासभाक्त्वं वृद्धिह्राससूत्रे सिद्धम्। अम्भोरुहपदोक्तेनाब्धिसम्बन्धाभावादाहुः समुद्रश्चेति। 'भवः' सेवोपयोगी नदी वेदे यमुना तद्रूपो जातः यमुनायाः सेवोपयोगिनीत्वात्। लोके सिन्धुनदीरूपो जातः। संसारस्य कियतो मायायां स्वकारणे लयात् कारणमाया समुद्रः मार्कण्डेयं प्रतीत्रोर्वरितः। इत्यत्रैवेति चरणाम्भोरुहनौकारूपो जात इति हेतोः सर्वनिवेशरूपादत्रैव निधायेत्यर्थः। दैत्यानां न संसारोत्तरणमिति दैत्यपक्षाद् व्यतिरेकोत्र। त इति पोतारूढाः। वशीकृत्येति योगे समाधौ मानससेवाप्रवेशात् तथा। आरुह्येति मनोद्वारा स्वजीवं समाधिकल्पिते एकीकृत्य। व्यापकेऽणोरारोहणम्। पोतस्य नौकारूपत्वेन महत्त्वप्रयोजनमाहुः सर्वमिति। योगसाधनमपि। सत्यव्रत इव। तदुपदेशिन इति स योगारूढकृत उपदेशो येषामस्ति ते तदुपदेशिनः योगारुरुक्षवः। तद्विधाः योगारूढविधाः। सत्सु अनुग्रहो यस्येति तथा चार्वाचीनानामतथात्वेपि तन्मूलभूताचार्येष्वनुग्रहात् तदनुसारिणस्तारयसीति भावः। 'सदनुग्रह' इत्यन्तवाक्ये विभक्त्युत्पत्तौ 'अस्ती'ति क्रियावश्यकत्वे तत्कर्ता 'भवा'नित्यनुक्तसिद्धे पुन'र्भवा'नित्युक्तेस्तात्पर्यमाहुः भवानित्यस्मिन्निति। सम्मतिरिति स्वसत्यवाक्यादेव सदनुग्रहायाजोपि जात इति

सदनुग्रहपोषणम्। नलकूबरमणिग्रीवोद्धारेयं धर्मः स्फुटिष्यति। अथ तैत्तिरीयप्रश्नछान्दोग्योक्तेषु चतुष्केषु षोडशकलासु च कः कोंशोत्र श्लोक उच्यत इत्याकाङ्क्षायामुच्यते। तैत्तिरीये द्यौरुत्तररूपम्, आपः सन्धिश्चात्र। समाधेर्ब्रह्माण्डद्योरूपशिरसि जायमानत्वात्। पूर्वस्या'थाधिलोक'मित्युपक्रम्य पाठात्। द्वितीयस्या'थाधिज्यौतिष'मित्युपक्रम्य पाठाल्लोकवेदात्मकत्वं स्मृतेरिति। समाधौ ध्यातेन पृथ्वीरूपप्रमाणेन द्योरपि प्रत्यक्षविषयत्वात् प्रमेयत्वम्।[1] पृथ्वीरूपप्रमाणाश्रयत्वाद् द्योः शिरोरूपाया योगिनाम्। आदित्यरूपकृतिः तद्रूपप्रमाणविषयत्वमपां भवाब्धिरूपाणाम्। कार्यत्वात्। अपां पुष्पस्यादित्यस्य प्रमाणत्वं तत्कार्यस्य पीतापां निर्मोकविषयाणां प्रमायाः करणत्वरूपम्। प्रश्ने न विशेषः। छान्दोग्ये समुद्रः कला। यमरूपप्रमाणेन समुद्रस्याधिष्ठानस्य प्रमायाः सत्त्वात्। प्रमाकरणस्य चक्षुरादेर्यमेन[2] स्वस्वविषयग्रहणे प्रेरणात्। 'समुद्रं मनसा ध्याये'दितिश्रुतेः वैदिकं प्रमेयं यमुनारूपं च। लोके च सिन्धुनदीरूपम्।

१०–२–३२. येन्य इत्यत्र कृपाविष्टः साधनं भगवान्, अतस्तद्व्यतिरिक्तसाधनलक्षणमाहुः साधनमिति। उपदेशक इति 'चन्द्रसूर्यग्रहे तीर्थे सिद्धक्षेत्रे शिवालये मन्त्रमात्रप्रकथनमुपदेशः स कथ्यते' इति रामार्चनचन्द्रिकायां रुद्रयामिलवचनमुपदेशलक्षणम्। वैदिकोपदेशे 'तत्त्वमसी'त्यादौ लौकिकनामादिप्रवेशात् अज्ञातेर्थे इवार्थे वा कप्रत्ययः। तूष्णीमुपदेशो न फलायेति प्रकारपर्यन्तानुधावनम्। प्रकारः प्रकर्षेण करणं कृतिः। उपदेशकविषयिणी कृतिः फलाय भवति। एतेन नन्वस्मिन् श्लोके बहिर्मुखनिन्दैव दृश्यते, न तु किञ्चित् साधनम्, अतः कथं साधनबाधकत्वमिति शङ्का परास्ता। तथा च तदतिरिक्तेऽसम्प्रदायिके साधने निराकृते तत्र दृढविश्वासो भवति, अन्यथा पाक्षिकत्वं स्यादिति असम्प्रदायिकसाधननिन्दाद्वारा न हि निन्दान्यायेनात्र साधनस्यैव कथनमितिभावः। स चेत्यादि न हि निन्दा निन्द्यान् निन्दितुं प्रवृत्तापि तु विधेयं स्तोतुमितिन्याये निन्द्यानि तदतिरिक्तसाधनानि। विधेयं उपदेशकस्य प्रकारः स अर्थात् आक्षेपात् अर्थापत्त्या व्यञ्जनयोक्तो'ऽनादृतयुष्मदङ्घ्रय' इति पदस्य। युष्मदङ्घ्रयो यैरादृताः पादसेवनेन ते न पतन्तीति। अर्थापत्तिस्तु प्रत्यक्षेण शब्देन वा प्रमितस्यार्थस्यार्थान्तरं विनानुपपद्यमानस्योपपत्तयेऽर्थान्तरकल्पना। अत्र शब्देन प्रमितोर्थः पतनम्। अर्थान्तरं अपतनम्। अनुपपद्यमानं अभावज्ञाने प्रतियोगिज्ञानस्य कारणत्वात्। अपतनाभावः पतनमिति प्रतियोग्यपतनम्। अर्थान्तरकल्पना अपतनकल्पनेत्यत्र ज्ञेयम्। तदतिरिक्तेति उपदेशकप्रकारातिरिक्तसाधनानि। भावस्यास्तत्वकथनेन पूर्वं भावस्य सत्त्वमायाति। 'तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा चे'ति बृहदारण्यकादित्याशयेनाहुः ते हीति। भगवन्तमिति तथा च कापिल-

१ भगवद्रूप। २. भगवता।

साङ्ख्यप्रवचनसूत्रवृत्तिः 'क्लेशकर्मविपाकाशयैरपमृष्टः पुरुषविशेष ईश्वर' इति। एवमिति भगवदुपासनेन। ज्ञानप्रवृद्धावुपासनस्य कारणत्वं प्रसिद्धम्। विकर्मसहितमिति ज्ञानविशेषणमिदम्। अत्र टिप्पणी स्पष्टा। सुबोधिन्याम्। भगवदंशमिति भगवतोसङ्गपुरुषस्यांशं उपाधिभेदभिन्नं, 'उपाधिभेदेप्येकस्य नानायोग आकाशस्येव घटादिभि'रिति, 'उपाधिर्भिद्यते, न तद्वा'निति सूत्राभ्याम्। पूर्ववदपीति विकर्म चेन्न कुर्युः। तथाबुद्धिरिति साङ्ख्यमायावादयोरुत्कृष्टत्वेन ज्ञानकरणभूता वेदे आचार्यमतत्वात्। लोके निरीश्वरादिबुद्धिर्ज्ञानम्। बुद्धिर्ज्ञानमिति नैयायिकाः। कीदृशीत्यत आहुः विकर्मेति। विकर्मापेयपानादिसाङ्ख्यमायावादावलम्बनज्ञानं फलं यस्याः तादृशी। पूर्वज्ञानेनेति बहुजन्मभिः प्रवृद्धज्ञानेनोपासनाजन्येन। महतेति संसारावेशः उपासकाश्चातो ज्ञानसंसाराभ्यां महत्कष्टम्। इदं कृच्छ्रपदस्य विवरणम्। सर्वस्वेति संन्यासे शाङ्करमतावलम्बे एवं भवति। ब्रह्मात्मेति 'अहं ब्रह्मास्मी'त्येवम्। निरीश्वरसाङ्ख्येप्येवम्। 'पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्ति'रिति सूत्रात्। जीव एवात्मा ब्रह्म, स्वाश्रयैव मुक्तिरिति मायावादिमतावलम्बनेन 'विमुक्तमानिनो' जाताः। भावना सरणम्। शाब्दज्ञानविषयस्यात्मब्रह्मणः। परपदारोहे पातोसम्भावित इत्यत आहुः तदेवेति। ब्रह्मत्वेनात्मभावनमेव। न तु भगवदाविर्भाव इति तद्योगव्यवच्छेदक एवकारः। परं पदमिति आवरणभङ्गादिति ज्ञेयम्। 'असङ्गोयं पुरुष' इति सूत्रोक्तं साङ्ख्यानाम्। एवं'मन्य'पदार्थं 'परं पद'मित्यस्यार्थमुपपाद्य पदानि व्याकुर्वन्ति स ये इतीत्यादि। प्रसिद्धा इति त्यदादित्रयाणां प्रसिद्धवाचकत्वम्। प्रधानरूपे जगति नित्यजगतोऽभेदं साधयन्ति स अन्ये भगवदिति। आन्तरालिकसृष्ट्युत्पन्नाः प्रसिद्धा भिन्नाः पूर्वश्लोकोक्तेभ्यो भगवन्मार्गीयेभ्यो भिन्ना लौकिकाः भगवतास्तिभातिप्रियत्वरूपेण रहिताः 'मायेत्यसुरा' इति वाक्येन प्रधानाज्जगज्जायत इति सांख्यसूत्रेण प्रधानस्य कारणत्वात् समवायित्वात्। तेन भगवद्रहिता निरीश्वरा इत्यप्यर्थः। ईश्वरान्निष्क्रान्ताः। ननु 'यतो वा इमानि भूतानि जायन्त' इतिश्रुते'रात्ममायामृते राजन् परस्यानुभवात्मनः न घटेतार्थसम्बन्धः स्वप्नद्रष्टुरिवाञ्जसे'तिवाक्योपष्टम्भायाः कुतो भेद इत्यत आहुः भगवद्विचारेणेति। भगवद्विचारो जीवविचारश्च, तत्र जीवविचारः जीवस्य विचारः षष्ठीतत्पुरुषः जीवकर्तृकविचारः साङ्ख्ययोगसम्बन्धी। ईश्वरविचारो वेदद्वारा भगवतो विचारो भगवद्विचारः, षष्ठीतत्पुरुषः, भगवत्कर्तृको विचारस्तेनेत्यर्थः। पूर्वश्लोके भगवद्विचारः, अत्र श्लोके जीवविचारः, तेनोभाभ्यां श्लोकाभ्यां वेदलोकप्रतिपादनादपि लोकवेदात्मकस्मृतिचतुष्टयमत्र। न हि सर्वत्र भगवत्स्फूर्तौ ह्यत्र धर्मी धर्मादिषट्कं च व्यूहचतुष्टयं वा पुरुषार्थचतुष्टयं वा वक्तुं शक्यम्। व्याख्यानात्। बालबोधे 'धर्मार्थकाममोक्षाख्याश्चत्वारोर्था मनीषिणां जीवेश्वरविचारेण द्विधा ते हि विचारिताः अलौकिकास्तु वेदोक्ताः साध्य-

साधनसंयुताः लौकिका ऋषिभिः प्रोक्तास्तथैवेश्वरशिक्षये'त्यनेन सन्दर्भेण साङ्ख्ययोगौ द्वौ मोक्षोपयोगिनौ जीवविचारेणातो वेदविचारेण भगवदीयेन विचारेण। 'एकः सन् बहुधा विचचार' इतिश्रुतेः। अन्यानिति आत्मीयेभ्योन्यान् भिन्नान् भेदेन यान् प्रसिद्धान् मन्यते जानाति। 'वेदाहमेतं पुरुषं महान्तं आदित्यवर्णं तमसस्तु पारे। सर्वाणि रूपाणि विचित्य धीरः नामानि कृत्वाभिवदन् यदास्त' इतिश्रुतेरभिवदनरूपप्रयत्नस्येच्छाद्वारा कारणं यज्ज्ञानं तदनुकूलव्यापारवानिति 'जानाती'त्यस्यार्थः। लोके ज्ञानाश्रय इत्यर्थः। असुरेति अन्यपदोक्तानां निरीश्वराणां तथात्वात्। तेष्वित्यादि तेषु असुरपक्षपातिसाङ्ख्येषु आत्मीयत्वज्ञानाभावः। तेष्वित्यत्र विषयसप्तमी। अदर्शनं ज्ञानाभावः। रात्रिस्थैरिति रात्रिञ्चरैः। आमोद इति पक्षपातः यौगिकः शब्दः। आ समन्तात् मोदो मोदनम्। अत इति व्यतिरेकात्। पूर्वेति दृढभावनया त्यक्तपूर्वापरविचारणम्। 'यदादानं पदार्थस्य वासनेति प्रकीर्तिते'ति योगवाशिष्ठसरणात्। सङ्गात् दृढसरणेनेत्यर्थः। पदार्थस्य विमुक्तत्वेन रूपेणात्मनः अविमुक्तत्वमाहुः ज्ञानं शास्त्रोत्थमिति। ब्रह्मात्मभावनारूपं 'तत्त्वमस्या'दिवाक्योत्थं शाब्दम्। भक्त्यर्थं तद् भवति। निबन्धे 'तत्त्वमस्यादिवाक्यस्य शोधितस्यापि युक्तितः न विद्याजनने शक्तिरन्यार्थं तच्च कीर्तितम्'। 'अन्यार्थं' भक्त्यर्थम्। तथाप्यन्ये एत आत्मीयेभ्य इति शाब्दापरोक्षमत्र। विषयत्वेनेति अभेदसम्बन्धस्तु आत्मस्वरूपसम्बन्ध इत्यात्मानतिरिक्तः। आवरणभङ्गाद्वाऽभेदसम्बन्धापेक्षाभावः। 'उपाधिर्भिद्यते न तद्वा'निति साङ्ख्यसूत्रम्। शाब्दापरोक्षे वैदिके लोकप्रवेशे विषयविषयिभावो भासत इति विषयत्वेनेत्युक्तम्। वेदे विषयविषयिभावे जडत्वापत्तिरिति। अत इति स्मृतिर्हिलोकवेदात्मिकेति वेदे लोकप्रवेशादित्यर्थः। तस्मादिति विषयत्वेनात्मज्ञानात्। विषयान्तरवत् बन्धकम्। तस्यापीति विद्यारूपस्य विषयत्वेनात्मग्रहणस्यापि। अपिशब्देन वेदान्ते विद्याभिमान उक्तः। तथा च श्रुतिः। छान्दोग्ये 'महामना अनूचानमानी स्तब्ध एयाये'ति। श्वेतकेतुः पितुराज्ञया वेदानधीत्य 'महामनाः' सर्वज्येष्ठोऽहमिति मन्यमानः। 'अनूचानं' अनुवचनसमर्थमात्मानं मन्यत इत्य'नूचानमानी'। 'स्तब्धः' अप्रणतस्वभावः 'एयाय' स्वगृहान् प्रत्यायात इति श्रुत्यर्थः। 'त्वय्यस्तभावा'दित्यादि व्याकुर्वन्ति स अत एव त्वयीत्यादिना। अत एवेति जनिताभिमानादेव। पूर्वस्थित इति 'ते हि पूर्वज्ञानानुसारेणे'त्यादिग्रन्थोक्तो भगवदुपासनारूपो 'ज्ञानान् मुक्ति'रितिसाङ्ख्यसूत्राज् ज्ञानरूपो भावः। साधनत्वेनेति भावनासाधनत्वेन परिग्रहात्। आत्मविमुक्तत्वाभिमानसाधनत्वेन परिग्रहाद् वा। अस्तः स्वरूपात् प्रच्युतः। अस्तं गत इत्यत्रास्तमिति भावे क्तः। असनं गत इति प्रत्ययार्थो विषयः कर्मप्रत्ययात्। असनाभिन्नगमनविषय इत्यर्थः। अहङ्कारादीति अविद्यासूत्रोक्ताहङ्कारादीत्यर्थः। महान्त इति

अविशुद्धबुद्धिषु तत्प्रतीत्या महान्तः साधनकरणात् । 'अन्य'त्वान्न भगवत्सम्बन्धकृतं महत्त्वम् । यत्नमपीति 'तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोग' इति पातञ्जलमाङ्ख्यप्रवचनसूत्रीयेश्वरप्रणिधानपदवाच्यक्रियायोगम् । अत इति यत्नाकरणात् । एव जाता इति विशुद्धबुद्धियोगव्यवच्छेदक एवकारः । ननु 'त्रय्या चोपनिषद्भिश्च साङ्ख्ययोगैश्च सात्वतैरुपगीयमानमाहात्म्यं हरिं सामन्यतात्मज'मितिवाक्यात् साङ्ख्ययोगशास्त्रिणामविशुद्धबुद्धित्वं महत्त्वविरुद्धमतो विशब्दार्थमाहुः परमेति । तथा च शुद्धबुद्धित्वं महत्त्वाविरुद्धं वर्तत इति न महान्त इति पदविरोध इत्यर्थः । अहङ्कारादिसर्वदोषास्फुरणं च शुद्धबुद्धित्वेपि । अहङ्कारादिसर्वदोषस्फुरणे परमशुद्धेः कारणत्वात् । ज्ञानस्येति सात्त्विकस्य, सर्वं एको भगवानित्याकारकस्य गीतोक्तस्य । पूर्वावस्थादोषत्वप्रकारकदोषविशेष्यकज्ञानस्य सात्त्विकत्वात् । एवं च दोषविषयकराजसतामसधीशून्यत्वमन्तःकरणे परमशुद्धिस्तयेत्यर्थः । अत इति संसारावेशा उपासकाश्चातो ज्ञानसंसाराभ्यां कृच्छ्रात् । आरुह्येति व्यापके औपाधिकजीवारोहणम् । अनादृतेति आरोपापवादेनाङ्घ्रीणां सगुणत्वात् आरोपविपर्यीकरण-'मनादरणम्' । भगवच्चरणेति आकाशरूपभगवच्चरणातिरिक्तम् । शृङ्खलद्वीप इति तत्र शृङ्खलापरित्यागे सति यथा पतन्ति तथैते आत्मीयेभ्योन्ये पतन्तीति मूलसंस्कारेणान्वयः, पुराणान्तरादौ प्रसिद्धम् । आदरेति आदरः स्नेहभेदः। चरणस्थितताविति समाधावनुभूतभगवच्चरणस्थितौ मनोनिवेशद्वारा तत्र जीवस्थितौ हेतुरित्यर्थः । अत्र विकर्मसहिताः ज्ञानिनोऽस्मिन् श्लोके उक्ता दैत्याः स्वयमङ्घ्र्यादराखीकारेण दैत्यपक्षव्यतिरेक उक्तः। अथ तैत्तिरीयप्रश्नछान्दोग्योक्तेषु चतुष्केषु षोडशकलासु च कः कोंशोत्र श्लोक उच्यते इत्याकाङ्क्षायामुच्यते । तैत्तिरीये आकाशः सन्धिः अग्निः पूर्वरूपं चात्र । अखिलोके आकाशः। वेदेऽग्निः। लोकवेदात्मकत्वं स्मृतेरिति । अत्र श्लोक आकाशस्य चरणत्वं अग्नेस्तत्प्रविष्टरूपस्यानादृतपदेन द्योतनात् । प्रश्ने विशेषाभावः।छान्दोग्ये'चक्षुःकले'तिश्रुतिः। लोके चक्षुः साधनम् । सूर्यः स्मृतिपक्षपाते चक्षुराधिदैविकः। अग्निरूपःसूर्यो वेदे । इति लोकवेदात्मकत्वं स्मृतिकृतपक्षपाते ।

१०-२-३३. तथा न त इत्यत्र । भक्तास्तु तादृशा अपि न पतन्तीत्याशयेनाभासमाहुः नन्वित्यादि । 'एकं साङ्ख्यं च योगं च वेदारण्यकमेव च परस्पराङ्गान्येतानि पञ्च रात्रं च कथ्यत' इतिवाक्यात् साङ्ख्येपि पञ्चरात्रोक्तां स्वतो जातां वा आदरे जातेनादृतशब्दप्रयोगात् भक्तिं निवेश्य साङ्ख्येपि भक्तिमार्गमाहुः भक्तिमार्गेति । विकर्मेति 'यः कश्चित् वैष्णवो लोके,मिथ्याचारोप्यनाश्रयी'त्यादिवाक्येषु वैष्णवविशेषणतयोक्तेन विकर्मादिना । साधनत्वेनेति निरीश्वरसाङ्ख्यमायावादावलम्बनसाधनत्वेन । यद्वा । त्वदीयतासाधनत्वेन । आशङ्काग्रन्थत्वादेवकारस्त्वदीयत्वासाधनत्वयोगव्यवच्छेदकः । तुल्यत्वादिति बुद्धिनाशप्रसञ्जकत्वेन तुल्यत्वं आत्मीयान्ययोर्मार्गयोः, भगवद्भावे

साधनत्वेन परिग्रहस्य तुल्यत्वादित्यर्थो वा। मार्गान्तरं अन्यमार्गम् । स्मार्तस्येति आत्मीयेभ्यो येन्ये तेषां मार्गो गतः । तथा च मोक्षशेषभूतस्य। त इति स्मार्तभगवन्मार्गीयाः। पूर्वमिति बुद्धिनाशात् पूर्वम् । तद्वत् निरीश्वरसाङ्ख्यवत् । इदं मूलस्थ'तथा'-पदस्य विवरणं, तथा चैवमन्वयः। ये तथा पूर्वं तद्वत् प्रवृत्तास्तेपि तावकाः सन्तः न नश्यन्तीति। पाद इति इदं भ्रश्यन्त्यपि नेत्यस्य विवरणम्। एतस्यैव निष्कर्षमाहुः आरुह्यमाणेति। साङ्ख्यमार्गात्। स्वमार्गादिति भगवन्मार्गात्। स्मृति-कृतपक्षपाते लोकवेदात्मकस्मृतिसङ्ग्रहोयेति। विशेष्यविशेषणभावो वा । मार्गस्यैवेति 'यानास्थाय नरो राजन् न प्रमाद्येत कर्हिचित् धावन्निमील्य वा नेत्रे न स्खलेन्न पतेदिहे'तिवाक्यात्। प्राप्नोत्येवेति अत्यन्तायोगव्यवच्छेदकैवकारः। भगवानितीति ऐश्वर्य-प्रधानः। कर्तुमकर्तुमन्यथाकर्तुं समर्थत्वमैश्वर्यम्। न भवत्येवेति अत्यन्तायोगव्यवच्छेदक एवकारः। तत्रत्यानामिति तावकानाम्। विलासचिह्नानां भगवति रात्रौ भवानां वा दर्शनार्थम्। विकर्मेति 'अकाले दर्शनं विष्णोर्हन्ति पुण्यं पुराकृत'मितिवाक्यात् तथा। द्वितीयपक्षे विषयासक्तिसद्भावेन विकर्मतुल्यत्वं दर्शनस्य। 'अपि चेत् सुदुराचार' इति वाक्यादाहुः सेवापरत्वादित्यादि। अनेन सेवाया विकर्मबाधकत्वमुक्तम्। तदित्थम्। ये भक्ताः सेवां कुर्वाणा अपि न विषयासक्तिरहितास्तेषां विषयासक्तिनिवृत्त्यर्थं भगवान् स्वस्वरूपस्थितानि विलासचिह्नानि प्रदर्शयति, तदा चिह्नानामतिरमणीयत्वेन भगवद्विलासे सर्वोत्कृष्टत्वज्ञानाद् विषयेष्वतिहीनत्वबुद्धिरुत्पद्यते, तदा विषयं त्यक्त्वा भगवत्येवासक्ता भवन्तीति । नान्येषामिति 'येन्य' इतिपदोक्तानां प्रसिद्धान्येषां नेत्यर्थः। अत एवेति दर्शनवत्त्वादेव। रज्जिवति 'स्नेहानुबन्धो बन्धूनां मुनेरपि सुदुस्त्यज' इति-वाक्यात्। स इति स्नेहः,सः संस्नेहः आत्मनि यस्यैतादृशं जीवम्। तेषामिति स्मार्त-भगवन्मार्गीयाणाम्। कालादय इति आदिना दुःसङ्गादयः। 'सर्वत' इत्यर्थक'ममित'-इत्यव्ययमित्याहुः बाह्याभ्यन्तरेति। बाह्यं देहं कालादिभ्यः आभ्यन्तरं भक्तिं दुःसङ्गा-दिभ्यः। कालादिभ्यः एव वा बाह्यमाभ्यन्तरं च। तदपि सर्वं यतः सर्वभावेन सर्वत्वेन। रक्ष्यमाणाः रक्षिताः। यथाश्रुतं वार्थः। बाह्यमाभ्यन्तरं च सर्वमाहुः बुद्ध्यादीनामित्यादि। आदिना मनश्चित्ताहङ्काराः मनोवृत्तयश्च दशाभ्यन्तरं सर्वम्। अन्यप्रवेशो भूतादिप्रवेशो बाह्यं सर्वम्। सर्वेष्विति 'तस्य सर्वेषु लोकेषु कामचारो भवती'ति छान्दोग्यश्रुतेः। 'तस्य' सर्वात्मभाववतो भक्तस्य। सर्वात्मभावदानेनापि रक्षिता रक्ष्यमाणा वा भ्रमन्तीत्यत्र कर्तारः। तदाहुः कालादिभयरहिताः निर्भया इति दुःसङ्गेपि निर्भयाः। यदिति सर्व-लोकेषु विनायकानीकपमूर्धरूपम्। एतेषामिति आत्मीयानां तावकानाम्। नायका दुष्टाना-मित्याशयेनाहुः विघ्नकर्तार इति। स्वयमपि दुष्टाः। यवर्णलोप इत्याशयेनाहुः विशब्देनेति।

'विघ्नराज' इति शब्दसमानाधिकरणत्वाद् विघ्ना उच्यन्ते। जनका एवेति विघ्नजनका एव। अन्ययोगव्यवच्छेदक एवकारः। अनधिकारात्। बहव इति बहुवचनार्थः। बहव इति बहुवचनार्थः। भगवदीयेति आदिशब्देन बलभद्रसुदर्शनभयमम्बरीषप्रसङ्गे नवमस्कन्धे दुर्वाससः। बलभद्रभयं फलप्रकरणे भक्तनयने शङ्खचूडस्य। शंखचूडस्पर्शेऽप्यत्रत्यस्पर्शात् पश्चादस्पृश्यैवेति ज्ञेयम्। उक्तदार्ष्टान्तिके दृष्टान्तमाहुः यथा प्रह्लाद इति। सामीप्ये सप्तमी। यथा प्रह्लादसमीपे अस्पृश्यैव तिष्ठन्तीत्यन्वयः। तेष्विति उक्तानां मूर्धसु सर्वसामर्थ्यस्थानेषु परमकाष्ठापन्नेषु आरोहणं मर्यादार्थं जन्म तदर्थं भगवद्भक्ताः प्रह्लादादयः। सेश्वरसाङ्ख्याः पादं चरन्तीत्यस्य गतिकर्मणः गत्याश्रयं, पादं पदनं गमनं स्वीयं कुर्वन्ति, प्रयच्छन्ति ददति। दैत्येभ्यः। अयमर्थः। पूर्वं सनकादिरूपस्य प्रह्लादस्य भगवद्द्वारि क्रोधेन विकर्मणा दैत्येऽनुपदोक्तरीत्या जन्म जातम्। तथा च निबन्धे 'अत्रापि वेदनिन्दायामधर्मकरणात् तथा नरके न भवेत् पातः किन्तु हीनेषु जायत' इति सम्प्रदायः। इदं अशक्यत्वेन मातं परिभ्रमणस्थानं जीवानामित्याभासोक्तं युक्तम्। किंच तदनु सर्वेषु लोकेषु परिभ्रमन्ति। यत्र तेषां विघ्नानां परमं सामर्थ्यं प्रभवति तादृशेषु निषिद्धदेशेष्वपि भ्रमन्तीति तेषामध इति। विघ्नतत्कर्तॄणां भगवद्भक्तानां तत्कृतभयाभावाद् भगवद्बद्धसौहृदत्वेनाधःपातनसामर्थ्याभावात्। अत्राधःपातनं पादसेवनानादरः। पाद आकाशः। प्रतिष्ठाहेतवः भक्तिहेतवः एव भवन्ति। माहात्म्यसारकत्वात्। अत्र निबन्धः 'किन्तु हीनेषु जायत' इत्यस्याग्रे पूर्वसंस्कारतस्तत्र 'भजन् मुच्येत जन्मभि'रिति। अयं सिद्धान्तः समर्थितः। दृष्टान्तमाहुः यथा जडेति। तेषामिति त एते निरीश्वरसाङ्ख्याघमिनिवेशिनोपि। अहं ब्रह्मास्मीति भावनावन्तः। तेषां मूर्धानः मुख्याः। सर्वेति यत्र तेषां विघ्नानां परमं सामर्थ्यं प्रभवति तादृशानि निषिद्धदेशरूपाणि। गौणनिषिद्धदेशव्यावृत्त्यर्थं विशेषणं परमेति। परमकाष्ठा पश्चिमदेशकाष्ठा। अतस्त इति तावकाः। न क्षिपन्तीति। अधःपतनसाधनं क्रोधं न कुर्वन्तीत्यर्थः। अधोगमनत्वेन तमस्त्वेन कार्यकारणभावात्। 'अधो गच्छन्ति तामसा' इतिवाक्यात्। यत् तु यथा पूर्वश्लोकोक्ताः पतन्ति तथा ते तावकाः न भ्रश्यन्तीत्यन्वयं कश्चिदाशशङ्के। तथा च पातो भवति परं तथा न भवतीत्यर्थं चाह। तन् मन्दम्। 'त' इति पदस्य वैयर्थ्यापत्तेः। यदि हि तच्छब्दस्येदं बहुवचनान्तपदं तदा तेन पूर्वश्लोकोक्ता एव परामर्षणीयाः। तेषां तु पात उक्त इति न भ्रश्यन्तीति वाक्यस्यैव विरोधः। यदि च युष्मच्छब्दस्य षष्ठ्येकवचनान्तं तदा तेनैव भगवदीयतायाः प्राप्तत्वात्, 'तावक'पदस्य वैयर्थ्यमिति दिक्। सिद्धमाहुः अतो भक्तीति। तथा चात्र स्तुत्या भगवदंह्र्यादरस्य साधनस्य फलनिरूपकत्वं बोध्यम्। फलमभयम्। 'अभयं ह वै जनक प्राप्तोसी'तिबृहदारण्यकाद् वेदः, एकविंशतिदुःखध्वंसो

मोक्षः इति लोकः। दुःखं भयात्। 'मुक्तिरन्तरायध्वस्तेर्न पर' इति साङ्ख्यसूत्रम्। भाष्येप्येकैका भक्तिर्मुक्तिसाधनमित्युक्तम्। भक्तास्तादृशस्थानेपि गतास्तत्कृतभयरहिताः, दैत्यानामभगवदीयत्वाद् अंश एवेति दैत्यपक्षव्यतिरेकः। अथ तैत्तिरीयप्रश्नछान्दोग्योक्तेषु चतुष्केषु षोडशकलासु च कः कोंशोत्र श्लोक उच्यत इत्याकाङ्क्षायामुच्यते। तैत्तिरीये 'वायुः सन्धानं' 'वैद्युतः सन्धान'मिति च श्रुतिः। वेदे वायुः अधिलोके वैद्युतः। लोकवेदात्मकत्वं स्मृतेरिति। परिशेषादत्रश्लोके। 'माधव'पदेना'त्मा वै पुत्र नामासी'तिश्रुतेर्वायुः वैद्युतश्च। विद्युतालिङ्ग्यत इति वैद्युतः, शैषिकोऽण्, माधवः। सूर्यो विद्युत्स्थः, माशब्दस्य विष्णुपत्न्यां लक्षणा, एकभर्तृत्वसम्बन्धः। फलत्वसाम्यात्। जन्मप्रकरणत्वेन सङ्ख्यातात्पर्यस्य मुख्यत्वात्। प्रश्ने विशेषाभावः। छान्दोग्ये 'सूर्यः कले'तिश्रुतिः। 'स्मृतिः प्रत्यक्षमैतिह्यमनुमानश्चतुष्टयम् एतैः सर्वैरादित्यमण्डलमेव विधास्यत' इत्यारण्यकात्।

१०-२-३४. सत्त्वं विशुद्धमित्यत्र पूर्ववदिति प्रमाणादि किं भगवत्पक्षपाते आह। सप्तम्यन्ताद् वतिः। प्रमाणेन पक्षपातमुपपादयति स वेदो हीत्यादि न स्यादित्यन्तम्। वैदिके मार्गे सर्वधर्मप्रवर्तको भगवान् प्रमाणं, तच्चानधिगतार्थगन्तृत्वं, तत् सर्वमुच्यते। प्रवृत्तीति 'निवृत्तं कर्म सेवेत प्रवृत्तं दूतस्त्यजे'दित्युक्तेः। प्रतिपादक इत्यभिधया। तात्पर्यवृत्त्या तु 'तवार्हणमर्थ' इत्यग्रे वक्ष्यन्ति 'ततोपी'ति ग्रन्थेन। 'आश्रमादाश्रमं गच्छेन् नान्यथा मत्परश्चरे'दितिवाक्यात् सर्वोत्तममार्गमेकादशस्कन्धे 'यथानुष्ठीयमानेन त्वयि भक्तिर्नृणां भवे'दित्याद्यध्यायद्वयेनोक्तं व्याख्यायामाहुः तादृशोपीत्यादि। प्रवृत्तिनिवृत्तिप्रतिपादकोपि,प्रत्येकं एकं प्रवृत्तं निवृत्तं वा कर्म लक्षीकृत्य,द्विधा भिन्नैः ब्रह्मचारिगृहस्थावित्येको भेदः वानप्रस्थयती इत्येको भेदः। द्विधा भिन्नैश्चतुर्भिराश्रमैः। द्विविध इति ब्रह्मचारिगृहस्थाधिकारकः वानप्रस्थयत्यधिकारकश्चेति।सप्तदशाध्यायार्थैकवाक्यतयाहुः तत्र प्रवृत्ताविति। सिद्धमिति ब्रह्मचारिणोध्ययनं अर्थो वेदार्थः गृहस्थस्यानुष्ठानं तेनाध्यात्मिकचित्तशुद्धौ अवबोधो ज्ञानमिति सिद्धम्। अष्टादशाध्यायार्थैकवाक्यतयाहुः तप इत्यादि।एतेन वेदः प्रमाणं भगवत्कृतिश्चाश्रमचतुष्टयधर्मरूपा प्रमाणमुक्तम्। कृतिसम्बन्धिनं प्रवर्तकं भगवन्तं प्रमाणमाहुः एतदित्यादि। धर्मानुष्ठानमित्यस्य विशेषणं वेदानुसारेणेति। क्रियाकाण्ड इतिनामानुसरणेन। दैत्यांशानामिति आश्रमचतुष्टयाधिकारिष्वेवासुरसम्पत्तिमताम्। सत्त्वमूर्तिरिति द्वितीयस्कन्धनवमाध्याये'प्रवर्तते यत्रे'तिवाक्ये शुद्धसत्त्वस्य वैकुण्ठ उक्तेः'सत्त्वं यस्य प्रिया मूर्ति'रित्युक्तम्। द्वितीयनवमाध्यायोक्ता। मिश्रसत्त्वप्रयोजनमाहुः स्वसत्त्वं प्रकटीकृत्येति। स्वं स्वीयम्। सात्त्विकानेवेति एवकारस्तामसदैत्यांशयोगव्यवच्छेदकः। प्रेरयतीति बुद्धिद्वारा। विपरीतानिति तामसान्। श्लोकं व्याकुर्वन्ति स वैदिकाश्चेति। जगति प्रवर्तन्ते इति 'यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो

जनः स यत् प्रमाणं कुरुते लोकस्तदनुवर्तते' इति गीतायाः। स्थितिपदार्थं विशदयन्ति स्म तदैव तेनेत्यादि। 'स्थितिर्वैकुण्ठविजय' इतिवाक्याद् वैकुण्ठरूपेणैक्येपि विजये न कर्तृकर्मभाव इति। श्रयते सेवते। क्रीडार्थं आत्मनेपदात्। द्वितीयस्कन्धनवम एव 'ददर्श तत्रे'त्यत्रेत्यादिवाक्योक्तः सात्वतां पतिर्वाक्ये भगवान्। भक्तवश्यत्वेपि क्रीडापि निमित्तम्। प्रसृत्तेनेति व्यापकधर्मस्य व्यापकत्वनियमात् व्याप्तेनेत्यर्थः। क्रमेणेति आश्रमक्रमेण। सम्यगनुतिष्ठन्तीति येन व्याप्तस्य सत्त्वस्याश्रयणेन हेतुना वेदादिभिः करणै'स्तवार्हणं समीहित' इत्युक्ते वेदादीनां दृष्टद्वारकं भजनकरणत्वं न सम्भवतीति पूर्वं वेदाद्यनुष्ठानं ततश्चित्तशुद्ध्या भजनमित्यदृष्टद्वारा करणत्वम्। तथा चैतावदर्थात् अर्थापत्तिरूपाल्लब्धम्, 'आर्थिकं तु मवक्ष्यामी'ति कारिकाया इति ज्ञेयम्। वेदरूपप्रमाणस्याभिधया भगवान् तत्कृतिश्च प्रमाणं निरूप्य तात्पर्यवृत्त्या वेदप्रमाणसिद्धार्हणकृतिरूपप्रमाणमाहुः ततोपीत्यादि। शुद्धान्तरिति आधिदैविकी शुद्धिरत्र। तवार्हणमिति तदुक्तं, 'भगवान् ब्रह्म कात्स्र्न्येन त्रिरन्वीक्ष्य मनीषया तदध्यवस्यत् कूटस्थो रतिरात्मन्यतो भवे'दिति। भगवत्सेवेति सेवा रतिः। श्रद्धायां भक्तौ व्यसनरूपप्रेममिलनात्। रतिरेवासक्तिः। अत्र 'श्रद्धारतिर्भक्तिरनुक्रमिष्यती'ति वाक्यम्। 'ततः प्रेम तथा सक्तिर्व्यसनं च यदा भवे'दित्याचार्योक्तिश्चानुसन्धेया। स्फुटिर्यथाऽनन्वपारस्य वेदस्यातिविस्तृतभगवत्सेवानिरूपकत्वेन विस्तारस्य स्कन्दपुराणचातुर्मास्यमाहात्म्यनिरूप्यत्वात् प्रवृत्त्यर्थं संक्षिप्तपूजनमेकादशैकोनविंशाध्यायोक्तम्। एकोनविंशाध्यायोक्तश्रवणादिकं च भगवत्सेवापदेन गृह्यते। भक्तिवर्धिन्यां 'पूजया श्रवणादिभि'रित्याचार्यवचनात्। अष्टाक्षरमन्त्रः श्रीभागवतमाहात्म्योक्तः साधनचतुष्टये मुमुक्षुकार्यम्।''मुमुक्षुर्वै शरणमनुव्रजे'दितिश्रुतेः। आत्मनिवेदनं श्रद्धा, श्रवणादिसरणिः प्रेमान्ता, एकोनविंशाध्याय एकादशीये इयं मर्यादा भक्तिः। पुष्टिभक्तिस्तु सन्ध्यामन्त्रे। 'तत्त्वायामि ब्रह्मणा वन्द्यमान' इत्यादौ। 'तदाशास्त' इत्यनेन तच्छन्दार्थाशया यजमानो हविर्भिरिति मूर्तौ मर्यादामार्गकरणात्। सर्वात्मभावस्तु मदानसाध्य इत्यन्यदेतत्। भावनादिकं ग्रन्थान्तरादूह्यम्। फलाध्यायरङ्गमेश्च मत्कृतात् अप्रतीकालम्बनसूत्रीयात्। विस्तरभिया न लिख्यते। ननु वेदेनेति विधिनिरूपकेणैव। एवकारः सत्त्वश्रयणयोगव्यवच्छेदकः। कार्यसिद्धाविति धर्मप्रमित्यादिसिद्धौ। मूले श्रेयः फलमित्याशयेनाहुः यदि फलेति। कोपीति वेदातिरिक्तश्चेतनो नियामकः। न च वपुर्विना वेदादपि न फलसिद्धिरिति वाच्यम्। तैत्तिरीये 'तस्य यजुरेव शिरः ऋग्दक्षिणः पक्ष' इत्यादिपक्षिवपुस्सत्त्वाद् वेदस्य। एवं वेदातिरिक्तापेक्षाभाव इति वाच्यम्। 'तासां मे पौरुषी प्रिये'तिवाक्यात् पुरुषविधब्राह्मणोक्तवपुषो मुख्यत्वात्। वेदातिरिक्तचेतनापेक्षासत्त्वात्। विसंवादिनमिति फलेन विगतसंवादोस्त्यस्तीति विसंवादी तं

विसंवादिनम्। फलरहितम्। न प्रवर्तेतेति 'सिद्धार्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्तते शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजन' इतिवाक्यात्। तथा च दृष्टविसंवादेपि केचिद् वेदमार्गेण प्रवर्तन्तेन्ये च न प्रवर्तन्ते इतिदर्शनात्, न वेदेन धर्मप्रमित्यादिसिद्धिः किन्तु श्रेयोजनकः सत्त्वोपाधिर्वैदिकपदार्थयथार्थज्ञानजननायावश्यकः, 'सत्त्वात् सञ्जायते ज्ञान'मितिवाक्यात्, प्रमेयबलं चैतत्, वेदशब्दस्तु स्वज्ञानजनने भगवत्प्रसादसापेक्ष इति वेदातिरिक्तश्चेतनः फलदानायापेक्षितः। 'अलौकिको हि वेदार्थो न युक्त्या प्रतिपद्यते तपसा वेदयुक्त्या तु प्रसादात् परमात्मन' इतिश्रुतेः। एतदाक्षिपन्ति स नन्विति। शुद्धसत्त्वस्य प्रमेयबल-तुल्यत्वेनादृष्टभूतसंस्कारद्वारा प्रमेयबलेन ज्ञानभक्तिभ्यां वैदिकपदपदार्थयथार्थज्ञान-जननरूपकार्यसिद्धावित्यर्थः। समादधते स ते हीत्यादि। अत्र टिप्पणी। अदृष्टजनक-मिति प्रमेयबलजन्यज्ञानभक्तिव्यापारभूतं यददृष्टं तस्य जनकमित्यर्थः। ज्ञानमिति माहात्म्यज्ञानम्। 'य एवं वेदे'त्यन्तिमवाक्यं बहुषु स्थलेष्विति बहुवचनम्। तदभावा-दिति वेदान्तोक्तकर्तृस्वरूपस्य मुक्तस्य माहात्म्यज्ञानस्य चाभावेन यथोक्तत्वाभावात् न तादृशादृष्टजननं, षडङ्गाशुद्ध्या कर्मप्रकारज्ञानाभावाच्च न भूतसंस्कारः शरीरोत्पादन-लक्षण इत्यर्थः। जडत्वादिति शरीराभिमानेन जडत्वाचेतनधर्मस्यादृष्टस्य तत्र नोत्पत्ति-रित्यर्थः। सुबोधिन्याम्। जानीयुरिति ते चतुराश्रमस्थाः शरीराभिमानिनः शरीरमात्मे-त्यन्यथाज्ञानवन्तः। शरीरमात्मत्वेन जानन्त्यतो यदि प्रथमं शरीरभिन्नतयात्मानं जानीयुः विद्वन्मण्डनोक्तरीत्या शरीरं नात्माऽनित्यत्वादित्येवमात्मविषयकानुमितिरूपज्ञानानुकूल-व्यापारवद् व्यापारवन्तो विधिरस्मान् प्रेरयतीत्येवं विधिविषयतयात्मज्ञानं कुर्युरित्यर्थः। तदा कर्त्रिति भिन्नप्रवृत्तिनिमित्तत्वे सत्येकार्थप्रतिपादकत्वं सामानाधिकरण्यम्। कर्तृपद-प्रतिपाद्यार्थैक्येनार्थप्रतिपादकत्वमदृष्टपदे तत्प्रतिपाद्यमदृष्टमुत्पद्येतेत्यर्थः। 'अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् विविधाश्च पृथक्चेष्टा दैवं चैवात्र पञ्चमम् तत्रैवं सति कर्तार-मात्मानं केवलं तु यः पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मति'रितिगीतायाः। दैवमदृष्टम्। तथा च कर्तृपदप्रतिपाद्यमदृष्टमुत्पद्येतेत्यर्थः। एवकारोत्यन्तायोगव्यवच्छेदकः। देहान्तर इति तेषां विद्यमानशरीराणां देहान्तरे वा फले प्राप्ये भूतसंस्कारो देहान्तरोत्पादको भवेदित्यर्थः। अभावादिति ज्ञानाभावेन कर्मणो निरङ्गत्वात् नादृष्टोत्पत्तिः न वा भूत-संस्कार इति समाधानम्। भगवानेवेति कर्तृपदवाच्यो भगवान्। एवकारोऽधिष्ठानादि-कर्तृचतुष्टययोगं व्यवच्छिनत्ति। वेदकृतपक्षपातत्वाद् भगवान् वासुदेवः, 'वासुदेवश्छन्दसि पठ्यत' इति ज्योतिषे। तेन 'कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्य' इतिसूत्राद् भगवान् कर्मापेक्षः फलदातेत्यपि प्रत्युक्तम्। वेदान्तमतत्वेन भगवन्मार्गकृतपक्षपातविषय-त्वात्। 'तं त्वौपनिषदं पुरुषं पृच्छामी'तिश्रुतेः, 'नाहं वेदै'रिति स्मृतेश्च। तथा च वासुदेव-

पदप्रवृत्तिनिमित्तत्वेन वासुदेवत्वरूपविशुद्धसत्त्वस्य वसुदेवशब्दितस्यापेक्षेति भावः। 'विशुद्धसत्त्वं वसुदेवशब्दित'मितिवाक्यात्। अपेक्ष्यत इति फलदानार्थमपेक्ष्यत इत्यर्थः। श्रेय इति श्रेयांसि सुदामसमृद्धिः नन्दभक्तिः परीक्षिद्ब्रह्मास्त्रनिवारणं 'तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यह'मिति योगक्षेमप्रापणम्। उक्तफलानि च। उप समीप इति अलौकिकी व्युत्पत्तिः उप समीपेऽयतेनेनेति लौकिकी। 'करणाधिकरणयोश्चेति ल्युट्'। यस्मादिति वपुषः। वं सुखं पुष्णातीति वपुरिति व्युत्पत्त्याहुः। दैवगत्येति।पुष्ट्या अधीतिनामिति बोध्यम्। किन्तु वपुषो व्यापकत्वादित्यपि बोध्यम्। अस्तु वेति यथाकथंचिच्छान्दादिज्ञानरूपात् कर्तृस्वरूपज्ञानात् कर्मप्रकारज्ञानाद्वास्तु वा। तस्येति चतुराश्रमीणस्येत्यर्थः। भगवद्भजन इति भक्त्यात्मके करणत्वं, प्रसृतसत्त्वाज् ज्ञानं, ज्ञानादिच्छया यत इति। अन्यथासिद्धत्वे तु कारणत्वमपि न सत्त्वस्य, कुतः करणत्वमित्यरुच्याहुः सहायत्वमिति। अन्यथासिद्धे यत् प्रतीयते कारणत्वं तदेव सहायत्वम्। यद्वा सहायत्वमाधिदैविकत्वं सत्त्वस्य भगवदीयत्वात्। भगवतश्चाधिदैविकत्वात्। क्षयिष्ण्वेवेति 'जायस्व म्रियस्वे'ति छान्दोग्योक्ततृतीयमार्गोक्तं क्षयिष्ण्वेव फलम्। एवकार अक्षय्यफलयोगव्यवच्छेदकः। 'अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवती'ति श्रुत्युक्तं अक्षय्यं वैश्वदेवपर्वणि। तत् पूर्वमीमांसाभाष्ये वृत्तौ वा मत्कृतायां स्पष्टमिति ततोवसेयम्। पूर्वदोषेति कस्याप्यप्रवृत्तिलक्षणदोषस्यानिवृत्तिः। देवानां पक्षेति अस्मिन् पद्ये पूर्वार्धेन सत्त्वस्य फलसिद्धौ धर्मज्ञानद्वारा करणत्वमुक्तं, तच्च सत्त्वं पूर्वोक्तं मैत्रायणीयोपनिषदुक्तो गुणान्तरसारभूतः कारणं सत्त्वगुणः कारणनिष्ठो वेदे ब्राह्मणरूपे प्रमाणं, मन्त्ररूपे वेदेनुष्ठीयमानवैदिकधर्मेषु भगवत्सेवाकरणतायाः तत्सहायतायाश्च प्रमितिर्भवति। ननु मन्त्रोक्तानुष्ठानेन फलं न ब्राह्मणप्रमितधर्मेणेति चेन्न। श्रेयस्त्वेन फलस्योपादानात्। तद् देवानां सात्त्विकत्वात् तत्पक्षपातार्थं भगवताधिष्ठीयते। सत्त्वेन धर्मप्रवृत्तिर्देवानां तमसा दैत्यानामिति। न च भगवत्सेवाकरणतातत्सहायताविशिष्टधर्मप्रमितौ सत्त्वस्यान्यथासिद्धत्वेन कारणत्वं कुतः करणत्वमिति शङ्क्यम्। सत्त्वाज् ज्ञानं ज्ञानादिच्छेच्छाया यत्न इति क्रमस्यात्राभावात्। सत्त्वे ज्ञानपदप्रयोगात्। यत्नेपि ज्ञानपदप्रयोगः पञ्चरात्रशास्त्रे। अतः सत्त्वस्येच्छाव्यापारकत्वं वा। अत्र मन्त्रब्राह्मणयोर्वेदनामधेयमिति वेदकृतपक्षपाते उत्तरार्धेन वेदक्रियायोगतदर्हणानां फलसिद्धौ करणत्वमुक्तं, तानि च शब्दभगवत्कृतिजीवकृतिरूपत्वेन मन्त्ररूपे वेदे प्रमाणं अनधिगतार्थगन्तृत्वरूपम्। वेदादिभिः तदर्हणादिरूपधर्मानुष्ठानादि प्रमा भवतीति। अथ तैत्तिरीयप्रश्नछान्दोग्योक्तेषु चतुष्केषु षोडशकलासु च कः कोंशोत्र श्लोक उच्यत इत्याकाङ्क्षायामुच्यते तैत्तिरीये 'अधरा हनुः पूर्वरूपम्। उत्तरा हनुरुत्तररूपम्। वाक् सन्धिः जिह्वा सन्धान'मिति चतुष्के वाक् सन्धिरत्र। 'वाचा विरूपनित्यये'ति श्रुतेः। वाक्

प्रमाणं, शब्दरूपत्वात्। प्रश्ने विशेषाभावः। छान्दोग्ये 'प्रतीचीदिकलेति'श्रुतिः। वरुणेन दिक्पपतिना नारायणप्रमाणम्। व्रियते वृणोति वा वृणुते वा वरुणः। वृञ् वरणे। 'कृवृदादिभ्य उनन्'। नारा आप इति प्रोक्ताः ता अयनं यस्येति नारायणः।

१०–२–३५. सत्त्वं न चेदित्यत्र पूर्वश्लोके पूर्वार्धेनोक्तं पक्षपातमेकदेशेनाश्रमचतुष्टये आश्रमद्वयेनाक्षिपन्ति स नन्वित्यादि। भवतु नामेति भक्तिमार्गे पुष्टेः सत्त्वेन तदुभयोपकारकं भवतु नाम श्रेयोदानार्थम्। गृहस्थमुक्तेश्च छान्दोग्योक्तात्। इत्याश्रमद्वयव्यवस्था। आश्रमचतुष्टये द्वितीयैकदेशेनाहुः ज्ञानस्येत्यादि। आत्मसाक्षात्कारस्य भगवद्विज्ञानस्य च। विज्ञानं ज्ञानमेकमेव मन्यन्ते। सिद्धफलेति देहाध्यासनिवृत्तिद्वारा सिद्धस्य परमानन्दरूपस्य मोक्षाख्यफलस्य ब्रह्मज्ञानस्य दातृत्वात्, भगवद्विज्ञानस्य भेदनाशद्वारा सिद्धस्य परमानन्दरूपस्य मोक्षाख्यस्य फलस्य दातृत्वात्। असिद्धेति साध्यस्वर्गादिफले द्रव्यादियोगेपि ज्ञानस्य साक्षादेव कर्मभिरेव 'य एवास्मि स सन् यज' इतिश्रुतेः फलजननसम्भवात्। तद्ज्ञान इति संन्यासाश्रमीणज्ञान आत्मसाक्षात्काररूपे। तत्साधन इति यतिज्ञानसाधने वानप्रस्थतपसि वन्यफलयागरूपे। नापेक्ष्यत इति विवेकस्य जातत्वादितिभावः। आत्मानात्मविवेकमन्तराश्रमद्वयेऽप्रवृत्तेः। आहेति विशुद्धानुवादकनिजपदाभिप्रायपूर्वकं विज्ञानप्रमेयमाह। 'निजं सत्त्व'मिति योजनयाहुः शुद्धसत्त्वमिति। सत्त्वप्रद्योत्यार्थमाहुः सर्वरक्षकमिति। सर्वकर्मेति मोचककर्मसङ्ग्रहाय सर्वपदम्। 'शरीरिणां श्रेयउपायनं वपु'रित्यस्य तात्पर्यार्थः चेदिति। च इदिति पदच्छेदः। चोप्यर्थे इदवधारणे। विज्ञानमिति भगवद्विज्ञानं न भवेदिति पूर्वेणान्वयः। कारणाभावादिति हेतुः। अपिना श्रेयः। पदार्थसम्भावनायामपिः। सत्त्वस्य श्रेयोदानार्थत्वमुक्तं, पूर्वश्लोके विज्ञानार्थत्वे हेतुमाहुः सत्त्वात् सञ्जायत इति। शास्त्रसिद्धेनेति शास्त्रीयवाग्विषयेण। उपेति उप समीपे नियन्तुः। परकीयत्वात् शास्त्रीयत्वात्। तदैवेति तत्काले। अभ्यासेपि पदजन्यपदार्थोपस्थितेः कारणत्वात् शास्त्रानुसन्धाने शास्त्रार्थयागाद्यनुष्ठाने वा शास्त्ररूपपदजन्यत्वेन अनुष्ठाने मन्त्ररूपपदजन्यत्वेनैवकारोवधारणार्थकः। आविरिति अन्यथाऽन्यदापि सत्त्वाज्ज्ञानं भवेदिति। तद्धर्मेति पदसमानाधिकरणः शास्त्रानुसन्धातुः तदर्थानुष्ठातुर्वा धर्मः तत्त्वात्। यद्वा सत्यादिधर्मत्वात्। सत्याद् रजः ज्ञानात् सत्त्वं आनन्दाच्च तम इति। स्वरूपलक्षणेऽनन्त आनन्द इति। इदमिति पार्थिवमिव प्रतीयमानमाकाशम्। निजं वागगोचरमध्यपातिवागगोचरम्। 'धात'रित्यस्याभासमाहुः न च तैरपीति। शास्त्रैरपि सात्त्विकराजसतामसैः। स्वमूलेति स्वीयसत्त्वादिगुणमूलं च तत्कारणभूतः सत्त्वगुणस्तम्। यद्वा तैरित्यस्य निजैरित्यर्थः। सत्यज्ञानानन्तधर्मैः सत्त्वरजस्तमोभिः। उत्पादयितुमिति

१. जीव।

उपासकहृदये उत्पादयितुम्। तेषामिति प्रकृतिसाम्यावस्थारूपस्य गुणत्रयस्य स्थित्यादिकालक्षुब्धानां विष्ण्वादिशक्तिभूतानां सत्त्वादिगुणानाम्। विशुद्धसत्त्वकारणत्वाभावात्। तस्य नित्यस्य कारणायोगात्। यतो धाता निजसत्त्वोत्पादकस्त्वमेवेत्यर्थः। सत्त्वस्य विज्ञानहेतुत्वं व्युत्पादयन्ति स विज्ञानमिति। अनुभवस्तु आत्मभगवद्विषयकः। आत्मविषयकं भगवद्विषयकं चानुभवं व्युत्पादयन्ति स स च सत्त्वैकेति.। सत्त्वं एकं रूपे यस्यान्तःकरणस्य तत् तथोक्तं तस्मिन्। 'माया मनः सृजती'ति चतुर्थस्कन्धात्। कारणस्य रजस्तमसी अन्तःकरणे तिरोहिते। साधनात्। भवतीति 'कामः सङ्कल्पः' इतिश्रुतौ मनोवृत्तिषु धीगणनात्। यथा यथेत्यादि ब्रह्मवित्प्रपाठके आनन्दमीमांसायां प्रत्यानन्दं 'श्रोत्रियस्य चाकामहतस्ये'ति विशेषणे छन्दोऽध्येतुः 'अकामहतत्व'मिच्छाऽपराभूतत्वं इच्छयाननुकूलेपि प्रवृत्तत्वमितियावत्। 'यथा यथात्मा परिमृज्यतेसौ मत्पुण्यगाथाश्रवणाभिधानैः तथा तथा पश्यति वस्तु सूक्ष्मं चक्षुर्यथैवाञ्जनसम्प्रयुक्त'मितिवाक्यमप्यनुसन्धेयम्। शुद्धसत्त्वेति आन्तं विशुद्धावन्तःकरणे मायिकसत्त्वाद्युपमर्देन शुद्धसत्त्वाविर्भावे भगवदधिष्ठानं तस्मिन् सत्येन समानाधिकरणं मनस्यात्मविज्ञानम्। जगत्यन्ने इति जगद्रूपेऽन्नेऽभेदान्वयः। क्षुधीति दार्ष्टान्तिके आत्मविज्ञानाकाङ्क्षा क्षुत्स्थाने। शक्यमिति 'वासुदेवं परित्यज्य योन्यं देवमुपासते तृषितो जाह्नवीतीरे कूपं खनति दुर्मति'रिति पाण्डवगीताया न शक्यम्। अयमर्थः। जगतोन्नत्वं ईशावास्योपनिषदि 'ईशा वास्यमिदं सर्वं यत् किञ्चिज् जगत्यां जग'दिति जगदुक्तम्। तस्यान्नत्वं तैत्तिरीये 'अन्नं बहु कुर्वीत, तद्व्रतम्, पृथिवी वा अन्न'मिति। 'अन्नं'पृथिवीं 'बहु कुर्वीत' 'पृथिव्या ओषधयः ओषधीभ्योऽन्न'मितिश्रुतेरन्नौषधिरूपेण बहु कुर्वीतेत्यर्थात्। अन्नसम्पादनमिति दार्ष्टान्तिके विज्ञानसम्पादनम्। न तु क्षुदनन्तरमिति दुःसहक्षुदनन्तरमित्यर्थः। दार्ष्टान्तिके दुःसहात्मविज्ञानाकाङ्क्षानन्तरम्। तत्सम्पादनं अन्नसम्पादनम्। दार्ष्टान्तिके आत्मविज्ञानसम्पादनं शक्यम्। ननु जानातीच्छति यतत इति आकाङ्क्षानन्तरं यत्न उचित इति चेन्न। ननु क्षुदनन्तरं तत्सम्पादनं शक्यमिति पाठान्तरसत्त्वात्। क्षुदनन्तरं क्षुज्ज्ञानं तदनन्तरं तन्निवर्तकान्नाकाङ्क्षा तदनन्तरं तत्सम्पादनमन्नसम्पादनं यत्नाख्यं शक्यम्। ननु प्रश्ने। अयं प्रश्नः। यद्वा ननु निश्चयेऽयं निश्चय इत्यर्थः। दार्ष्टान्तिकमाहुः अतो भगवतेति। आविर्भावित इति अन्नदृष्टान्तेन दृष्टान्तिते। तत्कृपयेति विज्ञानकारणभूतकृपया। विज्ञानत्वेन तत्कृपात्वेन कार्यकारणभावात्। आत्मविज्ञानाकाङ्क्षायां सत्यामिति बोध्यम्। सङ्कर्षणप्राकट्यस्याध्यायार्थत्वात् तत्प्रतिपाद्यपूर्वाध्यायार्थोपि भगवता सह सत्त्वं वासुदेवाख्यमित्यर्थः। तदायमहमित्यभेदेनानुभवः। इदं सत्त्वं आविर्भावितसत्त्वं प्रसूतं बोध्यम्। न त्वन्यथेति भगवता सत्त्वे

१. दा इति स्यात्।

अनाविर्भावित। निषिध्यमानमिति न भवेदिति निषेधविषयीभूतं विज्ञानमित्यर्थः। शास्त्रीयमिति शाब्दं यस्मिन् क्षणे शास्त्रानुसन्धानमित्यादिना पूर्वमुक्तम्। तथा च सात्त्विकं ज्ञानं न भवेत् चेत् नावश्यकं अदृष्टादिनापि तदितिभावः। आवश्यकं तु ज्ञानभिदयोरपमार्जनं विज्ञानमित्यपि भावः। विज्ञानं विशिष्टं ज्ञानं, तच्च विषयविशिष्टमित्याशयेनाहुः आत्मानुभव इति। आत्मनोनुभवः आत्मानुभवः अयमहमित्याकारकः। प्रतियोगिनः स्वाभावनाशकत्वं दृष्टम्। 'मामेव ये प्रपद्यन्ते मायामेतां तरन्ति त' इति वाक्यादाहुः भेदनाशकमिति। भिदा माया तन्नाशकं भगवद्विज्ञानं 'श्रीकृष्णः शरणं ममे'ति विज्ञानम्। स्वसमीपे स्वाशयप्रकाशनात् 'प्रपत्तिमार्गः' शरणमार्गः। यद्वा आत्मा सविकल्पकं ज्ञानम्। भगवान् ब्रह्म निर्विकल्पकज्ञानम्। 'ब्रह्मेति परमात्मेति भगवानिति शब्द्यत' इति वाक्याच्छ्रुत्यादौ शब्दत्रयात्। उभयोरिति आत्मभगवतोरित्यर्थः। अत्र टिप्पण्याम् अध्यासनिवृत्तिरिति आत्मानुभवेऽहं स्थूलोहं पश्यामीत्यादिदेहाद्यध्यासः तस्य निवृत्तिः। आत्मा स्थूलत्वादिरहितः शुद्धः बुद्धः मुक्तस्वभावः। द्वितीयस्येति भगवद्विज्ञानस्येत्यर्थः। अत्र 'सत्त्वं न चे'दित्युक्तं सत्त्वं भगवता सह सत्त्वरूपं हृदये समागतं वासुदेवरूपं विज्ञानविषय इति विषयरूपेण कारणम्। अद्वैतस्फूर्तिः न सात्त्विकी गीताष्टादशाध्यायोक्ता किन्तु आत्मसृष्टिविषया। निजसत्त्वस्य वासुदेवात्मकत्वेनाभिन्ननिमित्तोपादानत्वात् विज्ञानात्मसृष्टौ ह्यद्वैतस्फूर्तिर्या तामाहुः स वैदिकेति। सः अद्वैतविशिष्टत्वेन स्फूर्तिविषय आत्मा। प्रमेयमिति वैदिके मार्गे प्रमाणं वासुदेवः। 'विशुद्धसत्त्वं श्रयत' इतिवचनात् पूर्वार्धे उत्तरार्धे वेदः भगवत्क्रिया कृतिरूपा च प्रमाणमुक्तम्। सर्वथापि वैदिके मार्गे सर्वधर्मप्रवर्तको भगवानिति सुबोधिन्या भगवान् प्रमाणमित्युक्तम्। तादृशभगवज्जन्यकृतिजन्या या *आत्मसृष्टिः तद्विषयिणी प्रमा च तद्विषयत्वं आत्मसृष्टावित्यात्मसृष्टिः* प्रमेयं प्रमाविषयं प्रमेयमितिलक्षणात्। तत्त्वेनेति अद्वैतविशिष्टत्वेन। आत्मनः सृष्टिरूपस्य स्फूर्तिरित्यर्थः। सुबोधिन्याम्। उत्तरार्धं व्याचिख्यासवो विज्ञानस्वरूपं विविच्य सत्त्वस्य विज्ञानहेतुत्वं साधयन्ति स तच्चेति। शुद्धाद्वैतस्फुरणम्। न विषयेति किन्त्वावरणभङ्गमात्रेण। तथा चात्मानुभव इत्यत्र भगवद्विज्ञानमित्यत्र च न षष्ठीतत्पुरुषः किन्तु कर्मधारय इति भावः। पूर्वमिति 'मेन्येरविन्दाक्षे'त्यस्य व्याख्याने। किन्तु शुद्धाद्वैतं परिणामवादेन,'आत्मकृतेः परिणामात्'इति व्याससूत्रात्। तच्च टिप्पण्युक्तत्वादात्मसृष्टौ भवति। तत्र स्वगतद्वैतस्य दुष्परिहरत्वाच् छुद्धत्वं स्वगतद्वैतशून्यत्वं त्रिविधद्वैतशून्यत्वम्। आत्मसृष्टावपि भेदस्य प्रत्यक्षसिद्धस्य द्वित्वसङ्ख्यारूपद्वैतसापेक्षत्वं संशयज्ञानरूपद्वैतसापेक्षत्वं चेति न द्वैतहानिस्ततो न शुद्धाद्वैतत्वमिति चेन्न। सात्त्विकज्ञानेन गीतोक्तेन भेदनिवृत्त्या तन्निबन्धनसङ्ख्यारूपसंशयज्ञानरूपद्वैतयोर्निवृत्तेरज्ञानमूलकमेव भेदस्फूर्तिः। 'कार्यकारण-

वस्त्वैक्यमर्पणं पटतन्तुव'दितिवाक्यात्। एवं शुद्धाद्वैतं पुरुषार्थसाधकमिति विवेकः। एवं विज्ञानस्वरूपं विविच्य सत्त्वस्य विज्ञानहेतुत्वं साधयन्ति स आविर्भावस्त्विति । स्वरूपस्येति जीवतात्त्विकरूपस्य । शुद्धसत्त्वेति वासुदेवत्वादितिभावः । आत्मानुभवाधिकारिणावत्राश्रमद्वयस्थौ । आत्मविवेकस्य जातत्वात्। अत आश्रमस्थयोर्ज्ञानतपसी सत्त्वापेक्षे। आश्रमधर्मज्ञाने सत्त्वं हेतुतया तपसि तु ज्ञात्वा तपःस्वरूपं तपः कर्तव्यमिति। तपःस्वरूपं तु द्वितीयनवमाध्याये 'तपो मे हृदय'मिति वाक्योक्तम्। भगवतो हार्दकरणार्थं सन्तापः। तदपेक्षेति सत्त्वापेक्षा। न तदिति वानप्रस्थाश्रमधर्मस्तपः पृथङ् न निरूपितम्। ज्ञानादिति बोध्यम्। श्लोकयोजनां स्फुटीकुर्वन्ति स न चेत्यादि। अत्र टिप्पण्याम्। यदित्पदमिति 'य इत् तद्विदुस्त इमे समासत' इति श्रुतौ ये इत् तद्विदुः समासते इति पदच्छेदः। तद्वत् यत् इत्पदमित्यर्थः। योजना तु विज्ञानं सत्त्वं सकारणस्वत्वयुक्तं हे 'धातः' 'इदं' आत्मानुभवरूपं आत्मानुभवस्य मानसप्रत्यक्षविषयत्वात्। 'निजं' च भगवद्विषयकं 'च न भवे'दिति। सुबोधिन्याम्। ननु चेदित्येकं पदं यदि तदा लाघवमिति चेत् तत्राहुः अर्थवशादिति। तथा चार्थेन लाघवं बाधकं, अन्यथा कलशपदार्थे कर्तव्ये लाघवात् कुम्भार्थापत्तेः। अज्ञानभिदिति अत्र टिप्पण्यां इति भवेदिति 'हेतुहेतुमद्भावे लिङनुशासनात्'। कृष्णं नमेच्चेत् सुखं यायादित्यत्रेव। श्रीधरव्याख्यानं प्रत्युक्तम्। स्वोक्ताशङ्काया इति श्रीधरेण हि मोक्षस्य तु ज्ञानैकसाध्यत्वात् किं भक्त्येत्याशङ्कावतारिकायामुपक्षिप्ता। सा तदा निवर्तते यदा मोक्षस्य ज्ञानस्य वा भक्त्येकसाध्यता व्याख्यायते, तत् तु न व्याख्यातमिति स्वोक्ताशङ्काऽनिवृत्तिः। स्वव्याख्यातेति स्वव्याख्यातशास्त्रार्थो भक्तानां मोक्षप्राप्तिरूपः तस्याप्यनेनाप्राप्तिरित्यतः श्रीधरोक्तं द्वितीयव्याख्यानमयुक्तमित्यर्थः। सुबोधिन्याम्। उत्तरार्धस्याभासमाहुः नन्विति। अस्येति भगवदीयस्य। स्वत इति कार्यकारणभावसम्बन्धरूपलक्षणं विनामिधयेत्यर्थः। साधन इति 'सत्त्वात् सञ्जायते ज्ञान'मिति वाक्याज्ज्ञानसाधने। ज्ञानमत्र प्रथमज्ञप्तिरूपोत्पत्तिरूपम्। आविर्भावः। तथा च आविर्भावसाधन इत्यर्थः। यद्यन्यथैवेति अन्यथा सत्त्वं विनापीत्यर्थः। अर्थापत्त्याविर्भावः सिद्ध एव चेद् भवेत् तदा आविर्भावसाधनार्थं का सत्त्वापेक्षेत्यर्थः। भगवदाविर्भावो भगवद्विज्ञानम्। भेदनाशकमित्येव। आत्मन इति जीवस्य सविकल्पज्ञानस्य वा आविर्भावः प्रथमज्ञप्तिरूपः सिद्धो भवेत्। आत्मानुभवः सिद्धो भवेत्। अज्ञाननाशक इत्येव। केन प्रकारान्तरेणाविर्भाव इत्यपेक्षायां तं प्रकारमाहुः तत्रेन्द्रियाणामिति। तत्रेति आविर्भावप्रकारे वाच्य इत्यर्थः। प्रकाश इति विषयग्रहणं, इन्द्रियकर्तृकं ज्ञानं वा। स्वकारणेति स्वमिन्द्रियाणि तस्य कारणं प्रवर्तकं केनोपनिषदुक्तं ब्रह्म तस्य प्रकाशो ज्ञानं इन्द्रियविषयकं गृह्यते इन्द्रियप्रवर्तनेनेन्द्रियविषयकयत्नात्।

आक्षिपतीत्याक्षेपं करोति। आक्षेपोर्थापत्तिः। तत्रेत्यादि तत्रेति स्वकारणप्रकाश आक्षिप्ते प्रवर्तकस्येति केनोपनिषदुक्तस्येन्द्रियप्रवर्तकस्य। अभिमानिन इति स्थूलत्वद्रष्टृत्वाद्यभिमानवतः। भगवत अभिमानिन इति सार्तप्रयोगः। भावी भावः सत्ता तद्वान् भावी, षड्भावविकारेषु द्वितीयो भावः सत्ता। भवतीति शेषः। अत इति उभयोर्निर्धारात्। तदनुसन्धानेनेति उभयोरनुचिन्तनेन तदुभयोरात्मत्वेन ज्ञाने व्यवधायकस्य प्रतिबन्धकस्य मलस्य देहात्मज्ञानस्य निवृत्तौ सत्यामुभयोः प्रकाश आत्मत्वेनानुभवो भविष्यति वेदादिप्रमाणाभ्यां शाब्द इत्यर्थः। एवकारेण सत्त्वयोगव्यवच्छेदः क्रियते। इति प्रकाशेति इति हेतोः प्रकाशार्थं व्यर्थं सत्त्वमित्यर्थः। इन्द्रियेति इन्द्रियविषयाणां रूपादीनां आदिना सत्त्वादीनां गुणानाम्। ज्ञानैरिति तेनेन्द्रियाणां प्रकाशो विषयग्रहणं व्यावर्तितः। प्रेरक इति प्रेरक इन्द्रियाणां अभिमानीन्द्रियप्रेरकत्वद्रष्टृत्वादीनाम्। अनुमीयत इति इन्द्रियप्रेरकोभिमानी च तत्तदर्थप्रकाशवान्, तत्र तत्रेन्द्रियप्रेरकत्वात्, यन्नैवं तन्नैवमित्यनुमानेनेन्द्रियप्रवर्तकस्य प्रकाशेनुमितेपि तेन तत्सत्तामात्रं सिध्यति। न तु तत्स्वरूपं प्रकाशते। यदि तत् प्रकाशेत तदाऽयं भगवानयमहमित्येवं ज्ञानं स्यात्। तत् तु न जायते, तत्र हेतुः स हीत्यादि। तथा करोति प्रेरणं करोति। अग्राह्यत्वात्। ननु स्वरूपसत्तादिनैव स्वत एवाविर्भावो भवतु 'यदा यदा' हीतिवाक्यादिति चेत् तत्राहुः न चेत्यादि। स्वरूपसत्त्वमिति स्वरूपसत्ता। कार्यकरणमिति कार्यं धर्मः 'यद्धिया त ऊरुगाय विभावयन्ति तत् तद् वपुः प्रणयसे सदनुग्रहाय'ेति वाक्योक्तवपुरूपः तस्य करणम्। प्रकृत इति पूर्वोक्तप्रकारकापरोक्षानुभवे। पूर्वमिति पूर्वार्धव्याख्याने। इदमाक्षिपन्तः तुरीयचरणं व्याकुर्वन्ति स न च प्रकाशोपीति। कार्यमुक्तमेवात्र। न सम्भवतीति अग्राह्यत्वात्। गुणप्रकाश इति सत्यादिगुणानां सत्त्वादीनां प्रकाशो ज्ञानम्। सम्बन्धिन इति भगवतः। केनोपनिषदः प्रेरक उक्तः। येनेतिपदोक्तस्य करणस्य। अत इति गुणेन कार्यरूपेण सम्बन्धिनः प्रकाशाभावात्। अपेक्षित इति तेन प्रकटस्य प्रमाणत्वे सत्त्व पूर्वश्लोकोक्तं ग्राह्यं प्रमाणकमुक्तम्। अथ तैत्तिरीयप्रश्नछान्दोग्योक्तेषु चतुष्वेषु षोडशकलासु च कः कोंशोत्रश्लोक उच्यत इत्याकाङ्क्षायामुच्यते। तैत्तिरीये उत्तराहनुरुत्तररूपमत्र। परिशेषात्। अधगहनौ उपयोगाल्लोभोपयोगात्। 'लोभोधरोष्ठ' इतिवाक्यात्। उत्तरश्लोकयोः स्फुटिष्यति। प्रश्ने विशेषाभावः। छान्दोग्ये 'पृथिवी कले'ति समर्थितम्। 'इद'मिति प्रत्यक्षगे पृथिवीरूपे प्रयोगात्। पार्थिवं शरीरं ब्रह्मेति पृथिव्याकाशस्थानीयेति। 'यस्य पृथिवी शरीर'मित्यन्तर्यामिब्राह्मणे। 'आकाशशरीरं ब्रह्मे'ति तैत्तिरीये। विशुद्धसत्त्वस्य मायाभावेन तत्र तत्सत्त्वाभावात् पृथिवीरूपत्वं वसुदेवे दृष्टम्।

१ इन्द्रियप्रकाशव।

१०–२–३६. न नामरूपे इत्यत्र प्रमाणप्रमेये इति स्मृतिषु योगं इव, वेदे प्रमाजनकत्वात् सत्त्वं प्रमाणं भगवद्रूपं, अनधिगतार्थगन्तृत्वम्। प्रमाणम्। ज्ञानं भगवद्रूपम्।'ज्ञानमात्रे परब्रह्मे'तिवाक्यात्। 'इन्द्रियाणां प्रमाणत्वं सत्त्वयोगान्न चान्यथे'त्यत्र तथा निरूपणात्। तत् सत्त्वं पूर्वश्लोके निरूपितम्। तेन साध्यः प्रमाविषयीभूत आविर्भावोऽत्रश्लोके विचारित इत्यर्थ इति श्रीवल्लभानां लेखे उक्तम्। 'स वैदिकमार्गे हि प्रमेय'मित्युक्तटिप्पण्यां 'स' अद्वैतविशिष्टत्वेन स्फूर्तिविषय आत्मा 'प्रमेय'मित्युक्तम्। श्रीपुरुषोत्तमैस्तु अत्र जीवस्वरूपप्रकाशः शुद्धाद्वैतप्रकाशस्य वैदिके वर्त्मनि प्रमेयमित्युक्तमित्युक्तम्। प्रमाविषयीभूत आविर्भावः श्रीवल्लभोक्तः, टिप्पण्युक्तोऽद्वैतविशिष्टत्वेन स्फूर्तिविषय आत्मा तन्निष्ठः। श्रीपुरुषोत्तमलेखे जीवस्वरूपश्च प्रकाशोन्य आत्मा ज्ञानरूपश्च जडो यस्मिन् प्रपञ्चे स तथोक्तः। स शुद्धाद्वैतस्य यः प्रकाशो ज्ञानं तस्य प्रमाया विषयमित्येवं प्रमेयमित्यनेनान्वयः। क्वेति चेन्न। वैदिके वर्त्मनीत्यन्वयः। इति परस्परं न विरोधभानम्। वैदिकेति 'वेदक्रियायोगे'तिवाक्ये शब्दार्थयोरुक्तेश्चतुर्षु वाक्येषु वैदिकमार्ग इति भवत्यवधृतिः। भगवानिति 'फलमत उपपत्ते'रिति व्याससूत्रात्। भगवान् कृपाविशिष्टो बोध्यः। ननु भगवत्त्वेन भगवतः कृपया धर्मेण साधनत्वं कुतः धर्मार्थकामरूपसाधनस्य सत्त्वादिति चेन्न। 'वेदे रामायणे चैव पुराणे भारते तथा आदावन्ते च मध्ये च हरिः सर्वत्र गीयत' इति वाक्यात् भगवतः कृपारूपेण साधनत्वात्। सर्वपुरुषार्थेष्विति तेषु मोक्षरूपः। स च गुणातीत एवेति 'गुणेभ्यश्च परं वेत्ती'ति गीतायां आम्नायार्थदर्शिकायां 'गौणश्चेन्नात्मशब्दा'दिति व्याससूत्रादेवकारः। वेदे गुणाभावादिति 'वेदो नारायणः साक्षा'दितिवाक्येनात्मत्वादात्मनि च गुणाभावात्। उक्तसूत्रात् 'न यत्र माये'तिवाक्याच। तथा कृतवानिति मायिकसत्त्वभिन्नविशुद्धसत्त्वगुणाश्रयं कृतवान्। अत इति सत्त्वगुणसादृश्यात्। निराकरोतीति साक्षिण इति मूले, 'साक्षी चेता केवलो निर्गुणश्चे'तिश्रुतौ साक्षित्वस्य निर्गुणत्वसमानाधिकरणत्वान् निराकरोति। गुणकर्मेति गुणाश्च कर्माणि च जन्मानि च गुणकर्मजन्मानि तैरिति श्रीधर्याम्। तत्र गुणाः करणानि जन्मकर्मणोः। सात्त्विकजन्म सात्त्विकं कर्मेति प्रत्ययात्। न तु निरूपितव्ये करणानि आत्मनि गुणाभावादित्युक्तत्वात्। एवं च गुणैः कृत्वा यानि कर्माणि जन्मानि चेति द्वन्द्वः। कर्माधीनत्वाज् जन्मनः। तत्र मूले जन्मनोऽभ्यर्हितत्वा'दभ्यर्हितं चे'ति सूत्राद् पूर्वनिपातः। अतः गुणकर्मजन्मभिरिति सुबोधिन्यां पाठः। अनिरूपणे हेतुमाहुः साक्षीति। सुषुप्तिसाक्षी। श्रुतौ चेतःपदसमभिव्याहाराद् सर्वभूताधिवासपदाच। तथा च श्रुतिः 'कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्चे'ति। सर्वोपनिषदि ज्ञानज्ञेयानामाविर्भाव-

१. भगवद्रूप।

तिरोभावज्ञानात् स्वयमेवमाविर्भावतिरोभावहीनः स्वयंज्योतिः स सांक्षीत्युच्यते इति साक्षिलक्षणम्। अत उक्तं भगवानिति। सर्वकर्मफलदाता स्वयमेवमाविर्भावतिरोभावहीनो भवति। आविर्भावतिरोभावकाले कर्मफलदातृत्वाभावात्। कर्माध्यक्षः कर्माधिकृतः स स्वयंज्योतिर्भवति। साधनमिति भगवान् कृपाविष्टः साधनमिति बोध्यं, ग्रन्थान्तरात्। यद्वा 'द्रक्ष्याम गां द्यां च तवानुकम्पिता'मिति भगवदनुकम्पाया वक्ष्यमाणत्वात् कृपाविशिष्टः। सगुणसाधनपक्षनिराकरणं स्पष्टयन्ति स गुणैः कृत्वेति। प्राकृतैर्गुणैः। सात्त्विकादिकर्माणि सात्त्विकादिजन्मानि। एवेति 'गौणश्चेन्नात्मशब्दा'दिति व्याससूत्रात्। 'कृष्णो ब्रह्मैव शाश्वत'मितिश्रुतेः। स्वरूपलक्षणधर्मं जन्मकर्माण्याहुः किन्तु क्रियेति। सद्रूपयेति 'सत्यं ज्ञानमनन्तं ब्रह्मे'ति स्वरूपलक्षणे सत्यत्वरूपया। धर्मरूपेणेत्यस्य वेदार्थधर्मरूपेण जैमिनिविचारितेन। आविर्भावः धर्मविशेषकर्मरूपेणाविर्भावः,जनी प्रादुर्भाव इति धात्वर्थः कर्म, प्राकट्यापरनाम।जात्यपेक्षयैकवचनमित्याशयेनाहुः कर्माणीति। विशेष्यम्। 'कर्मैके तत्र दर्शना'दिति जैमिनिसूत्रम्। एवं जन्मप्रकरणे सत्यत्वेन धर्ममुक्त्वा शरीरस्वीकृतिज्ञानस्य 'आत्ममायामृते राज'न्निति द्वितीयस्कन्धादतो ज्ञानमुक्तमायमिति ज्ञानं विहायानन्तानन्दमाहुः आनन्दरूपेणेति।'अनन्त'मित्यानन्दविशेषणं स्वरूपलक्षण इति भाष्ये। 'यदेकमव्यक्तमनन्तरूप'मिति महानारायणे। एवमुभयोरेकवाक्यतया रूपानन्दयोरेकरूपत्वे 'आनन्दरूपममृतं यो विभाती'ति श्रुत्युक्तेनानन्दरूपेणेत्यर्थः।'अनन्तमानन्द'मित्यत्र श्रुतावानन्दमर्शआद्यजन्तम्। तेन नानन्दत्वेन रूपेणेत्युक्तम्। जन्मात्र चतुर्व्यूहसमुदायः। एतदेव ब्रह्माण्डपुराणेप्युक्तम्। 'स्त्रीपुंमलाद्युपज्ञात्मा देहो नास्य विजायते किन्तु निर्दोषचैतन्यसुखनित्यां स्वकां तनुं प्रकाशयति सैवेयं जनिर्विष्णोर्न चापरे'ति। ज्ञानानन्दमत्यरूपामिति'चैतन्यसुखनित्या'मित्यस्यार्थः। निर्दोषां च चैतन्यसुखनित्यामिति निर्दोषचैतन्यसुखनित्याम्। तथा च 'प्रकटस्य तवे'ति सुबोधिन्यां 'धर्मरूपेणे'त्यत्र 'प्रकृत्यादिभिरुपसङ्ख्यान'मिति वार्तिकेनाभेदे तृतीया, धर्मरूपाभिन्नाविर्भावविशिष्टमित्यर्थः। एकत्वावच्छिन्नाविर्भावाभिन्नानि बहुत्वविशिष्टानि कर्माणीत्यर्थः। आविर्भावो वर्तमानस्य वस्तुनो दर्शनविषयत्वयोग्यता विद्वन्मण्डनोक्तः। दर्शनविषयत्वयोग्यतास्वरूपसम्बन्धविशेषः। तैरेवेति जन्मकर्मभिरेव न तु गुणैः। जन्मना नन्दनन्दनः यशोदोत्सङ्गलालितः इत्यादीनि। कर्मणा गोवर्धनोद्धरणधीरः कालीयफणमाणिक्यरञ्जितश्रीपदाम्बुज इत्यादीनि नामानि। रूपाण्युद्बाहूत्थितरिङ्गणकर्त्रित्यादीनि। नामरूपे इति उदाहरणार्थमेकवचनं प्रत्येकम्। सिध्येदिति न हि मरुमरीचिकायां स्नानं सिध्यति। 'न निरूपितव्ये' इत्यस्यार्थमाहुः भवत्विति। कल्पान्तर इति लक्ष्मीकल्पे सरस्वतीकल्पे गौरीकल्पे वा। मात्स्ये कल्पानुकीर्तने उपान्त्याध्याये। तथाभूते इति

१ ज्ञान्त्ता।

प्राकृते। तदा तस्येति तस्य भगवतः। अत्र हेतुः कर्माध्यक्षत्वेति। अलौककर्माधिकाराभावात्। आत्मरूपमिति जीवात्मरूपम्। 'अयमात्मा ब्रह्मे'तिश्रुतेः। अनुमेयमेवेति यथाहुः 'कार्यायोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः वाक्यात् सङ्ख्याविशेषाच्च साध्यो विश्वविदव्यय' इत्युदयनाचार्याः कुसुमाञ्जलौ ग्रन्थे। मनः कर्तृपूर्वकं कार्यात् घटवत्। वेदः पौरुषेयः वाक्यत्वात् अस्मदादिवाक्यवत्। तथा च मनोवचोभ्यां पक्षाभ्यामित्यर्थः। त्वं असि मनसः देवदत्तवत्। त्वं असि वचसः देवदत्तवत्। इति वानुनेयम्। एवकारव्यावर्त्यमाहुः न तु प्रत्यक्षेति। पराञ्चि खानीति खानीन्द्रियाणि पराञ्चि बहिष्ठग्राहकाणि। न सन्तीति स्वरूपव्यतिरिक्तानि न सन्ति। आत्मसृष्टिवत्। औत्थामिति वैधसेवारूपायामपि। 'तं भजेत् तं रसे'दिति गोपालतापिन्याम्। 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य' इति मैत्रेयीब्राह्मणे। तान्त्रिकयामिति नारदपञ्चरात्रोक्तायां पञ्चरात्रोक्तायाम्। प्रतियन्तीति भगवदिच्छयावगच्छन्ति। जगज्जन्मादिद्वारा व्यवहार्यो भविष्यामीतीच्छया। 'अथापी'त्यस्य नामरूपाभावभिन्नप्रक्रमेण नामरूपे उपपत्त्यापीत्यर्थमाहुः विष्णोरित्यादि। विष्णुर्नाम 'इदं विष्णुर्विचक्रम' इति त्रिविक्रमरूपम्। षडक्षरादिमन्त्राः। वषट् स्वधा। वह प्रापणे। बाहुलकाड्डुपट् वा। ध्यानादीति आदिना गुप्तभाषणम्। मन्त्रा इत्यत्र मन्त्रि गुप्तभाषणे इति। इमामेवेति श्रुतार्थापत्तिरूपाम्। अत एवेति नामरूपकल्पनरूपार्थापत्तेरेव, तस्याः कारणीभूतान्यथानुपपत्त्या सह। दिव्यान्येवेति एवकारो विवर्तनामरूपयोगव्यवच्छेदकः। अथ तैत्तिरीयप्रश्नछान्दोग्योक्तेषु चतुष्केषु षोडशकलासु च कः कोशोत्र श्लोक उच्यत इत्याकाङ्क्षायामुच्यते। तैत्तिरीये जिह्वा सन्धानमत्र। 'तव तस्ये'ति मूले तच्छब्दार्थस्य फलस्यास्वाद्यत्वात्। यद्वाऽधरा हनुः पूर्वरूपमत्र। अधरो लोभः। 'लोभोऽधरोष्ठ' इति वाक्यात्। तस्मिन् सति वेदेपि स्मरणेन क्रियायां पूर्णायामविभक्त्या नामरूपे प्रतियन्तीति। मूले 'प्रतियन्त्यथापी'ति वाक्यात्। प्रश्ने विशेषाश्रवणम्। छान्दोग्ये 'श्रोत्रं कले'ति। वचोनुषङ्गेन श्रोत्रस्यानुमेयत्वात्।

१०-२-३७. शृण्वन्नित्यत्र पुरुषार्थेति स्वज्ञानद्वारेति बोध्यम्। तैरिति नामरूपैः। फलमिति अभवम्। साङ्गानीति ससाधनानि। साधनानामसिद्धवदावृत्तिः कर्तव्येति सुबोधिन्यामतः फलसाधने एकीकृत्य निरूपिते। जनयेदेवेति अत्यन्तायोगव्यवच्छेदकचकारः। नीलं सरोजं भवत्येवेत्यत्रेव। मोक्ष एवेति एवकारेण 'जायस्व म्रियस्वे'ति तृतीयमार्गीयस्वर्गलोकयागयोगव्यवच्छेदः क्रियते। उभयविधानीति श्रवणगृणनविषयाणि नामानि रूपाणि च। अन्यदेति श्रोतृरहितकाले। ध्यानरूपमित्यग्रे विवेच्यम्। योगीश्वरप्रबुद्धवाक्यं 'स्मरन्तः स्मारयन्तश्च मिथोघौघहरं हरि'मितिवाक्यं, तदनुसारेण चकारार्थमाहुः चकारादिति। वैदिकमार्गे गोपालतापिनीये 'मुमुक्षुर्वै शरणमनुव्रजे'दिति श्रुतिरुपदेशादि

दानमाक्षिपति। अष्टाक्षरशरणमन्त्रः। आदिनाऽऽत्मनिवेदनम्। 'इमे विदेहा अयमहमस्मी'ति याज्ञवल्क्यं प्रति जनकवाक्यात्। योगाङ्गेत्यादि एवं त्रिभिः श्रवणादिभिः ध्यानेन प्रेम्णि जातेऽवैधे 'भक्त्या प्रसन्ने तु हरौ तं योगेनैव योजये'दिति तृतीयस्कन्धनिबन्धाद् योगाङ्गध्यानत्वेन। इदं चिन्तननिष्ठम्। ध्यानं रूपस्येति नाम्नो ध्यानस्वरूपमाहुः तथैव चित्तेति। योगाङ्गत्वेनैवेत्यर्थः। रूपध्यानप्रकारेणैवेति श्रीवल्लभाः। इदं योगाङ्गत्वं आवृत्तिनिष्ठम्। नामावृत्तिरिति नाम्नामावृत्तिः नाम्नां ध्यानमित्यर्थः। अप्रयत्न इति स्मरणविषये रूपादौ चित्तस्य व्यापारमात्रं न तु प्रत्यङ्गे रूपपरिकल्पने प्रयत्नवानित्यर्थः। रूपत्वप्रकारकं रूपविशेष्यकं स्मरणम्। सप्रयत्न इति रूपकल्पने यः प्रयत्नस्तेन सह वर्तमानो व्यापारो न तु प्रकटरूपकल्पनसमर्थः। 'संस्मरय'न्नित्यत्र 'सं'मुपसर्गार्थमाहुः तदेवेति। चिन्तनमेव। एवकारः स्मरणयोगं व्यवच्छिनत्ति। रूपस्य प्रत्यङ्गे परितः कल्पनं समर्थनं येन प्रयत्नेन तादृशप्रयत्नवच्चित्तव्यापारो ध्यानम्। अत्र'प्रयत्नश्चित्तव्यापारः स्मरण'मित्यादावभेदान्वयः। चित्तव्यापारः स्मरणानुकूलो व्यापारः, उपासनान्यमते। स्मरणं भावप्रत्ययान्तम्। भावो धात्वर्थः, तत्र स्मरणे स्मरतेः प्रकृत्यर्थः। फलं धात्वर्थो व्यापारः। फलव्यापारयोर्धातुराश्रये तु तिङः स्मृता इतिभावप्रत्ययान्तस्मरणस्य स्मरणानुकूलो व्यापारोर्थः। स्मर्तेत्यत्र स्मरणानुकूलव्यापाराश्रय इति बोधः। नैयायिकमतेप्येवम्। स्मरणमात्रं भाव इति मण्डनमिश्राः, तन्मते स्मरणमित्यत्र भावप्रत्ययार्थे पुनरुक्तिरतः स्मरणद्वयं प्रकृष्टं स्मरणं ज्ञापयति। प्रकर्षश्चोक्तव्यापारवैशिष्ट्यम्। स चाप्रयत्नः प्रयत्नभेदवान्। चित्तस्य ज्ञानत्वेन प्रयत्नसम्भवात्। समानाधिकरणसम्बन्धेन। उदाहरणं 'सर्वं खल्विदं ब्रह्मे'ति स्मरणं अप्रयत्नश्चित्तव्यापारः। 'तज्जलानिति शान्त उपासीते'ति चिन्तनं सप्रयत्नश्चित्तव्यापारः, स्मरणेऽप्रयत्नचित्तव्यापारे तज्जलान्त्वोपासनाज्ञाविषयत्वेन पदजन्यचिन्तनविषयपदार्थोपस्थितौ लक्षणाभिधातात्पर्यप्रयत्नसाहित्यात् सप्रयत्नत्वम्। प्रयत्नेनाप्रयत्नप्रतिबन्धो भवति। अभेदसम्बन्धः पूर्ववत्। यदा तु भक्त्या सप्रयत्नचित्तव्यापारे प्रयत्ने आधिदैविकरूपस्य विश्वरूपदर्शने गीतोक्तस्य परितः एकैकाङ्गे मनःकल्पनं प्रणयनं येन तादृशे जाते ध्यानमित्युच्यते,'एकैकाङ्गे मनःप्रणयनं ध्यान'मिति ध्यानलक्षणादिति प्रपञ्चः।चकारादिति द्वितीयचकारात्। भगवत्सम्बन्धिनामिति समुद्रशेषचक्रव्यूहनृसिंहभगवद्भक्तानाम्। अन्येषामिति नामरूपाणामित्यर्थः। 'समुद्रं मनसा ध्याये'दित्यादिश्रुतेः। शेषोपासना पञ्चमस्कन्धे। चक्रोपासना नृसिंहतापिन्यां, नृसिंहोपासना च। व्यूहोपासना गोपालतापिन्यां भगवद्भक्तोपासना, 'तस्मादात्मज्ञं ह्यर्चयेद् भूतिकाम' इत्युपनिषदि। निरूपित इति तेन 'कथितो वंशविस्तार' इत्यारम्भे मङ्गलाभावेपि प्रतिबन्धाभाव इति ज्ञापितम्। मङ्गलत्वे युक्तिमाहुः अन्यथेति। प्रतिबन्धे तस्य श्रवणादेरसिद्धौ कार्यं फलं निरोधश्च

न स्यात्। ननु भगवदिच्छया श्रवणाद्यभावेपि फलं भविष्यति गोपीनामिवेत्याशङ्क्याहु-रिच्छायामिति। पुष्टेरनुग्रहसाध्यत्वेनानुग्रहस्य ज्ञातुमशक्यतया कार्यं न स्यादित्यर्थः। तदर्थमित्यादि प्रतिबन्धाभावार्थं नामरूपश्रवणाद्यादन्यत्। भजनानन्यत्वभञ्जकम्। मङ्गल-रूपस्येति 'मङ्गलानी'त्यस्य समभिव्याहारात् प्राप्तमिदम्। उत्तरत्रेति उत्तरार्धे। उत्तरार्धं व्याकुर्वन्ति स्म। वेदतात्पर्यार्थमाहुः भगवत्सेवेति। 'अग्नये जुष्टं निर्वपामी'ति संहिता। जुष प्रीतिसेवनयोरिति धातुः तु० आ० से०, जुष परितर्कणे इत्यपि धातुः चु० प० से०। 'लोकवत्तु लीलाकैवल्य'मिति सूत्रादाहुः लौकिकक्रियास्विति।'कायेन वाचा मनसेन्द्रियै-र्वे'ति वाक्योक्तास्विति वा। यस्त्वदित्यादि आचार्योपायेन यः कोपि। त्वच्चरणार-विन्दयोरिति पादकृतोपकारस्मरणात् पादसेवनमुक्तम्। 'चरणं पवित्रं विततं पुराण'-मितिवेदः।वैधावैधसेवोपलक्षणम्। आविष्टचित्त इति मानसी सेवा तनुवित्तजसेवाफलम्। सर्वथेति लौकिकक्रियाप्रकारेण लोकवेदक्रियाप्रकारेण वैदिकप्रकारेण च। 'जायस्व म्रियस्वे'ति तृतीयमार्गेपि सेवयाहन्ताममतात्मकसंसारनिवृत्तिमाहेत्याशयेनाहुः भवायेति। अत्रोक्तं मोक्षं व्युत्पादयन्ति स्म स्मरणेनेति। इदमुपलक्षणम्। श्रवणादिचतुर्भिरपि। यद्वा उपलक्षणं विनाप्यर्थः। 'यस्य स्मृत्ये'तिवाक्यात्। क्रियाः पूर्णाः साङ्गा भवन्ति 'आत्मानन्दसमुद्रस्थं कृष्णमेव विचिन्तये'दिति सिद्धान्तमुक्तावलीवाक्याच्च। क्रिया इति वेदेनाभिहिताः तात्पर्यवृत्त्योक्ताश्च तनुजवित्तजरूपाः लौकिक्यश्च। पूर्णाः क्रियाः त्रयोदश-गुणाः सत्य आनन्दरूपाः यास्ता गृह्यन्ते। फलनिरूपणात्। क्रियारूपो भगवानाविर्भवती-त्यर्थः।चित्तावेशो मानसी सेवा। तत्र भगवति चित्तावेशः। क्रियया चित्तशुद्धौ भगव-दावेशो युक्त इति हिशब्दः। उपकारस्मरणेन पादसेवने चरणाविष्टचित्तत्वे ज्ञानशक्तिरूपो भगवानाविर्भवतीत्यर्थः। क्रियाशक्तिर्यथा सदंशप्रकटा चिदानन्दतिरोहिता सा यदा प्रकटान-न्दांशा तिरोहितसच्चिदंशाऽऽनन्दरूपा,तथा ज्ञानशक्तिः चिदंशप्रकटा सदानन्दांशतिरोहिता, सा यदा प्रकटानन्दांशा तिरोहितचित्सदंशाऽऽनन्दरूपा। ज्ञानक्रियेति ज्ञानक्रिये जीव-निष्ठे जीवोणुर्भगवदंशः। एवं ज्ञानक्रिये भगवदीयज्ञानक्रियांशौ। एवं च 'ज्ञानशक्तिक्रिया-शक्ती सन्दिह्येते परस्थिते' इति भाष्ये ज्ञानशक्तिक्रियाशक्ती विष्णू। आनन्दत्वेन ज्ञानक्रिया-शक्त्योर्ग्रहणात्। वाच्यत्वार्थं विष्णुः। ज्ञानक्रिये जीवात्मके इति वाक्यवृत्तिः। शक्तिमतो 'यतो वाचो निवर्तन्त' इतिश्रुतेर्वागविषयत्वात्। तद्वज् जीवीये ज्ञानक्रिये यदा विष्णुः तदा जीवस्य मोक्षः,ज्ञानक्रियाशक्त्योर्वैलक्षण्यात्। जीवे व्यापकत्वोद्गमाच्च। मोक्षश्च 'परं ब्रह्मा-धिगच्छती'तिवाक्यात् संसारदुःखनिवृत्तिर्ब्रह्मबोधनं च। तदुक्तं सिद्धान्तमुक्तावल्यां 'ततः संसारदुःखस्य निवृत्तिर्ब्रह्मबोधन'मितिवाक्यात्। अन्यथा ज्ञानमार्गीयो मोक्षः। भगवद्रूपकर्मणो मोक्षसाधकत्वं निबन्धे स्वर्गपदविचारे विवृतम्। सदोष इति 'दोषा हरौ न सन्त्येव तथा

भक्ताहिताः क्रियाः स्फुरन्ति बुद्धिदोषेण मूलं तस्य बहिर्दर्शि'रितिवाक्यात्। निर्दोषयोग-व्यवच्छेदक एवकारः। 'निर्दोष एव रमत' इतिवाक्यात्। हि युक्तश्चायमर्थः। अपहत-पाप्मत्वात् भगवतः। सर्वदोषेति 'जीवाः स्वभावतो दुष्टाः दोषाभावाय सर्वथा श्रवणादि तथा प्रेम्णा सर्वं कार्यं हि सिध्यती'तिवाक्यात्। संसारेति संसारायासामर्थ्यं संसारा-सामर्थ्यम्। 'सह सुपे'ति सूत्रेण समासः। अथ तैत्तिरीयप्रश्नछान्दोग्योक्तेषु चतुष्केषु षोडशकलासु च कः कोंशोत्र श्लोक उच्यत इत्याकाङ्क्षायामुच्यते। तैत्तिरीयेऽधरा हनुः पूर्व-रूपमत्र 'गृण'न्नित्युक्तेः। जिह्वा सन्धानं वात्र। अभवरस आस्वाद्यत इति। लिह आस्वादने इत्यस्य जिह्वेति जायते। प्रश्ने विशेषाभावः। छान्दोग्ये 'अग्निः कले'ति। 'अग्निमीले पुरो-हित'मिति ऋग्वेदारम्भात्, 'ब्रह्म तर्हि अग्नि'रित्युत्तरार्धे, अथवा वेदकृतपक्षपाते चतुर्षु श्लोकेषु आचार्यः पूर्वरूपम्। अन्तेवास्युत्तररूपम्। विद्या सन्धिः प्रवचनं सन्धानमिति चतुष्कं निरूप्यते। 'विशुद्धसत्त्वं वपुराचार्यस्य। 'आचार्यं मां विजानीया'दित्यभेदः। 'आचार्यचैत्यवपुषा स्वगतिं व्यनक्ती'त्यत्र वपुःपदम्। अतः आचार्यः पूर्वरूपमत्र।'सत्त्वं न चे'दित्यत्र 'विज्ञानमज्ञानभिदापमार्जन'मन्तेवासिनीत्यन्तेवास्युत्तररूपमत्र। 'न नामरूपे' इत्यत्र वेदादिविद्या, अतः विद्या सन्धानमत्र।'शृण्वन् गृण'न्नित्यत्र श्रवणाद्यर्थप्रतिपादको वेद इति प्रवचनं सन्धानमत्र'प्रवचनं' वेदः। पदजन्यपदार्थोपस्थितिरत्र। 'औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्ध' इति जैमिनिसूत्रे शब्दार्थयोर्नित्यसम्बन्धोक्ते 'औत्पत्तिकमिति नित्यं ब्रूम' इति शाबरभाष्यात्।

१०–२–३८. दिष्ट्येत्यत्र स्वसिद्धान्तेति वेदकृतपक्षपातस्य गार्ग्यादिकस्योक्तत्वात्. तत्प्रसङ्गेन पौष्टिकपक्षपातं वक्तुं स्वस्य श्रीभागवतस्य सिद्धान्तः। 'नायमात्मा प्रवचनेन लभ्य' इति श्रुत्युक्तः श्लोके 'दिष्ट्ये'तिपदेन साधनाभावोक्तेस्तदनुसारेणाहेत्यर्थः। भग-वच्छास्त्र इति श्रीभागवते द्वितीयनवमेध्याये। भगवानेवेति 'हर' इति पदात् शास्त्रार्थ-त्वेन व्याख्या भगवानेवेत्येवकारः। सर्वात्मभावाद् भगवानिति। 'यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद् विजानाति स भूमे'ति सर्वात्मभावलक्षणं लिङ्गभूयस्त्वाधिकरण-भाष्ये। भगवतो'न्यत्' 'यत्र' भावे सुखत्वेन सुखसाधनत्वेन 'पश्यती'त्यादि। 'भूमा' सर्वा-त्मभावो भगवांश्च भूमाधिकरणे। 'स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तमे'तिवाक्यात्। उभयोर्भूमत्वम्। प्रमाणादीति प्रमाणं ज्ञानरूपो भगवान्। 'दर्शनं प्रमाण'मिति वक्ष्य-माणत्वात्। 'अत्र प्रमाणं भगवा'निति वाक्यमनुसन्धेयम्। आनन्दाविर्भावो भगवान् प्रमेयं, वक्ष्यमाणश्लोके प्रमाविषयत्वात्। स एव कृपाविष्टः साधनम्। लीलायुक्तः फलं लीला वा आनंदयुक्तस्य लीलात्वात्। अग्रे स्पष्टीभविष्यति। तत्र प्रमाणं स्पष्टयन्ति स भगवत्साक्षात्कार इति। 'ज्ञानमात्रं परं ब्रह्मे'ति श्रुतेः 'अत्र प्रमाणं भगवा'नित्युपद-

म्भानुरोधादाहुः साक्षात्कृत इति भगवच्छास्त्रं पञ्चरात्रमपीति। द्वितीयस्कन्धानुसारेण विराड्ध्याने पृथिवी पादरूपा सोपकारसरणात्, द्वितीयनवमाध्याये'ऽहमेवासमेवाग्रे' इति वाक्ये भगवानग्र आस कारणात्मा, पृथिवी कार्यरूपा पूर्वमासीदिति। पञ्चरात्रेण भगवद्भार्या भक्तेति च। भगवच्छास्त्रे पूर्वं निरूपयन्ति स भूमीत्यादिना। 'यमेवे'ति श्रुतौ भार्यात्वेन भक्तात्वेन च वृता। तस्याः प्रसङ्गादित्यर्थः। वयमिति ब्रह्माद्याः। कृतोर्थः भगवन्मार्गीयमोक्षः तदीयत्वलक्षणो यैस्तादृशा जाताः। 'भगवानेव हि फल'मिति निरोधलक्षणग्रन्थे भगवानानन्दाविष्टो लीलायुक्तः। लीलारूपो वा। द्वितीयस्कन्धनवमाध्याये 'इदं मतं ममातिष्ठ परमेण समाधिना भवान् कल्पविकल्पेषु न विमुह्यति कर्हिचि'दिति मोहाभावश्च मोक्ष उक्तः, स तदीयत्वे निविशते। भगवन्मार्गे तदीयत्वं भर्तृसूक्तप्रकारेण भूमेर्गृहीतम्। दत्तात्रेयवत्। तदुक्तं टिप्पण्याम्,'स्त्रियो वा पुरुषा वापि भर्तृभावेन केशवं हृदि कृत्वा गतिं यान्ति श्रुतीनां नात्र संशय' इति। कृतार्थमासीदिति स्वस्वमार्गीयं फलं प्राप्तवत्। त इति 'भवत' इत्यस्यार्थः। जन्मनेति चतुर्व्यूहैः। 'समुदायो जन्मवाची'ति निबन्धात्। वासुदेवेनासुरमोक्षदानाद् भारोपनीतः। सङ्कर्षणेन भूभारहरणेन। प्रद्युम्नेन गर्भसम्बन्धेन। अनिरुद्धेन धर्मरक्षणेन। अध्यायार्थसङ्कर्षणजन्मना वा। प्राकट्यरूपेण। अत्राश्चर्यरसोऽनुसन्धेयः। 'आश्चर्यवत् पश्यति कश्चिदेनमाश्चर्यवद् वदति तथैव चान्य' इति गीतायाः। 'आश्चर्यो वक्ता कुशलोऽस्य लब्धे'ति काठकोपनिषदश्च। एवं दुःखाभावरूपं फलमुक्त्वा सुखरूपं फलं भगवन्मार्गप्रवर्तकमाहुः मर्दनेति। तथा च मूले भारपदेन मर्दनक्लेशो ज्ञेयः। भर्तृगर्भसम्बन्धे आनन्दो भवति परन्तु मर्दनक्लेशस्तु परमानन्दप्राकट्येन न तु आनन्दप्राकट्येनेति परमपदम्। सर्वानर्थेति 'जगन्मङ्गल'मितिवाक्यात्। उपास्ये चेति विराजि स्वराजि। 'कृष्णद्युमणिनिम्लोच' इतिवाक्यात्। सूर्यदेहे चन्द्रस्य वंशीयस्य। 'मूर्तित्वे परिकल्पितः शशभृतो वर्त्मा पुनर्जन्मनामात्मेत्यात्मविदां क्रतुश्च यजतां भर्ताऽमरज्योतिषां लोकानां प्रलयोद्भवस्थितिविभुश्चानेकधा यः श्रुतौ वार्णो नः स ददात्वनेककिरणस्त्रैलोक्यदीपो रवि'रिति बृहज्जातके। 'शशभृत'-श्चन्द्रस्य 'मूर्तित्वे' परिच्छिन्नपरिमाणत्वार्थं 'परितः कल्पितः' समर्थितः। यतो जलमय- प्रकाशहीनः तत्र रविकलाः प्रतिफलिताः ज्योत्स्ना भवन्ति। तदुक्तं 'सलिलमये शशिनि दीधितयो मूर्च्छितास्तमो नैशं क्षपयन्ति दर्पणोदरनिहिता इव मन्दिरस्यान्त' इति। 'यः पुनर्जन्मनां' मोक्षमार्गिणां 'वर्त्मा' मार्गभूतः। मोक्षभाजो रविं भित्त्वा गच्छन्ति। एतत्करणमिति भारापनयनकरणम्। हरिरिति हरति दुःखमिति हरिः। अलौकिकत्वादिति तावतीं मायां दूरीकृत्य प्रकटत्वं चतुर्व्यूहसमुदायः तद्रूपभगवज्जन्मनः

१. पुनर्जन्मनाम्=द्विजन्मनाम्। इति न. प्रतिभाति।

अलौकिकत्वात्। क्लृप्तेति मनस्तोपि धारणे तथा। सर्वात्मकत्वादिति भगवतः भिन्नं जन्मासम्भावितं भेदाभावादित्यर्थः। दिष्ट्या महता भाग्येन। तेन साधनाभावद्योतनाद् द्वितीयस्कन्धनवमाध्याये पुष्टिसिद्धान्तोत्रेति सूचितम्। केचित् त्विति अस्मिन् पक्षे जन्मनेति न तृतीयान्तं किन्तु जन्मेति पदच्छेदः। भारोपनीतस्तव जन्म, ईशितुस्तव जन्म, नेत्यर्थः। समागमनस्य भारहरणहेतुत्वं, तत् तु न तु भारहरणहेतुत्वमेवेत्यस्वरस उक्तः। अत इति जन्माभावेनाप्राकृतत्वसूचनात्। यद्वा आभ्यां दिष्ट्येत्युक्तेः। आकारसमर्पकत्वाच। जातमिति भविष्यतीति क्रियापदम्। शङ्कापरिहारार्थमिति भगवति आभासोक्तशङ्कापरिहारार्थं पद्मपुराणे चरणचिह्नाध्याये 'केनैव ज्ञायते देवो भगवान् भक्तवत्सलः तान्यहं वेद नान्योस्ति सत्यमेतन् मयोदितम् षोडशैव तु चिह्नानि मया दृष्टानि तत्पदे दक्षिणे नव चिह्नानि इतरे सप्त एव चे'त्युक्त्वाग्रे चिह्नलक्षणान्युक्त्वा 'अङ्कान्येतानि भो विद्वन् दृश्यन्ते तु यदा कदा कृष्णाख्यं तु परं ब्रह्म भुवि जातं न संशय' इति वामचरणचिह्ननिरूपणानन्तरं वाक्यं, दक्षिणचिह्ननिरूपणानन्तरं 'चिह्नान्येतानि भो वत्स दक्षिणे चरणे सदा स वै कृष्ण इति ज्ञेयो बुद्धिमद्भिर्नरोत्तमै'रिति वाक्यम्। ताभ्याम्। देवपादाः भूमिं न स्पृशन्ति छायां च न जनयन्ति तदत्र देवदेवपदे जातमिति पुरुषोत्तमकृतपक्षपातो जात इति भाग्याभिनन्दनमित्याशयेन पुरुषोत्तमकृत इति हर्षात् प्राप्तं 'दिष्ट्ये'त्यस्यार्थमाहुः महदिति। महतां भूनारदवसुदेवनन्दानां भाग्यं अस्माकम्। असमस्तं वा पदद्वयम्। मूले पदकशब्दः सर्वलक्षणसम्पन्नैः पदैरितिस्वार्थकप्रत्ययान्तो व्याख्यातोधुना 'इवे प्रतिकृता'विति सूत्रेण कप्रत्ययेप्यज्ञातार्थेपि सिध्यन् यावर्थौ बोधयति तौ द्विधा पूर्वमाहुः भूमिः पदमित्यादि पदं छायामित्यादि च। पूर्वं पदं प्रतिकृतिरूपं द्वितीयं च। छायाम्। अज्ञातं पदमित्यर्थः। तृतीयं कप्रत्ययार्थमनुवदन्ति स पुरुषपदमिति। स्वार्थे कप्रत्ययान्ते पदकपदे कृते पुरुषस्य भगवतः पदकमित्यर्थः। उद्धृता चेत्याधिभौतिकी भूः। अग्रे चाधिदैविकी भूः,पक्षपातो जात इति पक्षपातज्ञानार्थं दुहितेति। त्रिलोकीकल्पनायां भूः पुरुषस्य पदम्। अवान्तरकल्पेषु ब्रह्मणा त्रिलोकी निर्मीयत इति ब्रह्मजन्या भूरतो दुहिता। सानुरागाया इति भूमिः पदं गृह्णातीत्यत्रात्यनुरागेण सात्त्विकभावस्वेदोद्गमे पदं प्रतिफलतीति पदग्रहणे भूमेरनुरागः सूचित इति सानुरागायाः। भगवति अनुरागेण सह वर्तमानायाः। दिष्ट्येति देवा अपि भुवं न स्पृशन्ति तत्र देवदेवस्य भूस्पर्शे सानुरागत्वदर्शनं विस्मयाविष्टमिति भाग्येन। पदाङ्किता सतीति भगवदर्थे मनुप्रसङ्गे चतुर्थस्कन्धे 'सर्वेषा'मित्यादिः। पूर्वमिति प्रथमाध्याये, 'गौर्भूत्वाश्रुमुखी'त्यत्र। परमानन्देति मर्दनक्लेशहान्यन्तरमिति बोध्यम्। महदिति तेन भाग्यमित्यत्रैकदेशग्रहणं ज्ञेयम्। अपिशब्दात्। न इत्यपीति

१ हान्यनन्तमिति नः प्रतिभाति।

नो देवानां सकलदेवानामपि पक्षपातदोग्ध्री । 'तवानुकम्पिता'मिति व्याकुर्वन्ति स किञ्चेति । तव पादैरेव न तु देवान्तरपादैः । 'तवे'त्यत्र करणत्वसम्बन्धाविवक्षायां सम्बन्धसामान्ये षष्ठीत्याशयेनाहुः त्वया वेति । दिव्यवतारपादसत्त्वामाहुः देवानां सर्वेति । तथा च दिव्यपि देवोपकारकरणात् 'तवानुकम्पितां ग्राम्' । कुण्डलेति आदिना कुण्डलयोः स्वस्वत्वध्वंसाभावः। आदित्या इति षष्ठी,सामर्थ्यात् । रजकस्य वस्त्रं ददातीति वत् । अत्र स्वमत्त्वध्वंसपूर्वकपरस्वत्वोत्पादनाभावेन दानत्वाभावान् न चतुर्थी । अस्माकमिति देवानां एवकारेणासुरपक्षपातव्यतिरेकात् असुरयोगव्यवच्छेदकः । उभयमिति अनुकम्पितां गां द्यां चेत्युभयम्। दर्शनं प्रमाणमिति व्याप्तिज्ञानवत् प्रमाणम् । दर्शनं भावल्युडन्तप्रतिपाद्यं धात्वर्थरूपं भगवदनुकम्पितगोद्योसाक्षात्काररूपं, तेन देवैर्निरोधक्रीडाः कर्मरूपाः कर्मणां प्ररोहैकस्वभावत्वादाविर्भावजनकत्वम् । आविर्भावो वर्तमानस्य वस्तुनो दर्शनविषयत्वयोग्यता, सा च प्रथमज्ञप्तिरपि । विषयस्य ज्ञानत्वाद् विषयत्वयोग्यतापि स्वरूपसम्बन्धविशेषाज्ञानरूपैवेति तादृशप्रमाकरणत्वं धात्वर्थज्ञान इति करणल्युडन्तप्रतिपाद्यप्रमाणं दर्शनमित्यर्थः । अभेदान्वयो भवत्येव । ते आविर्भाव इति प्रमाविषयत्वं प्रमेयत्वमनुकम्पितत्वाविर्भावस्येत्याविर्भावः प्रमेयम् । दिष्ट्येत्युपक्रमोपसंहाराभ्यां चतुष्कं भिन्नम् । अथ तैत्तिरीयप्रश्नछान्दोग्योक्तेषु चतुष्केषु षोडशकलासु च कः कोंशोत्र श्लोक उच्यत इत्याकाङ्क्षायामुच्यते । तैत्तिरीये अधरा हनुः पूर्वरूपमत्र । अधरोष्ठो लोभः । तस्य फलं 'वाक् सन्धि'रित्युक्ता वाक् । विद्याप्रवचनयोः पूर्वश्लोकचतुष्के गतत्वात् काण्डद्वयार्थानन्तरं काण्डद्वयतात्पर्यार्थभक्तिमार्गीया 'मत्स्याश्वे'ति श्लोकोक्ता वागत्र गृह्यते । तत्र वाचि प्रवचनपदोक्तयावत्पुराणवेदस्मृतीतिहासातिरिक्तायां वरणमात्रैकलभ्यायां 'उपूपध्मानीयानामोष्ठौ जिह्वामूलीयस्य जिह्वामूल'मितिवचनोक्तपुरुषोत्तमोङ्कारजिह्वास्वादनस्य पारोक्ष्येण तात्पर्यवृत्त्या प्रतिपादिकायां ओष्ठद्वयं जिह्वा चोपयुक्तेतिक्रमेण चतुष्कोपयोगः । अतोधरा हनुः पूर्वरूपमत्र उक्तवाकारणत्वात् । उकारशब्देनोङ्कारः परोक्षवादात् । बाहुलकाच्च । पुः पुरुषोत्तमः । उक्ताभ्यामेव हेतुभ्याम् । तेन पुष्टिमार्गीयं भक्तसंवलितं पुरुषोत्तमरूपम्। उपध्मानीयः पकारात् पूर्वं अर्धविसर्गसदृशः उपध्मानीयः पुरुषोत्तमपकारात् पूर्वं अर्धचन्द्रसदृशः उपध्मानीयः तुरीयतत्त्वं चन्द्रः तद्रूपपुरुषोत्तमः । जिह्वामूलीयस्येत्यत्र ककारात् आत्मसुखात् पूर्वं अर्धविसर्गसदृशः जिह्वामूलीयः पुरुषोत्तमो मनसा चन्द्ररूपेणात्मसुखम् । खकारादाकाशरूपशरीरात् पूर्वं अर्धविसर्गसदृशोपि जिह्वामूलीयः तेनाधरौष्ठलोभकार्यपुरुषोत्तमप्रतिपादनात् उत्तरत्र उत्तरा हनुरुत्तररूपम् । वाक् मत्स्याश्वादिषु कृतावतार यदूत्तम वन्दनं त इति सेवापूर्णताद्योतकवन्दनभक्त्यन्तप्रतिपादिका सन्धिः जिह्वा रसास्वादकर्त्री पुरुषोत्तमरूपा 'परः पुमा'निति चतुर्थश्लोके उक्ता । अतो वाचः सेवापूर्णताद्योतकवन्दन-

भक्त्यन्तप्रतिपादिकायाः प्रपञ्चः पूर्वश्लोकयोः चतुर्थे चेति, तेनार्थापत्त्या प्रमाणेन तत्प्रतिपादकाधरहन्वादेरुपस्थितिकल्पनं तत्प्रतिपादकपदाभावेपि श्लोके। पीनो देवदत्तो दिवा न भुङ्क्ते इत्यत्र रात्रिभोजनकल्पनवत् इति शुभम्। प्रश्ने विशेषाभावः। छान्दोग्ये 'उदीची दिक् कले'ति। तस्याः स्वामी कुवेरः। धनाधिपः लक्ष्मीपतौ मुख्यः शब्दः कुंवति, कुवि छादने, कुंवेर्नलोपश्चेत्येरक्। तदुक्तं वायुपुराणे। 'कुत्सायां कितिशब्दोयं शरीरं वेरमुच्यते कुवेरः कुशरीरत्वान् नाम्ना तेनैव सोङ्कित' इति। तत्रापि कौ वर्तमाने वातगणे। विराट्प्राणरूपे। 'वेरं वातगणेपि चे'ति विश्वात्। तथा च कौ पृथिव्यां वेरं वातगणः कुवेरः। वेरशब्दस्य पुंस्त्वम्।'प्राणस्तथानुगमा'दिति व्याससूत्रात्। अतो भगवत्त्वात् कुवेरः प्रमाणम्।

१०-२-३९. न तेऽभवस्येत्यत्र आविर्भावमिति पूर्वश्लोके'द्रक्ष्याम' इतिपदोक्तदर्शनस्य प्रामाण्यार्थं ब्रह्मा समर्थयति स ते अभवस्येति। जन्मनः कारणमिति भक्तमनोरथविषयविनोदस्य जन्मकारणत्वं वक्तुं शक्यं, भक्तवश्यत्वाद् भगवत इति। तर्कयाम इति तर्कः व्याप्तिशोधकः। निर्भवः स्वान्निर्विनोदः स्यादिति। तथा च त्वं जन्मवान् लीलावत्त्वात्। विषयिवदित्यनुमानम्। वन्ध्यावली वाक्यमप्यत्र। इच्छावादेनाहुः वेः कालस्येति। कालो हि स्थिर इति अनन्तदेहत्वात् स्थिरः सन्। व्यापकश्च। अत एव प्रस्थानरत्नाकरे स्वरूपेन्तर्भावः कालस्योक्तः। बुभूषुः प्रभुर्यदा भवति तदा कालकर्मस्वभावान् गृह्णातीति श्रीभागवते। यथासुखमिति काल उपदेश इति धातुपाठात्, उपदेशेन सुखं प्रसिद्धः अधिकारिणि काले वेति वक्ष्यन्ति। अन्यथेति स इच्छया पुष्टिमार्गोपयोगी क्रियते। प्राकट्यानन्तरं कालस्य मर्यादायाः साधकत्वं बाधकत्वं वा नास्तीति भावः। 'यदा यदा हि धर्मस्ये'ति गीतामूलादाहुः विनावीति। मोक्षविरुद्धायामिन्द्रियरूपायां नावि। संसारनौरिति संसारस्थिता नौरिन्द्रियरूपा कामोदधितारिका पारं कामस्य पर्यवसानं न प्राप्नुयादित्यर्थः। 'कामस्यान्तं हि क्षुत्तृड्भ्या'मिति सप्तमस्कन्धात् क्षुत्तृड् न भवेदित्यर्थः। इन्द्रियनौकायां सत्यां तस्या नोदं स्वस्मिन् प्रेरणं प्राकट्यकारणं तर्कयामह इत्यर्थः। स्वस्य कामान्तरूपत्वात् प्राकट्येनेन्द्रियरूपाया नौकायाः स्वस्मिन् प्रेरणे निरोधलक्षणग्रन्थोक्तरीत्या पारं कृष्णं गच्छेत् प्राप्नुयादिति श्रीवल्लभजिल्लेखे। पारावारः कृष्णः तस्यैकदेशः पारः। सत्या भामेतिवत्। अस्मिन् पक्षे मूले नशब्दान्वयो न भवतीति तदर्थं अस्मिन्नर्थ इत्यादिना योजनान्तरमुक्तम्। अस्मिन्नर्थे भक्तो नागतः शरणागत इत्यर्थाच् छरणमार्ग आगत इति। किञ्च पशुजातीयनागत इति शरणभक्तिमार्गार्थं पक्षान्तरमाहुः यद्वेति। तमिति नोदम्। विशब्दस्य वियोगरूपमर्थान्तरमभिप्रेत्य पक्षान्तरमाहुः नौकारहितेति। तस्यामिति वियुक्ता नौः श्रेयःसाधनरूपा यस्यां संसृतौ तस्याम्। सत्याम्। सर्वप्रेरणमिति सर्वेषामवतारकालीनानां 'कामाद् गोप्यो भयात् कंस'इतिवाक्यविषयानां

कामादिभिः स्वस्मिन् इन्द्रियाणां प्रेरणं स्वसम्बन्धकरणं निरोध इति यावत्। अनवतारकालीनानामपि शब्दरूपश्रीभागवते स्वस्वरूपे अधिकारिणां श्रवणादिभिरिन्द्रियाणां प्रेरणं स्वसम्बन्धकरणं निरोध इति यावत्। अत्रेति कारणे। प्रमाणं ऐतिह्यरूपम्। शब्दरूपमपि प्रमाणं नास्तीत्याहुः अद्यापीति। तेन भगवन्मार्गकृतपक्षपाते भक्तकृततर्कशोधितव्याप्तिज्ञानातिरिक्तप्रमाणाभाव उक्तः। 'यमेवैष वृणुते तेन लभ्य' इतिश्रुतेः। 'नाहं वेदैर्न तपसे'ति स्मृतेश्च, 'भक्त्याहमेकया ग्राह्य' इति स्मृतेश्च। भगवन्मार्गकृतपक्षपातस्तु विश्वरूपदर्शनाध्यायोक्तधर्माणामुपसंहारात्। तत्र दैत्यानां क्षयः सुराणां जयः। कृष्णेपि जृम्भालीलायां सुरपक्षपातः। तर्कयामह इति तर्क उक्तः वेदयुक्तिरूपः। अतः सत्यसंकल्पात् 'वशीकुर्वन्ति भक्त्ये'त्येवंरूपात्। 'यदा यदा हि धर्मस्य ग्लानिर्भवति भारत अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यह'मितिवाक्यरूपादुक्तरूपाद् वा। तर्के शोधके व्याप्तौ हेतोर्विरुद्धत्वमाहुः वस्तुतस्त्विति। रजोभाजो ब्रह्मणस्तर्को व्याप्तिशोधकः संशयविषय इति तथा। एवं च लीलावत्त्वादिति हेतोः सन्दिग्धविरुद्धत्वमिति भावः। सकलशास्त्राग्राह्यत्वे सति चरणग्राह्ये तर्कोपि सन्दिग्ध उक्तः। 'प्रवर्तते यत्र रज' इति द्वितीयस्कन्धनवमाध्यायवाक्यात्। अधिकारिभक्तिः सर्वथाऽप्रयोजिका, केनचित् प्रकारेणैव प्रयोजिका। यथा मानसी सेवा ब्रह्मणः मानसीसेवात्वेन प्रयोजिका। अत एवकारः। ममापीति कारणगुणाः कार्ये समायान्तीत्यदोषात्। अविद्ययेत्यस्य विवरणं देहाद्यध्यासेनेति। देहस्तु 'तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा चे'ति श्रुत्युक्तविद्यादिभिः तस्याध्यासो देहे गृहीते स्थूलोऽहमिति देहधर्मस्थौल्याध्यासः। स्थितिः स्पष्टा। प्रलयः देहान्तरे व्यापकत्वे च मुक्तामुक्तयोः मुक्तस्य च। मुक्तस्यापि स्वोपास्याध्यासाङ्गीकारात्। एवमन्तःकरणाध्यास इन्द्रियाध्यासः प्राणाध्यासः स्वरूपविस्मरणं च उत्पत्तिरुक्ता तां व्याकुर्वन्ति भाष्यत्वाय। जगति इति जगति ब्रह्मामिन्न आधारे, उत्पत्तिरुत्पत्त्यादीति। गीताविस्तारो भागवतमतः सुबोधिन्या भाष्यत्वमविरुद्धम्। त्वयीत्यधिष्ठानकारणम्। उदासीने न भवतीति किन्तु सिसृक्षाद्याविष्टेऽभवे भवति। अनित्ये नेति किन्तु नित्ये आश्रयरूपे भवति। असमवायीति किन्तु समवायिन्यात्मरूपे सत्येव जीवानामुत्पत्त्यादिर्भवेदित्यन्वयः। आधारेति आश्रयेत्यर्थः। अवश्येति उदासीनेऽक्षरे जीवानामुत्पत्त्यादिर्भवतीति नावश्यकत्वानुदासीनत्वस्य। 'अभयाश्रयात्मनी'त्यत्र'भवाश्रयात्मनी'तिपाठमङ्गीकृत्याहुः अत अभव इति। स्मार्तः प्रयोगः। अथ तैत्तिरीयप्रश्नछान्दोग्योक्तेषु चतुष्केषु षोडशकलासु च कः कोंशोत्र श्लोक उच्यत इत्याकाङ्क्षायामुच्यते। तैत्तिरीये उत्तराहनुरुत्तररूपमत्र। तद्वानकपदाभावेप्यर्थापत्तिः प्रमाणपूर्वश्लोकव्याख्यान्त उपपादितम्। प्रश्ने विशेषाभावः। छान्दोग्ये अन्तरिक्षं कलात्र। 'अन्तरिक्षदेवा वै पशव' इतिश्रुतेः।

'आदित्यः पशुरासीत् तेनायजन्ते'तिपञ्चमाष्टकसंहिता। यद्वा'ऽग्निः पशुरासीत् तेनायजन्ते'तिश्रुतिः। गतवैदिकपक्षे'वायुः पशुरासीत् तेनायजन्ते'तिश्रुतिप्रसरः। ब्राह्मणे वराहोक्तेः। 'वराहो वायु'रिति। ब्रह्मनस्तो निर्गमात्। पश्यतीति 'पशु'पदनिरुक्तिः। अन्तरिक्षमाकाशः, तेना'काशशरीरं ब्रह्मे'तिश्रुतेर्जरायुर्निरूपितम्।

१०-२-४०.मत्स्याश्वेत्यत्र प्रथमपर्यायमनूद्य द्वितीयपर्यायमनुवदन्ति स स्वरूपेति। स्वरूपं चतुर्व्यूहरूपं जन्मवागगोचरस्य तस्य निमित्तं कारणमिच्छारूपं तस्या ज्ञानम्। अन्यथेति लीलया प्रादुर्भावे स्वरूपनिमित्तेच्छाज्ञानाभावे वा। न स्यादिति कारणगुणाः कार्यगुणानारभन्त इति हेतोर्न स्यात्। आनन्दाविर्भाव इति आनन्देन विनोदेन लीलयाविर्भावो यस्य तादृशः भगवानिति ज्ञानं तद्विषयः प्रमेयं निरूपितः। स एवेति ज्ञानमुपासनं तेनाविर्भूत एव मत्स्यादिः साधनम्। उपास्यातिरिक्तस्य साधनत्वायोगात्। एवकारस्तु 'यत्किञ्च विज्ञातं वाचस्तद्रूपं वाग्घि विज्ञाता वागेनं तद् भूत्वावती'ति बृहदारण्यकात्। 'एनं' 'वाग्विदं तद् भूत्वा' विज्ञातस्वरूपं भूत्वा। कृपाविष्टो बोध्यः कृपाविष्टं साधनमिति। एवं च 'तवानुकम्पिता'मिति श्लोकादनुकम्पितपदमनुवर्त्यानुकम्पाविशिष्टो मत्स्यादिरिति बोध्यम्। एवमन्यत्र। नवाहुरित्याशयेन व्याकुर्वन्ति स त्रयो जलजा इति। 'अप्सुयोनिर्वाऽश्व' इतिश्रुतेरश्वोपि जलजः। आपःसु योनयो यस्य सोप्सुयोनिः। अग्रे स्पष्टम्। तमो रज इति 'बहुत्वनियम' इति सूत्रात् सत्त्वस्थाने रजः। तथा च तमःसत्त्वरजःसमानाकृतयः त्रयस्त्रयो बोध्याः क्रमात्। तमःसमाना निन्दिताकृतिः; सत्त्वसमाना आपाततः पूर्वं निन्दिताकृतिः, विचारे तु न निन्दिताकृतिः। रजःसमानाकृतिः आपाततः पूर्वमनिन्दिताकृतिः, विचारे तु निन्दितिकाकृतिः। अश्वो हयेति हयः ग्रीवः हयग्रीव इति नामत्रयमतस्तथा। जलज इति उक्तश्रुतेः। अतो हयग्रीवोपि जलजः। त्रयस्तामसाः। वनवासगृहवासातिरिक्तवासात्। 'तामसं द्यूतसदन'मितिवाक्यात्। उपलक्षणविधयेदमपि। जगति हीनजातीयं मात्स्यमिति तामसं निन्दितत्वात्। 'निन्दन्ति तामस'मितिवाक्यात्। तमःसमानाकृतिः लोकनिन्दितमत्स्यसमानाकृतिः। न तु मत्स्यः। 'मायामत्स्यविडम्बन'मितिवाक्यात्। 'यदग्रे चानुबन्धे च सुखं मोहनमात्मनः निद्रालस्यप्रमादोत्थं तत् तामसमुदाहृत'मितिगीतायाः। कच्छपः तामसः। 'मेनेऽङ्ग कण्डूयन'मित्यादिवाक्यैर्दुःखसाधनं मन्दरं सुखसाधनत्वेन दधारेति दुःखसाधने सुखसाधनत्वज्ञानं तामसं, तादृग्ज्ञानवान् तामसः। तामसकच्छपपुराणप्रतिपाद्यत्वाच्च। आरण्येति आरण्यपशुस्वभावकः। अक्षोपीति अक्षः अक्षजः हंस इति पाठत्रयं पुस्तकभेदेन। अक्षः हंसः। हन्तीति हंसः पृषोदरादिह नीति सः। यद्वा पचाद्यचि कृते भवेद् वर्णागमाद्धंस इति सक्। तदर्थोक्षोपि व्यवहारः यौगिक आत्मजो वा एकादशस्कन्धात् 'अक्षः कर्षे तुषे चक्रे शकटव्यवहारयोः आत्मजे पाशके चाक्ष'मिति विश्वः।

व्यवहारस्तु 'व्यवहारः सन्निपातो मनोमात्रेन्द्रियासुभि'रित्येकादशस्कन्धादसुकार्यं अहं ममेति धीः। 'सन्निपातस्त्वहमिति ममेत्युद्धव या मति'रितिवाक्यात्। शरीरे बहिर्वायुस्थानत्वादारण्यः। अक्षजो हंसः। अक्षं मनोरूपमिन्द्रियम्। 'अधोक्षज' इत्यत्र तथा व्याख्यानात्। तस्मात् प्रकटः अक्षजः हंसः, स ब्रह्मणा ध्याने क्रियमाणे प्रकटः, ध्यानं च मानमम्। तथा च 'तदुदित' इतिन्यायेन तस्याक्षजत्वमुच्यते। तदुदितः तस्मादुदितो जातः। 'स मानसीन आत्मा जनाना'मितिश्रुतेश्च। बहिर्वायुर्यत्रासौ बहिर्वायुराकाशः। तदेव स्थानमुड्डयने यस्य स तथा। तथा च योवतीर्यान्यान् वने प्रवेशयति तस्यारण्यत्वमुचितमिति भावः। एवं व्याख्यानं मानसौकस्त्वजलवासित्वेन जलप्रकृतिकत्ववारणायेति बोध्यम्। हंस इति पाठे स्पष्टम्। 'हंसः स्यात् मानसौकसि निर्लोभनृपविष्णवर्कपरमात्मन्यमत्सरे योगभेदे मन्त्रभेदे शारीरमरुदन्तरे तुरङ्गमप्रभेदे चे'तिकोशः। एते त्रयः सात्त्विकाः। वनवासात्। 'वने तु सात्त्विको वास' इतिवाक्यात्। 'यत् तदग्रे विषमिव परिणामेऽमृतोपमम् तत् सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादज'मिति गीतायाः। सत्त्वसमानाकृतयश्च। नृसिंहः पशुत्वांशे निन्दितत्वस्य पूर्वं भानेपि छान्दोग्य उपदेशे 'सिंहो वा व्याघ्रो वे'ति कालोपाधिकपरदेवतारूपमिति ज्ञाने परमोत्कृष्टत्वज्ञानात्, एवं वराहेपि। 'त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वे'तिश्रुतेः। 'ते' जीवाः। हंसः सत्त्वाकृतिः प्रसिद्धः परमात्माऽपरपर्यायः। 'परमात्मनी'त्युक्तकोशात्। 'ततो ह जातो भुवनस्य गोपा हिरण्मयः शकुनिर्ब्रह्म नामे'ति श्रुतेः। 'यद्यद् वृद्धाः प्रचक्षत', इतिवाक्यात् सुष्ठ्वाकृतयः। राजन्य इत्यादि एते त्रयः राजसाः गृहे वासात्। 'गृहे राजस उच्यत' इत्येकादशस्कन्धात्। 'रघुनाथस्तु सीताभक्तार्थेनेकदैत्यानवधी'दिति पूर्वं एकभक्तार्थेनेकहननं माहात्म्यद्योतकमपि समत्वहानेः पश्चात् 'विषमिवे'ति राजसः। 'विषयेन्द्रियसंयोगाद् यत् तदग्रेऽमृतोपमं परिणामे विषमिव तत्सुखं राजस'मिति गीतायाः। क्षात्रधर्मो न समत्वबाधक इति चेद् रजः कर्मबहुलमिति। यागादिकर्मबहुलं यत्रेति राजसः। परशुरामो राजसः प्रसिद्धः। सहस्रार्जुनवधेन माहात्म्येपि पश्चात्तापात् यागादिबहुलकर्मकरणाच्च राजसः। वामनस्तु राजसवामनपुराणप्रतिपाद्यत्वाद् राजसः। रजःसमानाकृतयश्च। राजत्वात् राजकत्वाभ्यां च 'राजसं तदुपेक्षित'मितिवाक्यात्। तरतमेति मायाविडम्बनमत्स्यात् तामसतामसाद्धयग्रीवो राजसतामसः उत्तमः। द्वितीयस्कन्धे ब्रह्मसत्रे हयग्रीवप्रादुर्भावस्योक्तत्वात् कर्मणां राजसत्वेन कर्मान्तःपाती हयग्रीवोपि राजसः। तामसस्तु द्विरूपत्वेनासुरसादृश्याङ्गीकारात्। कूर्म इति सात्त्विकतामसः, उत्तम इत्यर्थः। वास्तव्यत्वादिति सर्वदा जलवासित्वात्। तामसकूर्मपुराणप्रतिपाद्यत्वात् तामसः। जनवास्तव्यत्वात् सात्त्विकः। आश्रयः। इदं च तैत्तिरीय-

१. मानस सर ओको यस्य हंसस्य।

ब्राह्मणे कूर्मप्रजापतिसंवादे प्रजापतिना 'ममैव त्वं पूर्वः समभूरिति प्रोक्तः कूर्मः पूर्वमेवाह ह्यासीत्युक्त्वा सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् भूत्वोदतिष्ठ'दिति श्रावणात् स्फुटम्। ज्ञानांशः सात्त्विकः कूर्मस्तामस इति। एवं तामसे तरतमभावं प्रोच्य सात्त्विकत्रिक आहुः नृसिंहादिति। हिरण्यकशिपुमारकात्। नृसिंहः सात्त्विकः मारकस्तामसः। वराह इति भूम्युद्धारे सात्त्विकः, सात्त्विकवराहपुराणप्रतिपाद्यत्वात्। हिरण्याक्षवधे राजसः। हिरण्यकशिपुवत् अत्यन्तापराधाभावेनान्ते विषमित्र तत्सुखमिति नृसिंहेन प्रह्लादस्य यथास्थितस्य रक्षणं कृतं न तु नष्टाया भूमेरिवोद्धरणमिति भावः। महानिति सात्त्विकसात्त्विकः स्वयं सात्त्विकः ज्ञानप्रदः सात्त्विकः। 'सत्त्वात् सञ्जायते ज्ञान'मितिवाक्यात्। स्पष्ट इति राजन्यो राजसतामसः। विप्रो राजसराजसः। 'रजो रागात्मकं विद्धी'ति कर्मणि रागाद् राजसः। पितृमारकसहस्रार्जुनमारकत्वात् राजसः। विबुधो राजससात्त्विकः। देवाः सात्त्विकाः, वामनो राजसः राजकार्यकर्तृत्वात्। एभिरित्यवतारैः। नवविधाः सगुणाः। एकेनेति कृष्णेन। निर्गुणेन। स्वगुणान् सङ्गृह्य। अयमेवेति अवतारी अवताररूपेण प्रत्यक्षः। एवकारस्तु 'यदेकमव्यक्तमनन्तरूप'मितिश्रुतावनेकरूपस्य 'तमसः परस्ता'दिति कथनेन तमःपरत्वमवतारिलिङ्गमिति। 'अनुकृतेस्तस्य चे'ति सूत्रादाहुः तत्तज्जातीति। मत्स्यादिजात्यनुकरणरूपेषु मायाविडम्बनमत्स्यादिरूपेषु अवतारं वैकुण्ठादागमनं कृत्वा स्वायम्भूमन्वादीन् पासि। त्वमेतेष्विति त्वमवतारी साधनत्वात् कृपाविष्टः। ननु कृपाबोधकपदाभावात् कुतः कृपा यद्वैशिष्ट्यमुच्यते इति चेच्छृणु। कृपात्वेन मोक्षसाधनोपदेशत्वेन कार्यकारणभावस्य 'इति भारतमाख्यानं कृपया मुनिना कृत'मितिवाक्ये सिद्धत्वात्। पूर्वमिति अवतारिदशायां अवतार्यवतारयोरभेदः 'समान एवं चाभेदा'दिति व्याससूत्रात्। हे ईशेति अवतारिन् आकृष्टसर्वांशेनावतीर्णः वैकुण्ठात् कृष्णत्वेनागतः। पूर्वोक्तत्रयं त्रिभुवनं करोषि। अदित्याः कुण्डलदानेन द्यां पासि। अन्तरिक्षशरीरग्रहणेनान्तरिक्षम्। द्वयोः पालनेन भूः पालितैव, देवाः भूमिं न स्पृशन्तीति। देव त्रैलोक्येति हे देव क्रीडितः त्रैलोक्यधर्मरक्षाः 'उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम् संकरस्य च कर्ता स्यामुपहन्यामिमाः प्रजा' इतिवाक्यात्। भारनिराकरणमिति अवतारिणा रघुनाथावतारे रावणवधार्थं प्रार्थितत्वात् तावन्मात्रकरणम्। धर्मरक्षाप्रसङ्गेनान्यदपि शूर्पणखाविरूप्यादिकरणं न तु मुख्यतया यावद्भारनिराकरणमिति भावः। यदूत्तमेति मत्स्यादिवद् यदूत्तमेति। 'यदूत्तमे'-तिव्यवहारः क्वचिद् द्रष्टव्यः। प्रत्युपकार इति त्रिभुवनकरणादेः प्रत्युपकारः। एवेति 'नमो नम इत्येव सदुपशिक्षित'मिति पञ्चमस्कन्धात्। ननु नवावतारकार्यं दशमावतारकार्यं भूभारहरणं चाधिकं प्रार्थितमवतारान्तरकार्यं कुतो न प्रार्थितमित्याशङ्क्याहुः एतान्येवेति। एतैरेव सर्वकार्यसिद्धिरित्यर्थः। सर्वपुरुषेति दशरसत्वाज् जगतः। अत्रेति कृष्णावतारे। प्रार्थ-

घ्नन्तीति 'हरे'ति प्रार्थनार्थकलोडन्तप्रयोगात् तथा। निगूढत्वेनेति अरूपवत्सदृशेन। 'अरूपवदेव हि तत्प्रधानत्वा'दिति सूत्रात्। अन्यत इति बलपार्थभीमाह्वयतः। तेन (येन) रूपेणेति मत्स्यरूपेण। उक्तरीत्येति 'तथाधुने'तिमूलार्थः, 'तथा पूर्वोक्तत्रय'मित्यादिनोक्तरीत्या। प्रार्थना 'हरे'तिलोटा। राजसूय इति युधिष्ठिरराजसूये। यत्रेति रङ्गभूमौ। अमृतेति 'पयोनिधिं येन निर्मथ्य सुराणां साधिता सुधे'तिवाक्यादेवकारः। 'मेनेऽङ्ग कण्डूयन'मित्यादिवाक्योक्तं तु ग्रामं गच्छन् तृणं स्पृशतीतिवत्। स्वस्वरूपेति 'क्षुत्तृड्व्यथा'मित्यस्य सुबोधिन्यां स्पष्टम्। अत एवैवकारः। तेनेति गोवर्धनोद्धरणेनामार्रीडातो रक्षाम्। पूर्वभक्तमिति पूर्वस्मिन् जयद्वारपालकाले भक्तम्। पाण्डवेति 'पितामहा मे' इतिश्लोके 'व्यवहितपृतनामुखं निरीक्ष्ये'तिश्लोके च प्रथमस्कन्धे स्पष्टम्। श्रीभागवतमूले, गीतायां तु स्पष्टम्। मारितवानिति ते मृतवन्तस्तान् मारितवान्, कंसादयो मृताः क्रूरकर्मणा तान् मारितवान्। पार्थरक्षार्थमिति भोजनानन्तरमागताद् बहुशिष्याद् दुर्वाससः भक्षयित्वेति स्वार्थेणिच्। सर्वमिति पार्थरक्षामतिकूलम्। यदुद्धारार्थमिति पृथिव्युद्धारार्थम्। पक्षपातेति पक्षपातः सर्वत्र ज्ञेयः। पक्षपातस्तुतित्वात्। तन्मात्रेति पृथिवीमात्रविशेषगुणो गन्धः न्यायप्रसिद्धः तद्ग्राहकेन्द्रियं घ्राणं तस्याधिष्ठाने नसि। प्रकटोभवन्नित्यत्राभवन्निति लिङन्तं पदम्। आगच्छन्निति। तन्मात्रेति पाण्डवमात्रेत्यर्थः। 'अजातशत्रोः प्रतियच्छ दाय'मित्यादिवाक्येभ्यः। 'यद्वा अयं मन्त्रकृद् वो भगवानखिलेश्वरः पौरवेन्द्रगृहं हित्वा प्रविवेशात्मसात्कृत'मितिवाक्याच्च। अभवदिति लिङन्तम्। स्थल इति मथुरायाम्। तथाकृतवानिति व्रजस्यानुद्धृतवान्। 'लोके विकुण्ठ उपनेष्यति गोकुलं स्व'मितिवाक्यात्। अन्यत्रेति व्रजादन्यत्र। अग्रे चेति उत्तरार्धे। तथेति हननम्। ब्रह्मादिविषादेति एकादशे त्रयोदशे स्फुटम्। इहापीति अपिना गीता। ननु मर्यादाविरोधितत्त्वोपदेशः शास्त्राणां विषयः कथमिति चेत् तत्राहुरन्यथेति। भूभारहरणमिति अयमर्थः मर्यादाविरोधितत्त्वोपदेशोऽयं मार्यादिकानामेव न तु पुष्टिमर्यादास्थानां पाण्डवानां यतो गुरुवधादिः पुष्टिमार्गे न दोषः, 'ज्ञानी चेद् भजते कृष्ण'मिति निबन्धात्, ज्ञानिनस्तु तत्त्वोपदेशवन्तः 'नासाधुना कर्मणा कनीयांस' इति बृहदारण्यक उक्तम्। 'ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुने'ति भगवताप्युक्तम्। अतो ज्ञानिनः पुष्टिमर्यादास्थाः पाण्डवाः। अत उक्तं भीष्मेण सर्वधर्मभृतां वरेण 'व्यवहितपृतनामुखं निरीक्ष्य स्वजनवधाद् विमुखस्य दोषबुद्ध्या कुमतिमहरदात्मविद्यया य' इति। भगवदीयस्य तु भगवच्चिकीर्षितकार्योन्मुख्येव मतिरुचिता, तद्विरुद्धा कुमतिरेव। अन्यथा धर्मशास्त्रादिषु गुर्वादिहननस्य निषिद्धत्वात् ततो निवर्तिका मतिः कुमतित्वेन नोच्येत सर्वधर्मभृतां वरेण। तथा च मर्यादाविरोधितत्त्वोपदेशः पुष्ट्यंशे ज्ञानिनं विशेषणीकृत्य,

ज्ञानिपुष्टिमर्यादास्थाः पाण्डवा इति तथेति ज्ञेयम्। गीतातात्पर्यनाम्नि ग्रन्थे स्फुटम्। मज्जनेति अश्मानम्। अयोध्यास्थानां द्वेषादिकं च। रामोयोध्यास्थान् वैकुण्ठं निनाय। द्वेषादिभाववतां तथा कृतवानित्युक्तोद्धाराविषयत्वमाशङ्क्याहुः द्वेषादीति। 'कामाद् गोप्यो भयात् कंस' इति सप्तमस्कन्धे स्पष्टम्। मात्रिति 'अदितेरास कश्यपा'दितिवाक्याददिति-प्रार्थनया। वृकासुरेति अत्र मातृस्थानीयः शिवः। साक्षान्मातृप्रार्थनया प्राकट्यमाहुः देवकीप्रार्थनयेति। आविर्भूयेति द्विभुजत्वेनाविर्भूयेत्यर्थः। स्वानन्दमिति स्वार्थरूपं स्वस्य ब्रह्मण आनन्दम्। एकादशे चतुर्दशाध्याये 'धर्ममेके यशश्चान्य' इतिवाक्यात्। न तु स्वयमिति दृष्टान्ते इन्द्राय दत्तवान् न तु स्वयं विबुधो गृहीतवानिति बोध्यम्। अथ तैत्तिरीयप्रश्नछान्दोग्योक्तेषु चतुष्केषु षोडशकलासु च कः कोंशोत्र श्लोक उच्यत इत्याकाङ्क्षायामुच्यते। तैत्तिरीये वाक् सन्धिरत्र 'मत्स्याश्वे'त्यादिवाक्। इत्युपपादितं 'दिष्ट्या हरे' इत्यस्य व्याख्यानान्ते। प्रश्ने विशेषाभावः। छान्दोग्ये 'मनः कले'ति 'मनसैवानु-द्रष्टव्यमेतदप्रमेयं ध्रुव'मिति बृहदारण्यकात्। मनोत्र भक्तिरूपं 'भक्तिरहस्यभजनं, तदिहा-मुत्र फलभोगनैराश्येनामुष्मिन् मनःकल्पन'मेतदेव च 'नैष्कर्म्य'मिति गोपालतापिनीये। 'मानसी सा परा मते'ति सिद्धान्तमुक्तावल्याम्। 'भक्तियोगेन मनसि सम्यक् प्रणिहितेऽमले अपश्यत् पुरुषं पूर्णं मायां च तदपाश्रयाम् यया सम्मोहितो जीव आत्मानं त्रिगुणात्मकम् परोपि मनुतेनर्थं तत्कृतं चाभिपद्यते अनर्थोपशमं साक्षाद्भक्तियोगमधोक्षजे लोकस्या-जानतो व्यासः चक्रे सात्वतसंहिता'मिति समाधिभाषायां मनसः करणत्वमाभास उक्तमतो मनसः आश्रयत्वं करणत्वं चोक्तम्।

१०-२-४१. दिष्ट्याम्बेत्यत्र नमस्कारान्तमिति वन्दनभक्तिः दाससेवापूर्त्यर्थं तद्वत् स्तवनरूपकीर्तनभक्तिपूर्त्यर्थं नमस्कारान्तं भगवान् स्तुत इत्यर्थः। विशेषेणेति 'भारं भुवो हर यदूत्तम वन्दनं त' इत्यत्र तथा। प्रसङ्गादिति देवकीसान्त्वनमित्यनेनान्वेति। प्रसङ्गाद् देवकीसान्त्वनमप्याहेत्यर्थः। चरित्रं फलरूपमिति 'कुक्षि गत'इति पदाभ्यां देवानन्दजनकं पक्षपातस्तुतित्वेनानन्दफलरूपचरित्रमित्यर्थः। निरूपयन्निति भूमौ निरू-पयन्। लोके 'विकुण्ठमुपनेष्यति गोकुलं स्व'मिति परलोकेपि फलरूपं चरित्रं कुक्षौ तु स्वल्प-कालं फलमिति निरूपयन्। नन्वानन्दरूपं चरित्रं भूमावस्तु, वैकुण्ठे तु सगुणः, निर्गुणफल-रूपं चरित्रं कथमिति चेन्न, विद्वन्मण्डने नित्यलीलावादान्ते निपुणतरमुक्तस्य प्रत्युक्तत्वात्, 'परः पुमा'निति परपुरुषत्वकथनात् तच्चरित्रस्य फलत्वं बोक्तम्। नृसिंहादीति आदिना हंसवराहौ। कुक्षिंगत इति लोकरीत्या फलरूपानन्दज्ञापितेयं कुक्षिगमनक्रिया तद्रूपं चरित्रम्। छान्दोग्यीयाष्टमोपदेशोक्तं 'अथ न जानाति स य एषोऽणिमैतदात्म्यमिदं सर्वं तत् सत्यं स आत्मा तत्त्वमसि श्वेतकेत'विति कुक्षौ भवतीत्युपसंहारे सान्त्वनम्। एकादशस्य

दशमेध्याये 'बन्ध इन्द्रियविक्षेपो मोक्ष एषां च संयम' इतिवाक्यादिन्द्रियसंयमो मोक्षः कुक्षिगतः। 'इन्द्रियाणि समस्तानां मृत्यव' इति बृहदारण्यके 'समुदाहृताः'। अतोयमग्रे गोविन्दो भविष्यति गवामिन्द्रियाणां इन्द्रः। 'पश्यन् चक्षुर्भवती'त्यादि बृहदारण्यकात्। उक्तमिति 'सर्वात्मकस्ये'त्यादिनोक्तमर्थम्। पुरुषोत्तम इति तत्र सर्वं सम्भवतीतिभावः। ज्ञानक्रियेति काण्डद्वयार्थौ, भगवद्धर्मभूते ज्ञानक्रिये। ममेति देवक्याः। सान्त्वनपक्षे का गतिः किं फलम्। 'अन्ते या मतिः सा गति'रित्यत्र गतिपदस्य फलवाचकत्वं दृष्टम्। आशंसार्थद्योतनाय विशेषसूत्रमाहुः आशंसायामिति। प्रथमार्थे इति अष्टाध्यायीक्रमेणा- 'शंसावचने लि'ङिति सूत्रात् प्रथमस्य 'लृट् शेषे चे'तिसूत्रस्यार्थे लृडर्थे भविष्यति। आ- शसायां वाच्यायां 'छन्दसी'तिसूत्रेण लिङिति श्रीवल्लभानां लेखः पुस्तकान्तरसूत्रानुसारी। कंसादिति कसि गतिशासनयोः अदा० आ० से० पचाद्यच्, कंसः तस्मात्। क्रियां कर्तु- मिति 'भयात् कंस' इतिवाक्याद् भयभीतस्तथा। वचनेनेति उपेक्षितवचनमात्रेणेत्यर्थः। 'भविते'ति लुडन्तं न तु तृन् तृजन्तमित्याशयेनाहुः भविष्यतीति। अद्यतनकालाभावा- दिति भावः। अनेनेति परः पुरुष इति स्वरूपम्। 'नो भवाये'ति कार्यम्। 'तव भयं माभू'दित्यानुपङ्गिकं च कार्यमुक्तमित्यर्थः। अथ तैत्तिरीयप्रश्नछान्दोग्योक्तेषु चतुष्केषु षोडशकलासु च कः कोंशोत्र श्लोक उच्यत इत्याकाङ्क्षायामुच्यते। तैत्तिरीये जिह्वा सन्धानमत्र, परः पुमा'नितिवाक्यात्। पुरुषोत्तम आस्वादनीयः शृङ्गाररसो भक्तिरसश्च, चतुर्थैः। लिह आस्वादने अदा० उभ० अनिट्। लेढि लिहन्त्यनया वा, जिह्वा। शेव- यह्व जिह्वेति साधुः। ह्रस्व जः वप्रत्यय इति। प्रश्नेऽविशेषः। छान्दोग्ये 'चन्द्रः कले'ति, 'परः पुमा'नितिवाक्यात्। शीक्षायां 'भूर्भुवः सुव'रिति वा एतास्तिस्रो व्याहृतयः। तासामु ह सैतां चतुर्थम्। महाचमस्यः प्रवेदयते। भूरिति वा अग्निः, भुव इति वायुः, सुवरित्यादित्यः, मह इति चन्द्रमाः, चन्द्रमसा वाव सर्वाणि ज्योतींषि महीयन्त' इति। न च भक्त्येकवेद्यत्वहानिरिति वाच्यम्। 'नमामि हृदये शेषे लीलाक्षीराब्धिशायिनं लक्ष्मीसहस्रलीलाभिः सेव्यमानं कलानिधि'मिति मङ्गलाचरणकारिकायां 'कलानिधि'पदा- दिति शुभम्। अस्यार्थो वृत्रोदरे। तदुक्तं षष्ठस्कन्धे द्वादशेध्याये 'कृत्वाधरां हनुं भूमौ दैत्यो दिव्युत्तरां हनुम् नभो गम्भीरवक्त्रेण लेलिहोल्वणजिह्वये'ति। वाक् वृत्रासुरचतुः- श्लोकीति सर्वं सुस्थम्। मङ्ख्यातात्पर्यफलं चतुष्पाद्ब्रह्मणैवैतं सम्भरति। षोडशविकार- भिन्नषोडशविकारसदृशसूक्ष्मदेहेन सम्भरतीति, च प्रश्नेऽविशेषः, य एवं चतुष्पादं षोडश- कलं च भावयति सः।

१०-२-४१. इत्यभीत्यत्र उपसंहरतीति पक्षपातस्तुतिं ससान्त्वनां उपसंहरति, उपसंहारः समाप्तिः। चरमवर्णध्वंसस्तं करोति। इतिशब्देन। स्वतन्त्रतयेति 'स्वतन्त्रः

कर्ते'ति पाणिनिसूत्रात्। अनिदंयथेति मूले 'अनिदंयथे'त्येकं पदमत्रापि। समासस्तु इदं च तद् यथा इदंयथा न इदंयथा अनिदंयथेत्येवं बोध्यः। तथा न भवतीति 'सर्वं सर्वमय'मितिश्रुतेः। ऋषिः सिंहोपि भवति। श्रीगोवर्धनः पर्वतः सर्पोपि भवति। 'एषोत्र-मानितो मर्त्यान् कामरूपी वनौकसः हन्ति ह्यस्मै नमस्यामः शर्मणे ह्यात्मनो गवा'मिति-वाक्यात्। प्रकारेति प्रकारो ब्राह्मत्वं मायिकत्वं च। यद्वा इदं घटाद्येवं ब्राह्मत्वेन प्रकारेण भवेदपि देवमुक्तिदानार्थमित्यर्थः। तथा न भवतीति ब्राह्मत्वेन प्रकारेण न भवति किन्तु मायिकत्वेन प्रकारेण भवति दैत्यहितार्थमित्यर्थः। प्रकारेति प्रकारयोः ब्राह्मत्व-मायिकत्वयोर्भेदेन। इत्यर्थ इति 'अनृतेन प्रत्यूढ'मितिश्रुतेरित्यर्थः। स्थास्यत इति ननु तिष्ठतां नाम का चिन्तेति चेन्न। ब्रह्मापत्यान्तरा सुरपक्षपातं ईशानस्तु समत्वाद् दैत्यपक्षपातं कुर्यादिति तयोः पुरोधानस्यावश्यकत्वात्। एवं 'प्रते'र्लक्षणार्थ उक्तः। वीप्सार्थमाहुः एक-विंशतीति। नृसिंहपुराणे प्रसिद्धाः। एवं 'शतं स्वर्गा' इति पक्षोपि पुराणान्तरादवगन्तव्यः।

इति श्रीमद्वल्लभचरणैकतानश्रीगोपेश्वरविरचितायां शास्त्ररीत्या
बुभुत्सुबोधिकायां द्वितीयाध्यायव्याख्यानम्।

तृतीयोध्यायः।

१०-३-०. जननमित्यादि सङ्गतिरवसररूपा सूचिता। प्रथमाध्याये हेतुमुक्त्वा सव्यापारो हेतुरिति कोस्य व्यापार इति प्रतिबन्धकीभूतजिज्ञासानिवृत्त्यर्थं कृष्णोद्यमं द्वितीयाध्याये निरूप्यावश्यवक्तव्यस्य रूपस्य रूपान्तरस्य चावश्यवक्तव्यत्वमवसरसङ्गति-लक्षणसमन्वयः। प्रतिबन्धकीभूतजिज्ञासानिवृत्तौ सत्यामवश्यवक्तव्यत्वमवसर इत्यवसर-सङ्गतिलक्षणम्। कारिकार्थोग्रे वक्तव्यः स्वयमेव। स्तोत्रे इति द्विवचनान्तम्। वसुदेव-देवकीकृतं स्तोत्रद्वयम्। का० १। अत्र षडर्थानां निरूप्यत्वेऽध्यायार्थाननुगम इत्यत आहुः रूपान्तरेत्यादि। तथा चै'कमेवाद्वितीयं ब्रह्मेति'श्रुतेर्नाननुगम इति भावः। अनन्तेषु गुणेषु सत्सु षण्णामेव निरूपणे हेतुमाहुः प्रतीयमान इति। अनन्तेष्वपि गुणेषु सत्सु भगवत्त्वेन श्रोतव्यविषयतावच्छेदकाः षडेव धर्मा गुणाः 'तस्माद् भारत सर्वात्मे'त्यत्र द्वितीयस्कन्धे उक्ताः। तथा च भागवते प्रतीयमानो भगवानेवेति हेतोः षड्विध उच्यत इत्यर्थः। का० २। ब्रह्म वेदेत्र भगवानिति अष्टभिरित्यादि श्लोकैरेवमग्रेपि। अत्रेति अध्याये। का० ३। ऐश्वर्यमिति। एकादशेऽणिमाद्यैश्वर्यम्। ननु कर्तुमकर्तुमन्यथा-कर्तुं समर्थ ईश्वर इति वेणुगीतोक्तं त्रिवैश्वर्यं कुतोऽपेति चेन्न। गताध्याये 'सर्वात्मकं'

दधारे'त्युक्तेष्टविधे प्राकाश्ये त्रिधैश्वर्यान्तर्भावात्। अत एव वक्ष्यन्ति 'ऐश्वर्यं सर्वमङ्गल'मिति। अष्टधैश्वर्यमोंकारनिष्ठं सङ्ख्यातात्पर्यस्य जन्मप्रकरणे मुख्यत्वात्। अत आहुः अर्धमात्रेति। हराविति वेदवाच्यत्वाय तात्पर्यार्थे कृष्णे पुष्टिमार्गीयफलरूपे ॐकारभक्तविशिष्टेऽर्धमात्रा परा 'अर्धमात्रात्मकः कृष्ण इति तापिनीयश्रुतेः कृष्णः। तेन कृष्णो वाच्यवाचकरूप उक्तः। 'अर्धचतुर्थमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीते'ति प्रश्नश्रुतेः ऊमिति प्रणवः। तदर्थः श्रीगोस्वामिभिर्गायत्र्यर्थकारिकासु कृतः। विविधहरिभावास्तत्रापि। सर्वमङ्गलमिति सर्वात्मकत्वाद् भगवतः सर्वमङ्गलम्, न तु वेणुगीतलक्षणकमात्रमैश्वर्यम्। का० ४। अधिकारिणीति अत्र टिप्पण्याम् सत्स्विति तेन ननु जनने वर्णनीये कालगुणवर्णनस्य किं प्रयोजनमित्याकाङ्क्षायां सर्वगुणोपेतत्वोक्तिर्मूलेनुपपन्नेत्याशङ्काप्रयोजनमित्युक्तम्। अधिकारिणीति अनन्तदेहः कालः चेष्टारूपः सकलकार्याधिकारी। अधिष्ठानं चाविर्भावे। अधिकं तत्रेति तत्र सर्वगुणोपेतत्वोक्तिर्मूलेनुपपन्नेति दोषेऽधिकं आधिभौतिककाले प्रादुर्भावः। तद्धानिः उक्तदोषहानिः। अग्र इति अत्रैव 'तमद्भुत'मितिश्लोकीयकारिकाव्याख्याने च। प्रादुर्भूत इति कालस्यानन्तदेहत्वाद् देहस्य प्रादुर्भावात्। किञ्च त्रिविधमुधाविर्भावोपि। अन्यथा 'न तदश्नोति कश्चन न तदश्नोति कश्चने'तिश्रुतिविरोधः स्यात्। देशादीति आदिना तत्रत्याः। नन्वाधिदैविककालप्रादुर्भावे किं मानमित्यत आहुः अत एवेति। आनन्तर्येऽथशब्दः सुबोधिन्यामभिधया व्याख्यातः, तात्पर्यवृत्त्या तु टिप्पण्यां भिन्नप्रक्रमार्थक उक्तः। विविधहरिभावार्थम्। तथा च पूर्वार्धसमाप्तौ मङ्गलाचरणश्लोकः 'सर्वेषु पुष्टहृदयेषु निवेदयामि मार्गो यदा भगवतो भवतामभीष्टः भक्तिप्रकारसहितो हरिभावयुक्तो ज्ञेयस्तदा विवृतिरेव सदा विचिन्त्ये'ति। वरदेयेति वरे देयानां रात्रीणाम्। तदा दिवापीति वरदानकाले दिवेत्यव्ययं प्रातःकालेपि। दिवा रूपत्व'मिति साधिष्ठानदिवारूपत्वम्। अस्येति आधिदैविककालस्य आधिभौतिकस्याधिष्ठानरूपत्वम्। तथोक्तमिति सर्वगुणोपेतत्वमुक्तम्। अन्यथेति एतज्ज्ञापनाभावे। एवमिति पूर्वोक्तप्रकारेण सर्वगुणोपेतत्वम्। ननु प्रक्षालनपङ्कन्यायेन दक्षिणायनं विहाय उत्तरायण एव सर्वगुणोपेतत्वप्रकटनं भगवता कुतो न कृतमित्यत आहुः यद्यपीत्यादि। एतदिति सर्वगुणोपेतत्वप्रकटनम्। एतादृश इति दक्षिणायने काले। तथाकरणम् सर्वगुणोपेतत्वकरणम्। जानीम इति भगवत्कृतपक्षपातस्य साधनापेक्षया पुष्टिफलदातृत्वानुभवाज्जानीम इत्यर्थः। मयि दृष्टे साधनादिक्लेशनिवर्तनं भवतीत्यर्थबोधकवाक्याच्च। अत्रापि गमकमाहुः अत एवेत्यादि। भिन्नप्रक्रमेणेत्य'थ'शब्दार्थः। इदमिति सर्वगुणोपेतत्वमुक्तम्। ननु भवत्वेवम्, तथापि भगवदात्मकत्वे कालस्य किं मानमतः सर्वशब्दार्थापत्तिं मानमाहुः असङ्कोचे-

१. अथर्वशिरउपनिषदि।

त्यादि। सर्वशब्देनेति सर्वगुणोपेतशब्दैकदेशेन सर्वशब्देन। ऐश्वर्यादयः काले देहे सामानाधिकरण्यसम्बन्धेन। एकं रूपं रसात् पृथगित्यत्रेव। तेनेति ऐश्वर्यादिमत्त्वेन। तेनेति जगद्वत् कारणात्मनाऽभेदानुक्त्यैश्वर्यादिनाऽभेदेनेत्यर्थः॥ सुबोधिन्याम्। मूले कालस्य सर्वगुणोपेतत्वादिकथनेन सर्वथा भगवत्तुल्यत्वमायातीति तद्वारणायाहुः खण्डश इति। भगवद्गुणैकदेशतस्ते गुणाः अवयवशः कालावयवदानेन कृत्वा सर्वेषां ग्रहर्क्षतारादीनां यत् फलं तस्य बोधका उद्बोधकाः॥ 'कालावयवाः' उत्तरायणदक्षिणायनादयः॥ तथा च तावन्मात्रकार्यकरणान्न सर्वथा भगवत्तुल्यत्वमिति भावः। का० ५। गुणप्राकट्यं देशादिष्वतिदिशन्ति स मूल इत्यादि सार्धद्वयेन। मूले कारणे। इहावित्याश्रयबोधार्थमधिकरणसप्तमीविवक्षा। विवक्षातः कारकाणि भवन्तीति। प्रदर्शनार्थायेति राज्ञः प्रदर्शनार्थायाभरणादिकं पुरतः स्थाप्यते तथा प्रदर्शनार्थाय। यथेति यथावत्। का० ६। देशोपीति उपर्यधः परितश्च। आधिभौतिकादिभेदाद्वा। चैवेति चकारो मूलकारिकोक्तं कालव्यतिरिक्तस्य सर्वस्यानुक्तस्य समुच्चायकः, एवकारः आधिभौतिकत्वयोगव्यवच्छेदकः॥ भूतानीति 'मही मङ्गलभूयिष्ठे'त्यादिपद्योक्तानि भूतान्यपि। तथैव च उक्तप्रकारेणैव च पुनः। किन्नरास्त्वाकाशगुणत्वेनोक्ता इति तत्र व्याख्यास्यते। तत्रत्या ये विदुरिति तत्रत्या देशोद्भवा ये भगवत्प्राकट्यं विदुरित्यर्थः। ज्ञापनार्थमिति अवतरतो मूलरूपत्वज्ञापनार्थमित्यर्थः। दोषनाशेति 'निर्मलोडुगणोदय'मिति गगनदोषनाशः तत्पुरःसरम्। स्वामिन्यागते उडुगोपनं दोषो वा। तस्य नाशः प्राकट्यम्। एवं सर्वत्र। का० ७½।

कारिकोक्तमर्थं विशदीकर्तुमाहुः एवमित्यादि भयवर्णनमित्यन्तम्। तत्र स्वीकरणमुच्यत इत्यन्तेन सङ्गतिबोधनायाध्यायार्थ उक्तः। तत्र त्रिविधेति आधिभौतिकादिदुःखदूरीकरणाय, कंसादेः कालतोऽज्ञानादित्यर्थः। अतो रूपवर्णनतात्पर्यमाहुः अत इति। रूपमिति भेदप्रतियोगि। रूपान्तरत्वमिति वर्णितरूपात् चतुर्भुजात् अन्यत् रूपं रूपान्तरं द्विभुजम्। तस्याध्यायार्थत्वं सार्वदिकत्वाभिप्रायेण। गोपालतापिनीये। 'कदाचिच्च चतुर्भुज' इति श्रुतेरुपक्रमगतत्वेपि नाध्यायार्थत्वम्। कादाचित्करूपप्रतिपादकत्वेन सन्दिग्धत्वात् उपक्रमस्य। ततो जननस्वरूपबोधार्थसर्वगुणप्राकट्यतात्पर्यमाहुः तस्येत्यादि। जननेति 'अनित्ये जननं नित्ये परिछिन्ने समागमः नित्यापरिछिन्नतनौ प्राकट्यं चेति सा त्रिधे'ति कारिकोक्तजननापरपर्यायम्। न लोकस्येति कालस्य देहस्य। महतामित्यादि पृथ्व्यादीनां अन्येषां गन्धर्वादीनाम्। 'जगुः किन्नरगन्धर्वा' इति वाक्यात्। ततो वसुदेवस्तोत्रयोस्तात्पर्यमाहुः जनकयोरिति। एकशेषः। स्तोत्रमिति जात्यपेक्षयैकवचनम्। स्तोत्रे इति पाठो वा। तादृशमिति धर्मरूपम्। तयोर्बुद्धिरिति तादृशी तयोर्बुद्धिरिति ज्ञानमस्मदादीनां स्यादित्यर्थः। यथास्थित एवार्थः स्यात्। तत'स्त्वमेव पूर्वसर्गे भू'रित्यादि-

गतस्वरूपकथनस्य तात्पर्यमाहुः रूपस्येति। चतुर्भुजरूपस्य। स्वरूपकथनमिति 'त्वमेव पूर्वसर्गे भूः' इत्यादिभिः स्वरूपत्रयकथनं शुकेन वक्तव्यमित्यर्थः। आश्चर्येति अकस्मादग्रे प्रकटे चतुर्भुजरूपे। आश्चर्यमात्रत्वेन निदानस्य कारणस्य चरस्याज्ञानात्। सन्देहः भगवान् वा अन्यो (अक्षरो) वेति। एवकारो निश्चययोगव्यवच्छेदकः। तथा च 'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे' इति श्रुतिविरोधः। परावरः कृष्णः। 'ततश्च शौरिर्भगवत्प्रणोदित' इत्यस्य तात्पर्यमाहुः रूपान्तरेणेति। कार्यं भक्तत्रिविधदुःखदूरीकरणं न भवतीति वृहद्वने गमनमावश्यकम्। कार्याप्रयोजकरूपान्तरग्रहणप्रयोजनमाहुः सर्वमुक्त्यभावरूपं रूपान्तराभाव इति। 'तमेव विदित्वा अतिमृत्युमेती'तिश्रुतेरेवकारः सर्वमुक्त्यभावयोगव्यवच्छेदकः। ज्ञाताज्ञातौषधपानेन तद्गुणवत्। तर्हि भयवर्णनं कुत्रोपयुज्यत इत्यत आहुः अलौकिकमित्यादि। अलौकिकं माहात्म्यज्ञानम्। लोकात् स्नेहात्। इदं च टिप्पण्यां स्फुटं षष्ठेध्याये। भयवर्णनमिति 'अयं त्वसभ्य' इत्यनेन 'समुद्विजे भवद्धेतो'रिति वाक्याभ्यां तथा।

१०–३–१. अथ मूलं व्याकुर्वन्ति स प्रथममित्यादि। अष्टैश्वर्येति अष्टैश्वर्ययुक्तं दर्शनविषयत्वयोग्यत्वमाहेत्यर्थः। युक्तत्वं सामानाधिकरण्यसम्बन्धेन। वस्तुतो दर्शनविषयत्वयोग्यताविर्भावः। ते इति पूर्वाध्याये ब्रह्मादयः। आधिभौतिककालस्याधारतानिवृत्त्यर्थं वाक्यभेदेन व्याकुर्वन्ति स अथ तदनन्तरमिति। 'द्रव्यसंस्कारयोर्मध्ये द्रव्यं बलीय' इति न्यायेन 'स आत्मा स्वाश्रयाश्रय' इति द्रव्यं स्वाश्रयश्चासावाश्रयस्तच्चभङ्गो यदा तदा वाक्यभेदेन व्याख्यानं न दोषाय। संस्कारो यर्हि पूर्वोक्तं सर्वं जातं तदा विष्णुराविरासीदिति वाक्यभेदविरहेण व्याख्यानम्। एवं व्याख्याने कालस्याश्रयत्वापत्त्याधेयत्वेनाश्रयत्वभङ्गः। आविर्भूत इति 'प्रादुरासी'दित्यस्यार्थोयम्। एवमेव जातपदमपि बोध्यम्। यद्यप्येवं दूरान्वयदोषो भवति तथाप्यध्याहारापेक्षया लघीयस्त्वादेवमुच्यते। अत एवेति भगवत्सेवापरत्वादेव। 'परमशोभन'पदार्थमाहुः परोत्तारी मीयते ज्ञायतेनेनेति परमः तस्य। पूर्णा गुणा यस्य। पूर्णगुणरूपस्य वा। शोभाजनक इति तेन शोभन इत्यत्र नन्द्यादित्वाल्ल्युः। शोभते शोभां कुरुते जनयतीति शोभाजनकः। ण्वुल्। पश्चाङ्गे नक्षत्रप्राधान्यमित्याशयेनोत्तरार्धं विवृण्वन्ति स्म कालावयवेति। कालः शरीरम् सावयवं भवत्येव। अवयवा अस्थीनि। 'नक्षत्राण्यस्थीनी'ति बृहदारण्यकात्। भगवद्दक्षत्वादाहुः केवलेति। वक्ष्यमाणश्रुतेरेवकारः। भगवत्सृष्टत्वादाहुः स्वगुणप्राकट्येति। 'दोषा हरौ न सन्त्येव तथा भक्ताहिताः क्रियाः स्फुरन्ति बुद्धिदोषेण मूलं तस्य बहिर्दृशि'रिति वाक्यादेवकार उक्तः। उत्पादित इति 'नारायणाद् ब्रह्मा जायत' इति नारायणोपनिषदः। रजो गृहीतवानित्यर्थः। 'सत्त्वं रजस्तम' इति प्रथमस्कन्धात्।

सत्त्वरजस्तमोगुणान् भगवत्सृष्टान् सृजति ब्रह्मा। माया रजोदेहरूपा विकारान् षड्भावविकारान्। गुणानेवेति एवकारो मायिकगुणयोगव्यवच्छेदकः। तन्नक्षत्रमिति स्वदेवताकं रोहिणीनक्षत्रं गृहीतवान् स्वीकृतवान्। नक्षत्रस्य सर्वरोहरोहकर्तृत्वेन गुणप्राकट्यहेतुत्वात्। तस्येति ब्रह्मणः। 'तनो वै ते' इति श्रुतिस्तु यजुर्ब्राह्मणे प्रथमप्रपाठके द्वितीयानुवाकेऽस्ति। 'प्रजापती रोहिण्यामग्निमसृजताम्. तं देवा रोहिण्यामादधत, ततो वै ते सर्वान् रोहानरोहन्, तद् रोहिण्यै रोहिणीत्वम्, रोहिण्यामग्निमाधत्ते ऋध्नोत्येव सर्वान् रोहान् रोहती'ति। श्रुत्यर्थस्तु सायणाचार्यैर्माधवीये वेदार्थप्रकाश एवं कृतः। अथ निर्दोषनक्षत्रं विधत्ते। 'ततः प्रजापति'रित्यादिश्रुतिमुपन्यस्य। रुह्यन्ते प्राप्यन्त इति रोहाः कामाः। ते च यस्यां रुह्यन्ते सा रोहिणी। रोहिण्यै इति षष्ठीस्थले चतुर्थी। ऋध्नोत्येव समृद्धो भवति। समृद्धिरेव सर्वानित्यन्तेन विशदीक्रियते इति। तत्र असृजत अमिति पदच्छेदः। अम् प्रसिद्धार्थकमव्ययम्। रुह जन्मनि। भ्वा० प० अ० ऋध वृद्धौ। भ्वा० प० भ्वादेराकृतिगणत्वात्। विकरणव्यत्ययः। सर्वगुणोपेत इति काले सर्वगुणोपेतत्वं जातम्। कालस्य नित्यत्वात्। रोहिण्या रोहिणीत्वात् सर्वगुणोपेतत्वस्य। आनुगुण्यमिति निर्दोषनक्षत्रत्वादिति भावः। तेषामिति तारानक्षत्राणाम्। शान्तत्वमिति अशान्तत्वप्रतियोगिकं यत् शान्तत्वाभावाभावरूपं शान्तत्वमुक्तम्। अनेनेति सम्बन्धकथने रोहिण्याः कारणत्वेन। आनुषङ्गिका इति रोहिण्यनुषङ्गजाः सर्वगुणोपेतत्वादयः। एवं पञ्चाङ्गे नक्षत्रमुक्तम्। प्रत्यक्षत्वात्। 'यत् पुण्यं नक्षत्रं तद्वट् कुर्वीतोपव्युष'मिति श्रुतिः। अर्थस्तु 'तत्' नक्षत्रं 'वट्' प्रत्यक्षं 'कुर्वीत'। वष वधे इत्यस्मात् क्विपि अव्ययम्। प्रत्यक्षकरणोपायमाह उपेति। उषः कालोष्टपञ्चाशदिति विध विचारे लिखितवाक्यादुपसीति व्युषमिति विभक्त्यर्थेऽव्ययीभावः। व्युषं समीपमुपव्युषम्। पारिभाषिकसूर्योदयकाल इत्यर्थः। पञ्चाङ्ग इतराणि तिथिवारयोगकरणानि नारदीये ब्रह्माणं प्रति भगवद्वाक्येषु 'सिंहराशिगते सूर्ये गगने जलदाकुले मासि प्रोष्ठपदेऽष्टम्यामर्धरात्रे विधूदये बुधवारे वृषे लग्ने रोहिण्याश्चरमांशके शुभे हर्षणयोगे च कौलवेन युते तथा वसुदेवेन देवक्यामहं जातोस्मि पद्मज इह्यतः शिश्नहास्यैव कृष्णजन्माष्टमीत्वत' इति। शिश्नहा नपुंसकत्वात्। एवं पञ्चाङ्गं निष्पन्नम्। अत्रा'थ सर्वे'त्युपक्रमः 'देवक्यां विष्णु'रिति पदद्वये विष्णुः प्रद्युम्नप्राकट्यार्थम्। अध्यायार्थः स्पष्टः।

१०–३–२. दिश इत्यत्र त्रयाणामिति देश आधिदैविकत्वाभावादाधिभौतिकत्रिकाभावात् तथा। वैकुण्ठे दिशोयं देश इति चातुरर्थिकप्रत्ययान्तदेशपदप्रयोगाप्रवृत्तेः। तत्रेति उक्तासु तिसृषु। देवतात्मिका इति श्रोत्रेन्द्रियदेवतारूपाः। भूतात्मिका इति प्राच्यादिरूपाः। आध्यात्मिका देवतारूपा एव। 'यस्तु आध्यात्मिकः प्रोक्तः सोसावेवाधिदैविक' इति वाक्यात्। चकारेणाध्यात्मिकाः। भूतात्मिकानां दिशां प्रसादमाहुः तत्रेति।

मेषादिनेति चातुर्मास्य आविर्भावादिति भावः। मेषादिनेति द्वितीयः पाठः। आदिना दिशां व्यापकत्वं क्रियाव्यापकत्वम्। 'मेषास्तस्यात्ममूर्तय' इति वाक्यादिन्द्रक्रियारूपात्ममूर्तित्वात् क्रियारूपाः। क्रियाणां करणत्वमिन्द्रियव्यापाररूपाणाम्। मेषादिना लग्नादिरूपेण तेषां फलानि। 'चण्डोभिमानी गुणवान् सकोपः सुहृद्विरोधी च सखा परेषाम् पराक्रमप्राप्तयशोविशेषो मेषादयो यः पुरुषोधिगेष' इति मेषलग्नफलम्। 'भवति साहसकर्मकरो नरो रुधिरपित्तविकारकलेवरः। क्षितिपतिर्मतिमान् सहितश्च क्रिये रवि'रिति राशिफलम्। क्रिये मेषे। कालस्य करणत्वं प्रसिद्धम्। दूरदर्शनेति दूरे श्रावणप्रत्यक्षलक्षणः प्रसादः। दिशामिति भूतात्मिकानाम्। 'दिशः श्रोत्रा'दितिश्रुतेर्मेषादिना स्वव्यापारेण मेषादिना कालेन स्वगुणैश्चण्डत्वादिभिः क्षुब्धगुणो दूरे शृणोतीत्यर्थः। प्रसादस्तु प्रसन्नतेति करणे मनसि आनन्दः। 'मन आनन्द'मिति तैत्तिरीयश्रुतेः। भगवदाविर्भावे दिगादीनां साधारणासाधारणधर्मा उच्यन्ते। देवताप्रसाद इति 'कर्णौ दिश' इति वाक्याद् दिशः श्रोत्रेन्द्रियदेवताः तासामाकाशेन्तर्भावात् तत्प्रसादः सर्वसाधकः। 'सर्वाणि ह वा इमानि भूतानि आकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्ती'ति श्रुतेः सर्वकारणत्वात्। तद् विवृण्वन्ति स अत इति। ज्ञानमिति दूरदर्शनम्। निर्मलोडुगणं च तदुदयमिति बहुव्रीहिगर्भितकर्मधारयमाहुः निर्मला इति। बहुव्रीहौ यत्रेति गगने दर्शने वा। वर्षाकाले भाद्रपदे उदयेतीति उदया सोरमसो डा मूले। गगनं उदयरूपं भगवद्देहत्वात्। प्रसिद्धिस्तैत्तिरीये। उदयोपि मलाभावरूपः सान्निध्यादित्याहुः उदयेति। गगने उदयकाले इत्यर्थः। अपिशब्दात्। उदयस्य मलरहितस्य गगनस्य कालेपि मलाभावः, नीलिमा काले नास्तीत्यर्थः। 'कृपेर्वर्णे' इति पाणिनिसूत्रात् कृष्णस्वाभाविकनीलिमा गगने काले चेति भावः। यत्तु निर्मला उडुगणा उदये यत्रेति समासो गङ्गादिः स प्रयोजनशून्यः, अवतारकालेपि साधारणगगनोक्तेः प्रयोजनाभावात्। उदयो दर्शनमिति आकाशरूपदेहस्य ज्ञानं तदानीं जातम्। उदयोस्यास्तीति उदयम्। अर्शआद्यच्। एवकारो ज्ञानरहितस्य गगनदेहस्ययोगव्यवच्छेदकः। विवाहेति षोडशसंस्कारादित्वात् पूर्वं ग्रहणं विवाहस्य। सर्वैर्तयो विवाहस्येति वर्षाकालेपि विवाह उक्तः। अजायन्तेति निशीथकालेपि रोहिणीसत्त्वाद् भगवत एव वा सत्त्वात्। 'मही मङ्गलभूयिष्ठा' इति पाठेऽर्थमुक्त्वा 'मङ्गलभूयिष्ठपुरग्रामे'त्यादिपाठेऽर्थमाहुः पुरं नगरमिति। सर्वाण्येवेति रोहिणीभगवतोः सत्त्वादेवकारः।

१०-३-२. नद्य इत्यत्र भौतिकानामिति नद्यादीनाम्। तत्तद्भूतेति सलिलजलरुहादिप्रधानानाम्। गुणान् श्रीप्रमत्तत्वादीन्। तत्रेति 'बहुष्वनियम' इति सूत्रेणानियमे। एकोनेति यद्यपि तैत्तिरीयसंहितायां 'कूप्याभ्यः स्वाहे'त्यादिना 'सर्वेभ्यः स्वाहे'त्यन्तेन विंशतिभेदा अपामुक्तास्तथापि 'सर्वेभ्य' इत्यन्तिमस्य समष्टित्वेन पूर्वोक्तसर्वमङ्गलक-

त्वेन सर्वातिरिक्तत्वाभावात्। उभयविधा एवेति स्थावरजङ्गमजगद्वत्। एतदेवाहुः स्थावरा इति। उभयेषामिति 'उभय'शब्दस्य द्विवचनं नास्तीति कैयटः। कालेति वर्षाकालवशात्। कालनियन्तुरिति सङ्कर्षणात्। कालनियन्तृभगवद्वशादिति पाठान्तरम्। कालनियन्तुर्भगवतो वशादित्येकदेशान्वयः। स इति दोषः। कालनियन्तरीति कालनियन्तरि ई इति छेदः। इ आश्चर्ये। स्वाभाविक इति गुणः प्रसन्नता। कमलादिरिति पार्थिवांशप्रतीतिर्भ्रमात्। मत्स्यादिष्विव। वायूपनीतपार्थिवांशप्रतीतिर्वात एव गन्धो रसयुक्तः। अनेनेति विशेषणेन। भूमेर्गुणानिति पूर्वं भूमेर्मङ्गलान्युक्तानि। मुख्य इति पृथ्वीतन्मात्रत्वे सति गुणत्वं मुख्यत्वम्। गन्धरसेति भगवत्प्राकट्याद् रोहिणीनक्षत्राच्च, गन्धास्वादः गन्धाघ्राणाच्छब्दः, रस आस्वादने रस शब्दे इति धातुपाठे, 'सन्नादे'तिशब्दोक्तं शब्दः कार्यं, तत्कथनपूर्वकम्। भूमेरैश्वर्यख्यापकाः। मूढैरलिभ्रमरैस्तदाघ्राणादिकरणरूपपूजनात्। 'ईश्वरः पूज्यते लोके मूढैरपि यदा तदा निरुपाधिकमैश्वर्यं वर्णयन्ति मनीषिण' इति वेणुगीतसुबोधिनीकारिकायाः। कुलानीति समूहाः। पुष्पगुच्छा इति मालत्यादिपुष्पाणामाम्रादिपुष्पानां च गुच्छाः। जाता इति आधिदैविककालेनाधिदैविका जाताः।

१०–३–४. ववौ वायुरित्यत्र सुखस्पर्श इति त्रिगुणस्पर्शः रोहिणीनक्षत्रे गुणः भगवत्प्राकट्यात्। अन्यदा तु स्पर्शमात्रम्। सामानाधिकरण्यसम्बन्धेन स्पर्शे त्रिगुणान् शीतमन्दसुगन्धानाहुः गन्धं चेति। भूमेरिति मालत्यादिपुष्पानामाम्रादिपुष्पाणां च। तेन मन्दत्वगुणोऽप्युक्तः। पुण शुभे पुणमर्हति पुण्यमित्याशयेन पुण्यशब्दार्थमाहुः शुभकार्यमिति। कर्मणि घञ् न कृतः। वेदवेदान्तसारत्वात् पचाद्यच् कृतः। वाह इत्यत्र अज्विकारो वा, वहतीति वहः पुण्यगन्धस्य वहः पुण्यगन्धवह इति षष्ठीतत्पुरुषो न कृतः। कर्मणि घञुपस्थितेः। गन्धादिजलेति वर्षाकालत्वात् तथा। दोषेति जीवसाम्यदोषः प्राणत्वाद् भवति। 'अथातो ब्रह्मजिज्ञासे'त्युपक्रम्य 'प्राणस्तथानुगमा'दित्युपसंहारो भाष्ये प्रथमचरणस्य यतः। शुभसूचक इति हिरण्याक्षहिरण्यकशिपूत्पत्तौ कठोरवायुरशुभसूचकोऽयं तद्विपरीतः शुभसूचकः। लौकिका इति स्मार्ताः। निषिद्धेति चिताग्न्यसंस्कृताग्नय इतरे येभ्यः ते निषिद्धेतराः। शान्ता इति अशुभकार्यस्थास्तु क्रूरा अशुभभयात्। जाता इति रोहिण्याः स्वभावात् शुभसूचका जाताः। कालोऽपि प्रतिबन्धपिहितत्वनिवारक इति तत्पुरःसरं विवृण्वन्ति स तस्मिन् समय इति। जाता इति पूर्ववत्।

१०–३–५. मनांसीत्यत्र भौतिकगुणसमय इति तामसाहङ्कारकार्याणि भूतानि निरूपितानि। स्मरणात् सात्त्विकाहङ्कारकार्यं मन इति तद्गुणा उच्यन्ते। राजसाहङ्कारकार्याणीन्द्रियाणि मनोनिरूपणेन निरूपितानि। स्वस्वगुणप्रकटकानि। तदेवतास्तु 'दिशः

प्रसेदु'रित्यत्रोपलक्षणविधया निरूपिताः। तथा चाहङ्कारत्रयकार्यमपि निरूपितं जातमित्यर्थः। सत्त्वमारूढमिति। भगवदिच्छया स्वकार्ये मनसि आरूढं जातं प्रतीतिविषयं भवतीत्यर्थः। 'माया मनः सृजती'ति चतुर्थस्कन्धात्। श्रीवल्लभानां लेखे तु भगवतेति शेषः। 'देवक्यां देवरूपिण्या'मित्यत्र देवक्याः सत्त्वरूपत्वं व्याख्यास्यते। तथा च सत्त्वं यदारूढं भवति तदा स्वकारणे भगवदारोहात् मनसां प्रसादो भवत्येवेत्यर्थ उक्तः। प्रसन्नानीति 'सत्त्वात् सञ्जायते ज्ञान'मिति वाक्यात्। स्थूलेति भौतिककाले। निकटेति भगवद्रूपे रोहिणीरूपे जायमान इति जायमानेऽजने प्रद्युम्ने। 'निशीथ' इतिश्लोकसुबोधिन्यां 'देवक्यां प्रद्युम्न' इत्युक्तेः।'अजन' इति मूले पदच्छेदः।'दिवि दुन्दुभय'इति पदसमभिव्याहारात्। तस्मिन्निति सामीप्ये सप्तमीं व्याकुर्वन्ति स तन्निकट इति। वटे गावः सुशेरत इत्यत्र वटनिकटे गावः सुशेरत इत्यर्थात्। नित्यवादित्राणीति नित्यशब्दा आकाशगुणाः वादित्ररूपाः। दुन्दुभिरिति तेषु दुन्दुभिरित्यर्थः। कैश्चिदिति मयापि (गोपेश्वरेण) दुन्दुभिरेतादृशी श्रुता आकृतिस्त्वाकाशत्वात्। 'आकाशो ह वै नामरूपयोर्निर्वहिते'ति छान्दोग्यात्। विरुद्धधर्माश्रयत्वं सर्वत्र। तेन कदाचित् कैश्चिद् वादिता अपि।

१०-३-६. जगुरित्यत्र स्वत इति आनन्दस्य व्यापकत्वात्,मायाज्ञापनाच्च,'मुदे'ति श्लोके पदात्। अज्ञात्वैवेति व्यापकानन्दज्ञानं न जातम्। मायाज्ञापनात् तत्कार्यमुल्लसितहृदयत्वम्। अन्यथेति स्वत एवोल्लसितहृदया इति, आर्थिकोऽर्थोऽत्र न प्राप्नोतीति न्यूनपूर्णं कृत्वा। किन्नरगन्धर्वविशेषणाभावे। लेखे तु मुदेति दूरान्वयं कृत्वा मुदेत्यस्यार्थमाहुः। तदान्यथेत्यस्य मुदेत्यस्यात्रान्वयाभाव इत्यर्थः। माहात्म्येति देवत्वस्य प्रतिपादकं 'जगुः किन्नरगन्धर्वा' इति वाक्यं न स्यात्। अकस्मादित्यव्ययम्। कारणशून्ये। कृतवन्त इति ननु रोहिण्या अपि कारणत्वं भज्येतेति चेन्न। वाचनिकत्वात्। वैतालिकेति वैताला वंशशंसकाः। विद्याधर्य इति तेन वाचकं विना विद्याधरा इत्यत्र नैकशेषः कर्तव्यः। पाठभेदेनोभयप्राप्तेः। विद्याधरा इति पाठे एकशेषे कृते तु चकारस्तात्पर्यग्राहक इति भावः। आनन्दावेशेनेति अद्यापि जन्माष्टम्यादौ विवशदशायामेवं नृत्यं कुर्वन्ति। शास्त्रीयं संगीतं नृत्यम्। केनचिदिति मुदा तु स्वकीयानन्दरूपेति न कारणत्वसमर्पिका।'आपं चैव हलन्तानां यथा वाचा निशा दिशे'ति भागुरिर्वष्टि। मुदारूपा इत्यर्थः। मुदेति करणत्वपक्षमग्रे वक्ष्यन्ति। अत्र पक्षे मुदा आनन्दरूपाः। मुदा इत्यत्र विसर्गलोपश्छान्दसो वा। स्वत इति आनन्द आविर्भूतो येषु। कपो वैकल्पिकत्वम्। अस्मिन् पक्षे मुदा आनन्दे केनचित् प्रेरिता इति पाठः। मुदा आनन्देन न केनचित् प्रेरिता इति पाठान्तरम्। अकस्मात् इत्यस्य कारणशून्ये। तस्मिन् समये कार्ये। मुदेति टाबन्तं पदं लुप्तविसर्गकं पदं तृतीयान्तं च पदम्।

१०–३–७. मुमुक्षुरित्यत्र देवा ज्ञात्वैवेत्यारभ्य पुस्तकेषु ग्रन्थः । कस्मिंश्चित् पुस्तके तु विविधभावार्थं अथवेत्यारभ्येत्युक्तमित्यन्तो ग्रन्थोधिकः। सोप्याख्यायते। अथवेति तेनाथवेत्यस्य पूर्वं स्पष्टमिति ग्रन्थोऽसूचि । श्लोकव्याख्यानं स्पष्टमित्यर्थः। तथापि भावविवशा आहुः अथवेति । स्पष्टव्याख्यानापेक्षया विविधभावव्याख्यानं श्रेष्ठमिति । 'भक्त्या भागवतं शास्त्रं न बुद्ध्या न च टीकये'ति श्रीव्यासं प्रति नारदवाक्यम्। 'न यद्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं प्रगृणीत कर्हिचित् तद्वायसं तीर्थमुशन्ति मानसा न यत्र हंसा निरमन्त्युसिक्क्षया' इति वाक्याच्च । मानसाः सत्त्वप्रधाने मनसि वर्तमानाः। मनस इमे मानसाः । चातुरर्थिकः प्रत्ययः। 'उसिक्' कमनीयं ब्रह्म,'क्षयो' निवासो येषां ते उसिक्क्षयाः । सुमनांसि यद्यपि पुष्पाणि तथा चित्रपदत्वाच्छोभनानि मनांस्यप्यर्थः। यथा गतश्लोके मुदाशब्दः। अत आहुः सुष्टु निर्दुष्टानि मनांसीति। 'सुमनः'पदमहिम्नाहुः ववृषुरिति। सुमनोभिरिव पूजायै ववृषुरित्यर्थः। गर्भे ऐक्यस्यायुक्तत्वात्। देवक्यां ववृषुः। 'तस्यारविन्दनयनस्य पदारविन्दकिञ्जल्के'तिश्लोकोनुसन्धेयः । उभयेति कर्तृसम्बन्धात् तथा। उपपद्यत इति मुख्यमुपपद्यते कादाचित्कत्वात्। आनन्दावेशेति शब्दबलत्वेन शब्दार्थानन्देन व्याप्ताः, भगवत्प्राकट्यानुभावात् । 'मन आनन्द'मिति श्रुतेः । तच्च गर्जितमिति तत् प्रसिद्धम्। बृहदारण्यके। भाण्रूपं वेदारण्यके। विद्युद्ब्रह्म वाल्पशब्दरूपं गर्जितं गगने नास्तीत्यर्थः। प्रतिबन्धकतामिति प्रतिबन्धकता अम् इति छेदः। अत्रायमाशय इति अत्र जलधरपदे। तादृशत्वेनेति नीलत्वेन। कवय इति 'तदेव ब्रह्म परमं कवीना'मिति महानारायणात् कवीनामधिकारः। जलधरा इति जलस्य धरा इति पुण्यगन्धवह इतिवत् । जाता इति रोहिण्याः । स्वस्य विद्युदिति स्वस्य जलधरस्य विद्युत्सहभावोन्यकालेपि दृष्ट इति तस्मात् । गर्जन्तीति जलधराशयः। धर्मापेक्षयेति गर्जितशब्दापेक्षया। स्वस्येति समुद्रापेक्षया जलधरस्याधिकम्। अनुसागरमिति सागरं लक्षीकृत्य। लक्षणेत्थम्भूताख्यानेति कर्मप्रवचनीयसंज्ञायां द्वितीया। इति 'अथवे'त्यारभ्य 'इत्युक्त'मित्यन्तग्रन्थाख्यानम्। सङ्क्षेपेण सम्बन्धमाहुः देवा ज्ञात्वैवेति। अत्र मुदान्विता इत्युक्तम्, न तु मोचनक्रियायां मुदः करणत्वमतो भगवज्जन्मरूपहेतुज्ञानं सूचितमित्याशयेनाहुः देवा ज्ञात्वैवेति। गानादिकं रसोद्रेकात् स्वतोपि भवति। पुष्पवृष्टिस्तु हेतुज्ञानं विना न जायत इति भावः। हेतुज्ञानं योगजप्रत्यासत्त्येत्याहुः शब्दबला इत्यादि। मुनीनां व्यासमुख्यानां, व्यासस्य शब्दबलं भाष्ये उक्तमित्यन्येषामपि मुनीनाम्। अतो योगजधर्मेण भगवदनुभावरूपमानन्दं कृष्णजन्मीनं ज्ञात्वेत्यर्थः। अर्थबला इति बादरिरर्थबलविचारक इत्येवं भाष्ये उक्तस्तदनुसारिदेवाः अर्थेनानुभावसहितेन विचारविषयेणा· ज्ञमयोगमायाकार्येण तद्विषयज्ञापनेन कृष्णजन्म ज्ञात्वेत्यर्थः। प्रामाणिका इति दैवी

सम्पत् तेषु वर्तत इति। स्वसेवां सुमनोवृष्टिरूपाम्। अभिज्ञताम् कृष्णविषयिणीम्। शुभेति सर्वोच्चैग्रहरूपशुभसूचनार्थम्। संहितायाम् पुष्पाणि ऊर्ध्वमेव गृह्णन्तीति। हर्षेणेति 'मुदे'ति तृतीयान्तम्, न टावन्तम्, नापि लुप्तविभक्तिकं मुदूपदम्। विपरीतः कालधर्म इति वर्षायां सर्वथा मेघानामभावः, शरदि सर्वथा मेघाः, इति विपरीतः कालस्य शरदो धर्म इत्यर्थः। अशुभेति उत्पातेन्तर्भावात्। कार्यमिति अविपरीतं कालधर्मं जलधरगर्जनमाहेत्यर्थः। सागरनिकट इति 'अनुसागर'मित्यत्र सागरं लक्षीकृत्येत्यर्थात् तथा।

१०–३–८. निशीथ इत्यत्र भगवत्प्राकट्ये पूर्वश्लोकैः सह सप्तार्थी वक्तुमाहुः एवं देशकालयोरित्यादि। देशकालौ प्रकरणमिति निबन्धात् चतुर्व्यूहसमुदायो जन्म तस्य देशकालाविति। यद्यप्यनिरुद्धजन्म चतुर्थाध्याये तथापि शुकहृदयेस्त्येवेत्यदोषः। तत्रत्यानामिति भूतानां देवादीनां च। अनेन आनन्दत्वेन लीला शास्त्रार्थ उक्तः। 'जगुः किन्नरगन्धर्वा' इत्यत्र स्वत एवोल्लसितहृदया इति न्यूनपूरणाय तस्य विशेषणमुक्तम्। सा लीलानन्दत्वेनात्र। ऋतोश्चेति 'मन्दं मन्दं जलधरा' इत्यनेन वर्षर्तोर्गुण उक्तः। तेनोत्सन्नाविष्टचित्तानां निरोधात् स्कन्धार्थ उक्तः। रात्र्या इति 'निशीथ'शब्दस्यार्धरात्रवाचकत्वात् तेनैवार्थबलात् रात्रेरपि प्राप्तेस्तथेत्यर्थः। एतादृशनिशीथवत्त्वं रात्र्या गुणः। मुहूर्तस्य घटिकाद्वयात्मकस्य। निशीथस्य गुणस्तमउद्भूतत्वादिः। अध्यायार्थः रूपान्तरस्वीकरणम्। 'विष्णुराविरासी'दिति रूपं रूपान्तरप्रयोजकम्। अथ वाक्ये सप्तार्थव्याप्तिपरिहारोपि व्याख्यास्यते। सिंहार्के निशीथविचारस्तु श्रीपुरुषोत्तमानां लेखेस्ति। तथाहि। सिंहार्के निशीथे इदानीं पञ्चचत्वारिंशत्सप्तचत्वारिंशद्घटिकाद्वयात्मको भवति तद्व्यावृत्त्यर्थं सौरमानब्राह्ममानाभ्यां घटीद्वयविषमभावात् विवक्षितं प्रादुर्भावसमयं निश्चेतुमाहुः पञ्चचत्वारिंशादिति। तत्रायमर्थः। द्वापरस्य पञ्चविंशाधिकशरच्छतावशेषे भगवः (भगवतः?)। 'शरच्छतं व्यतीयाय पञ्चविंशाधिकं विभो' इति ब्रह्मवाक्यात् निश्चीयते। तत्र गणितविचारे स्फुटोर्कः ४–१९–०–१ चतुरङ्केन गतकर्कराशिः। सिंहेर्क इत्युच्यते। एकोनविंशाङ्केन सिंहराश्येकोनविंशांशाः अंशादिना विकलाः पूर्णाः। एकाङ्केन विकला एका। गतिः ५९–९ सूर्यगतिः एकोनषष्टिः कलाः, नव विकलाः। अयनांशाः २४–३२–२०। मधुपुर्यां पलप्रभा ६–५। चरखण्डानि ६०–४८–२०। चरपलानि ३२। दिनमानं ३१–४। रात्रिमानं २९–५६। रात्र्यर्धम् १४–२८। निशीथः ४५–१२। एवं सति तत्रापाद्योपियकोप्युपेयः। उक्तरीत्या स्पष्टेर्के सति ४–१९–०–१। पूर्ववत् राश्यंशकलाविकलाश्चतस्रः। एतादृशस्य सूर्यस्य तदैव सिद्धेः। पञ्चचत्वारिंशद् घटिका द्वात्रिंशत्पलात्मिका भवति। इति पञ्चचत्वारिंशद्घटिकाद्वयमिति। ईदृशस्तु निशीथो विषुवदिने एकस्मिन् भवति। पञ्चमस्कन्धीयात्। 'यदा मेषतुलयोर्वर्तते तदाऽहोरात्राणि समानि भवन्ती'ति वाक्यात्।

ज्योतिःशास्त्राच्च निश्चीयते। दिनमानं ३०–०। रात्रिमानं ३०–०। रात्र्यर्धं १५–०। निषीथः ४५–४६–०। तदग्रे तु पलद्वयं प्रत्यहं रात्रेर्दिनस्य च वृद्धिह्रासौ। एवं सति यदत्राष्टम्याः प्रान्तभाग इति। तत्र चन्द्रप्रकाशस्तेभ्यो द्वात्रिंशत्पलेभ्यः पूर्वं भवति। चन्द्रप्रकाशक्षितिज(पृथ्वीछाया)संयोगे तमसो निवृत्तेः। तदेवाभिप्रेत्य मूले 'तमउद्भूत' इत्युक्तम्। भगवत्प्राकट्यं तु द्वात्रिंशत्पलोत्तरं निशीथारम्भसमये चन्द्रोदयसमकाले। एतदेवाग्रिमश्लोके 'प्राच्यां दिशीन्दुरिवे'ति दृष्टान्तेन सूचयिष्यते। अतो द्वात्रिंशत्पलान्यनादृत्य यत् पञ्चचत्वारिंशत्षट्चत्वारिंशद्घटिकाद्वयमितिकथनं तत् प्रकाशन्यायेन लक्षणादोषनिवृत्त्यर्थं भगवत्प्रभावादिति न कोपि विरोधः। ऊर्ध्वो भवतीति उत्क्षेपणकर्मोक्तं तमसः। गुणा उक्ताः। नन्वनन्तस्य कालात्मनोनन्तमाहात्म्ये कृष्णत्वोक्तेर्जनार्दनाविर्भावे निशीथे गुणाः क इत्याकाङ्क्षायां गुणा उक्ताः। निशीथे तमउद्भूते सत्युत्क्षेपणकर्मणा रोहिण्या च जनार्दने सङ्कर्षणे सितकेशे जायमाने। इत्यन्वयोत्र। सर्वाविद्येति सर्वेषां निरोधाधिकारिणां पूतनाचैद्यप्रलम्बादिरूपाविद्यानाशकः। तादृशगुणवानिति तमउद्भूतत्वगुणवान्। तमोऽविद्या विद्यया नश्यतीति वेदविद्यारूपः सङ्कर्षण उक्तः। ननु 'जायमानेऽजने' इत्यनेनैव चारितार्थ्यं, विद्यागुणनिरूपणसिद्धेः, अतो जायमाने जनार्दन इत्यस्य किं प्रयोजनमित्याकाङ्क्षायामाहुः भगवज्जननस्येत्यारभ्य हेतुरुक्त इत्यन्तम्। भगवज्जननस्येत्यस्य निमित्तत्वमित्यनेनान्वयः। मूलभूतेत्यादि काले स्थितानां'मथ सर्वगुणोपेतः काल' इत्यारम्भश्लोकोक्तानां मूलभूतस्य भगवतो गुणानाम्। भौतिकानां नद्यादिगुणानाम्। 'दिशः प्रसेदु'रित्यादिभिः पञ्चमहाभूतानां दिश आकाशेन्तर्भाव्य प्राकट्य इत्यर्थः। मध्य इति कालगुणभौतिकगुण'नेदुर्दुन्दुभयो दिवी'त्याद्युक्तदेवगुणास्तेषां मध्ये। देहलीप्रदीपन्यायेन निमित्तत्वं वक्तुम्। कालनिमित्तत्वमिति कालो निमित्तं यस्य तादृशत्वमित्यर्थः। अन्ते चेति अष्टधार्धमात्रानिरूपणान्ते च। प्रकटीति अविद्यानाशादिति भावः। ननु नेदं युक्तम्, देवक्यामितिपदेन 'देवकी सर्वदेवते'ति सर्वदेवतावाचकपदघटितेनैव चारितार्थ्यादित्याशङ्कायामस्याप्याशयं सूक्ष्मेक्षिकयाहुः एवं सन्दर्भ इत्यादि। अयमपीत्यपिशब्दः प्रासङ्गिकत्वं सूचयति स्म। पुरुषोत्तमस्यैव प्रकरणित्वात्। सर्वधर्मेति 'अनुसागर'मित्यन्तैः सप्तभिः श्लोकैर्धर्मरक्षोक्तेस्त्वैश्वर्याधमात्रामध्ये कथनमनिरुद्धस्यैवोचितमिति भावः। सर्वमुक्तीति सर्वेषां चैद्यप्रलम्बादीनामासुरसम्पत्तियुक्तानां मुक्तिदाता तथेत्यर्थः। अज्ञाननिवृत्तिरज्ञानसंहारः। विद्ययाऽज्ञाननाशे मोक्षो वासुदेवकार्यमिति विवेकः। तथा च जनार्दनपदादयं सङ्कर्षण इति भावः। तथा चार्द हिंसायां चु० आत्म० से० तस्य रूपं न तु अर्द गतियाचनयोरित्यस्य भ्वादेः परस्मैपदिनः सेटः। देवक्यामिति 'देवक्यां देवरूपिण्या'-

मितिश्लोके देवरूपाधिकरणत्वकथनात्। वासुदेव इति 'प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मज' इतिवाक्याद् वसुदेवगृहेपि व्यूहचतुष्टयप्राकट्यम्। पुरुषोत्तमो नन्दगृहे पूर्वमुक्तो वासुदेवोऽत्रोक्तो वेदसारः तेन वेदवेदान्तसारत्वात् पदभेदः। सर्वरूपेणापीति विश्वप्रदर्शनं मुखे करिष्यमाणमिति सर्वरूपेणेत्यस्य नार्थः, किन्तु चतुर्व्यूहरूपेण सह भगवान् पुरुषोत्तम आविर्भूत इत्यर्थः। पूर्वपक्षस्या'थोमुष्यैव ममार्भकस्य यः कश्चनौत्पत्तिक आत्मयोग' इतिवाक्योक्तौत्पत्तिकात्मयोगत्वात्। द्वितीयाध्याये 'कालात्मा भगवान् जात' इति काल देहात्मा भगवानुक्तः, तत्रापि न कालस्य निमित्तत्वं किन्तु देहिनो भगवत एव। न तु देहस्य कालस्य तमोरूपदोषाभावे 'सर्वगुणोपेत' इतिपदोक्ते गुणप्राकट्ये चेत्यर्थः। तादृश इति देहरूपः। सहज इति बलभद्रे तु सहजः, अत्र तु चतुर्व्यूहरूपेण सह पुरुषोत्तमो जात इति सङ्कर्षणाप्राधान्यात् न सहज इत्यर्थः। कश्चिदिति द्वितीयस्कन्धनवमाध्यायेपि विशुद्धसत्त्वस्य तत्रोक्तेः तस्यैव देहत्वं, न तु कालस्येति भावः। एकमिति कालरूपम्। 'निर्दोष एव रमत' इतिवाक्यादाहुः भगवत्प्रादुरिति। गुणप्राकट्यमिति पूर्वोक्ताज्ञाननिवृत्तिद्वारा। तेन नान्योन्याश्रयः। निरूपितमिति वारद्वयं 'जायमाने' इत्यादि कथनान्निरूपितम्। सर्वांश इति कृष्णकेशनारायणांशावपि। तत्र कृष्णकेशः सङ्कर्षणे शब्दे कृष्णशब्दात्मके नारायणांशोनिरुद्ध इति विवेकः। तेन सर्वशब्देनेन्द्रियदेवता अपि। देवक्यां विष्णुरिति प्रद्युम्नः। विष्णुपदप्रयोगतात्पर्यमग्रे स्वयमेव वाच्यम्। देवानां समूह इति "गोत्रोक्षोष्ट्रोरभ्रराजन्यराजपुत्रवत्सममनुष्याजाद्वुञ्" इति सूत्रेण समूहार्थकप्रत्यये विष्ण्वाविर्भावः कारणम्। अन्यथाविर्भावो न स्यादधिष्ठानान्तरे। वृद्ध्यभावश्छान्दसः। तदुपपादयन्ति स सम्पूर्ण इत्यादि। तथा च 'देवक्यां देवरूपिण्या'मिति पाठान्तरम्। पूर्णमिति भगवता पूर्णम्। मूषानिषिक्तन्यायेन। देवकी ब्रह्मविद्या, भगवानपि सत्यज्ञानानन्तानन्दरूपविद्यारूपोसङ्गत्वात्। आधारत्वेनेति अवतारे आधारनिमित्तं न दोषाय। भक्त्यन्तःपातित्वाद्वा। सत्त्वं ज्ञानं वा। तेन स्वाश्रयः। अनवतारदशायां स्वक्षरात्मकत्वे हृदयस्य जाते तत्राविर्भूतं 'परमं व्योमे'त्याद्युक्तमेवाधारत्वेन निमित्तम्। 'ब्रह्म तर्हि अग्नि'रित्युत्तरार्धे वक्ष्यमाणत्वादाधानोक्तः साधिष्ठानोग्निर्दृष्टान्तीक्रियते यथेति। भवतीति इतिशब्द उत्तरत्र हेतुवाची। मथनेति मथनदण्डस्थानीयम्। ज्ञानस्य प्रयत्नासाध्यत्वादाहुः भगवद्रूपमिति। देवकीत्वरूपम्। तत्रेति देवक्याम्। हृदमेवेति सर्वभूतस्थं जातिरूपं प्रादुर्बुभूषुरूपमेव वा। आधिदैविक इति ब्रह्मविद्यारूपः। यद्वा देवक्यां विद्यमानः सर्वव्यापकत्वेन यः स विष्णुपदेनोच्यते। पाठान्तर इति 'देवक्यां देवरूपिण्या'मिति पाठान्तरे। गुहा हृदय आकाशमिति हृदयाकाशमिति समस्तोपि पाठः। तस्मिन्निति 'गुहायां परमे व्योम'न्नित्यत्रोक्तायामित्यर्थः। व्योम-

न्मित्यत्र डेर्लुक्। आ समन्तादिति अन्तर्याम्यपि स्वांशजीवरूपेणापीत्यर्थः। सत्त्वगुणाभिमानित्वव्यावृत्त्यर्थमाहुः विष्णुर्व्यापक इत्यादि । पुरुषोत्तम इति विष्णुसमानयोगक्षेमत्वेनाकारकत्वेन च पुरुषोत्तमे विष्णुपदमुक्तमिति भावः। ब्रह्मशब्देनेति चतुष्पाद्ब्रह्मत्वेन। अत्र चत्वारः पादाः व्यूहाः तात्पर्यवृत्त्या। सर्वान्तर इति सर्वेषामन्नमयादीनामन्तर आनन्दमय इत्यर्थः। सर्वान्तर्यामी अन्तर्यामिसमष्टिः, अन्तर्यामिब्राह्मणोक्तानां सर्वेषां पृथ्व्यादीनामन्तर्यामी वा। अनेनेति अध्यायार्थप्रद्युम्नस्य राजसत्वेन तत्प्रकरणीयगुहाशयपदेनेत्यर्थः। सर्वेषामिति ब्रह्मप्रभृतीनाम्। भजनार्थमिति 'भगवान् ब्रह्म कार्त्स्न्येने'ति वाक्यात्। तेन वेदे माहात्म्यज्ञानं ऐक्यं चेत्युभयं भजनाङ्गं भजनार्थमुच्यते। स्वयं हृदि स्थित्वेति 'तेने ब्रह्म हृदे'त्यत्रेति बोध्यम्। तदुक्तं गीतायाम् 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठती'ति। वेदांश्चकारेत्यन्वयः। 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मा' इति श्रुतेः। किं प्रयोजनमित्याकाङ्क्षायामाहुः तत्परा इति। वेदपराः, भजनद्वारा कृतार्था इत्यादि । तदुक्तं सुबोधिन्यां ब्रह्मा मानसीं सेवां प्रत्यहं करोतीति। इयं सर्वदा व्यवस्थितिः। सोऽत्रैवेदानीं प्रकट इति हेतोरवतारपूर्वप्रक्रिया नोपयुज्यते। अतः परं अवतारदशायाम्। अयमेवेति गुहाशय एव । गुहाशयप्राकट्यकथनेन निरूपितमिति अन्वयः। अन्तरन्विति विद्यारूपज्ञानस्य निर्विषयत्वाभावात् तथा। पूर्वोक्तप्रणाड्या वा। न त्विति जननिमित्तभूतस्तु जननाभावादेव न जातः। अनिमित्तभूतोपि ज्ञानरूपो व्यापारोऽवधारणार्थं मनसस्तदेकपरता। सावधानता विनयेन स्थितिः, तादृशोपि व्यापारो न जात इत्यर्थः। सम्पूर्ण एवेति गतिप्रतिबन्धकमुल्लङ्घ्य प्रियमोदप्रमोदादियुक्तः पक्षी न तु कश्चिदप्यंशं विहायानन्दमयः प्रकट इत्यर्थः। चतुर्भुजत्वेग्रे 'बभूव प्राकृतः शिशु'रिति न्यायो बोध्यः। आधारेति विशुद्धसत्त्वमाधारः। यथा प्राच्यां दिशीन्दुरिवेति 'यथा प्राच्यां दिशी'त्येतावत्प्रतीकेनाधारदृष्टान्तः, 'इन्दुरिवे'ति प्रतीकेन प्रकटीभूतदृष्टान्तः । सर्वोपास्येति 'तस्यै दिशे नमस्कृत्ये'तिवाक्यात्। हेतुगर्भं विशेषणमाहुः सर्वदेवतेति। श्रीभागवते तत्र देवताप्राकट्यकथनाज् ज्ञायते सर्वदेवतामयीति। तस्या आकाशेन्तर्भावा'दाकाशशरीरं ब्रह्मे'ति श्रुतेः सर्वदेवमयब्रह्मशरीरत्वात् तथा। आगमन इति चन्द्रागतौ। अमृतमय इति जलमयः। 'अपां पुष्पं यो वेदे'ति श्रुतेः। आनन्दरूपामृतमयो वा। 'आनन्दरूपममृतं यद्विभाती'तिश्रुतेः। इदीति औणादिक उः। आनन्दमय इति नन्वानन्दमयाधिकरणे आनन्दमयः परमात्मोक्तः कुतश्चन्द्र इति चेन्न । तैत्तिरीये देवतात्रयपक्षे चतुर्थ्याकाङ्क्षायामस्योपादानात्। अत एव जन्माष्टम्यामर्धरात्रे चन्द्रार्घ्यदानं स्मृतम्। तथा च प्राचीदृष्टान्तेन श्रीदेवक्या आविर्भावप्रयोजकत्वमात्रम्। न तु मातृवज् जननीत्वं

द्योतितम्। इन्दुपदेन च परमैश्वर्ययोगात् पूर्णत्वं द्योतितम्। तर्हि दृष्टान्तेन कथं पूर्णत्वसिद्धिरित्यत आहुः स इन्दुः प्रथमं पूर्णमास्यां षोडशकलत्वदशायां प्रथमं पूर्वं पूर्ण एव दृश्यते। खण्डास्त्वित्वति चन्द्रमसः खण्डास्तु तिथ्यन्तरे आकाशमध्ये तत्प्रान्ते पश्चिमदिशि च दृश्यन्ते। तथा च प्राचीपदेन्दुपदयोः समभिव्याहारात् दृष्टान्तेनापि तत्सिद्धिरित्यर्थः। नन्वेवं दृष्टान्तेनैव पूर्णत्वसिद्धौ पुष्कलपदस्य विष्णुविशेषणप्रतिपादकस्य किं प्रयोजनमित्याकाङ्क्षायामाहुः उच्चैरित्यादि। तथा च कृष्णद्वितीयादौ उच्चैः खण्डस्यापि प्राच्यां दर्शनात् तद्व्यावृत्त्यर्थं पुष्कलपदमिति तत्समभिव्याहृतदृष्टान्तादेव पूर्णत्वसिद्धिरित्यर्थः। समाप्तपुनरात्तत्वदोषपहान्यैतद्गतभूयोधर्माणां दार्ष्टान्तिके निरूपयितुं पूर्णत्वातिरिक्तधर्मनिरूपणार्थं पुष्कलपदस्यार्थान्तरमभिप्रेत्यैतद् द्विधा व्याकुर्वन्ति स पुष्कलशब्देनेत्यादि, नन्वित्यादि च। क्षयेति लोके प्रसिद्धम्। अत्रेति एवं व्याख्याने। प्राच्यादीति 'यथेवे'तिपदद्वयस्य विद्यमानत्वात् प्राच्यां दिशि पुष्कल इन्दुरिति चतुर्णां पदानामावृत्तिः। यथा प्राच्यां दिशि पुष्कल इन्दुस्तथा देवक्यामित्याधारदृष्टान्तः। प्राच्यां दिशीन्दुरिव विष्णुः प्रादुरासीदिति प्रकटीभूते दृष्टान्तः। तथेत्यर्थ इति पत्नीषु बह्वीषु सतीषु देवक्यामेवाविर्भावः। अत इति समाप्तपुनरात्तत्वदोषनिवृत्त्यर्थं दृष्टान्ते निवेश्य पुष्कलेन्दुदृष्टान्तकथनादित्यर्थः। आश्चर्येति 'सविस्मयोत्फुल्लविलोचन' इति पदेन। आविर्भावे प्राप्तं सदैकरसत्वश्रुतिविरोधं कारिकया परिहरन्ति स दासीनामिति। भक्तानाम्। स्त्रीप्रत्ययस्तु प्रसादरूपशक्तिरूपस्त्रीत्वविवक्षायां भवति। 'स्त्रीद्वारा पुरुषे भवेत्' इति च।'दास्यो वक्ष्यमाणा अङ्गीकार्या' इति लेखे(प्रकाशे)। सर्वरक्षार्थं सर्वपुरुषार्थरक्षानिमित्तम्। स्वममानाकारं वासुदेवं अत्युत्कटं भक्तदुःखं वा। निमित्तीकृत्य स्वाविर्भावे प्रयोजकं कृत्वा। मम स्वामी पुरुषोत्तमः प्रादुर्भूतः। अत्र 'मायया सह जात' इति सुबोधिन्या मायिकी विषयता जाता, तया 'न तदश्नोति कश्चन,' न तदश्नोति कश्चने'तिश्रुतिविरोधो न। कृपारूपमाया त्रिविधा सुधा तस्या अप्याविर्भावो बोध्यः। नैश्चिन्त्यमिति, अत्र टिप्पणी, स्पष्टार्था, पूर्ववदित्यस्य व्याख्या प्राकट्यात् पूर्वमित्यादिना। अयमर्थः साधनाध्यायद्वितीयपादे। 'अरूपवदेवे'त्यधिकरणस्य द्वितीयसूत्रे 'प्रकाशवच्चावैयर्थ्या'-दित्यत्रोक्तः (३-२-१५)

१०-३-२. तमद्भुतमित्यत्र ऐश्वर्येणेति 'ईश्वरः पूज्यते लोके मूढैरपि यदा तदा निरुपाधिकमैश्वर्यं वर्णयन्ति मनीषिण' इत्यैश्वर्यलक्षणम्। अत्रान्यथाकर्तुं समर्थ ईश्वरः। अजनः प्रादुर्भूत इति। वीर्येति 'वीर्यं देवेषु तत्रापि स्त्रीषु तत्रापि कामतः सान्निध्ये पुरुषाणां च मूर्छा तेन ततो मह'दिति लक्षणकवीर्यनिरूपणार्थम्। देवे वसुदेवे वीर्यमत्र। अग्रे देवेषु वीर्यं अपि न, किन्तु दैत्येष्विति विपरीतलक्षणपार्थः। पुनः शुकोक्तीति

मूलेस्मिन् श्लोके 'श्री शुक उवाचे'ति पाठो वर्तत इति ज्ञेयम्। 'अद्भुत'पदस्यारित' नैश्चिन्त्यं वाचि पूर्वव'दिति तत् प्रपञ्चयन्ति स्म दश लीलेति। अत्र टिप्पणी, ऐश्वर्यस्याष्टविधत्वात् तत्राष्टौ श्लोका उक्ताः। निरूपणीयस्य वीर्यस्य कुतो द्वौ श्लोकौ कुतश्च प्रथमे श्लोके दश पदानि द्वितीयश्लोके च द्वे इत्याकाङ्क्षायां सार्धचतुष्टयकारिकाभिस्तत्तात्पर्यं वदन्तीत्याशयेन व्याकुर्वन्ति स्म विशेषणेत्यादि। अयमिति प्रथमचरणोक्तः। पदेनेति विशेष्येण 'पुरुष'पदेन। अत्र व्युत्पत्तित्रयम्। द्वादशात्मकः उभयश्लोकविशेषणसङ्ख्यातात्पर्यम्। समुदायसङ्ख्यातात्पर्यम्। द्विगुण इति 'द्वादशाङ्गोयं पुरुष' इति श्रुतेर्द्वादशाङ्गानां वक्तव्यत्वेनानन्दमात्रकरपादमुखोदरादिरूपेपेक्षाबुद्धिजन्यद्वादशत्वाभावाज् जन्यत्वादाहुः मर्यादामार्गीयमित्यादि। पूर्वं पक्षपातादधमाङ्गे ऐश्वर्यादिकं पुरुषोत्तमस्यो(=वासुदेवस्यो)च्यते। पद्भागे भूभारहरणप्रवर्तकं सङ्कर्षणव्यूहरूपम्। वेदधर्मप्रवर्तकमनिरुद्धव्यूहरूपम्। विहितभक्तिः उद्धवद्वारैकादशस्कन्धोक्ता, तत्प्रवर्तकं गर्भमम्बद्वप्रद्युम्नव्यूहरूपम्। ज्ञानवैराग्ययोः प्रवर्तकं वासुदेवव्यूहरूपम्। यशः समुदायेन। 'तस्य नाम महद्यश' इति महानारायणात्। चतुर्व्यूहैः षड्गुणा उक्ताः। इदं रूपं वेदे देवासुरमर्यादया एकम्। वेदान्ते पुष्टिरूपं उत्तमाङ्गे पक्षपाताभावादैश्वर्यादिकं वासुदेवस्य (पुरुषोत्तमस्य) उच्यते। मर्यादाया अपीति पूर्वमैश्वर्यादिकं वासुदेवस्य पुरुषोत्तमस्य वा कारणरूपस्य व्यापारभूतमुक्तम्। अधुना कार्यरूपमैश्वर्यादिकमुच्यते। तथा च पुरुषोत्तमः स्वव्यापारेण वेदधर्मप्रवर्तकानिरुद्धेन पुष्टिधर्मं मर्यादाया अप्युल्लङ्घनं कार्यं ऐश्वर्यरूपम्। तथा स एव स्वव्यापारेण भूभारहरणप्रवर्तकसङ्कर्षणेन पुष्टिधर्मं दैत्यानामपि मुक्तिदानं कार्यं वीर्यरूपं करोति। उभयं ऐश्वर्यादिकं अदेयस्वरूपामृतदानादौ हेतुः। नपुंसकत्वविशिष्टैश्वर्यादिकाभिन्नपुंस्त्वविशिष्टो हेतुरित्यर्थः। अत्रेदं बोध्यम्। अदेयस्वरूपामृतदानं ऐश्वर्यकार्यकार्यम्। स एव स्वव्यापारेण विहितभक्तिप्रवर्तकप्रद्युम्नेन पुष्टिधर्मं यशःश्रीरूपं करोति। आदिशब्देन देयस्वरूपदानं वीर्यकार्यकार्यम्। स एव स्वव्यापारेण ज्ञानवैराग्यप्रवर्तकवासुदेवेन पुष्टिधर्मं ज्ञानवैराग्यरूपं करोतीति। समुदितेति समुदितं यच् श्लोकद्वयं तत्तात्पर्यमित्यर्थः। तेन पुरुषपदे पुरा आसेति पुरमुपतीति व्युत्पत्तिद्वयम्। पुरि शेत इति तृतीया व्युत्पत्तिर्नास्ति व्यापकत्वादिति बोधितम्। अग्र इति अग्रिमकारिकासु। सर्वेषामितिकारिकायां सर्वेषामितिपदं सङ्कुचितवृत्तिकमित्याशयेनाहुः भक्तानामित्यादि। ऐहिकः पुरुषार्थरूपः पारलौकिकश्चेति द्वादशात्मक इत्यर्थः। तेन 'प्राणस्तथानुगमा'दितिसूत्रोक्तप्राणरूपता। वेदसारत्वात्। 'वायुर्वै क्षेपिष्ठा देवते'ति वेदः। तथा ज्ञानक्रियोभययुत इत्यज्ञात्वा लीलाः प्रवर्तयति करोतीति द्वादशधा मत इति ज्ञेयम्। तथा सगुणां नवधा भक्तिं इत्यत्र तात्पर्यार्थं भक्तिं प्रवर्तयन् काण्डद्वयस्यार्थं अभिधेयरूपं ज्ञानक्रियारूपं तनुत इति

द्वादशधा मत इति ज्ञेयम्। अत्र कारिकासार्धेनाद्भुतं कर्म 'कर्मैव गुरुरीश्वर' इति सिद्धान्तोक्तम्। बलं चोक्तम्। 'बलं भक्तिरिति सिद्धान्त' इति भाष्यात्। जन्मप्रकरणे द्विधा द्वादशधा सूक्ष्मरूपेण विद्यमानापीदानीं सङ्ख्यातात्पर्यरूपापि। सर्वप्रकाशक इतिकारिकां सार्धां विवृण्वन्ति स्म सर्वप्रकाशक इत्यादिना। तथेति 'कृष्णद्युमणिनिम्लोच' इतिवाक्यात् सूर्यात्मकः। द्वादशस्कन्धे द्वादश सूर्या इत्याश्रयस्कन्धप्रतिपाद्यत्वादाश्रयरूपा द्वादश। सार्तसिद्धान्तोप्यत्र। 'स्मृतिः प्रत्यक्षमैतिह्यमनुमानश्चतुष्टयम् एतैः सर्वैरादित्यमण्डलमेव विधास्यत' इत्यारण्यकात्। कालात्मेत्यादि कारिकांशं विवृण्वन्ति स लीलाया इत्यादि। तदवच्छेद इति कालावच्छेदः। एकहायन इत्यादि नात्र कालावच्छेदः स्वरूपातिरिक्तः। इन्द्रियनायक इत्यनेनान्या विधोच्यते सूक्ष्मदेहरूपेत्याशयेनाहुः लौकिकेति। आत्मेतिकारिकां विवृण्वन्ति स्म आत्मपदेनेत्यादि। अन्यदिति आनन्दमात्र इत्यन्यत्। अक्षरं भगवांश्चेति पदद्वयं स्पष्टम्। कारिकांशरूपं च। एतत्स्वरूपात्मिकैवेति भाष्ये फलाध्याये स्पष्टम्। छान्दोग्यीयश्रुतेरेवकारः। 'आत्मतः सर्व'मिति श्रुतिः। एवमैश्वर्यं निरूप्य वीर्यं निरूपयन्ति स्म एवं तात्पर्येति। पूर्वोक्तप्रकारेण। इदमेवेति वीर्यमेव, ऐश्वर्यमेव वा। एवकारस्तु 'वीर्यं मे दुश्वरं तप' इति वाक्यात्। फलितमित्यन्वयः। हरिरिति सुबोधिन्यां प्रतिपाद्यत्वाय कृष्णसाकारकत्वाय। सुबोधिन्याम्। तत्र प्रथमं दशधेति द्वादशसु विशेषणेषु, दशधेति विशेषणेषु, तमित्यस्य प्रसिद्धार्थकत्वे विशेषणत्वात्। आश्रयार्थकत्वे तु तमिति विशेष्यम्। यादृशस्तच्छब्देन परामृष्टः तस्य सामान्यतः स्वरूपमेतेनोक्तम्।'पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यये'ति वाक्यात्। स्वरूपलक्षणानीति।'दिष्ट्याम्ब ते कुक्षिगतः परः पुमान्' इति पूर्वाध्यायान्त उक्तत्वात्। तथा 'परः पुमान्' भगवानिति वक्तुं युक्तम्। यथा घट इत्युक्ते कम्बुग्रीवादिमानिति लक्षणविद् वक्ति, न त्वातानवितानवानिति पटलक्षणम्, अनाप्तत्वापत्तेः। एवं वाङ्मनोतीते परपुरुषे तत्त्वाद्भुतत्वादिलक्षणानि न। तमिति 'यस्मात् क्षरमतीतोहमक्षरादपि चोत्तमः अतोस्मि लोके वेदे च प्रथितः पुरुषोत्तम' इति वाक्याद् वा। एकं स्वरूपलक्षणं लोकवेदप्रसिद्धत्वम्। 'यस्यान्तःस्थानि भूतानि येन सर्वमिदं तत'मिति लक्षणान्तरमङ्गीकृत्याहुः आश्रयेति। कृष्णाश्रयभूतः। सृष्टिरूप इति 'तदात्मानं स्वयमकुरुते'ति श्रुतावप्यकर्मत्वोक्तेः। केचिदिति विरलाः। मायापमारणादिकमत्रापि ज्ञेयम्। लेखे (प्रकाशे) मतान्तरमाहुः 'सृष्टिरूप इति केचिदिति अत्र युक्त्यलिखनादुक्तवाक्यविरोधाच्च तदसङ्गतमिति बोधित'मिति। श्रीवल्लभास्तु 'सृष्टिरूप इति सृष्टिं निरूपयतीति सर्गलीलाप्रवर्तक इत्यर्थः, अत्र लीलाप्रवर्तकत्वं सङ्ख्यातात्पर्यत्वेनोच्यते, न तु प्रत्येकं विशेषणेषु ता लीला व्याख्यातुं शक्यन्ते, अतोत्रापि न व्याख्येयमित्याशयेन केचि-

दित्युक्त'मित्याहुः।आश्रयत्वं द्वितीयं स्वरूपलक्षणम् । अलौकिकमेवेति लोके भवं लौकिकं, अद्भुतं भवति, 'आश्चर्यवत् पश्यति कश्चिदेन'मितिवाक्यात्, परं परिचयात् प्रतीतिविषयं न भवतीत्यलौकिकमेवेत्येवकारः। अलौकिकत्वं तृतीयं स्वरूपलक्षणम् । न तु लोकवेदसिद्धमिति अत्र टिप्पणी 'तमद्भुत'पदयोर्विरोधपरिहरित्री यद्यपीत्यादि। सिद्धमिति तृतीयाष्टके सिद्धम्।'प्रजापतिरकामयत'ेति प्रजापतिपदेन। 'ब्रह्मन् पुंसि चे'ति लिङ्गानुशासनसूत्रम्। अत एव संवत्सरोत्सवः संवत्सरादिः। 'संवत्सरो वै प्रजापति'रिति संहिता। तत्त्थैवेति तत् रूपं तथा विरुद्धधर्माधारत्वेन एव। 'उभयव्यपदेशात् त्वहिकुण्डलव'दिति सूत्रभाष्यादेवकारः। इदमिति लोकवेदप्रसिद्धत्वे सति अद्भुतत्वम्। 'अदि भुवो डुतच्' इति पाणिनीसूत्रम् ।पूर्वेणेति 'त'मिति विशेषणार्थेनेत्यर्थः। सुबोधिन्याम्। ननु प्रमाणै'र्यतो वाच' इत्यादिभिर्विशेषज्ञानस्य निषेधादद्भुतत्वे ज्ञानं कथं भवतीत्याशङ्क्य व्युत्पादयन्ति स इदं हीत्यादि। हि यत इदम् लोकवेदप्रसिद्धत्वे सत्यद्भुतत्वं स्वेच्छया यदा प्रमाविषयं भवति तदा तस्य बलं भक्तिः स्नेहः प्रमाणाद् 'यतो वाचो निवर्तन्त' इत्यस्मात् अतिरिक्तं स्निग्धभगवद्विषयकम्। तथा च पूर्वविशेषणोक्तं सामान्यतो ज्ञानं वेदेनापि भवति, तद्विशेषाणामद्भुतत्वादीनां ज्ञानं तु तदधिकेन प्रमेयबलेनैव भवतीति भावः। प्रमाणतोधिकबलत्वादेवास्य वीर्यरूपत्वमित्याहुः तदेव हीति । अनुल्लङ्घ्यमिति उल्लङ्घनं लौकिकैः दूषणं वैदिकैरप्रमाणीकरणं तद्योग्यं न भवतीत्यर्थः। तदैवेति लौकिकवैदिकानुल्लङ्घ्यवीर्यप्राकट्यकाल एवेत्यर्थः। अनेनेति लोकवेदाप्रसिद्धाश्चर्यरूपत्वकथनेनेत्यर्थः। दृष्टमित्यनुग्रहवशाद् दृष्टम्। उपपद्यत इति प्रत्यक्षप्रमाणादुपपन्नं भवति, युक्तियुक्तं कुरुतेऽन्योपि। इत्युक्तमिति तथा च श्रुतिः "अन्यदेव तद् विदितादथोऽविदितादधी"ति उक्तमिति तात्पर्यवृत्त्योक्तम्। वाच्योर्थस्तु त्यदादीनां पूर्वोर्थः प्रधानोर्थो वा। त्यदादीनां पूर्वपरामर्शित्वं प्रधानपरामर्शित्वं वा । अद्भुतपदस्याश्चर्यं वाच्योर्थः । बाले बाले क इति 'नैश्चिन्त्यं वाचि पूर्वव'दिति निशीथसूत्र उक्तत्वाद् रोमे 'ऊर्ध्वमूलमधःशाख'वृक्षे समवायसम्बन्धेन ब्रह्माण्डविग्रहो यस्य, तथा बाले पुरो दृश्यमाने को ब्रह्माण्डविग्रहो यस्य जृम्भिष्यतः। यद्वा। 'सर्वं सर्वमय'मिति श्रुतेः तथा। यद्वा। बालब्रह्माण्डयोराधाराधेयभावसम्बन्धमात्रम्। असदादिरोमशरीरयोः सम्बन्धस्तथा। श्रीभागवते वाक्यमपि। अद्भुतबालकपदयोः सामानाधिकरण्यस्वभावात् सूचितमर्थमाहुः अद्भुतश्चेत्यादि। बलसम्बन्धिन इति 'रामाद्या गोपबालका' इत्यत्रोक्ता बालाः क्रीडायां तेषु मुख्यो भगवानिति। अद्भुतपराक्रमत्वेनेत्यादि अद्भुतः पराक्रमो वीर्यं तदभेदाद् बालके तत्त्वेन बालरूपेण यशो निरूपितमित्यर्थः। 'यशो यदि विमूढानां प्रत्यक्षासक्तिवारणात् स्वधर्मं योजयेत् तेषु तदा भवति नान्यथे'ति लक्षणकम्। 'विमूढा' लौकिकाः

-अद्भुतबालके बालकधर्मासक्तियुक्ता भवन्त्येव। 'स्वधर्मं' पीयूषरूपम्। चतुर्थं स्वरूपलक्षणमद्भुतबालकत्वम्। लक्ष्मीरीक्षण इति कामपुरुषार्थत्वात् तदीक्षणे लक्ष्मीः, प्रतिबिम्बद्वारा ईक्षणे भवति। सर्वतोक्षित्वाद्वा। अम्बुजौ सूर्याचन्द्रमसौ अपां पुष्पत्वात्, आरण्यके प्रसिद्धम्। ईक्षणे इति द्विवचनान्तं पदम्। पश्चाग्नीति अत्र 'ह्यापः पुरुषवचसो भूत्वा वदन्ती'ति श्रुतेस्तद्विद्यासाधितरूपस्याम्बुजत्वं बोध्यम्। ज्ञानं यस्येति विषयता षष्ठ्यर्थः। यद्विषयकं ज्ञानमित्यर्थः। सप्तमी तु न भवति। तात्पर्यार्थत्वात्। भोगायतनेति भोगायतनं शरीरम्। कादाचित्की क्रीडा।"प्राप्तं तन्निजरूपाय गोविन्दाय नमो नम" इति श्रीगोस्वामिविज्ञप्तेः। पृथिव्यामेवेति पृथिवी पत्नी पञ्चरात्रशास्त्रे भगवतः। अन्यत्रेत्यन्तरिक्षे दिवि च। पृथिव्याः प्रकृतत्वात्। पादयोर्दृष्टिरुक्ता न शिरसि न मध्येन्तरिक्षे। अनेकधेति पूर्वोक्तप्रकारेणैवेति बोध्यमदृष्टेरपादकत्वात्। 'श्रियो हि परमा काष्ठा सेवकास्तादृशा यदी'ति श्रीलक्षणम्। 'सेवका' ईक्षणं इन्द्रियाणि च। अत्रैव ज्ञानं निरूपयन्ति स ज्ञानात्मिकेति। तत्रेत्यम्बुजे। दयामृतादय इति अमृतं जलम्। आदिना लक्ष्मीः। तत्सम्बन्ध इति भक्त्या बोध्यम्। प्राकृतैरिति 'लौकिकं नैव मनुत' इतिवाक्यात्. पक्षान्तरमाहुः यथा वेति। कमलमेवेति हंसशैवालादयोऽद्भुता भवन्ति तद्योगव्यवच्छेदायैवकारः। दार्ष्टान्तोपयोगिनो न भवन्तीति। ज्ञानलक्षणं तु, 'ज्ञानोत्कर्षस्तदैव स्यात् स्वभावविजयो यदी'ति। सर्वो हि भगवद्व्यतिरिक्ते आसक्तः स्वभावात्, स्वभावविजये भगवद्यामृतादिमकरन्दमधुपो भवति। तथाऽद्भुतरूपत्वेन नेत्रज्ञानं तद्वान् भवति। इदं गीतोक्तज्ञानपक्षे। स्वयं प्रकाशत्वं ज्ञानत्वमितिपक्षे तु न। अम्बुजेक्षणत्वं पञ्चमं स्वरूपलक्षणम्। चतुर्विधमिति 'क्रिया ज्ञान'मिति पञ्चरात्रमित्याशयेनात्र टिप्पणी प्रमाणेत्यादि। सङ्ख्यातात्पर्यम्। यद्वा। कामः प्रमाणं शृङ्गाररसत्वात्। 'अत्र प्रमाणं भगवा'नितिवाक्यात्। अर्थः प्रमेयम्। धर्मः साधनम्। मोक्षः फलम्। चतुर्व्यूहकार्यम्। निरूपितेति उभयकाण्डार्थौ। ज्ञानं निरूपयतीति पञ्चरात्रात् कर्म ज्ञानत्वेन निरूपयति। इति नेति जानातीच्छति यतते इति नैयायिकप्रवादात्। स्वयमिति कर्मेन्द्रियाणि। चिद्रूपाणि ज्ञानरूपत्वात्। पूर्णज्ञानजनकानि अद्भुतत्वात्। तेषामिति धर्मार्थकाममोक्षाणाम्। अत्र सुबोधिनी तान्येवेति "चतुर्णां पुरुषार्थानां दानाद् देवश्चतुर्भुज" इति प्रसिद्धेरेवकारः। यद्यत्र तिष्ठति तदन्यस्मै ददातीति तथा। चतुर्भुजरूपेणोच्यन्त इति चतुर्भुजरूपेण चतुर्भुजाभिरुच्यन्त इत्यर्थः। पुरुषार्था इति सङ्ख्यातात्पर्यं जन्मप्रकरणत्वात्। एवं स्पष्टेति न व्याख्याता। भूतानि चेत्यस्य तात्पर्यमाहुः "भगवद्भुजानामित्यादि। तदाधीति क्रियाधिदैविकरूपत्वमपि। तन्मात्राणि गन्धादीनि तद्रूपत्वम्। अपिना तन्मात्राकार्यरूपपृथिव्यादिचतुष्टयरूपत्वं, 'आकाश-

शरीरं ब्रह्मे'ति भुजानामाकाशरूपत्वम्। ज्ञाननिरूपणप्रयोजनमाहुः तेनेत्यादि। तेषामिति ज्ञानरूपकर्मेन्द्रियाणामित्यर्थः। भूतपदस्यार्थान्तरमाहुः जरेति। सङ्ख्यातात्पर्यं प्रकरणात्। उक्तरूपाणीति जरायुजादीनामाधिदैविकरूपाणि। तेन जरायुजादीनां कर्मसिद्धान्ते क्रियारूपभुजामूलम्। अत्र वाक्यम्। 'कर्मणा जायते जन्तुः कर्मणैव प्रलीयत' इत्यादि। भगवान् पुरुषद्वारा स्रष्टा। पुरुषान्तःस्था जरायुजादयः। धर्मादयो दिक्पाला वेति तु 'इन्द्रादयो बाहव आहुरुस्रा' इति द्वितीयस्कन्धवाक्यात् स्फुटमतो न व्याख्यातम्। द्विगुणपुरुषत्वं विवृण्वन्ति स पुरुषस्येत्यारभ्यालौकिकमित्यन्तम्। युद्धापेक्षेति 'कालः कलयतामह'मिति वाक्यात्। अवस्थेति बाल्यावस्था। साधनं स्तनपीडनचरणोत्क्षेपणम्। घातकाविति कारिकायोजना तु चतुर्षु भुजेषु द्वौ द्वौ भुजौ घातकौ रक्षकौ विरोधेप्युक्तौ। च पुनः अतिसङ्कटेपि तथोक्तौ। किञ्च चतुर्भुजपदेन भुजतया वेदोक्तं द्विविधं ज्ञानमुक्तम्। तथा भगवतो भक्तिरुक्तेति रूपामङ्गीकृत्य तां विवृण्वन्ति स घातकावितारभ्य रूपा चेत्यन्तम्। विरुद्धमिति सहानवस्थानलक्षणो विरोधः। तथापि विरुद्धधर्माश्रयत्वात् तद् विरुद्धं कृतवान्। कर्म ब्रह्मेति वेदशब्देन वेदान्तस्यापि सङ्ग्रहे बोध्यम्। वेदान्तासङ्ग्रहे त्वाहुः आत्मपरमात्मेति। आत्मा वेदे। 'कृष्णाजिनं ब्रह्मे'ति श्रुतौ। परमात्मा स्मृतौ। तेनोत्सन्नप्रच्छन्नशाखामूलत्वम्। स्मृतीनामुत्सन्नप्रच्छन्नशाखामूलत्वात्। अत्र द्वयं द्वयं घातकं रक्षकं च। भक्तिरपीत्यत्र सगुणा साधनरूपा च घातिका। निर्गुणा फलरूपा च रक्षिका। मूलेन सकृदुच्चरितेषु पदेषु अद्भुतत्वादनेकेर्थाः 'सर्वं सर्वमय'मितिश्रुतेर्ब्रह्मविषयिण्या उक्तास्ते खले कपोतन्यायेनात्र बोध्याः। वैशिष्ट्येन तं प्रत्येकैकशः स्फुरन्तोपि भगवत्कृपावलोकितं सर्वज्ञं प्रति युगपत् क्रमेण वा यथाधिकारं विषयीभवन्तीति न कोपि शङ्कालेशः। चतुर्भुजत्वं न लक्षणं, अम्बुजेक्षणरूपस्वरूपलक्षणेन्तर्भावात्। 'ज्ञानं क्रिये'ति पञ्चरात्रात्। अग्रिमपदेन वैराग्यं कथमुच्यत इत्याकाङ्क्षायां तद् विवृण्वन्ति स वैराग्यं हीत्यादि। सर्वदुःखेति भगवद्रूपत्वात् तथा। तेनेति यद् यज्जनकं तत् तद्गुणकं यद् यद्गुणकं तत् तदात्मकमितिव्याप्तेस्तन्न्यायेनेत्यर्थः। अत्र विरुद्धधर्मौ व्यवस्थयेत्याहुः तेन भक्तेष्विति। वैराग्यलक्षणं तु, 'हरेश्चरणयोः प्रीतिः स्वसर्वस्वनिवेदनात् उत्कर्षश्चापि वैराग्ये हरेरपि हरिर्यदि भक्त्या च तादृशत्वं च सा सेवा सेवकोचिते'ति 'दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्य'मिति साङ्ख्यसूत्रोक्तनिर्व्यापारं भक्तिमार्गेनुपपन्नम्। मिथ्याचारत्वस्य गीतोक्तस्यापत्तेः। सुबोधिन्यां शङ्खं तदादिश्चेत्यादि शङ्खादिः पद्मम् 'तदादि'शब्दार्थः। शङ्खं आदिर्यस्येति। आदिशब्दोऽनपुंसकः। शङ्खं च गदा च शङ्खगदे। द्वन्द्वान्ते श्रूयमाणः आदिः प्रत्येकमभिसम्बध्यते। तेन शङ्खगदे आदी श्रुतौ ययोः पृथिवीतेजसोः ते शङ्खगदादिनी। तद्गुण-

संविज्ञानो बहुव्रीहिः। तदनन्तरं शङ्खगदादिनी आयुधे यस्येति बहुव्रीहिः। गदादिश्चेति गदा आदिर्यस्याग्रेः स गदादिः। शङ्खादित्वं पद्मस्य, गदादित्वं चक्रस्य व्युत्पादयन्ति स अपां तत्त्वमिति। श्रुतिस्तु 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः, आकाशाद् वायु'रित्यादिस्तैत्तिरीये। इत्येवं स्फुटत्वान्न व्याख्यातम्। टिप्पण्याम् उक्तरीत्येति लेखे(प्रकाशे)'दक्षिणहस्तयोरुपरि शङ्खो नीचैः पद्मम् ,वामयोरुपरि गदा नीचैश्चक्रम्। अनया रीत्या धारयन् मधुसूदनः, पुराणान्तरे तथाप्रसिद्धत्वात्। मन्दारमधुसूदनादौ १ म· ३ / ४ द· २। तथा दर्शनाच्चेति भाति। एवं माधवरूपेपि, विन्दुमाधवादौ ३ मा· १ / २ द· ४। तथा दर्शनात्। नारायणस्वरूपेपि वैङ्कटादौ ४ ना· २ / १ द· ३। तथा दर्शनाद् भातीति। तथा एवं त्रिवृद्रूपत्वमित्यादिटिप्पणीलेखे(प्रकाशे)"अत्र पूर्वं चतुर्भुजपदविवरणे चतुर्विधकार्यकरणार्थमवतारचतुष्टयकथनेन चतुर्व्यूहत्वसिद्धावपि यदत्र त्रिरूपत्वेन विवरणं तत् 'शङ्खगदाद्युदायुध'मित्यत्र क्रमेण शङ्खस्य गदायाः 'आदि'पदोक्तस्य चक्रस्य च उत्पदेनोच्चैःस्थापनबोधनादङ्गीकृतमिति प्रतिभाति। त्रिव्यूहकार्यस्यैव बहुशः करणादुक्तं ज्ञेयम्। वासुदेवकार्यस्य गीतोपदेशभीष्ममुक्त्यादौ क्वचिदेव करणादिति भाती"ति। अत्र प्रथमभातीतिपदं एवं शङ्खपद्मेति सुबोधिन्या दक्षिणावर्तनेपि क्रमो नायातीति क्रमेणेति सुबोधिन्या विरोधः, अतोयं क्रमो वासुदेवव्यूहे दक्षिणावर्तने नास्ति। वासुदेवो वेदे पठ्यत इति वेदत्रयीपक्षवत्। व्यूहत्रयपक्षे वासुदेवव्यूहः पुरुषोत्तमः इति हेतोः क्रम उक्तः सुबोधिन्याम्, लेखे (प्रकाशे) तु प्रतिकृतिकानुरोधेनोक्तम्। तद्यथा १ म· ३ / ४ द· २। द्वितीयभातीति तत्र माधवनिरूपणे तथेति गदाचक्रे दक्षिणयोरब्जशङ्खौ वामयोर्धारकत्वप्रकारेण। तद्यथा ३ मा १ / २ द· ४। नारायणनिरूपणे तथेति शङ्खाब्जे दक्षिणयोः चक्रगदे वामयोर्धारकत्वेन प्रकारेण। तद्यथा। शं ना च / प द ग। त्रिरूपत्वेनेति त्रिवृन्नारायण इति नैकं पदं नारायणे त्रिवृत्करणस्य वेदादिबाधितत्वात्। प्रतिभातीति, समासस्य सुबोधिन्यामुक्तत्वात् प्रकारान्तरस्य व्यूहेषु युक्तत्वात् प्रतिभाति। ३ अ २ / १ द ४। लेखोक्तप्रकारात्। ३ सं २ / १ द· ४। व्यूहप्रतिपादकत्वेन तद्विरुद्धक्रमाप्राप्तेः। सङ्कर्षणो वेदात्मेति। ३ प्र ४ / १ द २। शङ्खगदादिनी पद्मचक्रे उदायुधे यस्येति टिप्पण्याः। अस्याः शङ्खगदे आदी ययोस्ते शङ्खगदादिनी पद्मचक्रे उदायुधे यस्येति तद्गुणसंविज्ञानो बहुव्रीहिरिति टिप्पणीफक्किकाया आधुनिकत्वे तु शङ्खगदादय एव उद्यतान्यायुधानि यस्येति सुबोधिन्युक्तविग्रहो द्रष्टव्यः। अग्रे स्पष्टम्। उक्तमिति उपलक्षणविधया व्यूहत्रयपक्षादुक्तमित्यपि। भातीति ४ वा २ / १ द· ३। पञ्चमस्कन्धे 'श्रीवत्सलता मन्दरवरवनरुहवनमालाच्छर्यमृतमणिगदादिभिरुपलक्षित'मिति वाक्यात्। 'अङ्घ्रि' चक्रम्।

त्रिधापि व्यूहाश्चतुर्धापि। वासुदेवो धर्मी वेदे। २ वा. ३ / १ द. ४ । वेदेऽस्पष्टत्वात् पञ्चरात्रं 'इत्युक्तो ब्रह्मणा देवः शङ्खचक्रगदाधर' इति। पुष्टौ तु विपरीतः क्रमः। ३ वा. २ / ४ वा. १ । अत्र वासुदेवः पुरुषोत्तमो। न व्यूहः। २ पु. १ / ३ द. ४ । 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः, आकाशाद् वायुः, वायोरग्निरग्नेरापः,अद्भ्यः पृथिवी'ति श्रुतेः। अत उक्तं भातीति। तदग्रे शङ्खेत्यादि-विग्रहेति टिप्पणी। विग्रहवाक्ये शङ्खगदादय इत्यत्र शङ्खः गदा च शङ्खगदे आदिः आदिश्चेति आदी सरूपैकशेषः। शङ्खगदे आदी च शङ्खगदादयः। परवल्लिङ्गं द्वन्द्वतत्पुरुषयो-रित्यजहल्लिङ्गविषयत्वात्। 'आदि'शब्दो नियतपुल्लिङ्गः। क्वचित् स्त्रियामपि। आदिशब्दे न्यूनपूरणम्, आदिः तदादिः शङ्ख आदिर्यस्य। आदिः गदादिः गदा आदिर्यस्य। न त्वार्थिकमिदम्। अर्थस्यार्थान्तरं विनानुपपत्त्यभावात्। यथा पीनो देवदत्तो दिवा न भुङ्क्ते इत्यत्र रात्रिभोजनकल्पनमन्तरा पीनत्वानुपपत्तिस्तथात्र नेति। न च वसुदेवदर्शनादार्थिकं तत्र तु न्यूनपूरणमिति वाच्यम्। दर्शनस्य भविष्यत्वात्। एवकारो स्वादिचतुष्टययोग-व्यवच्छेदकः। 'पुरुषोत्तमस्तु नन्दगृह एव मायया सह जात' इति मायाशबलितस्य नन्दगृह एव सत्त्वात्। अष्टभुजामायासहितस्य उद्यतानीति उत् प्रधानानि तत्त्वरूपाणि यतानि। उत् प्राधान्ये। इन्द्रियेत्यादिसुबोधिन्युक्तं पक्षं व्युत्पादयितुमवतारयन्ति स्म शङ्खा-ब्जाभ्यामित्यादि। 'अपां तत्त्वं दरवर'मित्यादौ अपां तत्त्वे कारणताशक्तौ भगवन्निष्ठायां दरवरत्वं न तु दरत्वं तच्चेन्द्रियम्। दरवरस्यान्यविधस्यास्याविसर्जनाया ज्ञानाविषयत्वं इन्द्रत्वादिन्द्रसम्बन्धि किञ्चित् तत्त्वमिन्द्रियम्। योगमात्रात् 'सर्वं सर्वमय'मिति 'सर्वे सर्वार्थवाचका' इति च वाक्याभ्याम्। यद्वा, प्राणपदस्येन्द्रियवाचकत्वमपीति प्राणपोषित्व-मपीन्द्रियम्। तदाहुः प्राणपोषितानीति। कार्येति गतप्राणेन्द्रियाणां कार्यासाधकत्वात्। तादृशत्वादिति प्राणपोषितत्वात्। प्राणेन्द्रसम्बन्धेनेन्द्रियत्वात्। द्वे आयुधे आन्तरमारकौ इत्याहुः तेनान्तर इति। 'दर्पोहङ्कारकः सूर्य' इति विश्वः। 'सूर्य आत्मा जगतस्तस्थुषश्चे'ति श्रुतेः सूर्य आत्मा। प्रकृते चेति अवतारे च। पद्मस्य देहरूपता, तां चोपपादयन्ति स्म ब्रह्माण्डेति। उपरीति कंसस्योपरि। तथा भवतीति दर्पहन्त्र् भवतीत्यर्थः। तयेति देहरूपत्वमायुधरूपत्वं च पद्मस्येत्यर्थः। एवं दर्पोपमर्दके द्वे उक्त्वा प्राणघातके द्वे आयुधे आहुः गदाया इति। निहन्तीति तम उपाधिमैच्छिकं स्वीकृत्येति बोध्यम्। अतिदेशा-धिकरणे प्राणपदवाच्यत्वोक्तेर्ब्रह्मणः। तेजोरूपमिति मन ज्ञाने मनोन्तःकरणमतस्तेजो-रूपम्। सात्त्विकाहङ्कारकार्यत्वाच्च। पक्षान्तरमिति पद्मदेहात् पक्षान्तरमाहुः। इति हेतो'राकाशशरीरं ब्रह्म'। अन्योपीति वेदान्तादन्यो वैदिकः भावः, 'आप मायामपः सर्वा' इत्यारण्यकोक्तो वात्मभावः। मज्जयतीति जलं कर्तृ। प्रापयन्तीति इच्छाविद्याकर्म-

पूर्वप्रज्ञाः कर्यः। तेन न तु छित्त्वेत्यस्याः सुबोधिन्या अयमर्थः। देवासुरान् द्वैधीकृत्वाप्यासुराणां महाभूतपातनं न त्यजन्तीच्छाविद्यादयः। तदुक्तं दशमे नलकूबरमणिग्रीवस्तुतौ 'त्वमेकः सर्वभूतानां देहास्वात्मेन्द्रियेश्वर' इति चतुर्व्यूहेष्वेकत्वसामानाधिकरण्येपि शब्दप्रवृत्तिनिमित्ताभावादायुधेष्वेव देहास्वादीनां कारणेषु देहास्वादिरूपेष्वलौकिकेषु प्रवृत्तिः, देहः असुः आत्मा इन्द्रियाणि च तेषामीश्वरः। आमिरीशिनीमिरीशते इतीश्वरः। यद्यपि सर्वभूतानां देहास्वादीश्वरः तथापि तैस्तैरूपैरीश्वरो बोध्यः। अलौकिकत्वाच् चतुर्णाम्। शङ्खगदाद्युदायुधत्वं षष्ठं स्वरूपलक्षणम्। एवं षड्गुण इति ऐश्वर्यादिगुण एवं 'तमद्भुत'मित्याद्युक्तप्रकारेण भगवान् निरूपितः, न तु तत्त्वाद्भुतत्वादिप्रकारेण। परपुरुषस्य स्वरूपलक्षणलक्षितस्य वक्तुं युक्तत्वात्। वेदे स्मृतौ पुराणे च 'ब्रह्मेति परमात्मेति भगवानिति शब्द्यत' इति वाक्यात्। पुनरिति 'हरिः सर्वत्र गीयत' इति वाक्यात् पुरुषस्य द्विगुणत्वात् सङ्ख्यातात्पर्यात् वेदान्तोक्तरूपानन्तरं वैदिकैश्वर्यादेः प्राप्तत्वाच्च पुनरित्यर्थः। श्रीवत्स इत्यादि, अत्र टिप्पणी, अत्रैतावदिति मूले लक्ष्मत्वकथनादत्र विशेषणे ज्ञानक्रियाशक्तिरूपमधिकं किञ्चिद् व्याख्यानं वाच्यमित्यर्थः। लक्ष्म लक्षणं, तज्ज्ञानवत्त्वं लक्षणम्। 'यः सर्वज्ञ' इति श्रुतेः। सर्वज्ञानमक्षरम्। अनन्तत्वात्। क्रियावत्त्वं च। जगज्जन्मादिकर्तृत्वं कृतिः। तत्र श्रीः कृतिः। कार्यलक्षणरूपा परम्परया स्वजनकाक्षरद्वारा। 'अक्षरं ब्रह्म परमं वेदानां स्थानमुत्तम'मिति वाक्यात्। अक्षरं 'सत्यं ज्ञानमनन्तम्'। इदं स्वरूपलक्षणम्। तत्र श्रियः परम्परालक्षणभूतायाः 'जन्मा'दिसूत्रे साक्षाल्लक्षणत्वेन प्रतीतेराहुः पुरुषोत्तमेति। अनेन भाष्ये 'ब्रह्मलक्षणं पुरुषोत्तमे तु कृतिः श्रीरूपा परिचायिता अक्षरं ब्रह्म परमं वेदानां स्थानमुत्तम'मिति वाक्यादक्षरसमावेशमाहुः तस्याश्चेतरेति। लक्ष्मीत्वेनागोचरत्वं भक्तिजज्ञानविषयत्वात्। ब्रह्मानन्दत्वेन तु प्रत्यक्षत्वम्। तत्प्रादुर्भावेति लक्ष्म्याः प्रादुर्भावस्थानं च तत्, असाधारणधर्मः, अक्षरः तम्। धारयतीति तद्वारपरम्परया श्रियं च धारयतीत्यर्थः। तद्दर्शनेनेत्यक्षरदर्शनेन। अत्र सुबोधिनी-जनकमिति अक्षरमित्यर्थः। व्यावर्तकमिति क्षराक्षराभ्यां व्यावर्तकम्। ब्रह्मानन्द इति ब्रह्मणोऽक्षरस्यानन्दः। इदं द्वितीयस्कन्धनवमाध्याये सुबोधिन्यां स्फुटम्। सर्ववेदेति सर्वे वेदास्तल्लक्षणमक्षरं ब्रह्म प्रतिपादयन्ति। स्वरूपं त्ववाङ्मनोगोचरमिति भावः। धर्माधारत्वं तु अयोगोलके वह्नेरिव। तथा च बहिःप्रकटे भगवति लक्ष्मज्ञापनार्थं केनचिदंशेनाक्षरमपि स्वानन्दधर्मेण भासते। प्रबलेऽग्नावयोगोलकश्यामतेवेत्येवं स्फुटेति न व्याख्याता। सर्वात्मकस्येत्यादिसुबोधिनीं विवरीतुमाहुः अस्य मुख्यत्वमित्यादि। साक्षात् सृष्टावुक्त्वा परम्परासृष्टौ पृथिवीस्थं जगत् लक्षणमाहुः यः पृथिव्यामित्यादि। अन्तर्यामिब्राह्मणेस्ति। जगत् तथेति कृष्णाश्रयस्यादिपदार्थत्वेन वक्तव्यत्वाज् जगदाश्रयलक्षणमुक्तम्, तथा

लक्षणम्। अक्षरमिति सत्यं ज्ञानमनन्तानन्दम्। जन्यमात्रे कालोपाधिः 'जन्यानां जनकः काल' इति अलौकिकसृष्टौ कालापेक्षायामाहुः चेष्टेति। तथेति लक्षणम्। अक्षरलक्षणेऽनन्तानन्देस्य कालस्यापि निवेशात्। कृष्णाश्रयलक्षणमाहुः आदिपदादिति। लीलाविशेषा दशमस्य विशुद्ध्यर्थं नवविधलीलाः, देहिष्वसङ्गता लीला वा। अत्रेति मुख्यत्वे। अत एवेतीति मुख्यलक्षणत्वादेव, श्रीवत्सस्याक्षरत्वादेवेति वा। जातीति ब्राह्मणत्वजातिः, भृगुत्वं वा। तदानन्द इति अक्षरानन्दः। चकारात् सर्वर्षिदत्तविद्याः भार्गवी विद्या च। तद्वतस्तस्येति देहवतो भृगोः। गतिरिति महत्त्वपरीक्षार्थम्। तथेति मुख्यत्वम्। स्वाश्रयत्वादितिसुबोधिनी स्वमक्षररूपभृगुस्तदाश्रयोक्षरः तत्त्वादित्येव स्पष्टेति न व्याख्याता। प्रकारान्तरेणापि भृगुपदस्य नानुचितत्वमित्याहुः किञ्चेत्यादि। अन्तर्बहिरिति ब्रह्म(प्राण)-धर्मवत्त्वात्। तथा ज्ञानेति स्पार्शनप्रत्यक्षस्य ब्रह्मधर्मस्य जनकत्वात्। 'आत्तगजेन्द्रलील' इति वाक्यात्। स्पर्शसुखं गजेन्द्रस्य प्रसिद्धम्। तथा च स्पर्शजातो भृगुरपि विशिष्ट इति नानुचितत्वमित्यर्थः। इदं प्रकारान्तरेणाप्याहुः स्पर्शेत्यादि। अनुचितत्वपरिहारायैवमुपपत्तित्रयेण भृगोरक्षरात्मकत्वं तेन श्रीवत्सस्याक्षरात्मकत्वं समर्थितम्। अत्र "अच् प्रत्यन्ववपूर्वात् सामलोम्न" इति सूत्रेऽजितियोगविभागादच्। सुबोधिन्याम्। अस्मिन् विशेषणे आभासोक्तमैश्वर्यनिरूपणं निगमयन्ति स ब्रह्मेत्यादि। ब्रह्मणोक्षरस्योक्तरीत्या निरूपितेन लक्षणत्वेनैव भगवतोक्षरप्रयोजकत्वरूपं कर्तुं समर्थरूपमैश्वर्यं निरूपितम्। अयमर्थः। 'ईश्वरः पूज्यते लोके' इत्युक्तैश्वर्यलक्षणात् अकारके मूलरूपे 'मूढा' वैचित्यं प्राप्तास्तैरक्षरं पुच्छं चरणं वैकुण्ठरूपं वा भगवत्कृतं 'पूज्यते' प्रतिपादनसौकर्यार्थं अर्हं क्रियते इति। कयाचिदिति अक्षरब्रह्मण एवावस्थाविशेषो जीव इति काशकृत्स्नमतमनुसृत्येदमुक्तम्। वैदिकत्वेन धर्मरूपैकदेशत्वात्। क्रियाशक्तेरित्यादि, अत्र टिप्पणी, ज्ञानशक्तीति क्रियाशक्तिर्भुजा, तद्व्यतिरिक्तत्वं ज्ञानशक्तित्वम्। सरस्वती कीर्तनभक्तिरूपा ज्ञानशक्तिः। 'एतद् ज्ञान'मिति गीतायाः। स्थानमित्यस्य विशेषणं प्रभुगुणगानमिति। प्रभुगुणा गीयन्तेस्मिन् कण्ठ इत्यधिकरणे ल्युट्। तेन सुबोधिन्यां ज्ञानशक्तिरुत्तमेत्यत्रोत्तमा देहासमारम्भिका। क्रियाशक्तिस्तु देहारम्भिका। 'तं विद्याकर्मणी समारभेते पूर्वप्रज्ञा चे'ति शारीरब्राह्मणात्। न च पूर्वप्रज्ञाभावः। विद्यात्वेन सत्त्वात्। सुबोधिन्याम्, 'शोभी'ति विशेषणादाहुर्मध्य इति। ज्ञानक्रियाशक्त्योर्मध्ये। अत एव सर्वाङ्गेति जीवानां द्विविधत्वादेव। उभयत्रेति कण्ठे भुजायां च। कण्ठं चेति चकाराद् भुजा। कण्ठ इति अन्यविधं भुजायामिति ज्ञेयम्। 'चैत्यस्य तत्त्व'मितिविशेषणे 'तत्त्व'पदात्। तत्त्वं कारणताशक्तिः। चैत्यमात्रमन्यत्र। अन्यथा जीवा नोत्पद्येरन्। कर्माभावात्। अत्रार्थे प्रत्यक्षं प्रमाणमाहुः अत एवेति। उक्तचकारार्थात् 'तत्त्व'पददानाभैव। उभयेति भगव-

दंशत्वादितिभावः। जीवा अक्षरांशा इति स्त्रीप्रायत्वात् वीर्यलक्षणं सङ्गतम्। ब्रह्मद्वयेति अक्षरं कयाचिदवस्थयावस्थितं ब्रह्म जीवाख्यं चेति ब्रह्मद्वयम्। तथात्वेति तादृगवस्थोत्पादनेन जीवत्वप्रयोजकभूतामित्यर्थः। प्रदेशविशेषेति यदवच्छेदेन मायासम्बन्धः स प्रदेशः अक्षरात्मकचरणः पुच्छं वा तत्र मायासम्बन्धः मायास्मृतेः। सृष्टीच्छा मायाया ज्ञाननाश्यत्वप्रतिबन्धिका। आकाशशरीरे वा मायासम्बन्धः। पीताम्बररूपत्वं गोपालतापिनीये। निरूपयतीति देहसम्बन्धमर्यादार्थं कारणे निरूपयति। वर्णान्तरं विहाय पीतस्यैवाम्बरस्य धारणे हेतुमाहुः आकाशतनोरिति। एवेति सायं प्रातराकाशे सिन्दूरादिवर्णसम्भवेपि न तादृशी शोभेति भावः। पीतत्वमित्यादि तामसमाकाशीयकृष्णं रूपं सजलवालुकासु राजसं सूर्यातपरूपं रोहितं तयोः सम्बन्धात् संयोगरूपात् पीतं रूपं प्रसिद्धं लोके। इदं भास्वरशुक्लकं रूपम्। रूपाणां त्रैविध्यात्। यद्वा, पीतमम्बरं यस्येति विग्रहे पीताम्बररूपा माया सा तु ज्ञानकारेति ज्ञानं विषयाविनाभूतं पीतं चाम्बरं वेति संशयात्मकं राजसं ज्ञानं तमोरूपमायायाः पीतत्वांशे सत्त्वात्। तथा पीतमम्बरमिति भ्रमात्मकं तामसं ज्ञानं शुक्ताविदं रजतमिति ज्ञानवत्। ननु रविकरा एकादशाङ्गुलसूर्यबिम्बस्योदयास्तं गच्छतस्तन्निष्ठनारायणस्य भवन्तीति राजसतामसत्वं कथं नारायणस्य सात्त्विकत्वादिति चेन्न। तमसः पारे विराजमानस्य द्वितीयस्कन्धोक्तसत्त्वादिषु मायारूपपीताम्बरे सत्त्वस्यानुपयोगाद् द्वितीयतामसराजससम्बन्धग्रहणात्। अन्नस्येति पृथिव्याः। 'पृथिवी वा अन्न'मितिश्रुतेः। सत्त्वसम्बन्धाभावे हेतुमाहुः व्यामोहिकेति। तथा च सत्त्वसम्बन्धे नीलमपि रूप प्रतीयेतेति भावः। लयेति भगवति दृष्टेपि विषयेषु मनोलयः विषयत्वेन भगवद्ग्रहणात्। चित्तविक्षेपोपि भवति। सुवर्णग्रहणे। आकाशे तथा दर्शनात्। तेन मायाप्राबल्यम्। चिक्रीडिषया। पीताम्बरमित्यनेन यशो निरूपितम्। 'यशो यदि विमूढानां प्रत्यक्षासक्तिवारणा'दित्युक्तलक्षणकम्। कारागृहे श्रीवसुदेवस्य वैचित्र्यसम्भवात् मूढानां प्रत्यक्षे स्वमोचनादिविषयकज्ञाने आसक्तिवारणात् 'स्वधर्मं' दिव्यचक्षुरादियोजनाल्लक्षणसङ्गतिः। सान्द्रो हीत्यादि 'सान्द्रं घनकाननयोर्मृदा'-विति विश्वः। घनकाननमृदावर्थे। सान्द्रपयोदस्येव सौभगं कान्तिर्यस्य स तथोक्तः, तमित्यत्र सौभगपदार्थमाहुः परमानन्दस्येति। ननु परमानन्दः कालः प्रद्युम्नो वात्रेति चेन्न। 'कालदेहः प्रद्युम्नः' इत्युक्तम्। काल आनन्दमय इति कालविशेषणं परमानन्दस्येति। पूर्वमिति अत्र टिप्पणी, पूर्वमिति निबन्ध इति शास्त्रार्थनिबन्धे। रूपवद् द्रव्यमिति रूपविशिष्टं द्रव्यम्। रूपद्रव्यमाकाशम्। नीरूपो नील आकाश इति रूपं द्रव्यमिति कर्मधारयः। तथेति चक्षुः कर्तृ। अतिगाढमिति दृढम्। यथा गाढं जलं नीलं वियति विक्षेपे शुक्लम्। अतिगाढमप्यगम्भीरं छिल्लरं जलं शुक्लं भवतीति गम्भीरतयाऽगाधतयेत्युक्तम्। आकाशेन नील-

रूपत्वमुक्तम्। कालेन नीलरूपत्वमाहुः तत्तद्युगेति। तादृक्ताहगिति 'कृते शुक्लश्चतुर्बाहु'रिति 'आसन् वर्णास्त्रयो ह्यस्य गृह्णतोऽनुयुगं तनू'रिति च तादृक्तादृग्रूपत्वात्। तद्वदिति स्फटिके जपाकुसुमारुणिमेव। भूम्या नीलरूपत्वमाहुः भूमेर्नीलेति। 'यत् कृष्णं तदन्नस्ये'तिश्रुतेः। वैकुण्ठेन नीलरूपत्वमाहुः शुद्धस्येत्यादि। अयं च प्रकारो निबन्धे त्रुटितः। उपलक्षणविधया व्याख्यातो ज्ञेयः। तदेव स्फुटीकुर्वन्ति अथचेत्यादिना। अंशावतारेत्यादि आकाशनीलः अंशस्य जीवस्याक्षरस्य, कालनीलः अवतारस्य अध्यायार्थस्य, 'कालोसि लोकक्षयकृत् प्रवृद्ध' इति देहविषयश्च भूमिनीलः विभूतिरूपव्याहृतेः, वैकुण्ठनीलः अवतारस्य लोकरूपस्याक्षरस्य, तथा च अंशः अवतारः विभूतिरूपं अवतारश्चेति द्वन्द्वः, एते विषया यस्य तत्त्वात्। अस्य प्रकारचतुष्टयस्य। निरूपयिष्यत इति यथा 'इदानीं कृष्णतां गत' इति, कृष्णता स्वाभाविकी, अन्यतिरोभावेन यथा जीवे चिदंशः प्रधान इतरयोस्तिरोभावः, तथा च 'प्रवर्तते यत्र रजस्तमस्तयोः सत्त्वं च मिश्रं न च कालविक्रम' इति सिद्धान्तोक्तशुद्धसत्त्वनीलो वास्तविक इत्युक्तम्। तस्य धर्मा इति सुबोधिनी 'नीलवर्णस्य धर्मा' इत्येवं स्पष्टार्थेति न व्याख्याता। यस्तु स्वकाल इत्यादि सुबोधिनीं व्याख्यातुमाहुः यस्तु स्वकाल इत्यादीति। जन्मप्रकरणे भगवतः फलत्वात् फलांशे परोक्षवाद इति फलांशे परोक्षवादमाहुः परोक्षवादत्वेनापीति। अत एवेति लीलाकालस्य पारोक्ष्येण विवक्षितत्वादेव। अन्यथा प्रावृट्काल इति वदेयुरिति भावः। अन्नोत्पादक इत्यस्य परोक्षवादः। नूतनरसोत्पादक इति 'दिनान्त' इतिपदात् तथा। आदिनान्यदपि। अग्रिम इति तापनाशक इत्यस्य परोक्षवादः स्पष्टः। सान्द्रः पयोद इति तस्येव सौभगं यस्येति ज्ञेयम्। एवमेवेत्यादिसुबोधिनीतात्पर्यमाहुः एवमित्यादिनेत्यादिना। अनेन प्राकट्यनिमित्तभक्तदुःखनिवारकधर्मस्य सर्वानिष्टेत्याद्युक्तस्य वसुदेवकर्तृकदर्शनविषयत्वमुच्यते। स्वतोऽविषयत्वात्। विशुद्धसत्त्वात्मकत्वेपि वसुदेवस्य 'न वन्नाथेपवर्गे मे मोहितौ मम मायया' इति वाक्ये मोहकथनात्। अतो 'देवभोग्या सुधे'यम्। द्वितीयस्कन्धनवमाध्याये 'विषयते'त्युच्यते। 'ब्रह्म पुच्छं प्रतिष्ठे'ति ब्रह्मणः पादत्वमुक्तम्। भृगोर्ब्रह्माधारवतोत्र पादः प्रतिष्ठित इत्युक्तम्। पादः पृथिवी। भुवनत्रयपक्षे। एवं च श्रीवत्सो ब्रह्म, पाद इति यावत्। उपपादयन्ति स पुरुषोत्तमेति। तत्त्वेनेति अक्षरवत्त्वेन। मूलकारणेति 'अक्षरात् सौम्य विविधाः भावाः प्रजायन्त' इति श्रुतेरक्षरः श्रीवत्सः। अत इति शेषः। तस्येति श्रीवत्सस्य। नैतावता 'श्रीवत्सलक्ष्म'मित्यत्र साक्षाच्छ्रियाः लक्ष्मत्वं येन पृथिवीविषयि ज्ञानं तद्विषयणीच्छा तदनु पृथिवीप्रतीतीच्छयोच्चरितत्वम्। वक्तुः शुकस्येच्छा वा पृथिवीप्रतीतिविषयिणी न स्यात् तात्पर्यरूपा। तत्प्रतीतीच्छयोच्चरितत्वं तात्पर्यम्। वक्तुरिच्छा वा तात्पर्यम्। अत आहुः वस्तुतस्त्विति। स इति श्री-

वत्सः। अन्यथा श्रीर्यथा तपः कृत्वा वक्षःस्थानं प्राप्ता तथा भूमिः हिरण्यगर्भद्वारा सर्वानिष्टनिवृत्तिपूर्वकसर्वेष्टकर्तारं प्राप्तेति प्रतीतीच्छया वक्तुरिच्छया वा 'श्रीवत्सलक्ष्म'मिति विशेषणं नोक्तं स्यात् श्रीशुकेनोक्त'भूमिर्दृप्तनृपव्याजे'तिप्रसङ्गेन। जानातीच्छति यतते इति नैयायिकोद्घोषात्।'यन् मनसा ध्यायति तद् वाचा वदती'तिश्रुतेः। किञ्च, स्वरूपलक्षणबाधितं श्रीघटितं लक्षणं न ब्रूयाच्छुकः। गौणमुख्यन्यायेनाप्याहुः ब्रह्मानन्दरूपत्वादित्यादि। तद्रूपमिति ब्रह्मानन्दरूपम्। 'उरो वत्सं च वक्षश्चे'ति कोशाद् 'वत्स'पदं वक्षो वाचकं तत्पक्षे लक्ष्मपदासङ्गतिः। श्रौतेन स्वरूपलक्षणेन विग्रहमात्रेनास्य विग्रहस्य बाधात्। एवं 'श्रीवत्स'पदे व्याख्यातब्रह्मरूपायाः भृगोः पादरूपायाः पृथिव्याः सर्वानिष्टनिवृत्तिपूर्वकसर्वेष्टकर्तृत्वमुक्तम्। 'गलशोभिकौस्तुभ'मित्यस्य विशेषणस्य तात्पर्यं स्वर्गस्य सर्वानिष्टेत्यादावाहुः कौस्तुभव्यपेति। तथेति व्याहृतिरूपभगवतो द्यौः शिरः अतः स्वर्गस्य सर्वानिष्टनिवृत्तीत्यादौ तात्पर्यमित्यर्थः। तेन कौस्तुभव्यपदेशेनेत्यादिवाक्यज्ञानवतः शुकस्येच्छातात्पर्यलक्षणघटिका बोध्यात्र। 'पीताम्बर'मितिविशेषणस्य तात्पर्यं धर्मस्य सर्वानिष्टेत्यादावाहुः भूरूपेति। नरको हि धर्मग्लानिजनकः भूस्थः तस्यावरणे ग्लानिनिवृत्त्या तथात्वं धर्मस्य सर्वानिष्टेत्यादौ तात्पर्यमित्यर्थः। अत्र 'यदा यदा हि धर्मस्य ग्लानिर्भवति भारत अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यह'मितिगीताज्ञानवतः शुकस्येच्छातात्पर्यलक्षणघटिका बोध्या। 'सान्द्रपयोदसौभग'मिति विशेषणस्य तात्पर्यं भक्तानां सर्वानिष्टेत्यादावाहुः प्रावृट्घनेति। सुबोधिन्याम्, सर्वत्रेत्यादि, अग्रे हेतुः प्राकृतेति। सान्द्रपयोदोपमा।

१०–३–१०. महार्हेत्यत्र वीर्यक्रीडां धारयितुं श्लोकार्थं स्मारयन्ति स एवं मूलभूत इति। एवं श्रीवत्सलक्ष्मलक्षणे 'तमद्भुत'मित्याद्युक्तमूलभूते ब्रह्मणि 'वस्तुतस्त्वि'त्यादिटिप्पण्युक्तदिशा ब्रह्मानन्दे स्थित्स्वेत्यर्थः। 'गलशोभिकौस्तुभ'मित्यस्यार्थमाहुः स्वांशानिति। 'पीताम्बर'मित्यस्यार्थमाहुः भूमिष्ठानिति। व्यामोहः पीताम्बररूपमायाधर्मः। 'सान्द्रपयोदसौभग'मित्यस्यार्थमाहुः तेभ्य इति। अनुगृहीतेभ्यः प्रमेयबलेन। चतुर्विधेति भुजाभिप्रायेण। तत्रायुधेषु पृथिव्याः सभार्यायाः भारदूरीकरणेन कामः धर्मो वा गदया स्थापितः, 'अस्रतेजः स्वगदये'तिवाक्यात्। 'गदा सा कालिका साक्षात् सर्वशत्रुनिबर्हणी'ति उपनिषदि। पद्मेन स्वदेहरूपेण तु कंसतृणावर्तादौ भुवनभारदानात् अर्थः। शङ्खनापां तत्त्वेन सर्वशुद्ध्या कामः। अद्भिः शुद्धिः प्रसिद्धा। चक्रेण मोक्षः। 'ये ये हताश्चक्रधरेण राज'न्नितिवाक्यात्। तत्रेति भगवत्स्वरूपे। सर्वशास्त्रेति वेदवेदान्तयोः। ज्ञानक्रिये। साङ्ख्यादिषु प्रकारभेदाः। सांख्ययोगयोः असङ्गत्वम्। पञ्चरात्रे चतुर्भुजत्वम्। पाशुपतशास्त्रे पशुपतित्वमिति सर्वशास्त्रे रूप्यन्तेऽभेदेन व्यवह्रियन्त इति

सर्वशास्त्ररूपाणि शब्दार्थरूपाणि । ज्ञानवैराग्येति ज्ञानत्वं स्वरूपात्मकत्वात् , किरीटादीनाम् । भक्तेः सह निगूढभावकरणे उपयोगात् वैराग्यं तदितरेषु । यशःश्रीवाचकपदाभावात् तन्नोक्तम् । तादृशवैडूर्येति राहुरूपम् । सप्तग्रहाङ्गीकारपक्षे द्वयाभावमाशङ्क्योक्तं उपलक्षणविधया केतुरपि । एवं पद्मरागः । त्विषेति राहुकेतुत्विट्स्वरूपोपाधिकी । 'स्वरोचिषा भारत सूतिकागृहं विरोचयन्त'मितिवाक्यात् । अत्र द्वितीयनवमाध्याये तत्र तमोनिषेधात् समाकर्षाधिकरणोक्ताकृष्टार्थस्तमःपदस्य विवक्षितः । वसुदेवस्तत्र स्थित ऐक्षत एव पुनस्तत्कथनेन योर्थोद्भुतरूपस्तमाहुः परिष्वक्तानीत्यादि । किमेतावता तत्राहुः भगवन्मुखनिरीक्षका इति । अत्र टिप्पणी अत्रापि तद्रूप इति मौलौ किरीटरूपः । अवगम्यत इति शास्त्रप्रायपाठादवगम्यते । तथात्वमिति शास्त्राभिन्नत्वम् । यद्वा, तेषां कुन्तलानां तथात्वं भगवन्मुखनिरीक्षकशास्त्राभिन्नजीवत्वम् । रुचिस्तु तात्पर्यरूपा । अयुक्तेति भक्त्यभावादयुक्ता । भगवन्मुखेति भक्तिरूपभगवन्मुखेत्यादिः । भक्तिज्ञानमात्रं भक्त्योक्तम् । सुबोधिन्याम् भगवन्मुखामोदेति भक्त्यामोदतज्ज्ञनकसाधनशास्त्राणि तेषां पानं समवधारणं पानं अनुभवार्थमन्तःप्रवेशनं तत्र रता इत्यर्थः। 'पुण्यस्य कर्मणो दूराद् गन्धो वाती'तिश्रुतेर्भक्त्यामोदः । भक्ताविति मुखारविन्दरूपभक्तौ सत्याम् । अन्यदा तु अपरितः। चकासु दीप्तौ। अथ वैराग्यमाङ्ख्ययोगे तु ज्ञानं फलं निबन्ध उक्तम्। दैवगत्यानुग्रहेण भक्तौ तु फलभक्तिरूपभगवन्मुखामोदपानरताः तद्गताः सारूप्यमुक्तिं प्राप्ताः कमलगताः षट्पदा इव भवन्ति । टिप्पण्याम् फलमिति मुखारविन्दसायुज्यं सारूप्यमुक्तिगतानाम् । वेदसाङ्ख्ययोगानामितिसुबोधिनीं विवृण्वन्ति स्म अर्हस्येत्यादिना । शिष्यनिष्ठभगवद्भक्त्या प्रसन्नः शास्त्रत्रयाभिन्नः । तादृश इति यथा महापौरुषिकत्वेन प्रसीदन् शुकस्तथा। तथोक्तमिति वैडूर्यरूपेणोक्तम्। महार्हत्वेन वैडूर्यं निरूपितं वा। इदं चेति भगवन्मुखामोदपानम् । तथा विशेषणमिति 'महे'तिविशेषणम्। उक्तसायुज्ये काममार्गीयकामप्राप्तेस्तत्र स्थितिरयुक्तेति भक्तिशावल्यमाहुः कुन्तलानामिति । भक्तिप्रेति 'श्रेयोभिर्विविधैश्चान्यैः कृष्णे भक्तिर्हि साध्यत' इतिवाक्यात्। सुबोधिन्याम्। शास्त्रिणां मुक्त्यनन्तरं षट् शास्त्राण्याहुः वेदे काण्डद्विनयमिति । षट्पदत्वार्थमुक्तम्। 'त्रय्या चोपनिषद्भिश्च साङ्ख्ययोगैश्च सात्वतैरुपगीयमानमाहात्म्यं हरिं माऽमन्यतात्मज'मित्यत्र द्वे शास्त्रे, अन्यत्र वेदान्ते भेदाभावरूपमद्वैतमिति साधनेन मुक्त्यनन्तरम्। सात्वते मुख्यतया विष्णुशिवपरत्वमिति साधनेन मुक्त्यनन्तरम्। टिप्पण्याम् एतेष्वेनानीति। मुक्तजीवेषु एतानि त्रीण्येव तानि षट्पदानि । तत्प्रयोजकमित्यादि कुन्तलानेकत्वप्रयोजकम् । आक्षेपोर्थापत्तिः । लौकिकज्ञानेत्यादिसुबोधिन्यां तु स्वरूपार्थानुस्यूततया लौकिकज्ञानं शास्त्रत्रयोत्थं प्रपञ्चसम्बन्धि शास्त्रीयत्वेन रूपेण लोके-

ऽनेकविधतां प्राप्तं भगवद्विषयकं ज्ञानम्, तद्विसारणे पपञ्चविस्मृतिर्जाता, तत्पूर्वकभगवद्‍दासक्तिः परिपूर्वकप्वञ्जधातोरर्थः। तु० आ० अनि० प्वञ्जिः। भगवतो निरोधस्तु वर्तते एव। लोके ज्ञानमिति शास्त्रयोरर्थं लोके ज्ञानं 'महार्हवैडूर्यकिरीटकुण्डलत्विषे'त्यनेन निरूप्य ज्ञानक्रिययोः काण्डार्थयोः द्वितीयं निरूपयतीति स्पष्टार्थेति तां विहाय कर्माण्यनन्तानीत्यादिसुबोधिनीं विवृण्वन्ति स्म त्रयाणामित्यादि। दशगण्युक्तकर्मणां भ्वादेराकृतिगणत्वेन बहुविधत्वेपि पुराणे मायायाः व्यापारत्वेन तस्या गुणत्रयसाम्यावस्थारूपत्वेन गुणत्रयकार्येषु गुणत्रयरूपकर्ममुख्यत्वं, तत्र द्रव्येषु कर्मत्वं कथमित्यत आहुः भूमावेवेति। तद्रूपकख्यामिति 'कर्ता कर्म च करणं च त्रिविधः कर्मसङ्ग्रह' इत्यत्र कर्तरि पञ्चविधे'धिष्ठानं तथा कर्ता करणं च पृथग्विधम्, विविधाश्च पृथक् चेष्टा दैवं चैवात्र पञ्चमम्, तत्रैवं सति कर्तारं आत्मानं केवलं तु यः पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मति'रित्यधिष्ठाननिवेशात् कर्मरूपकख्यामित्यर्थः। एकरसत्वाद् युक्तम्। द्रव्यत्वेपि वेदान्ते। प्रतिष्ठितत्वेनेति पूर्ववद् द्रव्यत्वेपि कर्मत्वं वेदान्ते। सुबोधिन्याम्। जनयिष्यन्तीति कर्मणः सजातीयोत्पादनस्वभावत्वाज्जनयिष्यन्ति। काञ्च्यां अद्भुतत्वं तमोरूपत्वं चाहुः लोके काञ्चीति। उद्दामेति 'अच्प्रत्यन्ववपूर्वात् सामलोम्न' इत्यत्राजिति योगविभागादच्। प्रतिसाममित्यादिवत्। टापि उद्दामा। हिंसेति हिंसाप्रचुरं कर्म तामसम्। तामसत्वं द्वितीयनवमाध्यायसिद्धान्तविरुद्धं मत्वाहुः न लोकेति। लौकिकदुःखनिवर्तकत्वात्। अनेनाभासोक्ता वैराग्यरूपता स्फुटीकृता। लोकदुःखनिवर्तकत्वं वैराग्यम्। हरेरपि हरित्वे वैराग्य उत्कर्षः। दृष्टानुश्रविकविषयवितृष्णसंज्ञं वैराग्यमर्थात् सिद्धम्। तत्रेति काम्यकर्मसु। तानीति कर्माणि। नित्यकर्मसङ्ग्रहायाहुः उत्कृष्टानि चेति। अलौकिकानि नित्यानि। भगवद्रूपाणि। तत्र निरूपितानीति काञ्च्यां वैदिककर्मणि उपकरणानि। 'तत्साधनानि स हरिः प्रयाजादिस्रुगादि य'दितिसिद्धान्तात्। अङ्गदानां सात्विकत्वे हेतुमाहुः अङ्गं चलीत्यादि। न च तामसत्वम्। दो अवखण्डने इति धातुपाठेऽवखण्डने शक्तेः। सात्विकबाहंशेवस्थानात्। भगवतः फलत्वेनाद्यमनोरथस्य सिद्धत्वात् साध्ये आद्यमनोरथे पूर्वदेहावखण्डनेऽङ्गदं सात्विकं फलम्। 'यत् तदग्रे विषमिव परिणामेमृतोपमम् तत् सुखं सात्विकं विद्यादात्मबुद्धिप्रसादज'मिति गीतायाः। इति हेतोः सात्विकं भवतीति शेषः। 'अलौकिकस्य दाने हि चाद्यः सिध्येन् मनोरथ' इति सेवाफलग्रन्थे। कङ्कणं निरूपयन्ति स्म राजसं तदिति। कङ्कणम्। राजसं कर्मबहुलं कङ्कणम्। सात्विकराजसयोरिति यावत्पर्यन्तं कङ्कणचलनं बाहौ तावद् राजसं कङ्कणं बाहुश्च। अङ्गदस्थानापेक्षया कङ्कणस्थाने कर्मबाहुल्यात् तद्भिन्नं सात्विकं स्थानमङ्गदस्थानम्। एवं च सात्विकराजसयोरेकबाहोरंशद्वयोरित्यर्थः। भेदरूपा मायात्र कृपा। अन्यस्या निषेधात्।

कृपायां गुणत्रयं द्वितीयस्कन्धोक्तम्। द्वन्द्वान्ते श्रूयमाणं प्रत्येकमभिसम्बध्यते तदादायाहुः अङ्गदस्थानीयानीति। अन्यानीति अङ्गदोत्तरं सम्बद्धादिशब्दार्थः। काञ्चीसम्बद्धादिशब्दार्थमाहुः क्षुद्रघण्टिकेति। 'आदि'शब्देन चरणभूषणानि। धर्ममार्गेति प्रभुबाहवो धर्मरूपाः क्रियारूपत्वात्। वसुदेवज्ञानमिश्रीभावे मार्गत्वम्। भगवद्धर्माणां क्रियारूपाणाम्। अन्यथा भगवद्धर्मत्वमेव। एकादशसुबोधिन्यां तथोक्तेः। तद्धर्मिभिः। तेन क्रमेण वसुदेवदर्शनविषयत्वं 'तमद्भुत'मित्यादिविशेषणोक्तानामर्थानाम्। भगवद्रूपाणां जन्मनि सङ्ख्यातात्पर्यमावश्यकमिति तद् वदन्त एव जन्मप्रकरणव्यतिरिक्तस्थले 'यतो वाच' इति श्रुते'स्तमद्भुत'मित्यादिकथनं युक्तमित्याशङ्क्य तत्र गमकमाहुः वेद इत्यादि। तथा च जन्मप्रकरणेपि हरिरेव नारायणस्तत्समानयोगक्षेमत्वात् कृष्णोपि। हरिवंशे पुष्करप्रादुर्भावसमाप्ताविदं पद्यम्। तथापि नारायणपरमिति वेदपुराणसम्मतम्। किमर्थमिति श्रीभागवतत्वेपि शब्दत्वात् प्रत्यक्षामूलत्वे किमर्थमित्यर्थः। यतो वेदेपि ब्रह्मण आर्षं वर्तत इति किमर्थमुच्यत इत्यर्थः। तत्पूर्वोक्तानामिति ते पूर्वोक्ता धर्माश्चेति द्वन्द्वः। अलौकिकत्वमिति अद्भुतत्वसमानाधिकरणम्। वसुदेव इति भगवदधिष्ठानं ज्ञानरूपः। मंस्यत इति लोकः। उभयार्थमिति लौकिकालौकिकत्वार्थम्। शुक आहेति दर्शनाङ्कनार्थकमैक्षतेतिपदमाहेत्यर्थः। वसुदेवस्य तत्समये तथाज्ञाने प्रमाणमाहुः एतद् ज्ञानमिति। तथा च प्रमेयबलमिदमिति भावः।

१०-३-११. स विस्मयेत्यत्र भगवन्तमिति अङ्गदप्रधानमिति बोध्यम्। शुद्धसत्त्वात्मक इति विशेषणं कर्मानर्हदेहव्यावर्तकम्। साङ्गदभगवदनुभावेन कर्मार्हदेहोत्पादनम्। तेन शुद्धसत्त्वात्मको जातः। तत्कार्ये इच्छाद्वारा क्रिया। यदा तु शुद्धं सत्त्वं न ज्ञानं तदा साक्षाज्ज्ञानं च। कारागृहे क्रियाज्ञानप्राकट्ये हर्षो हेतुः। हर्षे पुत्रजन्म हेतुः। कर्मणीति जातकर्मणि। एतस्यैव विवरणं आसमाप्ति। इदं कर्म यथाकालम्। न मुख्यं हर्षहेतुकम्। अर्थीति भगवत्प्रादुर्भावार्थी। गीतायामर्थार्थी। विद्वदादयोग्रे स्पष्टाः। नैमित्तिकमिति नित्यकाम्यनैमित्तिकेषु कर्मसु। कारागृहे कर्मबाधादाहुः तस्येति। जातकर्मणः। भगवन्निष्ठ इति भगवति निष्ठा स्थितिर्भक्तिर्वा येन स तथोक्तः। 'स विस्मये'त्यत्रोत्फुल्ले विस्मयो हेतुस्तच्छाभाय स इति भिन्नं पदम्। एतत् सर्वेति दानस्तोत्रस्वाधिकाराणां परिज्ञाने। पूर्वोक्त इति ईक्षणकर्तृत्वेनोक्तः शुद्धसत्त्वात्मकः। अलभ्यलाभादित्यादि एतेनार्थितोक्ता। विस्मय आश्चर्यम्। पूर्वमिति 'वसुदेवगृहे साक्षाद् भगवान् प्रकृतेः परः जनिष्यत' इति वाक्ये श्रुतम्। विद्वत्ता सुतविषयकज्ञानवत्ता। गीतायां ज्ञानी। ननु कर्मविद्वानधिकारी, न तु हर्षद्वारा निमित्तसुतं विद्वानित्यत आहुः निमित्तज्ञानेनैवेति। निमित्तं सुतं तज्ज्ञानेनैव, न तु पृथक्तया। नैमित्तिकं सवनकर्म

ज्ञातम्। करणात् ज्ञानेन स्पष्टं भविष्यति। ततो निमित्तसुतविद्वान् कर्मविद्वानधिकारी। नेदुरिति तेन गीतायामार्तोधिकारी। 'अतप्ततनुर्न तदामोऽश्नुत' इतिश्रुतेः। सम्यक् भ्रमो यस्येति अत्र टिप्पण्याम् भगवच्छास्त्रेणापर्युदस्त इति श्रीभागवतेन अपर्युदस्तः, अतोधिकमस्तः। कारागृहेपि। स्मृतिशास्त्रे न त्वधिकाराभावादधिकमस्तः। पर्यनर्थकः 'अपपर्यनर्थका'वितिसूत्रात्। सुबोधिन्याम्। तथाधिकार इति कारागृहे स्मृतिशास्त्रेणाधिकाराभावेपि हर्षकृतोऽधिकारः। एवमङ्गचतुष्टयं विवृत्योक्तश्रद्धाङ्गं विवृण्वन्ति स मुदेतीति। सूचितार्थो मुदेत्यस्य भक्तिस्तयेत्यर्थः। 'श्रद्धा रतिर्भक्तिरनुक्रमिष्यती'ति वाक्याच्छ्रद्धा भक्तेः पूर्वरूपम्। 'अयुत'मित्यस्यार्थः दशसहस्रमिति। एवमेवेति स्नानं विनैव। हर्षजलेनैवेति न तु नेत्रजलमात्रेण।

१०-३-१२. अथैनमित्यत्र इत्याशङ्क्येति तेनाशङ्काग्रन्थे कारागृहेऽप्राप्तापि जातसंस्कारोक्तिर्न विरुद्धा। प्राकृत इति प्राकृत एव पुत्रे जाते तस्य पुत्रस्य संस्कारः। कृतधीत्वात्। कर्मसमाप्तिमिति हर्षजलाप्लवनान्तं कर्म मानसम्। अवभृथान्तकर्मवत्। तदनन्तरमित्यथशब्दार्थः। पुत्रत्वेनेति 'देवक्या'मितिश्लोके प्रद्युम्नाविर्भावस्योक्तत्वादित्यर्थः। पूर्वोक्तेति 'त'मित्यादिपूर्वश्लोकद्वयोक्तवर्णनप्रकारेण। तथात्वमिति अभिनन्दननताङ्ग कृतधीत्वम्। प्रमाणसिद्धमिति शास्त्रसिद्धम्। द्वेष्टुरामुष्मिकानिष्टजननम्। अग्निं प्रत्युक्तिर्या घोरा तनुः तया तान् प्रति गच्छ योस्मान् द्वेष्टि यं च वयं द्विष्म इतिशास्त्रं वेदः। भारतेति भरतोऽत्यगान् मायामिति। कापट्याभावाद् विश्वासः, तदर्थम्।

१०-३-१३. विदितोसीत्यत्र द्वादशात्मेत्यादि, अत्र टिप्पणी, द्वादशधा प्रादुर्भाव इति क्रमेणेत्युक्तम्। तद्रूपेति भगवद्रूपे दृशो ययोस्ताभ्याम्। पूर्ववदिति 'त'मित्यादिश्लोकद्वयवत्। त्रिधेति दशश्लोकैर्वसुदेवः अष्टभिर्देवकीत्यष्टादश श्लोकाः स्तुतौ, तदग्रे स्पष्टम्। स्तुत्योरिति दशभिरष्टभिश्च कृतयोरित्यर्थः। वैदिको लौकिक इत्यत्रावृत्त्या विशेषणं स्मृतेर्लोकवेदात्मकत्वादित्याहुः वैदिको लौकिक उच्यत इत्यनेनेति। आहुरिति कारिकाद्वयेनाहुः। 'भगवा'नित्यस्यार्थमाहुः षड्गुणैश्वर्यवानिति। षड्गुणाः तद्दाता धर्मोप्युक्तः ऐश्वर्यरूपः। शेषं पूरयति स साकारेति। ऐश्वर्यकृतः। तन्त्रे पञ्चरात्रे। फलितमित्यादि अवान्तराभासः। इदमेवेति न नवविधोपदेशोक्तं, वेदमार्गत्वेन तन्त्रत्यागापत्तेः। नन्विति अवान्तराभासः। तत्रेति वेदे। अत्र त्विति तन्त्रे त्वित्यर्थः। तथेति भाव इति तन्त्रं वेदेन सम्मितमित्यर्थः। त्रिधात्व इति अष्टश्लोकैः कृतायास्त्रिधात्वे। लौकिको हरिर्यस्त्रिगुण इत्यत्र गुणपदार्थमाहुः अत्र गुणेति। प्राकृतेति प्राकृतगुणवाची। मा तथेति तन्त्ररूपा स्मृतिर्लौकिकी लोकैर्भगवद्व्यतिरिक्तैः ऋषिभिः प्रणीतेत्यर्थः। अत आधिदैविकादिरूपपरो गुणशब्दोष्टश्लोकेषु। त्रिधेति मुख्यव्यवहार

इति भावः। लौकिकस्यैवेति शास्त्रदृष्ट्या दर्शनविषयस्येति ज्ञेयम्। अत एवेति त्रित्वादेव। अनुवदन्तीति भक्त्यानुवदन्ति। मुख्येति त्रिधाऽष्टधयोर्मुख्या। एकेन प्रार्थनमिति कारिकायां एकेनेत्यादेरर्थ उक्तः। त्रिधेत्यत्र पञ्चत्वाय देवकीस्तुतौ द्वयमाहुः द्वाभ्यां चेति। तदर्थमाहुः मर्त्यो मृत्स्विवत्यादि। पर्यवसानत इति प्रपत्तिः विरोधपरिहारश्च तत्र प्रतीयेते पर्यवसानतः स्तुतिरूपं अपरमित्यर्थः। पर्यवसानतः स्तुतिप्रतिपादकाभ्यामिति चकारार्थः। एवं च एकेन वसुदेवस्तुतौ प्रार्थनं, पूर्व नवभिः श्लोकैः पूर्वम्। तेन वसुदेवस्तुतौ दश श्लोकाः इत्यर्थः। त्रिधा देवकीस्तुतौ त्रिभिराधिदैविकादिभिः द्वाभ्यां श्लोकाभ्यां च पर्यवसानतः स्तावकाभ्यां अपरं प्रार्थनात् तथा अपरं स्तुतिरूपमेव न तु प्रपत्तिविरोधपरिहाराभ्यां परिसमाप्तार्थौ श्लोकौ। सिद्धमाहुः दशभिरित्यादि। पञ्चभिरिति द्वौ श्लोकौ आधिदैविकादित्रयं चेति पञ्च तैरिति कारिकार्थः। फलितमिति 'अपि संराधने प्रत्यक्षानुमानाभ्या'मिति व्याससूत्रम्। उभाभ्यामिति शास्त्रप्रत्यक्षाभ्याम्। तथेति दृढीकृतः। आवश्यकत्वमिति दृश्यमानस्य ब्रह्मत्वार्थम्। बाधकमितीति अन्यथाज्ञानं प्राकृतत्वेन ज्ञानं, अज्ञानं ब्रह्मत्वेन, एतदुभयं ब्रह्मत्वे बाधकम्। ब्रह्मसाक्षात्कारे ह्यज्ञानमन्यथाज्ञानं च न तिष्ठतीति भावः। शास्त्रप्रत्यक्षाभ्यां तन्निरूपणाभावे एतयोरन्यथाज्ञानमज्ञानं वा शङ्क्येत, तथा च दृश्यमानस्य ब्रह्मत्वं न सिध्येदित्यर्थः। हेतुत इत्यस्यार्थमाहुः उभयोर्हेतुरिति। अज्ञानान्यथाभावयोर्हेतुः। आदिना प्राकृतत्वज्ञानम्। तस्मादिति हेतुतः। सुबोधिन्याम्। तत्रेति ब्रह्मत्वे साधनीये। प्रथममिति बाधकशङ्काभ्यः प्रथमम्। बाधकधर्मैरिति ब्रह्मत्वे बाधकमज्ञानमन्यथाज्ञानं च तद्धेतुभूतैर्धर्मैरित्यर्थः। चाक्षुषत्वनिमित्तेति चाक्षुषत्वस्य निमित्तं लोकद्वारा व्यवहार्यो भविष्यामीतीच्छा तदन्तर्गता ज्ञातस्वरूपो भविष्यामीतीच्छा तस्या अज्ञानात्। ज्ञातस्वरूपेति ज्ञातस्वरूपो भविष्यामीतीच्छयेह ज्ञातस्वरूपाभ्यां कृते स्तोत्रे इत्यर्थः। जानातीच्छति यतत इत्यनुक्रमात्। ताभ्यां ज्ञातस्वरूपस्य स्तोत्रे इति वा। विदित इति पुरुषोत्तमत्वेन स्मृतः। सम्यगिति ज्ञाने सम्यग् यथा भवति तथा। अयं परः पुमान् कुक्षिगतो यश्छान्दोग्याष्टमोपदेशोक्तोतो भक्तानुग्रहाय चतुर्भुजः। धर्मग्लानिभक्तदुःखादिजन्या कारणम्। भक्तमनोरथपूरकत्वात्। यद्वा इति शङ्कराचार्यप्रभृतयः। ज्ञातस्वरूपत्वं व्युत्पादयन्ति स यस्त्वित्यादि। अत्र टिप्पणी। सुबोधिनी। चतुर्भुज इति तेनावतारविषये माध्वमतेन भागत्यागलक्षणेति भावः। सिद्धान्ते विरुद्धधर्माश्रयः अद्भुतः। इत्यर्था स्फुटेति न व्याख्याता, यस्त्वित्यारभ्य प्रयोगान्तं व्याख्यातं अत्रेयं ज्ञेयमिति। छान्दसः प्रथमपुरुषस्थाने मध्यमपुरुषप्रयोग इत्यनुक्त्वा व्याकरणोक्तरीत्या पादस्यभेददोषेण यत् सुबोधिन्यां व्याख्यानं तस्मिन् प्रत्यक्षव्याख्याने एवं वक्ष्यमाण-

प्रकारेण ज्ञेयमित्यर्थः। छान्दसत्वकल्पनापेक्षया शब्दबलविचारकाणां 'भवान् असी'ति-पदाभ्यां वाक्यभेदपक्षो ज्यायान् बाह्याभ्यन्तररूपनिरूपक इति व्याकरणस्मृतिः प्रबलेति हेतोः। किञ्च भवान् उत्पत्तिसामयिको विदितः। भवतेरुत्पत्त्यर्थकस्य षड्भावविकारेषु प्रथमस्य वाक्यभेदेनोक्तिः। असिपदेन द्वितीयभावविकारः। स स्थितौ अस्तिपदवाच्यायामिति न वाक्यभेदो दोष इत्याशयेनाहुः असीति व्यवहार इति। 'व्यवहारस्त्वहमिति ममेत्युद्भव या मतिः'। स्थितावपीति द्वितीयभावविकारेपि। व्यवहारमात्रोक्तिरिति न तु युष्मच्छब्देनोपस्थितोक्तिः। स युष्मच्छब्देनोपस्थितः। तेन विना असीतिव्यवहारेण विना। तमिति युष्मच्छब्देनोपस्थितम्। अत एवेति स्थितौ अर्थाक्षेपादेव। सुबोधिनी। य इति चेतनस्थानीय इत्येवं स्फुटेति तां विहाय अध्याहारापेक्षाभावात् तदपेक्षाकथनारुच्या पक्षान्तरमाहुः वस्तुतस्त्विति। पुरुषत्रयरूपो वेत्यारभ्य पदत्रयमित्यन्ता सुबोधिन्यत्र व्याख्याता। सुबोधिन्याम्। अतः शास्त्रत इत्यादि बाह्याभ्यन्तरभेदेन वेदनापेक्षणाच्छान्दसत्वस्यानावश्यकत्वात्। शास्त्रतः आभ्यन्तररूपः लोकतः लोके दर्शने प्रत्यक्षतो बाह्यरूपः यः। अधुना भवान् विदितोसीति छान्दसप्रयोगेपि बाह्याभ्यन्तरभेदोपपत्तिरन्यथा पूर्वेण चारितार्थ्यमित्याशयेनाहुः अनेनेत्यादि। अङ्गग्रन्थेन। भवत्पदस्य द्वेधा व्युत्पादनेनेत्यर्थः। य इति भातीति भवानिति व्युत्पत्त्या यो भवानित्यर्थः। 'चतुर्भुज' इत्यत्र भवत्युत्पद्यत इति भवान्। शता लोकतो चेतनः। इत्युक्तमिति वेदोवयवीतिपक्षेप्युक्तम्। अथ वेति, अत्र टिप्पणी, भवच्छब्दसङ्गतीति आवृत्तिं विना तथा। देहरूपेणेति 'यथा दशमस्त्वमसी'त्यत्र। तदभीति भातेर्डवतौ तथा। अग्रिमेणेति पुरुषपदेन। भवानिति वेदाङ्गनिष्पन्नात् पश्चात् पुरि शेत इति पुरुष इति तथा। तेनेति भवत्पुरुषपदाभ्यामेकरूपत्वेनोभयोक्तिः चारितार्थ्यत्वेन। प्रतिज्ञायेति प्रतिज्ञाहेतूदाहरणोपनयनानि गमनानि पञ्चावयवा इतिवत्। सुबोधिन्याम्। सैन्धवदृष्टान्तन्यायश्छान्दोग्ये। उपसंहरिष्यन्निति वसुदेवः विशुद्धसत्त्वेऽवतारकारणे स्वसिद्ध्युपसंहरिष्यन्। 'एवं भवान् बुद्ध्यनुमेयलक्षणै'रितिश्लोकेनोपसंहरिष्यन्। तत्र स्वरूपमात्रमुक्तम्, बहिरन्तररूपोपसंहार उक्तः। अस्मिन् पक्षे एकेन प्रार्थनं पूर्वं बोध्यम्। असीतिक्रियायाः प्रतिज्ञायां निवेशात् सर्वदृगस्त्विति प्रार्थने लोडन्तक्रियाध्याहारात्। यद्वा। विदिते प्रतिज्ञाते ब्रह्मत्वं विराट्त्वाद्युपसंहरिष्यन् प्रापयन्। 'उपसंहारोर्थभेदा'दित्यादिव्याससूत्रात्। भवान् पुरुष इति भवान् विराट् पुरुषस्त्वण्डसंस्थितः अतः सर्वत्वं प्राप्तः। 'तृतीयं सर्वभूतस्थ'मितिवाक्यात्। तेन पूर्वोक्तः भवान् चतुर्भुजः महतः स्रष्टा बोध्यः। भारते सारं गीता। गीतायामपि विश्वरूपदर्शनाध्यायः सारमिति। उपसंहार्याधिभौतिकरूपमुक्त्वाध्यात्मिकं रूपमाहुः प्रत्यक्ष इति। स्वेच्छया प्रत्यक्षः आध्यात्मिक-

रूपो भवान् अप्रत्यक्षः पुरुष इति। आधिदैविकं रूपमाहुः सम्मुख इति। भक्तसम्मुखः भक्त्या प्रकटः भवान्। असम्मुखः पुरुषः व्यापकः। वेदान्तसारभागवतपक्षमुक्त्वा वेदसारभागवतपक्षमाहुः पुरुषत्रयेति। टिप्पण्यां व्याख्यातम्। असि भवानिति अत्रापि टिप्पणी समस्तं पदमिति असीति विभक्तिप्रतिरूपकमव्ययम्। तेन सह समासं प्राप्तमेकं पदम्। यथास्ति क्षीरा गौरित्यादावस्तीत्यव्ययं प्रथमपुरुषार्थे। तथासीत्यव्ययमपि मध्यमपुरुषार्थे। संहितायामापस्तम्बादि'रसि विष्णव' इत्याह,'अधस्तमसि विष्णवे त्वे'त्याह,'यज्ञो वै विष्णुः यज्ञायैवैनदद्दस्तं करोती'त्यनेन। तेन सुबोधिन्यामसि भवान् साक्षात्पुरुष इति पदत्रयं न व्याख्येयविरोधापादकम्। 'यस्यामतं तस्य मत'मितिश्रुतेरिति द्योतितम्। सुबोधिन्याम्। पुरुषपदकृत्यमाहुः पुरुषप्रवेशादिति। पुरुष आनन्दमयः पुरा आसेति पुरुषपदव्युत्पत्तेः। तस्य प्रवेशादित्यर्थः। त इति अन्नमयादयः। न स्वात्मस्फूर्ताविल्यादिः 'प्रकृतेः पर' इत्यस्याभासः। प्रकृतीति तेन परत्वं नियन्तृत्वं इत्युक्तम्। गुणानामिति त्र्यंशेष्वेकप्राधान्यं द्वयोस्तिरोभावः प्राकृतसत्त्वादिश्च तैर्गुणानाम्। मायाजीवेति 'आत्मानं त्रिगुणात्मकं परोपि मनुत' इति समाधिभाषायां मायाजीवाः, तेषां, आदिना जडानाम्। प्राकट्यकरणादिति कौस्तुभपीताम्बराभ्यां प्राकट्यकरणात्। प्रत्यक्षदोषस्त्वित्यादि अत्र टिप्पणी प्रत्यक्षविषय इति 'भवा'नित्यत्र भवतेरुत्पत्त्यर्थकस्य शतृप्रत्ययान्तस्य ग्रहणात् तथा। 'असी'ति षड्भावविकारेषु द्वितीय इत्येवकारः। उक्तव्यवहारेति प्रत्यक्षव्यवहारविषयस्य। उक्तरूपत्वमिति असि भवानित्युक्तरूपत्वम्। तत्परिहार इति इच्छया प्रत्यक्षदोषपरिहारः। शरीरप्रत्यक्षात् 'लोकद्वारा व्यवहार्यो भविष्यामी'ति भाष्ये सत्वात्। तयोरिति विदिताविदितयोः। अन्यदितिपदेन भेदमाह। वदद्व्याघात इति शब्देन विदिते भगवति विदितभेदे वदद्व्याघातः। यदादृश्यमिति अदृश्यमिति पदच्छेदः। उभयेति इन्द्रियसामर्थ्येनादृश्यत्वसिद्ध्या प्रभिच्छालक्षणेन दृश्यत्वधर्मसिद्ध्या। भाष्येनैकदेशिमतम्। सुबोधिन्याम्, तथा भविष्यामीति। प्रकृतेः परो भविष्यामीत्यर्थः। अनुभवानन्द इति ज्ञानानन्तानन्दः। अयोगोलके वह्निरिवेति पूर्वं उत्तरं चान्वेति चिदित्यनुभवविवरणम्। नन्वपरोक्ष उक्तदेह इति षड्विधत्वभङ्गमाशङ्क्याहुः आत्मा नोक्त इति बुद्धीः पञ्च ज्ञानेन्द्रियाणि, ज्ञानकारणानि वा। षड्विध इति त्रिगुणसच्चिदानन्दः। अयमिति वसुदेवज्ञानविषयः। प्रत्यक्षेति आदिशब्देनाप्रत्यक्षव्यवहारः।

१०-३-१४. स एवेत्यत्र तत्रेति उदरे। दर्शनमात्रेणेति 'ततो जगन्मङ्गल'मितिश्लोके समाधौ देवकीं भावयित्वा 'देवक्यां' भगवन्तं 'स्थापितवा'नित्युक्तम्। तथा च दर्शनमात्रेणेत्यस्य मानसप्रत्यक्षमात्रेणेत्यर्थः। स्थित्यर्थमिति यावज्जीवं स्थित्यर्थमिति प्रथमश्रुतौ। कार्यार्थं भूभारहरणादिकार्यार्थमिति द्वितीयश्रुतौ। क्षुरोसि। विश्वम्भरो भगवान्।

दृष्टान्तयोः कार्ये ऊह्ये, विश्वम्भरः कीटविशेषः। अनेकरूपभवनार्थमिति सृष्टानामनेकरूपत्वात्। अन्यप्रवेशनार्थम् आतपादन्या छाया तस्याः प्रवेशनार्थम्। त्रिभ्योऽन्यद्वा प्रवेशनं तदर्थं वा। छायाप्रवेशनार्थमित्यर्थः। कश्चनेति द्वितीयः। दक्षिणायां वेति इवार्थे वाशब्दः। "जातो रुचेरजनयत् सुयमान् सुयज्ञ आकूतिसूनुरमरानथ दक्षिणाया"-मित्यत्र द्वितीयस्कन्धे सिद्धः। चतुर्थस्कन्धारम्भेपि वर्तते। 'यस्तयोः पुरुषः साक्षात् विष्णुर्यज्ञस्वरूपधृक्, या स्त्री सा दक्षिणाभूतेरंशभूतानपायिनी'त्यादिना दक्षिणाप्रसङ्गः। तथेति सोपाधिकः कार्याभिनिविष्टश्च वा। तथा चानुपाधिकत्वं कार्यार्थतया प्रवेशभावना चोपपद्यत इत्यर्थः। इत इति दक्षिणायाः। इदं शुक्रं कर्तृ। तामिति दक्षिणाम्। अवतारप्रवेश उक्तः। सामान्यप्रवेशप्रकारप्रश्नमवतारिविषयकमाहुः तर्हीत्यादि इत्यर्थ इत्यन्तम्। प्रकार इति सामान्यप्रकारः। पूर्वमिति सृष्टेः पूर्वम्। स्वप्रकृत्येत्यादि स्वस्य भगवतः प्रकृतिः स्वभावः। आधिदैविकेति अत्र टिप्पणी तथोक्तमिति आधिदैविकस्वभावेनेति व्याख्यातम्। सुबोधिन्याम् अपेक्ष्यत इति स्वभोगार्थम्। अन्यार्थसृष्टावन्येषां मायाजीवानां भोगात्। यद्वा। साक्षित्वप्रकाशननियमनाद्यर्थमपेक्षते। न तु स्वार्थेति स्वार्थसृष्टौ कारणतया विद्यमानेनैव रूपेणान्तर्यामिकार्यस्य च कारणात् नापेक्षते। कारणत्वेनैवेति आधिदैविकरूपेणैव। आधिदैविकादिभेदस्य सर्वत्र सत्त्वादेवकारः। सृष्ट्यन्तरमिति पुरुषद्वारा सृष्टिः। सृष्ट्यन्तरन्यायेनेति वा पाठः। अग्रे तथोक्तेः। प्रकार इति उक्तसामान्यप्रकारः। ननु 'तमद्भुत'मित्यत्र लीलोपयोगिप्रपञ्चस्य ब्रह्मात्मकत्वमभिप्रेतमित्युक्तम्, इह तु त्रिगुणात्मकत्वमुच्यत इत्यत आहुः यथेत्यादि ज्ञेयेत्यन्तम्। प्रवेशभावनेति प्रवेशस्मरणम्। तेषामेवेति सात्त्विकादीनामेव। एवकारोन्ययोगव्यवच्छेदकः। मायासाम्यस्य दौर्बल्यमभिप्रेत्य पक्षान्तरमाहुः अत्रिगुणात्मकमिति। अकारप्रश्लेषमप्रतीतमनङ्गीकृत्य पक्षान्तरद्वयमाहुः यद्वेत्यारभ्य उक्तरीत्येत्यन्तम्। अत्रैव 'स्व'पदानर्थक्यपरिहारः 'तद'न्वितिपदव्यर्थत्वपरिहारश्च। योग्र इदं प्रकृत्याऽक्षरद्वारा त्रिगुणात्मकं सृष्ट्वा तदनु स एव स्वप्रकृत्याऽत्रिगुणात्मकं सृष्ट्वा अग्रे पूर्ववत्। तदन्विति 'अनुकृतेस्तस्य चे'ति सूत्रादिदमुक्तम्। अत्र युक्तिमाहुः अन्यथेति। 'अनाविष्कुर्वन्नन्वया'दितिसूत्रादाहुः। यद्वानन्तरमिति रूढमिति यौगिकशक्तिसङ्कोचात्मकरूढिस्तद्युक्तम्। वेदे योगरूढिः वेदान्ते ईदृशी रूढिः प्रस्थानरत्नाकरे ग्रन्थे उक्ता। उक्तदोषः इति आनन्तर्यस्य शाब्दत्वदोषः। त्रिगुणात्मकत्वदोषो वा प्रपञ्चस्य। अनन्यलभ्यस्य शब्दार्थत्वात्। अत एवेति अनुप्रवेशस्य रूढत्वादेव। अन्विति यथा भुक्त्वा व्रजतीत्यत्रानूपसर्गाभावेप्यानन्तर्यस्य क्त्वाप्रत्ययेनैव सिद्धेर्नानूपसर्गः। उक्तरीत्या इति अतः पूर्वव्याख्यानोक्तरीत्या।

१०-३-१८. यथेमे इत्यत्र दूषणान्तरमिति प्राकृततुल्यत्वम्। तथैवेति तादृशै-

रविकृतसदृशैः। मूलस्य'तथा तै'रित्यस्य विवरणम्। 'तैः' इति वक्ष्यमाणा ये विकृतास्तैः। तेन विराजि आध्यात्मिकानि चतुर्विंशति तत्त्वानि। रूपरसादीति पूर्वमादिपदेन गन्धादयः। अग्रे आदिपदेन क्रियादयः। अमिलिता इति चिक्रीडिषया विशेषपदार्थेनामिलिताः। विनापि 'सह'पदप्रयोगं सहार्थे तृतीयेति व्यवस्थापितत्वात्, अत्र सहपदप्रयोगं विनापि 'विकृतै'रिति तृतीयया सहार्थलाभेपि 'सह'पदप्रयोगादन्योन्यमपि सहभावो विवक्षित इत्याशयेनाहुः सर्वे संहृत्येति। तेनार्थिकान्यपूरणयोरङ्गग्रन्थाप्राप्तौ प्रसङ्गो बोध्यः। हिशब्दार्थमाहुः युक्तश्चेति। कार्ये इति देहे। सर्वांश इति अत्र सर्वांशो भगवानित्यंशसम्बन्धिन एते भावाः। प्राकृताः प्रतीयन्त इत्यर्थः। अंशानां चतुर्विंशतितत्त्वानां सत्त्वव्यवहितत्वात् सत्त्वनिष्ठा विराड्देहजनकाः कारणभूता भावास्तत्र प्रतीयन्ते। पुरुषोत्तमस्य त्वानन्दमयत्वात् तत्र शिरआदयः प्रियादिरूपा एव, न हि ते कारणभूताः। 'कारणत्वं न चैवास्ति चिदानन्दांशयोः स्वत' इति सिद्धान्तात्। न कोपीति पृथिव्यादिभूतदर्शनकृतो यः स्वरूपेऽनित्यत्वविकृतत्वादिप्रतीतिरूपो दोषः सोपि नेत्यर्थः। किञ्चानन्दमयः लीलास्थकालः। तथा दुःखादिलीला अप्यानन्दमय्यः। यतः सुखात्मके जगति ईर्ष्यादिमिश्रणे सुखं दुःखायते। भगवदिच्छाननुकूलत्वे च दुःखम्, न तु स्वत इति न कोपीत्युक्तम्।

१०-३-१६. सन्निपत्येत्यत्र 'नैश्चिन्त्यं वाचि पूर्ववदि'ति पूर्वश्लोकेवतारिविषयोऽवतारेप्युक्तप्रायः। अवतारेप्यन्यदप्युच्यते सन्निपत्येति। सन्निपातोवतारिणि सिद्धः। अवतारे त्वाहुः मिलित्वेति। मायाजवनिकां दूरीकृत्योद्घाटितांशे मिलित्वा। 'यदेकमव्यक्तमनन्तरूप'मितिश्रुतेः। दर्शनाच्च। यद्वा, विराजि त्वाहुः मिलित्वेति। दार्ष्टान्तिकस्याग्रे कथनात्। विराजि मिलित्वा। पूर्वेति विराजमिव सम्यक्। 'सौन्दर्यं प्रकटीकरिष्यामी'तीच्छानुकूलम्। प्रद्युम्नव्यूहमुत्पाद्येति पूर्वस्य वैराजस्यानुवादः। सिद्धस्य कथनमनुवादः। कारणेष्विवेति विराडादिषु। 'एतन्नानावताराणां निधानं बीजमव्यय'मितिवाक्यात्। आधिदैविकमिति यद्यपि विराज्याध्यात्मिकं रूपं तथाप्यवतार्यभेदादाधिदैविकमित्युक्तम्। विराज्यपि युक्तम्। 'यस्तु आध्यात्मिकः प्रोक्तः सोसावेवाधिदैविक' इतिवाक्ये आधिदैविकाध्यात्मिकयोरभेदोक्तेः। अनुगता इति अग्रिमव्याख्यानुरोधात् यतो दृश्यन्तेऽतोनुगता इव सन्तीत्यन्वयः। पटे तन्तव इव। पूर्वोक्ता अविकृता भावाः पूर्वं विराजि तत्त्वरूपेण दृष्टाः पुनः कार्यरूपव्यष्टौ तत्त्वकार्यत्वक्चर्मादिरूपेण दृश्यन्तेऽतः कार्येनुगता इव सन्तीत्यर्थः। अनुगतत्वं विशदयन्ति स पृथिवीति। मह्यातरूपेसदादिदेहे। कारणभूता आधिदैविकी पृथिव्यनुगतेव। विराज्यावरणरूपादौ रूपे आनन्दः पृथिवीरूपेण प्रतीयते। वायवीयदेहे वायुः पृथ्वीव प्रतीयते यथा। सर्वसङ्ग्रहार्थमाहुः तत्तद्रूप

वेति। घटादौ सर्वत्र तत्तत्कारणरूपा घटत्वादिरूपाधिदैविकी पृथिव्यनुगतेव। रुधिरादीति अस्मदादिसमष्टौ देहरूपायां जलं रुधिरस्वेदादिरूपम्। विराजि जलमावरणरूपम्। हिमकरकादौ च तत्तत्कारणरूपमनुगतमिव। अदोरूपे तु वायुर्जलमिव वायवीयदेहे तद्वदानन्दरूपं जलम्। अवतारे तु वैराजं जलम्। अन्यदपीति तेजआदि सत्त्वान्तरम्। अतः परं तत्त्वानां कृत्स्नप्रसक्तिवारणाय बीजाङ्कुरन्यायमवतारयन्ति स तर्हीत्यादि। अत्रापीति शेषः। भवन्त्विति उत्पद्यन्ताम्। प्रागेवेति अवतारिदशायाम्। कारणत्वेनेति न तु कार्यत्वेन्। 'एतन्नानावताराणां निधानं बीजमव्यय'मितिवाक्यात्। इहेति स्वरूपे, ब्रह्माण्डोपरि च। इहोत्पत्तिरिति कार्ये पुनरुत्पत्तिः। विलक्षणत्वादिति आधिदैविकत्वादिना। 'तत् सृष्ट्वा तदेवानुप्राविश'दिति श्रुतिविरोधं वारयन्ति स साक्षादिति। एवकारेण न तु श्रुत्या। श्रुतिबोधितः कृष्णत्वप्रवेशस्तु वर्तते श्रुतिप्रामाण्यात्। पूर्ववत् तेषामपीति अवतारिदशावत् तेषां त्वक्चर्मादीनाम्। अत्रेत्यवतारे। न कोपीति शास्त्रसिद्धत्वात् तद्विसंवादिप्रतीतिकृतो विरोधोकिञ्चित्करत्वान्नेत्यर्थः।

१०–३–१७. एवमित्यत्र दृष्टान्तद्वयमिति अवतारि विराड्रूपं द्वयम्। दार्ष्टान्तिकोक्तिस्तु प्रासङ्गिकी सुखबोधायेति ज्ञेयम्। भेद इति आधाराधेयसम्बन्धे भेद आयातीति तन्निराकरणार्थमतिदिशति, अन्यत्रैव प्रतीतायाः कृत्स्नाया धर्मसन्ततेः अन्यत्र कार्यतः प्राप्तावतिदेशः,स कथ्यत इति। अत्रान्यत्र दृष्टान्तद्वये। अन्यत्रावतारे। अतिदेशयुक्तिमाहुः अन्यथेति। एतस्य विवरणं मूलस्येत्यादि। विराजो मूलस्येत्यर्थः। कार्यं कृष्णावताररूपमत्र। तथा च व्यावहारिकः प्रपञ्चः स्वसत्तोत्कृष्टसत्ताकप्रपञ्चपूर्वकः मायिकप्रपञ्चत्वात्, ऐन्द्रजालिकप्रपञ्चवदितिन्यायेन पारमार्थिकप्रपञ्चसिद्धौ पश्चात् तत्स्वरूपे विचार्यमाणे 'यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्ता'दिति 'यदक्षरे परमे प्रजा' इत्यादिजातीयकश्रुतिभिः द्वितीयस्कन्धचतुःश्लोकयुक्तप्रकारेण च ब्रह्मरूपत्वं पर्यवसाति। एवं तमःपरत्वलिङ्गेनाक्षरप्रतिष्ठत्वलिङ्गेन च ब्रह्मणः सर्वाकारत्वे सर्वात्मकत्वे च सिद्धे नाद्वैतश्रुतिविरोधः। अविद्यादिवदभेदस्यापि भेदविरुद्धसम्पद्रूपत्वात्। इदं चा'दृश्यत्वादिगुणको धर्मोक्ते'रित्यधिकरणे स्पष्टम्। अन्यथेति दृश्यत्वे। 'तमेव विदित्वा अतिमृत्युमेती'तिश्रुतेः। बाधकद्वयमन्यदाहुः बाह्यत्वेन भिन्नत्वेन चेति। आनन्दमयस्य सर्वान्तरत्वात्। व्यापकाद् भिन्नत्वेन। दोषत्रयेति प्रतीतित्रयविषयत्वानि दोषाः तेषां त्रयम्। तत्राहेति तादृश्यामाशङ्कायामिन्द्रियसामर्थ्येनाग्राह्यादिकमाहेत्यर्थः। बुद्ध्येत्यादि तत्र तैजसाहङ्कारोपादेयत्वे सति ज्ञानक्रियान्यतरकारणत्वमिन्द्रियत्वम्। इदं गाक्षात्सृष्टावव्याप्तमिति देहसंयुक्तत्वे सति स्वफलेनात्मज्ञापकत्वं लक्षणम्। इदं क्रमसृष्टौ नाव्याप्तम्। 'सर्वं खल्विदं ब्रह्मे'ति श्रुतेर्ब्रह्मज्ञानिनं प्रति लक्षणस्य मुख्यत्वात्। कालिकसम्बन्धेनाव्याप्तेरदृष्टत्वात्। परं त्विहांश-

भेदेन विरुद्धधर्मसमाधानात् सैद्धान्तिकमतमिति यत् सम्प्रयुक्तेर्थे विशदावभासं ज्ञानं जनयति तदिन्द्रियमिति मीमांसकलक्षणम्। अथवा शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वमिति नैयायिकलक्षणमादर्तव्यम्। उद्भूतविषयगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वं श्रोत्रेन्द्रिये व्याप्तमिति शब्देतरेति। विशेषणदलं घटादावति व्याप्तमिति विशेष्यदलम्। तदपि व्यापकात्मकालादावति व्याप्तमिति विशेषण-दलम्। सूर्यग्राहकमिन्द्रियं चक्षुरित्यादिलक्षणानि च बुद्ध्या विचारणानुमेयानि न तु कम्बुग्रीवादिमत्त्ववत् प्रत्यक्षत उपलभ्यन्त इत्यर्थः। तत्रेति आनन्दमये गह्वरे। अत्रोक्तं दृष्टान्तद्वयमनुसन्धेयम्। नेन विराज्यपि विद्यमानो गृह्यते, तेन तत्रेत्यस्य तयो-रित्यर्थः। अपीन्द्रियसंयुक्तोपि इति सर्वे मां पश्यन्त्वितीच्छयेन्द्रियसंयुक्तः। दृष्टान्तीय-विराट् तु साधारणेच्छयेन्द्रियसंयुक्तः। ननु विषयता काचिदस्ति तयेन्द्रियसंयुक्तोस्त्विति चेत् तत्राहुः सन्नपीति। विषयता मायिक्ययं तु सन्नित्यर्थः। सर्वे मां पश्यन्त्विती-च्छया विषयतास्त्वयं तु विषयतानिष्ठः सन्नित्यर्थः। व्यावहारिकी सत्तेत्युच्यते। तद्-गुणेति तद्गुणैरिन्द्रियसामर्थ्यैः। वर्तेत इति व्यावहारिकी सत्तारूपेण वर्तते। न भगव-दिति दिव्यचक्षुराद्यभावादवतारिवन्नेत्यादिः। इन्द्रियैरग्रहणेप्याधिदैविकैः सूर्यादिभिरेवा-वतारिवद् ग्रहणं भवत्वित्याशङ्क्याहुः न चाधिदैविकानामिति। अन्यार्थमिति विषय-ग्रहणार्थम्। निविष्टानां न भवद्ग्राहकत्वमित्यन्वयः। ग्राह्येति इन्द्रियैर्यद् ग्राह्यरूपादि तत्स्वरूपत्वादित्यर्थः। न वा इति ग्राहकेति स्वनिष्ठग्राह्यत्वनिरूपितग्राहकत्वसम्बन्धः। ग्राहकेति भावप्रधानम्। इन्द्रियैस्तु वर्तते इति भावः। अत इति यत आधिदैविकाना-मन्यार्थत्वग्राह्यत्वाभ्यां न ग्राहकत्वं मायात्मिकानां तु सन्निकर्षराहित्यान्न तथात्वमतो-वतारिवत् त्वं न गृह्यस इत्यर्थः। विद्यमानोवतारिवत् रूपभूतो विराड्वत्। 'एवं भवा'नित्युपपाद्य दोषत्रये दृश्यत्वेनाग्राह्यत्वं निराकरोतीत्याशयेन पूर्वार्धं व्याकुर्वन्ति स्म इन्द्रियाणामित्यादि। बुद्ध्यनुमेयत्वं साधयितुं प्रथमतः प्रत्यक्षतामुपस्थितां वारयन्ति स्म प्रत्यक्षतेति। अर्थआद्यच्। प्रत्यक्षविषयता। प्रत्यक्षं चक्षुस्तत्त्वं न निषेधार्हमिन्द्रियेषु। प्रत्यक्षं ज्ञानं तत्ता ज्ञानेन्द्रियेषु नास्ति। तत्तद्द्रव्यरूपत्वात्, आत्माग्राहकत्वात्। ज्ञान-रूपाणीन्द्रियाणि ज्ञानेन्द्रियाणीति न समासः आत्मग्राहकत्वापत्तेः। 'स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम' इतिवाक्यात्। अतः स्वविषयरूपादिग्राहकाणीन्द्रियाणि ज्ञानेन्द्रियाणि। अत इति 'अणवश्चे'ति सूत्रेणेन्द्रियाणां प्रत्यक्षविषयत्वाभावात्। बुद्धिरनुमानज्ञानजनिका। बुद्धिमानयं पदार्थाञ् जानातीति प्रत्ययात्। बुद्धिस्तत्त्वान्तरम्। क्रियात्वादिति साध्यता-वच्छेदकसम्बन्धो ग्राहकता। हेतुतावच्छेदकसम्बन्धः समवायः। ननु स्वरूपासिद्धो हेतुरिति

१=स्वमात्मा।

चेन्न, वेदवेदान्तसारत्वेनोपलब्धेः क्रियात्वेन विवक्षितत्वात्। तथा च पञ्चरात्रशास्त्रं ज्ञानं क्रियेति। छिदि क्रियायां दात्रं करणम्। नेत्रेत्यादि यत्र यत्र क्रियात्वं तत्र तत्र नेत्रगोलके इत्यन्वयव्याप्तिः। यत्र यत्र नेत्रगोलकाभावस्तत्र तत्र क्रियात्वाभावः। 'यस्तु ह्याध्यात्मिकः प्रोक्तः सोसावेवाधिदैविक' इति द्वयमुपात्तम्। आधिदैविकस्याध्यात्मिकाभेदात्। इत्यादीति शब्दोपलब्धिः स्पर्शोपलब्धिः। एतेन मूलस्थं 'बुद्ध्यनुमेयलक्षणैरिन्द्रियै' रितिपदं न्यूनपूरणेन व्याख्यातं ज्ञेयम्। न च यथामूलं व्याख्यानमस्त्विति शङ्क्यम्। दृष्टान्तोपात्तेन्द्रियवदत्रापि न्यूनपूरणे कर्त्रभिप्रायात्। तेन सिद्धमाहुः अनेनेत्यादि। निरस्तमिति तेन विदितेप्यप्राकृतत्वमिति भावः। युक्तिरिति दृश्यस्य प्राकृतत्वकथनेऽदृश्यस्याप्राकृतत्वं यदङ्गीकृतं मा युक्तिरनुकूलतर्कशून्येत्यर्थः। एवमप्रत्यक्षत्वेनाप्राकृतत्वेन व्याप्तौ दूषितायां पुनराशङ्कान्तरमवतारयन्ति स्म नन्वित्यादि। प्रसिद्धानुमाने यथा व्यापकस्य वह्नेरयोगोलकादौ हेतुव्यभिचारः हेत्वभाववद्वृत्तित्वं न दोषाय, तद्वदत्र अप्राकृतोऽप्रत्यक्षत्वादित्यनुमानेप्यप्रत्यक्षत्वस्य व्यभिचारो न दोषाय। मया प्राकृतः प्रत्यक्षत्वादित्यनुमानाङ्गीकारात्। तथा सति यत् प्रत्यक्षं तत् प्राकृतमेवेति व्याप्तौ न दोष इत्याशङ्का चेत् यदीत्यर्थः। सर्वत्रेति तेन ग्राह्यैर्गुणैः सह सन्नपि प्राकृतं विदितत्वात् प्रत्यक्षत्वात् घटवदित्यत्र विदितत्वहेतुः सत्प्रतिपक्ष इति भावः। अनुमानं तु रूपादिषु भगवानप्राकृतः अप्रत्यक्षत्वात् भक्तनिष्ठभगवद्वत्। साध्याभावसाधकं हेत्वन्तरं यस्य स सत्प्रतिपक्षः। चक्षुषाऽग्रहणादिति अग्रहणादिति छेदः। पुनराशङ्कते क्वचिदपीति। प्राकृतः क्वचित्प्रत्यक्षत्वादित्यनुमानं बाधकं प्रत्यनुमानसत्प्रतिपक्षत्वेन मूलानुमानसत्प्रतिपक्षत्वविघटकमित्यर्थः। तत्राहेति आशङ्कायां बाधकानुमानस्याप्रयोजकत्वमाहेत्यर्थः। चक्षुषः सामर्थ्येनेति तद्गुणैर्ग्रहो यस्येत्यत्र तद्गुणान्तर्गतेनानेन। इदानीमित्यादि न हि ग्रहो यस्येत्यस्यार्थः। अत्रापीति जन्मस्थानेपि। न दुष्टं भवतीति उक्तक्वचित्प्रत्यक्षत्वहेतोः सोपाधिकत्वात् दुष्टम्। इन्द्रियसामर्थ्यमुपाधिः। यत्र यत्र प्राकृतत्वं तत्र तत्र इन्द्रियसामर्थ्यम्। यत्र यत्र क्वचित्प्रत्यक्षत्वं तत्र तत्र इन्द्रियसामर्थ्यमिति नास्ति, किन्तु स्वेच्छयैव क्वचित्प्रत्यक्षम्। तथा क्वचित्प्रत्यक्षत्वहेतोर्व्यभिचारित्वं साध्याभाववद्वृत्तित्वम्। धीरप्रत्यकृते दर्शने विषये प्राकृतत्वाभाववति क्वचित्प्रत्यक्षत्वहेतोः सत्त्वात्। अत एवाप्रयोजकत्वं च हेतोः। इन्द्रियग्रहणदोषेण न दृष्टं भवतीति पाठः। अत्रेन्द्रियग्रहणेन दोषः प्राकृतत्वं तेन सह न धीरदृष्टं भवतीत्यर्थः। यद्वा। इन्द्रियैर्भगवद्ग्रहणे इन्द्रियाणां दोषः पराक्प्रवृत्त्वं विषयदोषस्त्वपरावत्त्वम्, तेन पूर्वोक्तस्तु करणदोषः। दोषं व्युत्पादयितुं प्रमाणमाहुः पराञ्चीति। खानीन्द्रियाणि। अन्तरात्मन्नित्यत्रामोलुक्। प्रत्यक्जीवः। तथा च पराक्पदादिन्द्रियसामर्थ्येन सोपाधिकत्वम्। ऐक्षदित्यनेन व्यभिचारः श्रुत्या प्रदश्यते। तत एवाप्रयोजकत्वमपि सिध्यतीति श्रुतिरेवात्र मानमित्यर्थः। सिद्धमाहुः

तस्मादित्यादि। तस्मादिति श्रुत्या प्रतिपक्षहेतौ दोषप्रदर्शनात्। उत्तरार्धमवतारयन्ति स भिन्नत्वेनेत्यादि। पूर्वमिति तृतीयस्कन्धे कापिलेये आकाशलक्षणे बहिरन्तरमेव चेत्यत्र। तदपीति आकाशकृतं बाह्याभ्यन्तरत्वम्। अन्यस्मात् द्रष्टुः गृहमध्यस्थितान्तर्गतात्। स्वस्य गृहस्य। स्वयं गृहम्। दार्ष्टान्तिके योजयन्ति स व्यापको भवानिति। उपपादयन्ति स तत्त इति। व्यापकाद् भगवतः। अग्र इति उलूखलबन्धन इत्यनेनान्वेति। तदुद्भवैरिति तृणशैवालादिभिरित्यर्थः। तावदिति अनाच्छन्नप्रकटतडागमात्रत्वम्। जगदुद्भवानामिति तदुद्भवव्यतिरिक्तानां पुरुषद्वारोद्भवानामिति बोध्यम्। अवच्छेदकत्वम्। अन्यूनवृत्तित्वं अनतिरिक्तवृत्तित्वम्। न संभवतीति तादृशव्यापकत्वात्। एकदेशे इति कारागृहे भक्तहृदये च तावन्मायादूरीकरणेन प्रकटस्येत्यर्थः। उक्तदृष्टान्तेन प्राकृतेन प्रतीतत्वं न सेत्स्यतीत्यत आहुः प्रतीतिस्त्विति। दृष्टान्तीयाशेषधर्मापत्त्या माभूत् प्रतीतिः। उपपादिताऽलौकिकी प्रतीतिस्तु स्यादेवेत्यर्थः। पराञ्चि खानि इत्युक्तश्रुतेरेवकारः। तथा च न बाह्यत्वप्रतीतिकृत आनन्दमयत्वबाध इति भावः। एतेनैवाभिन्नत्वकृतस्यापि परिहारमाहुः परीत्यादि। अनेनैवेति 'अनावृतत्वाद् बहिरन्तरं न त' इति विशेषणेनैव। परिछिन्नत्वे हि भिन्नत्वं व्यापकत्वेन तस्मिन् परिहृते भिन्नत्वमपि परिहृतप्रायमेवेत्यर्थः। कथमित्याकाङ्क्षायां तत्र हेतुत्रयमवतार्य व्याकुर्वन्ति स अस्मिन्नित्यादि विवेचनीय इत्यन्तम्। अस्मिन्निति तृतीयपादोक्तेऽर्थे। प्रथमतो वेदान्तशास्त्रीयं हेतुमाहुः सच्चिदिति। सच्चिदानन्दरूपो भवान् सर्वः अंशत्रययुक्तः। मवर्णलोपः 'सत्यं ज्ञानमनन्तं ब्रह्मे'ति श्रुतेः। भगवानित्युत्तरत्राप्यन्वेति। 'सदेव सोम्येदमग्र आसी'दितिश्रुतेः। जीवात्मेति द्वितीयनवमाध्याये स्पष्टम्। 'यतो वाचो निवर्तन्त' इत्युपक्रम्या'नन्दमेतज्जीवस्ये'तिश्रुत्युक्तमानन्दं व्यावर्तयन्ति स न आनन्दरूप इति। किन्तु 'यतो वाचो निवर्तन्त' इत्युपक्रम्या'नन्दं ब्रह्मणो विद्वा'नित्युक्त आनन्दमयः। काल आनन्दमयश्चेष्टा सधर्मक आनन्दमय इति, 'आनन्दरूपममृतं यद् विभाती'तिश्रुतेः। अत्रेति एकस्मिन् सर्वरूपे। व्यावर्तकत्वं भेदकत्वम्। जगत इत्यादि जगतो जडस्य कर्ममयस्य, जीवानां ज्ञानानां, फलस्य कर्मद्वारा जीवफलस्य। यथा जगदाश्रये सति जगद् भेदकम्। आश्रयो भिद्यते जगद्वत्त्वात्। घटत्ववान् घट इत्यत्र घटत्वजगद्वति घटे पटभेदवत्। पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वादित्यत्र गन्धजगद्वत्यां पृथिव्यामबादिभेदवत्। जगदाश्रयो भिद्यते जीवेभ्यः, कौस्तुभवत्। जडाश्रयाद् भिद्यते। एवं फलस्य भेदकत्वं, कृष्णाश्रयः भिद्यते आनन्दमयत्वात्। आनन्दमयजीववत्। एवं न सम्भवति भेदकत्वम्। त्रयाणां मतीति 'सत्यं ज्ञानमनन्तं ब्रह्मे'ति ज्ञानस्वरूपम्। 'ज्ञानमात्रं परं ब्रह्मे'तिवाक्यात्। अपि स्वरूपमिति पाठे स्वरूपं समष्टिः। एवकारस्तु व्यावर्तकाभावे समष्टित्वेन मति ज्ञानरूपत्वात्।

सर्वरूपस्येति सर्वं त्रयं तद्रूपस्येत्यर्थः। 'सर्वात्मन' इत्यस्यार्थमाहुः सर्वेषामिति। तेन षष्ठीतत्पुरुषः। 'आत्मवस्तुन' इत्यस्यार्थमाहुः सर्वात्मनामिति। आत्मनेति स्वस्वरूपेण। महत इति अवतारस्य। अंशान्तरैरिति सदानन्दरूपैः। भगवता आकाशशरीरेण। व्युच्चरणे सति 'छिद्रा व्योम्नीव चेतना' जीवा भवन्तीति। आत्मनैवेति स्वस्वरूपेणैव। इतरव्यावर्तक एवकारः। अग्र इति उलूखलबन्धनस्थले। तथा च परिछिन्नतया भिन्नत्वस्यापि स्वीयेच्छया स्वेच्छाकृतत्वान्न तत्प्रतीत्याप्यानन्दमयत्वबाध इत्यर्थः। एवमेतैः श्लोकैर्विदितत्वे ब्रह्मत्वबाधकदोषपरिहारेण विदितोसीति प्रतिज्ञा समर्थिता। उपसंहरन्ति स एवमित्यादि। पञ्चात्मक इति पृथिव्याद्यात्मकः। कालात्मकः पञ्चनिलयगात्मकः इति शास्त्रद्वयम्। वेदवेदान्तरूपम्। पञ्चरात्रशास्त्रीयम्। 'पञ्चात्मकः स भगवा'निति पञ्चरात्रात्। इतीति इत्येवं निरूपितोवतारः।

१०–३–१८. य आत्मन इत्यत्र पञ्चात्मक इति पृथिव्याद्यात्मकः। 'तस्माद्वा एतस्मादात्मन आकाशः संभूत' इत्यादिश्रुतेश्चतुर्भुजः। उक्तरूपश्च। तन्त्रेत्यादि'गहना कर्मणो गति'रिति बोधयन् अनुकल्पं वैदिकप्रकारानन्तरं'पञ्चात्मकः स भगवा'निति पञ्चरात्रं तद्रूपेण वेदभेदेन तन्त्रस्योक्तत्वात् तत्रत्यचतूरूपो निरूप्यते भयाभावाय। 'सोबिभे'दिति बृहदारण्योक्तं भयमेकस्येति। प्रथम इति परब्रह्मरूपः। यत् प्रवदन्तीति 'इत्थं विचिन्त्य परमः स तु वासुदेवनामा बभूव निजकारणमुक्तिदाता, तस्याज्ञयैव नियता परमापि रूपं वव्रे द्वितीयमिव यत् प्रवदन्ति माया'मितिपञ्चरात्रवाक्यात्। केवलयेति सदस्पृष्टया। न मुच्यत इति 'योन्यथामन्त'मितिश्रुत्युक्तपापापरया मर्यादाभक्तिप्रतिबन्धान् न मुच्यते। सद्बुद्धिरसज्जन्ये जगति या बुद्धिः सा तामसी। तमोऽज्ञानजमित्यज्ञानाच्च न मुच्यते। वदन्नेवेत्यस्य *प्रथमपाद्रेत्यनेनान्वयः। अन्तरेणेत्यादि स्वान्तरेत्र स्वस्माद् बहिः प्राक्प्रदेशे।* वासुदेवपदात् स्वस्य वसुदेवस्यान्तरे स्वस्माद् वसुदेवाद् बहिः। केवलचिदानन्देति चित् श्रीरानन्दो ब्रह्मानन्दः तद्रूपः। श्रीकार्य उत्पन्नत्वात्। आत्मभूतस्येति केवलचिदानन्दरूपस्य। दृश्येष्विति लौकिकेन्द्रियसामर्थ्येन दृश्येषु। आत्मनैवेति अन्तर्वर्तिनानुभवरूपभगवता। तेषामित्यादि सङ्घातरूपाणाम्। सत्त्वाभावात् व्यावहारिकसत्त्वस्याप्यभावः कारणे सत्त्वाभावात्। बन्धकेष्विति सर्जकत्वेनेच्छाविषयत्वात्। व्यवस्यति निश्चिनोति। तादृशस्य अबुधत्वं व्युत्पादयन्ति अस्तीति। परमार्थोस्तीत्यन्वयः। तेन तान्त्रिकोपस्यति। तन्त्रं वेदविरुद्धांश इति परमार्थः। आत्मव्यतिरेकेणेति तसिल् तृतीयार्थे व्याख्याय षष्ठ्यर्थे तस्यैव व्याख्यानं आत्मसम्बन्धेत्यादि। मोहित इति मुह वैचित्त्ये, मायाधर्मो मोहः। आत्मसम्बन्धादिति अनुभवसम्बन्धात्। 'आत्ममायामृते राजन् परस्यानुभवात्मनः न घटेतार्थसम्बन्ध' इतिवाक्यात्। तस्येति श्रीकार्यस्य। वैराग्यार्थमिति

अस्ति सत्त्वं तथापि मपञ्चे वैराग्यार्थं केवलया जगत् सृज्यत इति मतम्, अनुवादात्। अस्येति मतस्यानुवादः। तत्रोक्तत्वादिति भावः। नोपपद्यतेति खपुष्पत्यागायोगात्। अनुवादेनेति सिद्धस्य कथनमनुवादस्तेन। सिद्धं वैदिकमतम्, तस्यानुवादस्तत्रे पुनरुक्तिदोषरहितः। स्वम्वन्ध इति अज्ञातः। प्रतीयतीति अनुभवातिरिक्तः। सङ्गात इति 'अत्र मां मार्गयन्त्यद्धे'तिवाक्यात्। ज्ञानमार्गीयज्ञानानन्तरम्। आत्मव्यतिरिक्तमिति 'कामं कामं पुरुषो निर्मिमाण' इतिश्रुत्युक्तात्मव्यतिरिक्तम्। गृह्णातीति सत्त्वेन गृह्णाति। सत्त्वसिद्धिव्यतिरेकेणेति पाठे। स्वत्वसिद्धिव्यतिरेकेणेति पाठे स्वत्वेन गृह्णाति। पुरुषोपि भूत्वेति पुरमुपति दहतीति पुरुषः। 'सूर्य आत्मा जगतस्तस्थुषश्चे'ति श्रुतेः। पुरा आसेति ब्रह्मणि पुरुषपदव्युत्पत्तिः। पुरि शेत इति स्त्रीपशुसाधारणी व्युत्पत्तिः। 'निवृत्ततर्षे'रित्यत्र स्पष्टः। पूर्वेणैवेति भवतीत्यादि क्रियापदम्। एवकार इतरयोगव्यवच्छेदकः। समीप इति गृह्यत इति शेषः। न्यूनपूरणं स्पष्टम्। तथा चादरेण ग्रहणादबुध एव स इति भावः। अन्योपेति दत्तात्रेयगुरुवत्। आत्मसम्बन्धात् सत्त्वानुवादेन। ग्रहणमिति आदरेण ग्रहणम्। येनैव प्रकारेणेति आत्मव्यतिरिक्तत्वेन प्रकारेण। गृह्णातीनीति इति हेतोरन्योपदेशार्थमनुवादेनापि ग्रहणसम्भवव्यतिरेक इत्यर्थः। एवं 'निगमो वसुदेवोभू'दितिश्रुत्या वसुदेवनिगमस्य वैदिकप्रकारेणोक्त्वा स्तुतिं तद्गौणतन्त्रप्रकारेणोक्तौ 'वेदान्तरूपवेदेन स्तुतिं प्रभुचरणा आहुः अथवेत्यादि। व्यतिरेकमिति व्यतिरिक्तत्वं प्राप्य सन् व्यावहारिकः सन्। धर्मिग्राहकेति उभयव्यपदेशश्लोकेन। न हीति हि युक्तश्चायमर्थः। भक्तिमन्तरा स्वरूपाज्ञानात्। तस्यैवेति तैः सह सम्बन्धस्यैव। तदसम्भव इति व्यावहारिकसत्त्वोत्पत्त्यसम्भवः। इति भाव इति इति हेतोस्तादृशगुणादददबुध एवेति भाव इत्यर्थः। तथा च तत्रेपि मिथ्यस्य जगत एव वैराग्यार्थमसत्त्वं सार्यते न तु स्वरूपात्मकस्येति तत्रमपि वेदेन समानम्। मोक्षधर्मे पञ्चरात्रस्य तथात्वनिश्चायनादिति बोधनार्थमेवं व्याख्यातमतो न कोपि दोष इत्यर्थः। श्रीधरीये व्यवस्यत इत्यात्मनेपदपाठदर्शनात् तस्मिन् पाठे जीवब्रह्मवादानुक्तेः। किञ्च। 'स्वव्यतिरेकत' इत्यस्य स्वपदघटितस्य स्वस्मिन् यदभावे यदभावो व्यतिरेक इति व्यतिरेकलक्षणासम्भवात् इत्यरुच्या पक्षान्तरमाहुः अथवेत्यादि। आत्मनो द्रष्टुरिति आत्मपदार्थः द्रष्टुरिति। अनुभवेन सत्त्वकर्तुः स्वस्यात्मीयस्य जीवस्य दृश्येषु स्वेन्द्रियसामर्थ्येन दृश्येषु भगवदीयकरपादादिषु। वर्तमानः व्याप्य स्थितः। व्यवस्यत इति जीवब्रह्मवादेन जनविमुखकरणनिश्चयं कुरुते इत्यर्थः। अत्र फलमात्मने भवतीत्यात्मनेपदम्। स्वात्मत्वेनेति अस्वव्यतिरेकपदविवरणम्। विवर्तवादे आत्मानात्मविभागाभावादात्मत्वमपि न वक्तुं शक्यते इत्यभिमतादिरयुक्तम्। सिद्धान्ते कराम्बुजं पदाम्बुजमित्यत्र विशेषमाहुः अव्ययान्तेति। तसिलन्तमव्ययम्। कोपि त्वयीति व्यूहत्रयं गुणत्रययुक्तं

वासुदेवो गुणातीत इति तन्त्रे सिद्धान्तादिति भावः। एवमनुवादपदस्वारस्येन तन्त्रमतमुक्तम्।
१०–३–१९. त्वत्तोस्येत्यत्र प्रद्युम्नरूपमिति यो भवान् प्रत्यक्षगोचरः परब्रह्मतया वासुदेवत्वेन निरूपितः गुणातीतस्तमेवेश्वरत्वहिरण्यगर्भत्वाभ्यां प्रद्युम्नरूपत्वेन निरूपयतीत्यर्थः। स हीति प्रद्युम्नः, हिर्हेतौ, राजसत्त्वात्। निरूपित इति पञ्चरात्रे निरूपितः। प्रकृतिमिति रजःसत्त्वतमोमयीं भूतप्रकृतिम्। प्रकृतौ रुय्येवेत्यादि। सामीप्ये सप्तमी। प्रकृतिसमीपे शाक्तमते रुय्येव मुख्या। नन्तु राजसाज्जन्म भवतु स्थितिप्रलयौ कुत इत्यत आहुः सङ्कर्षणादिति। न प्रद्युम्नमात्रात् सृष्टिः, किन्तु ब्रह्मोपाधिरजोरूपात् प्रद्युम्नात्। एवं चेश्वरवत् प्रद्युम्नोप्यनुस्यूतः। एवं च वासुदेवात् सङ्कर्षणः, सङ्कर्षणात् प्रद्युम्नः, प्रद्युम्नादनिरुद्ध इति। सङ्कर्षणादुत्पन्नेनैव सूत्रनाम्ना तस्यां जगत् पुरुषो वोत्पाद्यत इत्यर्थः। जगदुत्पत्तीत्यादि प्रद्युम्नादुत्पत्तिः, प्रद्युम्नानुस्यूतवासुदेवात् स्थितिः। प्रद्युम्नसङ्कर्षणात् प्रलय इति। तन्मात्रेणैवेति सन्निधिमात्रेणैव। एवकारव्यावर्त्यमाहुः न त्वित्यादि। वासुदेववदिति बिम्बप्रतिबिम्बन्यायेन,प्रेरकत्वेनापीत्यर्थो वा। तदत्रेति तन् मतं अत्र स्तुतौ। त्वत्तः प्रद्युम्नरूपादिति नन्तु वासुदेवादिति कुतो नोक्तं तन्त्रत्वादिति चेन्न। गौणमुख्यन्यायात् 'वदन्ती'ति वचनेन तन्त्रे लोकमतस्य प्रबलत्वात्। शब्दबलविचारकत्वादाचार्याणाम्। किञ्च, युष्मच्छब्दस्य गर्भसम्बद्धे प्रद्युम्ने प्रयोगः दशमस्त्वमसीत्यत्र तथा दर्शनात्। लोका वदन्तीति तन्त्रेपि लोकमतत्वादस्वरसः। अतो 'वदन्ती'तिपदेनास्वरसार्थं प्रद्युम्नरूपादिति व्याख्यातम्। प्रद्युम्नेन रूपं यस्य, प्रद्युम्ने रूपं यस्येति वा, प्रद्युम्नो रूपं व्यवहार्यं यस्येति वा, प्रद्युम्नेन रूप्यते व्यवह्रियत इति वा। नन्तु सङ्कर्षणत्यागे किं मानमिति चेन्न। शब्दबलविचारकत्वादाचार्याणाम्। तन्त्रे तथाशब्दः। अस्तु तथैवेति सामर्थ्यात् साक्षात्कर्तृत्वमस्तु। महदैश्वर्यादीति महतां ऐश्वर्यं मूढपूजनाश्रयत्वं तदादि समत्वं मत्त्वं सत्यत्वं च। एतेषां गुणानां पालनकर्तृत्वं व्युत्पादयन्ति स्म आज्ञयैवेति। विकारनियमाभावेप्याज्ञानियमस्तु वर्तत एवेति भावः। आज्ञायैवेति पाठोपि। तथा चागुणपदस्यैश्वर्यादिगुणानाश्रय इत्यर्थः। अयं चेति वासुदेवः च पुनरयं प्रद्युम्नः। मायागुणानां ज्ञानिनां प्रत्युदस्तानामभावाद् गुणातीतः। अस्येति प्रद्युम्नस्य। विक्रिया गुणानामिति भावः। अत इति गुणादर्शनात्। अघटमानमिति कर्तृत्वमघटमानमेव। तर्हि विरोध इति सामर्थ्यसत्तायां विद्यमानायामप्यकर्तृत्वे कर्तृत्वकाले, कर्तृत्वाकर्तृत्वयोर्विरोधः। अन्तरङ्गेति स्वल्पापेक्षमन्तरङ्गं बह्वपेक्षं बहिरङ्गम्। फलिष्ठा इति तेन त्वत्तः अनीहात् अगुणात् अविक्रियादेर्वा सामानाधिकरण्यमिति भावः। पक्ष इति प्रद्युम्नपक्षे। वासुदेवादिति गुणातीतात्। तथाहेति वासुदेवाद् भेदं वक्तुं कर्तृत्वाकर्तृत्वयोर्विरोधाभावे हेतुमाहेत्यर्थः। एवमारोपवादसङ्गत्या कर्तृत्वाकर्तृत्वविरोधः परिहृतः। सिद्धान्ते तु निर्वाहकसङ्गत्याऽ-

विरोधमाहुः विरोधे ह्येकतरेति। नैवंकल्पनेति नैकतरपरित्यागकल्पना। देशभेदेनेति ज्ञेयम्। ननु ब्रह्मत्वेन सर्वभवनसामर्थ्येपि विकृतत्वस्य विद्यमानत्वाज् जगदकरणेस्त्येवो-भयोर्विरोध इत्यत आहुः किञ्च नेति। ब्रह्मरूप एवेति विशेष्यत्वात् पूर्वमुपादानम्। 'त्वयी'ति युष्मच्छब्दार्थः, प्रद्युम्नो वा विशेष्यम्। जगत्कर्तृत्वमिति अन्यथाकर्तृत्व-सामर्थ्येन, रजो विनापि कर्तृत्वम्, जगत इति बोध्यम्। नापेक्ष्यन्त इति कर्तृत्वार्थं नापेक्ष्यन्ते। ईश्वरत्वादिति कर्तुमकर्तुमन्यथाकर्तुं समर्थो यः स पूज्यते सूर्वैरितीश्वरः। विरोधाभावमुपपादयन्ति स्म आज्ञाजनिकेरिति। एकतरेति कर्तृत्वाकर्तृ-त्वयोरेकतरपरित्यागः। प्रकारान्तरेणाप्युपपादयन्ति स्म किञ्चेत्यादि। इयमिति कर्तृत्वा-कर्तृत्वविषयिणी। शास्त्रीयेति शास्त्रं वेदान्तरूपम्, 'यतो वा इमानि भूतानि जायन्त' इति 'निष्कलं निष्क्रियं शान्त'मित्यादि च। शास्त्रशब्दाद् 'वृद्धाच्छः'। सम्भवतीति विरोधाभावाय सम्भवति। यथेति सिंहत्वमाणवकत्वे विरुद्धे, सिंहपदस्य गौण्या वृत्त्या क्रौर्यादिगुणवाचकत्वम्, "लक्ष्यमाणगुणैर्योगात् वृत्तेरुक्ता तु गौणते"ति, सिंहपदेन क्रौर्यादिगुणाः लक्ष्यन्ते, आधेयतासम्बन्धो लक्षणा, तथा च सिंहनिष्ठक्रौर्यादिगुण-विशिष्टो माणवक इत्यर्थः, तथा जगत्कर्ताऽविकृत इत्यत्र, वक्ष्यमाणरीत्या च, तथा च निर्वाहकसङ्गतिप्रकारादन्यः प्रकारः प्रकारान्तरम्। चतुर्थपादं व्याकुर्वन्ति स्म तथेत्यादि। यथा दृष्टान्ते सिंहस्तथा। कर्तृत्वाधारभूतो भगवानेव। 'परात् तु तच्छ्रुते'रिति सूत्रा-देवकारः। आधारत्वे सिद्ध इत्यन्वयः। तत्र हेतुः निराश्रयस्येति। त्रिगुणात्मकं जगत् क्वचिदाश्रितं गुणत्वात् रूपवत्। तद्वारेति आधारत्वद्वारेत्यर्थः। कर्तृत्वमाधारत्व-समानाधिकरणं गुणेषूपचर्यते। 'गुणै'रिति सप्तम्यर्थे तृतीया। भगवान् सगुणः कर्तेत्यत्र भगवन्निष्ठगुणेषु भगवच्छब्दं कर्तृत्वलक्षकं कृत्वा तद्वान् (तद्विशिष्टः) सगुणः, अर्थात् गुणाः कर्तृत्ववन्त इति गुणेषूपचर्यते। यद्वा। गुणैः सह वर्तमाने त्वय्युपचर्यते, सहार्थे तृतीयान्तस्य क्रियायामन्वयो दृष्टः, पुत्रेण सहागतः पितेत्यत्रेतीहापि तथा। तेन वेदान्तगुणेषूपचार इति लभ्यते, न तु 'गुणै'रिति सप्तम्यर्थे तृतीया। ननु पूर्वोक्तहेतुद्वयेन कर्तृत्वाकर्तृत्वयोरविरोधे सिद्धे पुनरुपचारेणाविरोधसाधनस्य किं प्रयोजनमित्याकाङ्क्षायां तत्प्रयोजनं टिप्पण्यामाहुः अविरोध इत्यादि। द्वितीयकोटीति कर्तृत्वकोट्युपस्थितिः। न प्रामाणिकीति शुक्तौ रजतोपस्थितिवद्। हेत्वन्तरमिति 'त्वदाश्रयत्वा'दिति हेत्वन्तरम्। पूर्वेणेति पक्षेण। तच्छङ्कयेति विरोधशङ्कया। तथा च मूलानुसरणं प्रयोजनमिति भावः। ननु मूले उपचार-पक्षः किमित्युक्तः सहार्थतृतीयान्तपदेन इत्याकाङ्क्षायां यत् सुबोधिन्यां वस्तुतस्त्वि-त्यादिनोपपद्यत इत्यन्तेनोक्तं तदुक्तवेदान्तपक्षेपीत्याशयेन तद् विवृण्वन्ति स्म वस्तुतस्त्वि-त्यादि ज्ञेयमित्यन्तम्। तथा च मूले गुणेषु कर्तृत्वोपचार इत्याशयो न तु भगवति तद्-

पचारो वेदान्तपक्षे, एवं च सुबोधिन्यां गुणा एव कर्तार इत्यस्य अभिमानेन कर्तारः। अत एवेत्यस्याभिमानादेवेत्यर्थो ज्ञेयः। अतो न वेदान्तपक्षे विरोधः। सुबोधिन्याम्, प्रद्युम्नस्य स्मृतिरूपश्रीद्वारा सृष्टौ मायिकत्वात् साङ्ख्यावलम्बनं स्पष्टमेव। अत एव साङ्ख्यादय इत्यादिशब्दः। सुबोधिन्याम्। अप्ययमाश्रय इति अपिनोक्तवेदान्तमतीयकर्तृत्वस्य। अयमिति भगवान्। कार्यकारणेति कार्यकर्तृत्वं कारणानि गुणाः तेषामभिमानाभावेप्याधारत्वात्। तथा चोपचारो लक्षणापि। आधाराधेयभावलक्षणा। कर्तृत्वेति भगवति कर्तृत्वकथनं मायिकसृष्टावपि तन्मतत्वादुपपद्यते इत्यर्थः। श्लोकार्थं निगमयन्ति एवं जगन् इत्यादि। अमायिकत्वमिति स्मृत्यां प्रकृत्युत्पादकथनात् स्मार्ती सृष्टिरमायिकीति। अकर्तृत्वमित्यादि तृतीयचरणेनोभयम्। चकारेण पूर्वार्धे लोका वदन्तीति कथनादकर्तृत्वम्, चतुर्थचरणेन कर्तृत्वमिति विभागः।

१०–३–२०. सत्त्वमित्यत्र वासुदेवात् प्रद्युम्नतश्च वैलक्षण्येनानिरुद्धं निरूपयितुं पूर्वोक्तमनुवदन्तोनिरुद्धमवतारयन्ति स इदमित्यादिना। प्रद्युम्ने प्रकृतिजननद्वारा इदमुत्पत्तिस्थितिप्रलयात्मकत्वं आध्यात्मिकत्वेन 'अनीहा'दित्यादिवाक्यादध्यात्मभवत्वेनोपादानतया निरूपितम्। उत्पत्तिस्थितीति उत्पत्तिस्थितिप्रलया आत्मनि यस्येति तथोक्तम्। 'अधिष्ठानं तथा कर्ते'ति वाक्यमनुसन्धेयम्। अतः परमधिदैवंभवत्वेन प्रयोजकतयांशत उपादानतयात्रानिरुद्धं जगत्कर्तारमुपपादयन्ति। तथा च वासुदेवः तटस्थत्वेन, प्रद्युम्न उपादानत्वेन, अनिरुद्धः प्रयोजकत्वादिना कारणमित्येवं भेदमुपपादयन्तीत्यर्थः। तद् व्युत्पादयन्ति स यथा वेत्यादि। उत्पादक इति बीजद्वाराप्रयोजकः। वृष्टिद्वारा इन्द्रादिः। आदिना मेघाः। यथा वा ब्रह्मादयः। गुणावतारा उच्यन्त इत्यन्वयः। त्रितयमिति त्रयोवयवा यस्य तादृशरूपम्। विष्णोः श्यामत्वादत्र शुक्लत्वं कथमुक्तमित्यत आहुः उपाधीति। उपाधिरूपो यः कालः कृतादिः तत्कृतानि त्रीण्यपि रूपाणीत्यर्थः। कालात्मत्वाद् भगवतः। अस्मिन् पक्ष इति गुणावताररूपेषु सत्त्वस्य श्यामः तमसश्च शुक्लो वर्णो निरूपितः ततो विपरीतपक्षे। तदर्थमिति रूपनिरूपणार्थम्। गुणानिति स्थित्यादिगुणान्। रूपाणीति वर्णान्। त्रिलोकस्थितिपदेन पालकोनिरुद्धः उक्तः। तत्र प्रद्युम्नस्य सृष्टिकर्तृत्वेनानिरुद्धस्य पालकत्वेन प्रसिद्धेः।

१०–३–२१. त्वमस्येत्यत्र सङ्कर्षणात्मकमिति वासुदेवकार्यम्। सङ्कर्षणकार्यमिति रक्षणस्य तद्द्वेषिदैत्यहननजन्यत्वेन कार्यकारणयोरैक्यात्। सर्वज्ञतेति अनागतज्ञानं सर्वज्ञतान्तर्गतम्। तस्य वसुदेवस्य। आर्षज्ञानमिति ऋषेर्मन्त्रद्रष्टुरिदमार्षम्। मन्त्राः लीलाप्रतिपादका अपि।

१०–३–२२. अयं त्वित्यत्र लौकिकस्येति लौकिकः कंसकृतोपद्रवो धरिद्यः

विशुद्धसत्त्वत्वे शूरत्वेपि विद्योपमर्दोऽविद्ययेति भगवते ज्ञापनायेत्यर्थः। भयमविद्याकार्यं, तस्मात्। 'तु'शब्द इति पूर्वार्धव्यावर्तने शक्तः। अज्ञाप्य इति ज्ञापयितुमयोग्यः कंसोसभ्यत्वात्। न इति बहुवचनं सर्वाभिप्रायेण। वर्तमानेतिफक्किका नातिप्रयोजना। पूर्वश्लोके आर्षज्ञानस्योक्तत्वाद् वसुदेवस्य। अस्येति वसुदेवस्य। मारणीय इति शङ्खाद्यायुधधारित्वात्। गन्तव्यमिति शिशुर्भूत्वा मां प्रेरयित्वा गन्तव्यम्। लक्ष्यत इति अर्थाज् ज्ञायते। ग्रन्थाच्च। न्यूनपूरणाद् वा ज्ञायते।

१०–३–२३. अथैनमित्यत्र प्रार्थयितुमिति 'प्रार्थिते वा ततः किं स्यात् साम्यभिप्रायसंशया'दिति योगविषयं भक्त्याविर्भूतपुरुषोत्तमस्य न तु ब्रह्मविद्याविषयमिति ज्ञापितम्, देवक्या ब्रह्मविद्यात्वात्। प्रथमत इति शरणगमनात् प्रथमतः। पदचतुष्टयार्थमाहुः स्वस्यैवेत्यादि। षड्भिः श्लोकैः विदितस्य ब्रह्मत्व उपपादिते आत्मजादिपदामङ्गतिर्ब्रह्मविद्यादेवकीं प्रति तद्वारणाय भिन्नप्रक्रमार्थकाथशब्दाभिप्रायेण पदचतुष्टयं सहेतुकं विवृतम्। स्वस्यैवेत्येवकारो'थ'शब्दस्य भिन्नप्रक्रमार्थत्वात् वेदादिरूपवसुदेवव्यावृत्त्यर्थः। 'वीक्ष्ये'त्यस्यार्थः ज्ञातवतीति। तथा बुद्धेरिति'वैष्णवीं व्यतनोन् मायां पुत्रस्नेहमयी'मिति वाक्यात्। तया तामस्याऽपुत्रेपि पुत्रत्वज्ञानात्। न तु 'स्त्रीशूद्रद्विजजातीनां त्रयी न श्रुतिगोचरे'ति ज्ञानाभावात्। 'महापुरुषे'त्यस्याभासमाहुः परमित्यादि। चतुर्भुजादीति आदिना श्रीवत्सलक्ष्मादि। इति तदर्थमिति इत्येवं श्रीदेवक्याभयज्ञापनाय। देवक्याः स्मृतिप्रकारेण स्तुतौ हेतुमाहुः स्वबुद्ध्येति। स्त्रियाः श्रौतज्ञाने नाधिकार इति भावः। 'उपाधाव'दित्यस्य 'प्रपद्य' इति वक्ष्यमाणैकवाक्यतयार्थमाहुः शरणं गतेति। यथा प्रथमस्कन्धे पृथा उपधावनानन्तरं शरणं गता। तत्र शरणं कार्पण्यरूपम्। अत्रापि तदेव। शरणमुपोपमगर्थः। उप दाक्षिण्ये पूजायां वा विश्वकोशात्। दाक्षिण्यं पूजा वा शरणम्। धाव् गतिशुद्ध्योः। भ्वा० उ० से०। आभासोक्तवाक्यार्थमुपपादयितुं स्तुतिमाहुः स्तुत्यैवेति। ब्रह्मविद्यात्वादेवकारः। गमिष्यतीति चतुर्थश्लोके। भीतेति ब्रह्मविद्यात्वादिति भावः। निवर्तयतीति भगवान् अभयं मोक्षं कथं न ददातीत्यर्थः। येनेति साधनेन। विस्मय आश्चर्यरसः। 'तमद्भुत'मित्यत्रोक्तोद्भुतरसोत्र सारितः। विस्मयः स्थायिभावः। चमत्कारदर्शनस्पर्शनस्मरणजनितोऽपरिपूर्णो मनोविकारो विस्मयः। 'रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्तिताः'। 'स्थायिभावो रसः स्मृतः' परं तु परिपूर्णः। 'चित्रं महानेष बतावतारः क्व कान्तिरेषाभिनवैव भङ्गिः, लोकोत्तरं धैर्यमहो प्रभावः काप्याकृतिर्नूतन एष सर्ग' इत्यत्र विभावादयः। नायकवचनम्। एष पुरुषः महान् विकाररहितः चित्रम्। बत हर्षे। एषा कान्तिः क्व? न कुत्रापि। प्रकारोभिनव एव। धैर्यं लोकोत्कृष्टम्। अहो प्रभावः। आकृतिरपि का? अपूर्वेव। ब्रह्मण एष विषयसर्गः विषयसृष्टिर्नूतनः। अत्र

लोकोत्तरवस्तु दर्शनादिर्विभावः। नेत्रविकासाद्यनुभावः। हर्षादि व्यभिचारी। विसयस्थायिभावोद्भुतरसः। इतिसरस्वतीतीर्थः[1]। एवं प्रकृतेपि। भङ्गिः, तत्र गमनोपवेशनदर्शनादिगतसौन्दर्यातिशयस्येति विस्तारिकाकृत्। तस्याश्रया। 'स्थायिभावो रसः स्मृतः' इति रसशास्त्रे। 'अभिसरत्युदायुध' इत्युक्तं ततश्चो'पाधावत्कंसा'दित्येकं पदमतः क्रियापदाकाङ्क्षाया'मथ'-शब्दमन्ते धृत्वा भिन्नप्रक्रमस्तवनभिन्नप्रक्रमस्तस्मिन् सत्य'स्तौ'दितिक्रियापदमर्थाल्लब्धमिति तेनान्वयो न तु भिन्नप्रक्रमे वेदादिप्रकारेण तत्र स्त्रिया नाधिकार इति। अन्यथेति 'उपाधावत्कंसा'दित्येकपदाभावे 'उपाधाव'दित्यस्य'थैनमस्तौदवधार्य पूरुष'मित्यत्रोक्तेना'स्तौ'-दित्यनेन पौनरुक्त्यं स्यात्।

१०–३–२४. रूपं यत् तदित्यत्र अष्टभिरिति श्लोकैः। 'पञ्चभि'रर्थैः। अर्थानां संनिवेशादन्यत्र। अष्टानां स्वरूपमाहुः आधिदैविकमित्यादिना। रूपत्रयं क्रमतस्त्रयाणां श्लोकानाम्। तुरीयस्यार्थमाहुः शरणागमने हेतुमिति। हेतुस्तुरीयस्य। 'मर्त्यो मृत्युव्यालभीत'इत्यस्य 'पञ्चभि'रित्यत्रापि तुरीयस्यार्थस्य। प्रकृत इत्यारभ्य पञ्चमस्य। 'पञ्चभि'रित्यत्राधिदैविकार्थस्य। इदानीमित्यारभ्य सिध्येदित्यन्तं षष्ठस्य।'पञ्चभि'रित्यत्राध्यात्मिकस्यार्थस्य। 'मधुसूदने'तिपदात्। 'कृष्णस्तु भगवान् स्वय'मित्युक्तस्याधिदैविकस्याधिभौतिक-वसुदेवमनःसम्बन्धात् आध्यात्मिकत्वम्। अत्र टिप्पण्याम्, तन्मारणेति आकाशवाणीप्रामाण्यात् कंसमारणसंभवे। पूर्वज्ञानेति सुबोधिनीं विवृण्वन्ति स्म पूर्वमुक्तेति। तादृशतद्दर्शनमिति उद्यतायुधकंसदर्शनम्। आकाशादिकृतं मायिकं वा। तथेत्यर्थ इति प्राणा न श्वासन्तीत्यर्थ इत्यर्थः। सुबोधिनी, प्रकारान्तरेणेत्यादिः प्रकारान्तरं जन्माज्ञानरूपं, तेन। प्रार्थयन्ती देवकी। अज्ञानं 'मा विद्या'दित्यनेन षष्ठे श्लोके प्रार्थयत इत्येवं स्पष्टार्थेत्यन्यथेतिसुबोधिनीं विवृण्वन्ति स्म अन्यथेतीति। जन्माज्ञानेति'मा विद्या'-दित्यनेन जन्माज्ञानोपस्थित्या तदभाव उक्तः, न तु जन्मज्ञान इत्युक्तं शक्यतावच्छेदकलाघवेपि। प्राणास्थितिरिति भगवतो युद्धार्थं प्रवृत्ताविव्येव। अयमेव प्रथमपक्षः। रक्षेति इदानीमुभयोरेकतरस्य कंसस्य। सुबोधिन्याम्, रूपेत्यादि सप्तमस्य श्लोकस्य। 'पञ्चभि'रित्यत्राधिभौतिकस्यार्थस्य। तत्रैव सुबोधिन्यां स्पष्टम्। अत्राप्याधिभौतिकत्वं स्पष्टयन्ति स्म सर्वाधिष्ठय इत्यादिना। अलौकिक इति प्रार्थनाविषयेऽलौकिकत्व उपसंहृते लौकिकसमानेऽलौकिक इत्यर्थः। शीघ्रमिति संस्काराभावेपि। चे इत्यत्र इ इत्यस्याश्चर्यार्थकस्य छेदः। स्वार्थमिति स्वस्याः ब्रह्मविद्याया विषयत्वार्थम्। आधिभौतिकम्। वसुदेवमनोपि ब्रह्मविद्या। मन ज्ञान इति धातुपाठात्। 'यतो वाचो निवर्तन्त' इतिश्रुतेः। द्वयमिति 'स त्वं घोरा'दिति 'जन्म त' इति श्लोकद्वयोक्तं द्वयम्। प्रकृतेति प्रकृतायां भयकृतस्तुतौ।

[1] मधुसूदनसरस्वतीतीर्थ इति प्रतिभाति।

स्वस्येत्यादिकोऽष्टमस्य श्लोकस्य । 'पञ्चमि'रित्यत्र पञ्चमस्यार्थस्य। स्वस्येति देवक्याः। भगवत्सेवानुकूलत्वलक्षणं पुंस्त्वं विवक्षितम्। तदेतत् कारिकायां सङ्गृह्णन्ति स्म रूपत्रयमित्यादि। रूपत्रयमाधिदैविकादि। प्रार्थनात्रितयम् श्लोकत्रयोक्तम्। विज्ञानमित्यादिकं चतुष्टये प्रत्येकमन्वेति। स्वस्येति देवक्याः, पुंस्त्वं भगवत्सेवानुकूलत्वलक्षणम्। यादृगिति ब्रह्मविद्यासामग्रीं न्यूनां कृत्वा भक्तिमार्गीयसामग्रीप्रबलविषयकम्। तेन चतुर्भुजादिरूपोपसंहारप्रार्थनेपि न चतुर्भुजादिरूपे गोपालतापिनीयादिब्रह्मविद्यानिरूपिते काचित् क्षतिः। स्वाभीति 'स त्वं साक्षाद्विष्णु'रित्यभिज्ञानम्।'अध्यात्मदीप' इत्यनेन प्रमाणम्। आधिदैविक इत्यर्थात्। आधिदैविको भगवान् प्रमाणं, 'अत्र प्रमाणं भगवा'निति वाक्यात्। अन्यत्र ज्ञानमात्रं शाब्दं वा भवतु, न त्वभिज्ञानं, उक्तश्रुतेः। प्रसिद्ध्येति प्रसिद्ध्या सह इत्यर्थः। 'यत् तत् प्राहु'रित्यनेन प्रसिद्धिरुक्ता। द्वयमिति आध्यात्मिकमाधिभौतिकं च। आध्यात्मिकस्याधिदैविकाधिभौतिकसम्बन्धजन्यत्वात्। अन्यथेति अस्यापि लोकसिद्धत्वे, 'योऽध्यात्मिकोऽयं पुरुष' इतिवाक्यात्। प्रमाणानामिति आधिदैविकादिशब्दानाम्। अनुवादकत्वमिति सिद्धस्य कथकत्वम्। तदेवेति प्रत्यभिज्ञा। आनुपूर्व्येणेत्यादि यत्तदोर्नित्यसम्बन्ध इत्यानुपूर्व्येण। आकाङ्क्षावैपरीत्यं 'रूपं तत् यत् प्राहु'स्तद्रूपमित्येवम्। स्वस्य देवक्या अनुभवः स्वबुद्ध्या स्मृतिजनकः तस्य दार्ढ्यार्थम्। अनुभवदार्ढ्ये स्मृतिर्दृढा भवति भगवद्विषयिणी। वैलक्षण्यादिति आधिदैविकादस्य वैलक्षण्यात्। अत्रैवेति जगत्सलक्षणत्वेन प्रतीयमान एवास्मिन् रूपे। नवधा हि जगदिति पृथिव्यप्तेजोवाय्वाकाशमनोबुद्ध्यहंकारजीवा इति नवधा, 'भूमिरापोनलो वायु'रित्यादिवाक्यात्। 'तत्त्वान्युक्तानि मे नवे'ति श्रीभागवते। आत्ममायागुणास्त्रयः, विस्तारे नव, एकैकस्य त्रैविध्यात् इति वा। यद्वा। सच्चिदानन्दानां त्रयाणां विस्तारो नव। मूलरूपमिति 'अक्षरात् सौम्य विविधा भावाः प्रजायन्त' इति श्रुतेः। 'पुरुषोत्तमेऽव्यक्तत्वं समाकर्षा'दित्यधिकरणोक्तम्। आद्यमिति सत्यज्ञानानन्तानन्दम्। जगच्चेति इदं त्वाधुनिकमिति लोकप्रतीतिरित्यनेनान्वयः। उक्तमिति अव्यक्तं स्वरूपलक्षणकं द्वेधापि आद्यं कालकृतं परमित्येवमुक्तं 'अदृश्यत्वादिगुणको धर्मोक्ते'रित्यधिकरणे च। वदन् परिमाणेनेति शब्दो वदन् परममहत्परिमाणेन। तथैव रूपमिति इति लोकप्रतीतिरित्यन्वयः। तदिति प्रसिद्धं सूर्यादिनिष्ठम्। सूर्यादिनिष्ठतेजसो भगवदीयत्वे युक्तिमाहुः अन्यथेति। तेजसो भगवदीयत्वाभावे जगत्त्वावच्छेदेन जगदभिव्यक्तिर्न स्यात्। दशाङ्गुलं विम्बमिति। तथा च तेजो भगवदीयं न स्यात् जगदभिव्यक्तिर्न स्यादित्यन्यथाज्ञानरूपा युक्तिः। ननु कारणधर्मजात्ये कार्यं कथं त्रिगुणमित्याकाङ्क्षायां समवायिकारणत्वात् तथा न तु कर्तृत्वे इत्याहुः गुणानामित्यादि। गुणानां कारणत्वं माहात्मने।

सिद्धान्तेपि 'आत्ममायामृते' इति वाक्यात्। भगवत्कारणतेति भगवतः कर्तृता। तत्र हेतुः स्वातन्त्र्येति। गुणाधीनत्वेन तथा। 'स्वतन्त्रः कर्ते'ति पाणिनिसूत्रात्। ब्रह्मविद्यारूपदेवक्याः स्तुतिर्वेदान्तरूपापि। तथा च गुणानां कारणत्वे वेदान्तश्रुतिविरोध इति गुणातीतमेव कारणमित्यर्थः। निर्गुणं विवृण्वन्ति स्म सदंशा इति। न चितीति ज्योतिरित्यनेन चिद्रूपत्वमुक्तम्। तद्विरुद्धा गुणा नात्र तत्र सम्भवन्तीति गुणातीतमेव कारणमित्यर्थः। कारणस्य स्वमतेन निर्गुणत्वमाहुः तदेवेति। प्रपञ्चविलक्षणमिति निर्गुणमित्यर्थः। रूपं त्वाधिदैविकभूतेन्द्रियादिरूपम्। निर्विकारं विवृण्वन्ति स्म प्रपञ्चस्त्वित्वति। भावविकाराः षट्, जायतेऽस्ति विपरिणमते वर्धतेऽपक्षीयते नश्यतीति। अत इति प्रपञ्चविलक्षणत्वात्। तदेवाहुः लौकिकानीति। इदं तु प्रपञ्चविलक्षणम्। इन्द्रियादिभिरिति। आदिपदेन सूर्यादिचक्षुराद्याधिदैविकसङ्ग्रहः। नन्वानन्दमात्रे वक्तव्ये 'सत्तामात्र'मिति किमित्युक्तमित्याकाङ्क्षायामाहुः विषयकृतमित्यादि। यद्वा। प्रपञ्चवैलक्षण्येङ्गीकृते आनन्दवैलक्षण्यं प्राप्तं वारयन्ति सेत्याहेत्याहुः विषयकृतमिति। निराकरणीयमिति 'आनन्दं ब्रह्मणो विद्वान्' इति 'आनन्दमेतज् जीवस्ये'ति श्रुतिद्वयदर्शनादिति भावः। मात्रच्प्रत्ययः कार्त्स्न्ये इत्याहुः सर्वमेवेति। कृत्स्नमेव। अपीति अपिना चिद्रूपं आनन्दरूपं च। तेनानन्देपि न विषयकृतं वैलक्षण्यमिति भावः। आद्यपदेनानन्दमयस्य मूलभूतत्वात्। 'सत्तामात्र'मित्युपलक्षणम्। 'सत्यात्मकं त्वां शरणं प्रपन्ना' इत्यत्र सत्यपदवत्। तेन व्यष्टिसत्तायां कारणत्वभरः। 'सदेव सोम्येदमग्र आसी'दिति छान्दोग्यात्। तेन स्त्रीत्वेन स्मृत्या स्तुतिः, विद्यात्वेनोपनिषदनुसारिणी स्तुतिः। आनन्दांशे जगद्वैलक्षण्यं निराकृतं, अधुना जगद्वैलक्षण्यार्थं जगति वैलक्षण्यं विशेषरूपमग्रिमविशेषणप्रतियोगिरूपमाहुः विशेषनामेति। व्यावर्तकविशेषपदार्थनामरूपधर्मवद् भवति परमाण्वंशे। बृहदारण्यकात् षष्ठस्कन्धार्थेन विशेषदर्शनं भगवति षष्ठस्कन्धार्थवैलक्षण्यार्थम्। षष्ठस्कन्धे प्रकरणत्रयम्, नामप्रकरणं रूपप्रकरणं क्रियाप्रकरणं च, षष्ठस्कन्धार्थः पोषणम्, 'पोषणं तदनुग्रह' इतिवाक्याद् विषयतासम्बन्धेन जगद्वृत्त्यनुग्रहात् आश्रयतासम्बन्धेन नामरूपकर्मवान् भगवान् विलक्षणः। जीवे विशेषकर्म भगवति सामान्यं कर्मेति बोध्यम्। एवं सर्वमित्यादिफक्किकाभासे तात्पर्याभावदर्शनाद् व्याख्याता जगदानन्दस्यावैलक्षण्यार्थम्। आवृत्त्या व्याख्यायते। तर्हि मात्रचोवधारणार्थत्वमपीति तस्याङ्गीकारे निर्विशेषपदस्य किं प्रयोजनमित्यतो 'निर्विशेष'पदमवतारयन्ति स्म सर्वमित्यादि। सामान्यमिति सत्तारूपं नित्यमेकमनेकानुगतं सामान्यं न भवति किन्तु ब्रह्म। इयं व्याप्तिरिति सामान्यत्वेन विशेषवत्त्वेन व्याप्तिः सत्ता विशेषवती, सामान्यत्वात्, घटसत्तावदित्यनुमानम्। इतीति एतज्ज्ञापनार्थम्। साध्यतावच्छेदकसम्बन्धभेदात्। सत्तामात्रं सामान्यत्वहेतुमदपि साध्याभाववदित्या-

हेत्यर्थः। अन्यथेत्यादि अन्यथा उक्तव्याख्यानाभावे। सत्तामात्रनिर्विशेषयोः पौनरुक्त्यं स्यात्। साध्याभावोपि सत्तामात्र एवेत्याहुः विशेषा हीति। नामरूपधर्मरूपाः। हीति 'चरमः सद्विशेषाणां' इत्यत्रापि विशेषा व्यावर्तकाः। मूलसत्तायामिति आत्मरूपायां सत्तायाम्। तथा च विशेषवत्त्वं चित्यानन्दे चेति भावः। व्यावर्त्यसत्त्वात्। सेत्तावैन्नासंयस्त्वाद्या इति सामान्ये सत्ताभावाद् धर्माभावप्रयुक्तो नामरूपाभावः। वाङ्निवृत्तिश्रुतेः। आद्याः द्रव्यगुणकर्मपदार्थाः सामान्यसमवायविशेषाभावेषु। विशेषेणेति व्यावर्तकेन। कार्यं न व्यावर्तनीयमिति सत्तया कार्यं न व्यावर्तनीयम्। घटत्वद्रव्यत्वादिना तु व्यावर्तनीयम्। क्वचित् कार्यं न कर्तव्यवर्तयमिति पङ्क्तिः। सा यथा लिखितपाठकस्य भाष्ये पाठकाधमेषु पाठात् बाहुलकाद् व्याकृता। अधुना अस्मत्प्रकरणे फले परोक्षातिपरोक्षवादानुक्तेः परोक्षवादमाहुः कर्तव्यवर्तयमिति। अतिपरोक्षवादः। कर्त छिन्नं तस्मान् न व्यावर्तनीयमित्यर्थः। काना–न्यक्षरयोरलुखरति(?)परोक्षवादार्थम्। कर्तव्यवर्तं वृतु वर्तने क्विप्। इ अम् अव्ययद्वयं आश्चर्ये प्रसिद्धौ चेति परोक्षवादः। कर्तव्ये वर्तनीयमित्यस्य। अन्यथेति सत्तायाः कार्यवैलक्षण्ये। तस्य कारणेति मूलसत्त्वसमवायिता। 'निरीह'पदं व्याकुर्वन्ति स पूर्णमित्यादि। चेष्टमानमिति 'अचेतनत्वेपि क्षीरवच्चेष्टितं प्रधानस्ये'ति साङ्ख्यसूत्रात् प्रधानचेष्टा। ननु कार्येपि न चेष्टा नियता, आकाशादौ व्यभिचारादित्यत आहुः आकाशेत्यादि। आदिना जडलोहादिकमभिमन्त्रितम्। चेष्टा व्यापारः महाभाष्येपि। ननु नैयायिकैश्चेष्टात्मधर्मो व्यापारो जडधर्म इत्युच्यत इत्याकाशे चेष्टाराहित्यं न कारणासाधारणलक्षणमित्यत आहुः आवरणेति। घटाद्याकाशावरणस्य घटादेर्गमने सर्वक्रियारूपे गमने कार्यापगमे घटादिनाशे तन्निष्ठाकाशे साकारे साकारत्वापगमवत्। तथा च चेष्टात्वव्यापारत्वजातिद्वयकल्पने गौरवमिति भावः। अयं दृष्टान्त, उत्तरत्र। आकाशापगमस्यापीति आवरणनिवृत्ताविति द्रष्टव्यम्। अन्धकारवदिति सप्तम्यन्ताद् वतिः। दीपचलनेन्धकारवत्। तथा च दीपचलनेन्धकारचलनवदाकाशेपि घटाकारे दृष्टानुरोधान् नैमित्तिकी चेष्टाङ्गीकार्या। अन्यथा घटाद्याकाराकाशप्रतीतेर्निर्विषयत्वापत्तेः। न च सा भ्रम इति वाच्यम्। भ्रमत्वेपि सविषयत्वस्यावश्यकत्वात्। आकाशस्य सर्वगतत्वात्। न च विषयोऽसन्नेव प्रतीयत इति वाच्यम्। श्रौते मते आकाशस्य कार्यत्ववद्व्यापकत्वस्यापि सत्त्वात्। अन्यथा 'ज्यायानाकाशा'दितिश्रुतिविरोधापत्तेः। एवं सिद्धेऽव्यापकत्वे तत्र क्रियाङ्गीकारोपि युक्त एवेति पूर्वोक्तप्रतीतेरभ्रान्तत्वमेव युक्तम्। धियां बाधकं विनौत्सर्गिकत्वादिति। नन्वेवं सति ब्रह्मण्यप्याकाशशरीरे चेष्टास्तु, मिषत्वस्य तत्रापि श्रौतत्वादित्यत आहुः ब्रह्मणीत्यादि। आवरकेति आकाशवद् घटाद्यावरकासम्भवात्। 'आकाशवत् सर्वगत' इत्याकाशदृष्टान्तादावरणसम्भवादाहुः अन्यथेति।

-जगज्जन्मादिकर्तृत्वेन वेदान्ते व्यवहार्यत्वं, साङ्ख्ये तु 'असङ्गोयं पुरुष इती'ति सूत्रा-
दव्यवहार्यत्वात् ।'प्रधानाज्जगज्जायत इती'ति साङ्ख्यसूत्रात् । प्रधानस्य व्यवहार्यत्वात् । एक-
स्मिन्निति यथाऽव्यक्ते नवधर्माणां क्रोडीकरणं पातङ्गिकरणम् । 'क्रोडः शूकरपातङ्गो'-
रिति विश्वः। पतदङ्गः पतङ्गः शकंध्वादिः । तस्यापत्यं पातङ्गिः अत इञ् । पतङ्गार्भक-
करणम् । पृथिव्यामिदं सर्वमिति । अव्यक्तं प्रकृतिः पृथ्वीः ।५। एवमाद्ये नवधर्माणां क्रोडी-
करणं मूलकारणत्वात् सत्तारूपाणाम् । आद्यः बुद्धिः । आत्मत्वात् ॥१॥ एवं ब्रह्मणि नव-
धर्माणां क्रोडीकरणम् । 'मनोमात्रमिदं ज्ञात्वे'ति वाक्यात् । ब्रह्म मनः। 'आत्मा देहमनो-
ब्रह्मस्वभावधृतिबुद्धि'ष्विति विश्वात् ।२। एवं ज्योतिषि नवधर्माणां क्रोडीकरणम् । 'ब्रह्म
तर्हि अग्निः' इति सुबोधिन्याम् ।४। एवं निर्गुणे, नवधर्माणां क्रोडीकरणम् । 'सर्वाणि
इमानि भूतानि आकाशात् समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्ति आकाशः परायण'मिति
छान्दोग्यात् । निर्गुणं आकाशः । 'आकाशशरीरं ब्रह्मे'ति श्रुतेः। 'नीरूपो नील आकाश'
इति प्रस्थानरत्नाकरग्रन्थे ।३। तृतीयपञ्चमाङ्कव्यत्ययो वा । एवं निर्विकारे नवधर्माणां क्रोडी-
करणम् । 'आपमापामपः सर्वा' इति श्रुतेः । आपः विकारो शुद्धिः तद्रहिताः ।६। एवं
सत्तामात्रे नवधर्मक्रोडीकरणम् । अतिदेशाधिकरणे प्राणश्रुतेः प्राणैर्भूयत इति भावप्रत्य-
-यात् ।७। एवं निर्विशेषे नवधर्मक्रोडीकरणम् । निर्विशेषा निराकारा जीवाः । नामरूपधर्म-
रहिता वा । तत्र नवधर्माः शरीरद्वारा प्रसिद्धाः । 'नैव किञ्चित् करोमी'ति वाक्यात् ।९।
एवं निरीहे नवधर्मक्रोडीकरणम् । निरीहोऽहंकारः । अहंकारी सर्वत्र न गच्छतीति । 'ततोहं
नामाभव'दिति पुरुषविधब्राह्मणश्रुतेः प्रथमकार्ये नवधर्मक्रोडीकरणं युक्तम् ।८। अत्र 'भूमि-
रापो नलो वायुः खं मनोबुद्धिरेव च अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा, अपरेय-
मितस्त्वन्यां प्रकृतिं विद्धि मे पराम्, जीवभूतां महाबाहो ययेदं धार्यते जग'दिति सप्तमे
ज्ञानविज्ञानयोगाध्याये । वाक्ये अनुसन्धेये । इमे पुरुषोत्तमयोगाध्याये योक्तव्ये ।
पुरुषोत्तमजन्मप्रकरणात् । तथाहि । 'यो मामेवमसंमूढो जानाति पुरुषोत्तमम्, स सर्व-
विद् भजति मां सर्वभावेन भारते'त्यत्र । 'एवं' नाम क्षराक्षरोत्तमत्वेन । तत्र क्षराक्षरयोर्नव-
धात्वं, इति पुरुषोत्तमसम्बन्धस्तयोः । प्रकृतिर्यदि स्वरूपम्, तदात्मसृष्टिः । यदा तु माया
तदा पौराणी क्रमसृष्टिरिति ज्ञेयम् । वैलक्षण्यस्येति जगद्वैलक्षण्यस्य । वक्तव्यत्त्वादिति
अग्रेवाग्रे वक्तव्यत्वात् । तादृशमिति नवविशेषणविशिष्टम्, स्वदोषेणैवेति इच्छाभावात्
दिव्यचक्षुराद्यदानाद्य करणदोषेण । सर्वभोग्यसुधाया अपि तादृग्विषयत्वेनाभावादेवकारः।
नन्वेकस्मिन्नपि विशेषणे सर्वधर्मसङ्ग्रहसिद्धौ किमिति नवानामुक्तिरित्यत आहुः नवविध-
त्वेति । इयं भ्रमरूपा । आनन्दमात्रे गीतोक्तभूमित्यादिप्रकारेण ज्ञानात् । भ्रमरिकेति
दृष्टिरूपकरणदोषः। तस्यैवेति करणविषयान्यतरदोषदुष्टस्यैव । इतरयोगव्यवच्छेदकैवकारः।

एवेति न तु नवधात्वविशिष्टः। ननु भवत्वेवम्, तथाप्यत्रोक्तानां स्वरूपे प्रतीत्यभावात् कथं सिद्धिरित्याकाङ्क्षायां वक्ष्यमाणव्याप्तिमूलभूततर्कानुगृहीतानुमानात् सिद्धिरित्याशयेनाहुः एवमत्रापीत्यादि। अन्यथेतिपदमग्रेपि सम्बध्यते। तथा च भगवान् अव्यक्तः ब्रह्मादिभिस्तदभिव्यक्त्यर्थं प्रयत्नकरणात्, यन्नैवम् तन्नैवम्, घटादिवत्। भगवान् आद्यः पश्चादुत्पन्नत्वेपि ब्रह्मादिभिस्तन्नमस्करणात्। यन्नैवं तन्नैवम्, घटादिवत्। भगवान् ब्रह्म, ब्रह्मादीनां तत्र सायुज्यमाप्तेः। यन्नैवं तन्नैवं,मायिकघटादिवत्। भगवान् ज्योतिः तज्ज्ञानेन ब्रह्मादीनां सार्वज्ञ्यभवनात्। यदेवं तदेवं धूर्जटिवत्। यन्नैवं तन्नैवं, विष्णुमित्रवत्। भगवान् गुणातीतः तन्निष्ठानां निर्गुणभवनात्, यदेवं तदेवं व्रजभक्तवत्, यन्नैवं तन्नैवं घटादिवत्, भगवान् निर्विकारः तद्भजने सर्वविकाररहितत्वात्। यदेवं इत्यादि पूर्ववत्। भगवान् सत्तामात्रः सर्वेषु पदार्थेषु तेषां तद्दर्शनात्। यन्नैवं तन्नैवं घटसामान्यवत्। भगवान् निर्विशेषः, तज्ज्ञानेन प्रपञ्चनिवृत्तेः। यन्नैवं तन्नैवं घटादिवत्। आनन्दमात्रो निरीहः एतत्कृपया तेषां ब्रह्मनिष्ठत्वभवनात्। यन्नैवं तन्नैवं प्रेरितघटादिवत्। अत इति उक्तविधानुमानेभ्यः। सम्भवतीति किन्तु भक्तभजनीयत्व एव सम्भवति। 'यो मामेवमसंमूढो जानाति पुरुषोत्तमं स सर्वविद् भजति मां सर्वभावेन भारत, इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ एतद् बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारते'ति पुरुषोत्तमयोगाध्यायवाक्याभ्याम्। 'सर्वभावेने'त्यस्य सर्वात्मभावेनेत्यप्यर्थः। कालिकव्यभिचारमाशङ्क्य परिहरतीत्याशयेनाहुः नन्विदानीमित्यादि। न त्वनवतारकालिकस्वरूपस्येति तद्योगव्यवच्छेदक एवकारः। आविर्भूतस्येति कालात्मनः। शक्यत इति तथा च कालिकात्मनि सङ्कर्षणव्यूहेषु नैतादृशत्वस्य व्यभिचारः। विशेषेणाभितश्चरणम्। कालिकानवताररूपे ज्योतिराद्यधिकरणोक्ते कस्मिंश्चित् प्रसिद्धव्यभिचारः साध्याभाववद्वृत्तित्वरूपः। तत्त्वमेवेति प्रत्यभिज्ञा। सेयं दीपमालिकेतिवत्। तत्तादन्ताप्रकारकं ज्ञानं प्रत्यभिज्ञा। अयमर्थः। शब्दार्थयोर्द्वितीयाध्यायोक्तयोः कालात्मनोरैक्यं औत्पत्तिकसम्बन्धात्। युष्मच्छब्दार्थः प्रद्युम्नः व्यूहत्रयेयं प्रत्यक्षः। सः तत् इति पूर्वोक्तेति विष्णुः पुरुषोत्तमसमानधर्मत्वेन पुराणे प्रसिद्धः। अत उक्तं पूर्वोक्तप्रकारेणेति। ब्रह्मवाक्यादिति 'दिष्ट्याम्ब ते कुक्षिगतः परः पुमान्' इति 'विष्णुः सर्वगुहाशय आविरासी'दिति वाक्यैकवाक्यतया 'स त्वं विष्णु'रिति ब्रह्मविद्यात्वाद् देवक्या ज्ञानम्। तथा च ब्रह्मवाक्यादित्यस्य शुकवाक्ये 'विष्णुः सर्वगुहाशय' इत्यस्मिन् ग्राह्ये भगवद्वाक्यादित्यर्थः। 'वैयासकिः सभगवान्' इत्यत्र शुकवाक्ये भगवद्वाक्यत्वोक्तेः। अंशावतार इति सत्त्वावतारः। वाक्यमिति 'स त्वं विष्णुः साक्षा'दितिवाक्यम्। अध्याहृतक्रियया 'एकतिङ् वाक्यम्'। अध्यात्ममिति पूर्वमाधिदैविकभगवन्मनःसम्बन्धाद् वसुदेवमनसः। वस्तुत इति

स्वरूपतः। तदेवास्येति त्वत्सान्निध्यमेवास्य प्रकाशस्य कारणम्। मदनुभावेनेति ममानुभावः त्वत्कृतः तेन। अनुभावो वस्तुत इत्यारभ्य प्रकाशयुक्त इत्यन्तेनोक्तः। कार्यमिति एवं प्रकाशरूपम्। लिङ्गमिति आधिदैविकत्वे।

१०-३-२५. नष्टे लोके इत्यत्र आध्यात्मिकं रूपमिति अध्यात्मनि भवमाध्यात्मिकम्। तत्र भव इति ढक्। लयम्। 'अशेषसंज्ञः' च। उपपादयन्ति आधिभौतिकस्येत्यादि। 'अत्रात्मा स्वयंज्योतिर्भवती'ति श्रुत्युक्तस्यैव। 'अत्रे'ति स्वप्ने। तथा सुषुप्तिसाक्षिप्राज्ञस्यैव। मुक्तावप्यात्मा तस्यैव। तत्र लयेऽनुभवं प्रमाणयन्ति स दृश्यते चेत्यादि। अध्यात्मनीति अव्ययीभावभ्रमो न कर्तव्यः। सर्वस्य लोकस्यात्मनि लयाभावात्। अतोधिक आत्माध्यात्मा तस्मिन्नित्यर्थः। स्वकारणे इत्यर्थः। एवकार आत्मसृष्टावप्येवमिति प्रकारान्तरयोगव्यवच्छेदकः। तस्यैवेति अभिमन्तुः। एवकार इन्द्रियादियोगं व्यवच्छिनत्ति। स्वप्नादाविति आदिना सुषुप्तिः। 'सुषुप्तिकाले सकले विलीने तमोभिभूतः सुखरूपमेती'ति श्रुत्याध्यात्मिकस्याभिमन्तुर्ज्ञानस्य तमोरूपाज्ञानाभिभवेन लय उच्यते। सोप्यध्यात्मके। सुखमाधिदैविकमन्तर्यामिसुखे आधिभौतिके मिलितं सुखरूपमाध्यात्मिकमित्यर्थः। अयमिति 'अत्रात्मा स्वयंज्योतिर्भवती'ति श्रुत्युक्त आध्यात्मिकः अयं प्रत्यक्षः। श्रुता'वत्रे'ति स्वप्ने। अयमात्माधिक इत्यर्थः। अन्यस्येति स्वप्नद्रष्टुर्जीवस्य। स लयेवधिर्न भवति किन्तु स्वप्नमात्र इत्यर्थः। लयावधित्वमिति लयाधिकरणत्वेपि 'जन्माद्यस्य यत' इत्यारम्भे व्याससूत्रे चेति लयावधित्वम्। पञ्चमीश्रवणात्। आहेति 'नष्टे लोक' इत्यनेनाहेत्यन्वयः। लोकस्य सविषयत्वाल् लोकशब्दस्यार्थद्वयमभिप्रेतमित्याहुः लोक इत्यादि। लोक्यतेनेनेति लोकः बाह्यप्रकाशः। लोक्यन्त इति लोका इति कर्मव्युत्पत्तौ ते चतुर्दश। सर्वनाश इति न तु यस्य कस्यचित् स्वामिकः। परार्धद्वय इति द्वे परार्धे द्विपरार्धं द्विगुः। लोक इति ब्रह्मकार्ये। ब्रह्मण उत्तरेति एवकार इवार्थे। ब्रह्माण्डस्थानामिति पूर्वपुण्ये विषयासक्त्या बन्धः। पञ्चाशद्वर्षपर्यन्तम्। उत्तरोत्तरमभिवृद्धितः। उत्तरायुषि सृष्टेरुत्तरोत्तरं ह्रासोतोधिकारिणामपि क्रमेण बन्धनिवृत्त्या मोक्ष इति ज्ञापनार्थम्। प्रलय इति प्राकृतिकप्रलयः 'ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे, परस्यान्ते कृतात्मानः प्रविशन्ति परं पद'मिति विशिष्टजीवानाम्। प्रलय इति प्राकृतिकः। तत्त्वानीति ब्रह्माण्डकारणानि। तदैवेति एतेनावान्तरकल्पेषु त्रिलोक्या इव शतमहाकल्पेषु सप्तलोक्याः प्रलयः। चतुर्दश लोकाः सात्त्विकपक्षे। त्रिलोकीपक्षस्तामसः। सप्तलोकीपक्षो राजसः। शेषा तु ब्रह्माण्डरूपा भूस्तिष्ठतीत्यनुसन्धेयमिति ज्ञापितम्। तत्त्वानीति ब्रह्माण्डकारणानि। अग्र इति अत्रैवाग्रे। आदौ भूत इति अस्मिन् पक्षेऽहङ्कारो नायातीति मूलस्थे'गते'ष्विति पदेऽहङ्कारद्वारा गतेष्विति व्याख्यानं बोध्यम्। प्रकृतिमिति अव्यक्तम्।

व्यक्ताव्यक्तेति महत्तत्त्वे प्रकृतिमित्यस्य स्थले व्यक्ताव्यक्तपदाभ्याम्। एतदिति एकस्यैव भगवतः स्थितिसंहारकाले वदन्ती देवकी व्याख्यायमानां प्रवेशक्रियां सूचयति। अक्षरादिति साक्षात्सृष्टिः क्रमसृष्टिः मुण्डकेऽक्षरात् सृष्टिः। 'आसीज् ज्ञानमथो ह्यर्थः केवलं निर्विकल्पितं वाङ्मनोगोचरातीतं द्विधा समभवद् बृहत्' इत्यादि श्रीभागवते। पुरुषोत्तमाभिन्न इति अत्र टिप्पणी। अक्षरस्य रूपद्वयं वस्तुन एव तथात्वात् जातिव्यक्तिभेदेन। जातिश्चरणौ वाक्यपदीये जातेरात्मत्वोक्तेः। जातिगुणयोरक्षराक्षरत्वयोर्भेदः स्पष्ट एवं स्पष्टार्थो। इदं द्वयं आभासोक्तमध्यात्मरूपद्वयम्। तेना'दृश्यत्वादिगुणको धर्मोक्ते'रित्यधिकरणेऽक्षराभिन्नपुरुषोत्तम उक्तः, स चरणरूपाक्षराभिन्न इति ज्ञेयम्। स्वरूपाणीति 'यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्ता'दिति महानारायणोक्तानि। आधीति तमःपरत्वलिङ्गात्। तन्निवृत्त्यर्थं लयनिवृत्त्यर्थम्। संज्ञा इति 'श्रीकृष्णः सच्चिदानन्दो नित्यलीलाविनोदकृत् सर्वागमविनोदी च लक्ष्मीशः पुरुषोत्तम' इत्यादिपुरुषोत्तमसहस्रनामस्तोत्रोक्ताः। ब्रह्मविद्यात्वात् देवक्या अशेषपदे तात्पर्यमुक्तम्। तत्प्रसङ्गेन शेषपदच्छेदे त्वाहुः सर्वशब्देति। शेषाशेषादिशब्दवाच्यः। शेषः शब्दः वेदेऽशेषोर्थो वेदान्ते ब्रह्मविद्यायाम्। वेदे। श्रुतिस्तु 'स शयानमसृजते'ति तृतीयाष्टके 'तस्मात् समानाः प्रजाः प्रजायन्त' इति श्रुतिश्च।

१०-३-२६. योयं काल इत्यत्र अध्यात्मेति अधिक आत्मा। आधिभौतिकं रूपमिति रूप्यते व्यवह्रियते येनाधिभौतिकत्वेन तदाधिभौतिकत्वं रूपम्। आधिभौतिकभूल इति आधिभौतिकत्वजातिरूपात्मा। अयमिति प्रत्यक्षः आधिभौतिकानामाधिभौतिकः काल आधिभौतिको भगवान् जातिरूपः। तथात्वेत्यादि आधिभौतिकानामाधिभौतिकत्वज्ञापकम्। इदंपदोक्तप्रत्यक्षसमानाधिकरणः कालः आधिभौतिकः चेष्टा यस्य तत्सम्बन्धिनस्ते तव चेष्टामाहुरिति सम्बन्धः। कालरूप इत्यस्य चेष्टात्मकर्मपदार्थस्याभेदो यथा तथात्रैवाग्रे वाच्यः। कालेति आधिभौतिकवच् चेष्टारूपो भगवानिनो 'निमेषादिर्वत्सरान्त'स्तत्प्रेरितानि। चेष्टारूपकर्मपदार्थरूपत्वं प्रकाशाश्रयन्यायेन। सामान्यत्वतलादिप्रतिपाद्यजातिरूपत्वं 'तत् सृष्ट्वा तदेवानुप्राविश'दिति छान्दोग्येन। 'योय'मित्याधिभौतिकः 'निमेषादिर्वत्सरान्तः'। तस्येति व्याख्येयम्। सर्वेषामित्याधिभौतिकानामित्यर्थः। मूलभूतस्येति आधिभौतिकस्य जातिरूपस्य तव 'चेष्टामाहु'रित्यन्वयः। तत्र हेतुः स एवेति। 'प्रकृतेर्गुणसाम्यस्य निर्विशेषस्य मानवि चेष्टा यतः स भगवान् काल इत्युपलक्षित' इति तृतीयस्कन्धे कपिलवाक्यात्। स एव भवानिति हेतोः। तत्रेति तादृशे विचारे मानमिति शब्दरूपं मानम्। 'तं चेष्टामाहु'रिति मूले योजना। यत्तदोर्नित्यसम्बन्धात्। चेष्टासत्त्वमुपपादयन्ति स न हीत्यादि। अस्तिभातिप्रियत्ववत्। समन्वया-

चिकरणे स्पष्टम् । 'आहु'रित्यन्यमुखेनास्वरसेन चेष्टायाः कालत्वमुक्तम् । 'चेष्टते येन विश्व'मित्यनेन स्वमतमित्याशयेनाहुः कालवशाच्चेति । चकारः 'आहु'रित्युक्तमभेदपक्षमाह । चेष्टायाः कालत्वे 'आहु'रिति यन् मानमुक्तम्, तदस्वरसप्रस्तमिति द्वितीयं यत्। तदुपपादयन्ति स काले कर्मेति । 'दर्शपूर्णमासाभ्यां यजेते'त्यत्र । अत इति यो यज्ञनकः स तदात्मक इति व्याप्तेः । प्रकृतीति वक्ष्यमाणैकादशवाक्योक्तपक्षे । द्वितीयस्कन्धे तु 'ह्यात्ममायामृत' इत्यत्र मायाद्वारा कार्यपक्षस्तस्मिन् । सर्वकार्यकर्तेति तस्य सम्बोधनं 'अव्यक्तवन्ध'विति । प्राकृतेति 'प्रकृतिर्यस्योपादानमाधारः पुरुषः परः सतोभिव्यञ्जकः कालो ब्रह्म तत्त्रितयं त्वह'मित्येकादशस्कन्धवाक्यादित्यर्थः । अत्र कालः सतोभिव्यञ्जकः । द्वितीयपक्षे चेष्टा कालस्तज्जनको वा । देहरूपस्य कालस्य चेष्टात्मकस्वरूपभूतकर्मरूपस्य च व्यवस्थामाहुः आधिदैविककालस्येति । भगवद्रूपत्वं शब्दार्थयोरभेदात् साधनप्रकरणे कर्मेश्वरवादाच्च । तद्व्यावृत्त्यर्थमिति 'अय'मिति मूलपदविरोधात् तद्व्यावृत्त्यर्थम् । ततोपीत्याहेति ततोप्यधिकमाह । एवमिति संवत्सरतो महीयान् । अवशिष्यत इति काल इत्यन्वयः । आधिदैविकः कालः । प्रपद्य इति प्रपत्तिः शरणमार्गः । अनेनेति चेष्टाकालरूपत्वादिना । प्रमाणमिति 'आहु'रित्यादिशब्दात्मकम् । स ईदृश एवेति शरणागतेरप्रयोजकत्वनिवर्तकः परिदृश्यमान एव । देवक्यदाहरणमत्रेत्याहुः ऐश्वर्यमित्यादि । आधाररूपधर्मस्येति आधारभूतस्य धर्मरूपस्य सत्त्वस्य । क्षेमधामेति लिङ्गव्यत्ययः । सत्त्वस्य नपुंसकत्वादिति भावः ।

१०–३–२७. मर्त्य इत्यत्र रूपत्रयं प्रपत्तिं चेति उक्तश्लोकचतुष्टयार्थाः । प्रकृतेति स्तुत्युपयोगित्वाय । हेतुमिति प्रपत्तिहेतुभूतं भयम् । अतीन्द्रिय इति 'कालोस्मि लोकक्षयकृत् प्रवृत्त' इत्युक्तः । प्रत्यक्षस्तु दत्तदिव्यचक्षुषा । प्रकृतिं समुत्पादितवान् 'सोनन्तोन्तकरः कालोनादिरादिकृ'दिति वाक्यात् । 'आदिः' प्रकृतिस्तस्याः कृत् । अयं कालो मृत्युभावरूपभयजनकत्वात् मृत्युप्रसङ्ग उक्तः । कालोयं मृत्युबालजनकत्वात् कुण्डलिनीरूपप्रकृतिसमुत्पादकत्वाच्च सङ्कर्षणः शेषः शब्दात्मा । अतोर्थाभेदात् सृष्टिरस्मान् न विरुद्धा । कालश्चेष्टा इतिपक्षे निर्धर्मकत्ववारकः वेदार्थ इति वेदार्थेनाभेदः । ननु न सङ्कर्षणस्य शेषत्वेन प्रतीतिः, किन्तु 'देवप्रवर'त्वेनेति चेत् तत्राहुः लौकिकास्त्वति । दत्तदिव्यदृष्टिरहिताः । अलौकिकमिति अतीन्द्रियं भयजनकं कालम् । तद्द्वारा प्रकृतिरूपकुण्डलिनीद्वारा । लौकिकद्वारा वा । प्रतिपद्यन्ते जानन्ति । प्रतिकृत्या तादृशपदार्थान्तरप्रतिपत्तौ दृष्टान्तानाहुः यथा सिंहेत्यादिना । सिंहो हिंसकः । व्याघ्रो द्वीपीति

१. प्रकृतिं समुत्पादितवान् इति श्रीयोगिगोपेश्वरजित्सुबोधिनीपाठः. अन्यपुस्तकेषु तु प्रतिकृतिं समुत्पादितवान् इति पाठः ।

मेदः। कालः स्वभक्ष्यमिति कालस्य सृष्टिकर्तृत्वं तृतीयस्कन्धे 'सोनन्तोन्तकरः कालोनादिरादिकृदव्ययः, जनं जनेन जनयन् मारयन् मृत्युनान्तक' इत्यत्र। अयमर्थः। मर्त्यास्त्रिविधाः। असन्मृत्युर्बृहदारण्यकोक्ताधिदैविकः कामरूपत्वात्। असन् कामी। मदासक्त्यभावात् ते मर्त्याः। ज्ञानिनो ज्ञानिभक्ताश्च, तेत्र श्लोके। अत्यन्तविस्मृतिर्मृत्युराधिभौतिकः। अत्रानुभूयमानत्वात्, पाप्मा मृत्युराध्यात्मिकः। असदत्यन्तविस्मृतिरूपमृत्युभ्यां मिश्रः। स बृहदारण्यकोक्तोऽग्न्यादिचन्द्रान्तानाम्। द्वितीयस्त्वत्रत्यमर्त्यानाम्। लौकिकभाषोक्तत्वादत्र। एतेन पूर्वश्लोकसङ्गतिरप्युक्ता। तत्र गमकमाहुः अत इत्यादि। मर्त्या इति मृत्यूपसेचनयुक्ता ब्रह्मक्षत्राः ते शीघ्रं भक्षणार्थं स्थापिताः उपसेचनयुक्तत्वाच्छीघ्रम्। शब्दसृष्टौ तदुपपादयन्ति स तस्येत्यादि। तस्येति कालात्मकस्य सर्पस्य। तद्दुद्बोधक इति कुण्डलिन्युद्बोधकः। तच्छरणमिति कुण्डलिनीशरणगतः यदा भवति तदा तया कुण्डलिन्या प्रार्थितोतीन्द्रियः कालः शीघ्रं न भक्षयति। मृत्युभ्रातृभयप्रेषणेन मृत्युजनकं भक्षणं न करोति। स्वजन्यमृत्युरनुकूलो यतः अर्थसृष्टिः वैश्यशूद्रौ सेवकावतः शीघ्रं नेत्युक्तम्। 'यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनं मृत्युर्यस्योपसेचनं क इत्था वेद यत्र स' इति श्रुतेः। तस्य चेति अतीन्द्रियस्य कालस्याधिक आत्मा वेदः। 'स एष जीवो विवरप्रसूति'रित्यत्र 'मनोमयो' वेदः। अतीन्द्रियः कालः। 'छिद्रा व्योम्नीव चेतना' इत्यत्रोक्तार्थसंवलितः शब्दः। छिद्रवदाकाशधर्मः। तदुक्तेति 'अनभ्यासाच्च वेदानामाचारस्य च लङ्घनादालस्यादन्नदोषाच्च मृत्युर्विप्रान् जिघांसती'ति निवन्धात्। अपिना कुण्डलिनीप्रार्थनया। यादृशमध्यात्मत्वं तदुक्त्वाधिभौतिकानाहुः अन्ये चेत्यादि। वेदोक्ता नित्यानित्यमिथा नाधिभौतिकाः पुराणोक्तास्तु तथा। तस्याधिभौतिकरूपाणीति अतीन्द्रियकालस्य। जन्यमात्रस्य कालरूपशब्दोपाधित्वात्। विलम्बहेतव इति मन्त्रौषध्यादिभिः। त्रिविधा इति योगिनः कर्मठाः देवोपासकाश्च। धर्ममार्गेत्यादि यथासङ्ख्यम्। त्रितयमेकत्र वा। तत्प्रवणाः कालाधीनाः अपि सेवकाः 'चेतस्तत्प्रवणं सेवे'ति सिद्धान्तमुक्तावल्याः। द्वितीयान् मर्त्यानाहुः ये पुनरिति। लौकिका इति उक्तत्रितयभिन्नाः। शीघ्रमिति अमार्गवर्तिनां रक्षकाभावाच्छीघ्रम्। अमुमुक्षुत्वादेवकारः। ओदनभूता इति उक्तश्रुतेः। धर्मानिति काम्यान् उपवेदोक्तौषधिरूपानपीत्यर्थः। पलायनमिति काम्यधर्माचरणमन्याश्रयरूपम्। मुख्यार्थेन दृष्टान्तः। मूषकस्येवेति व्यालभीतस्य। पतितस्येति पलायनशून्यस्य। मृत्युः। मृत्युः कालस्य मुखम्। भक्षणे उपायः उपसेचनरूपः। सोपीति मृत्युरपि। व्यालत्वमुपपादयन्ति स भयेत्यादि। विविधमालमनर्थोऽस्मादिति क्षीरस्वामिना निरुक्तत्वाद् योगेन भयवाचको व्यालशब्दः। तथापि तात्पर्यवृत्त्या मुखं यस्य तद्धेतुक एव। 'व्यालो दुष्टगजे सर्पे शठे श्वापदसिंहयो'रिति

विश्वे मुखवतामेवोक्तेः। तेषु योगरूढः। अन्यथा नदीप्रवाहपतद्भित्तिनिस्त्रिंशादावपि योगस्य तुल्यत्वात् तत्रापि प्रयोगः स्यात्। गच्छन्निति काम्यकर्माणि कुर्वन्। क्षुत्पिपासे असन्मृत्योर्घोरे तनू। जरावलीपलितादि, आदिना अपस्मृतिः। भयेन मृतस्य देवादिदेहप्राप्तौ भयं निवर्तत इत्याशङ्क्याहुः देवत्वेत्यादि। बहुकालः स्थितो धर्मो येषु तेषु। अभ्यासाद् भयं निवर्तते। लोकान् देहानपि। निर्भयमिति निर् इत्यस्याभावोर्थः। वेदेङ्गविकल्पात्। अत इति कार्यकारणमृत्यून् प्राप्य। 'निरादयः क्रान्ताद्यर्थे द्वितीयये'ति प्रसिद्धेराहुः भयनिवर्तकेति। अभ्यासेन कुतो नाध्यगच्छदित्यत आहुः शास्त्रेत्यादि। शास्त्रं पञ्चघटकेच्छाविषयोनुभवश्च जनकस्य। 'अभयं ह वै जनक प्राप्तोसी'ति श्रुतेः काम्यकर्मभिर्नानुभवः, किन्तु तत् तत् फलम्। नित्यकर्मभिस्तु चित्तशुद्धिद्वारा ज्ञानेऽभयं भवति। एवं लौकिकसाधारणविषये उक्त्वा उक्तत्रिविधविषय आहुः येपीति। पूर्वमिति अत्रैव पूर्वमुक्ताः। कालाधीना इति योगिनः समाधिकालाधीनाः। कर्मठा दर्शपूर्णमासादिकालाधीनाः। देवोपासकाः प्रातरादिकालाधीनाः। अवश्यभक्षकत्व इति सप्तम्यन्तम्। भगवतोवश्यभक्षकत्वनिमित्तं सामर्थ्ययुक्ता न भवन्तीत्यर्थः। काले प्राप्ते तु भवन्ति। तत्र हेतुः प्रार्थनेति। कुण्डलिनीकृता। दुर्बला ईश्वरस्य स्वातन्त्र्यात्। तर्हि कथं भयनिवृत्तिरित्याकाङ्क्षायामयमर्थ इत्याद्युक्तप्रथमपक्षेणोत्तरार्धं व्याकुर्वन्ति स एवमित्यादि। भगवच्चरणप्राप्तिरिति छान्दोग्ये 'उपरि उपरि सञ्चरन्तो न विन्दन्ति ब्रह्मे'त्युक्तं परितुष्टस्तु प्रतिबन्धनिवारणे प्रेरकः स्वचरणप्राप्तिकरो भवतीत्युक्तं सुबोधिन्याम्। अक्षरस्य चरणत्वे एकत्वं व्यापकत्वं च स्यात्, तद्वारणायाहुः सत्सङ्ग इत्यादि। शब्दार्थौ। पुष्टिमार्गस्य मुख्यत्वात् सत्सङ्गरूपोर्थ उक्तः अर्थविशिष्टः शब्द एको व्यापकश्च। सत्सङ्गो भगवत्प्रापकश्चरणश्चेति सत्सङ्गस्य। सत्सङ्गत्वेन रूपेणाक्षरप्राप्तौ भगवत्प्राप्तिः अक्षरत्वेनाक्षरप्राप्तिरक्षरैक्यम्। भागवतं भगवत्प्रापकं प्रसिद्धम्। सत्सङ्गवाचकमपि। अक्षरं सर्वं यद्यपि तथापि प्रकृतोपयोगि चरणरूपं यत् तद् गृहीतम्। आध्यात्मिकमिति ज्ञानभक्ती भगवद्धर्मौ सत्सङ्गे भागवते च मिलितौ आध्यात्मिकम्। चरणावेवेति ज्ञानभक्त्योराध्यात्मिकत्वोक्त्या ज्ञानभक्तिरूपौ धर्मौ चरणौ, चरणयोरिव भगवत्प्रापकत्वात्। प्रसन्नस्येति चरणविषयत्वार्थम्। तन्मध्य इति त्रिविधयोर्द्वयोः। षण्णां मध्ये द्वयोरन्यतरस्य प्राप्ताविति वा। पूर्वोक्तं स्फुटीकर्तुं'त्वत्पादाब्ज'मित्यत्र समासार्थमाहुः भगवत्सहितमिति। समासे न समासघटकानां शब्दानां पृथक्शक्तिः। समसनं समासस्तद्वैयर्थ्यापत्तेः। अतस्त्वया(भगवता)सहितमिति व्युत्पत्त्या विशेषणस्याक्षरव्यावर्तकत्वात् तथार्थः स्फुरति। भगवच्चरणारविन्दमिति'त्वत्पादाब्ज'मित्यस्यार्थः। लोक एवेति सप्तम्यन्तं लोकपदम्। ज्ञापको भगवज्ज्ञापकः। शोभातिशयः चरणयोः। त्रितयेति कुण्डलिनी-

वेददेवापेक्षया। ते च कालाधीनाः अक्षरात्मानः, इदं च तदतीतमिति ततोतिशयः। स्वस्थपदार्थमाहुः मृत्त्विवत्यादि। तर्हि मृत्युः स्वतः कुतो न प्रवर्तत इत्यत आहुः मृत्युरित्यादि। निवर्तत इति प्राप्तचरणान् मर्त्यात्। भगवच्चरणारविन्दमिति मृत्युत्रयप्रतियोगि। चिद्रूपत्वात्। निवर्तत इत्यनुक्त्वा'पैती'त्युक्तं तत्स्वरूपमाहुः अस्मादित्यादि। असाध्यत्वं त्वक्षरब्रह्मत्वात्। अप आ एतीति छेदः। अन्यथा त्वपेतीति। युक्तमेवेति मृत्योरुपसेचनत्वाद् युक्तियुक्तम्। एवं सर्वं व्याख्याय सिद्धमर्थं निगमयन्ति स शास्त्रं त्वित्यादि। 'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्मे'ति श्रुतौ 'नास्य जरयैतज् जीर्यति न वधेनास्य हन्यत' इति। तैत्तिरीये च 'यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽभयं प्रतिष्ठां विन्दते अथ सोऽभयं गतो' इति शास्त्रं प्रमाणम्। संवादस्तु स्वस्यालौकिकभावसिद्धिः। युक्तिस्तु 'सर्वस्य वशी सर्वस्येशान' इति। 'भीषास्माद् वातः पवत' इत्युपक्रम्य'मृत्युर्धावति पञ्चम' इतिश्रुत्युक्ता। कालनियन्ता च भगवान्। अत एभ्यो हेतुभ्यः अनुभवादिः। अत्रैवेति साङ्ख्यवेदान्ते। पूर्ववदिति वसुदेवोक्तवैदिकमार्गवत्। शङ्केति विदितत्वादिनाऽब्रह्मत्वशङ्कावन्न शङ्केत्यर्थः। ननु लोके व्यभिचारो दृश्यत इत्यत आहुः निःकपटेत्यादि। 'दासवद् यदमायये'त्येकादशस्कन्धात्। 'माया' कापट्यम्। तथा च यथा प्रह्लादस्य तथान्यस्यापि भवेच्चेत् तदा न व्यभिचार इत्यर्थः। अब्रह्मविदितत्वाद् घटवदित्यत्र शङ्का वसुदेवस्य ब्रह्मत्वे भवेत्। अत्र तु 'रूपं यत् तत् प्राहुरव्यक्तमाद्य'मित्यत्र श्लोकेन्यमुखेन सर्वैर्विदितेपि साक्षादविदितत्वात्।'यतो वाचो निवर्तन्त' इति श्रुतेः। तथा च ब्रह्मविदितत्वेपि साक्षादविदितत्वादक्षरवदित्यत्र न व्यभिचारः साध्याभाववद्वृत्तित्वरूपः। अब्रह्मविदितत्वादित्यत्र घटे व्यभिचाराभावेपि नृसिंहादौ व्यभिचारात्।

१०-३-२८. स त्वं घोरादित्यत्र हेतुमिति भयम्। त्रयमिति उग्रसेनात्मजात् पालनं, जन्माज्ञानं, रूपोपसंहारं च। वसुदेववेदस्य गतभीत्वाद् देवक्या ब्रह्मविद्यात्वात् कंसस्य कनिष्ठत्वाद् भयाभावेऽविद्यया विद्यानाशे भयसम्भावनयाहुः अत्रेति। अत्र श्लोके। भयावसरे। तत्र प्रथमे 'प्रार्थनीये'त्यन्तेन रक्षाप्रार्थनतात्पर्यमुक्तम्। तत्र ज्ञानदापनयोरिति आकाशवाणीवाक्यात् मारकत्वेनाष्टमगर्भज्ञानम्। 'तथेति सुतमादाये'ति दापनं तयोर्नियोगादवधारणात्। एतत् कंसस्य। श्लोकोत्तरार्धीयप्रार्थनातात्पर्यमाहुः इदानीं चेति। इदं रूपमिति कंसमारकं रूपम्। प्रार्थनीयमिति 'कृपीष्ठा' इति लिङ्नमिति तथा माङ्योगे छान्दसम्। एवमित्यारभ्य युक्तंचेत्यन्तेन तत्रैव पक्षान्तरोपपादनेन युक्तत्वसमर्थनम्। एवं रूपेणेति दृश्यादृश्यरूपेण। अत्रैव कारागृह एव। यद्यपि सर्वदैवममारयित्वा स्थितौ कंसकंसपक्षपातिकृतमारणदोषनिवृत्तिस्तथापि दोषान्तरं भवतीत्याहुस्तदेति। भक्तिरसेति 'पुत्रभावेन' भक्तिरसानुभवः। मर्यादेति अलौकिकत्वेपि द्विभुज-

त्वमर्यादा कपिलदेवादौ दृष्टेति तथा। द्वितीयश्लोकीयप्रार्थनातात्पर्यमाहुः एतदित्यादि। एतेषां पूर्वोक्तानां सर्वेषां दोषाणां इदानीमेवान्त इत्याद्युक्तानां कंसकंसपक्षपातिप्राकृतलोकासदादिनिष्ठानां मारणद्वेषशीघ्रमुक्तिभक्तिरसाननुभवानाम्। प्रार्थनेति 'मा विद्या'दिति प्रार्थना। 'ननु 'त्रयं प्रार्थयती'त्युक्तम्। चतुर्थीप्रार्थनोपसंहारविषयिणी कुत इत्यतः 'शङ्खचक्रे'त्यादिविशेषणात् इदानीं मारणे वेति पक्षान्तरे प्रार्थनानुवाद इत्येवमुपसंहारस्य प्रार्थ्यत्वं समर्थयन्ति स इदानीमित्यादि। स्वजीवनार्थमिति कंसपक्षपातिभ्यः। अत्र टिप्पणी। अस्मिन्निति अनुवादपक्षे। तत्कृत्वेति 'उपसंहरे'तिश्लोकोक्तं रूपोपसंहरणं द्वेषाभावादिभ्यः कृत्वेत्यर्थः। सुबोधिन्याम्। पूर्वोक्तपक्षेति अलौकिकं दृष्टेत्याद्युक्तपक्षसम्भवात्। प्रार्थ्य इति अनुवादत्वेपि प्रार्थ्यः। प्रसङ्गादाहुः भगिनीपतिरिति। पक्षपातिभिर्न मारयेत्। प्रार्थनीयेति अग्रेतनग्रन्थाभासः। पूर्वोक्तेति विरुद्धधर्माश्रयत्वादिति भावः। त्रैङ् पालने। भ्वादिः आ अनिट्। त्रायस्वेति प्राप्त आहुः उभयपदीति। प्रचुरेति उत्तरार्धे इदं द्रष्टव्यम्। इयं फक्किकाऽनिविष्टापि। नन्वित्यादि भगवदधिष्ठानत्वेन 'न मे भक्तः प्रणश्यति' इति वाक्यार्थज्ञानेन पर्यवसाने बाधस्य मारणस्याभावात्। प्रार्थ्यत इति ज्ञानदापनयोर्नियोगे आकाशवाणीप्रामाण्याद् दापननियोगाभावात्। सङ्कल्प इति 'कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यती'ति वाक्यात्। स्थिताविति अन्यत्रापि कंसममारयित्वा स्थितौ। अयुक्तमिति 'कदाचिच्च चतुर्भुज' इति श्रुतिविरोधादयुक्तम्। सर्वमिति श्रुतिविरोधाभावः मुक्तिश्च अन्यदपि। इत्यनेनेति छान्दसप्रयोगेण। चकारात् स्वरेण। 'मांसदृशा'मित्यस्य विग्रहमाहुः मांसमेव पश्यन्तीति। पश्यन्तीति दृशः मांसस्य दृशः मांसदृशः। विहितमित्यादि 'कृष्णो ब्रह्मैव शाश्वत'मिति विहितम्। 'योन्यथा सन्तमात्मानमन्यथा प्रतिपद्यत' इति मांसदर्शनं निषिद्धम्। उक्तसमुच्चयेति उक्ततात्पर्यसमुच्चयार्थः। आद्य उक्तोन्तेर्थो चकारः सर्वतात्पर्यसङ्ग्रहार्थम्।

१०-३-२९. जन्म त इत्यत्र अन्यतरेति अत्र टिप्पणी। तथात्वायेति करणाभावाय। इदानीमेव मारणं अन्यत्र गमनेनैतद्रूपादर्शनम्, तस्मै। इदानीमेवामारणं लोके चैतद्रूपदर्शनं तस्मै च। इदानीं मारणमिति 'रूपं चेद'मित्यस्य व्याख्यानम्। द्वितीयः पक्षः मध्यमपक्षस्तस्मिन्। एवं सत्यपीत्यादि अयं प्रथमपक्षः। स्वत इति स्वस्माद् भगवत इत्यर्थः। स्वस्य भगवत इति वार्थः। दोषानिवृत्तिरिति मारणदोषानिवृत्तिः। स दोष इत्यस्याः सुबोधिन्या अर्थः मध्यमपक्षे स्वत इत्यादिनेति। मध्यमपक्षे पक्षद्वयम्। स्वत उपेत्य युद्धेन कंसस्य मारणमित्येकः पक्षः। स्वतो निवृत्तावपि कंसो युद्धार्थमायाति चेत् तदा मारणमिति द्वितीयः। एवं पक्षद्वये सत्यपि स स्वतो नायाति तदा ,वममारयित्वैवान्यत्र गतिर्भवति। इत्युक्तम्। जन्माज्ञानस्येति मूलश्लोकोक्तस्य। सुबो-

धिन्याम्। स चेदित्यत्र सश्चेदिति पाठे सश्च गतौ । भ्वा० प० से०। अत इति ब्रह्मविद्याकृतनिषेधात्। पापः जन्मज्ञानकारणमर्यादाभक्तिप्रतिबन्धकरूपपापात्मा। मत्स्वरूपमिति सर्वसामर्थ्यसहितम्। अविद्ययोपमर्दो विद्याया ज्ञेयः। ममाकारकत्वाद्वा। मधुसूदन इतीति अकारकस्य दूरात् सम्बोधनं सम्भवति। अतः प्लुतत्वम्। मधुसूदनायुधक्रमः 'शङ्खगदाद्युदायुध'मित्यस्य व्याख्यान उक्तः। अविश्वास इति सर्वसामर्थ्ये विश्वात्मत्वे। विश्वास इति विश्वात्मत्वेनैकतमरक्षणाभावे। तथा । उचित इति एतादृशज्ञानवत्यहमधीरधीः। भवद्धेतोरिति भवान् हेतुस्तस्मात् सकाशात्। अतो 'जन्म ते मय्यसौ पापो मा विद्या'दिति जन्माज्ञानं प्रार्थ्यत इति भावः।

१०-३-३०. उपसंहरेत्यत्र पूर्वमिति 'तथेति सुतमादाये'ति वाक्ये। 'अदसस्तु विप्रकृष्टे' इति कोशात् अदस्शब्दस्यार्थमाहुः अलौकिकरूपमिति। अलौकिकप्रकारकम्। श्रीश्चेति तथा च पद्मान्तैः श्रिया च जुष्टमिति मूले समासः। यद्यपीति अत्र टिप्पण्याम् तदभाव इति अलौकिकांशदर्शनाभावः। नान्यतरेति उक्तादर्शनयोरन्यतरस्य वैयर्थ्यं न शङ्कनीयमित्यर्थः।

१०-३-३१. विश्वं यदेतदित्यत्र विरोधं परिहरतीति फले समवायिरूपत्वरूपविरोधं नृलोकस्य विडम्बनकथनेन परिहरतीत्यर्थः। विरोधीति विराड्रूपत्वम्। विरोधीति दीर्घान्तपाठे ई आश्चर्ये। अन्यतरस्येति विराड्रूपत्वनृलोकविडम्बनयोरन्यतरस्य कर्मादीनामपि सम्बन्धसामान्यविवक्षया षष्ठीप्रदर्शनपरत्वं विडम्बनपरत्वं तेनेत्यर्थः। उपपादयन्निति देवकीपदार्थः। देवकी भगवत्सेवानुकूलत्वलक्षणपुंस्त्ववतीत्यतः देवकी उपपादयन्नित्यत्र पुंस्त्वविशिष्टोपपादनकर्त्रभिन्ना स्त्रीत्वविशिष्टा एका देवकीति बोधः। विराजीति 'यथावकाश'मितिपदात्। 'यदेकमव्यक्तमनन्तरूपं तत्रे'ति नोक्तम्। 'रूपं चेद'मितीदमः प्रयोगात्। पुनश्चा'दो रूप'मित्युक्तम्। तदकारकम्। स्तुत्यविषयम्। अत आहुः ब्रह्माण्डाख्य इति। 'कालात्मा भगवाञ्जात' इत्युक्तकारिकायामपि कालः समवायी विराट् आत्मा स्वरूपं यस्येत्यपि ज्ञेयम्। गीताप्रसिद्धेः। चतुर्दशेति सात्त्विकपक्ष उक्तः। किर्मीरितत्वेति सङ्कुचिततया। पुरुष इति विराट्। विराट्त्वेनोपासनार्थमुक्तम्। तदत्र मृत्स्नाभक्षणविश्वदर्शने जातम्। 'सर्वत्र प्रसिद्धोपदेशा'दिति सूत्रभाष्य उक्तम्। सङ्गत्यर्थमिति समष्टिसङ्गत्यर्थम्। 'कृष्णस्तु भगवान् स्वय'मिति वाक्यात्। समाधानमिति प्रथमाभासोक्तविरोधस्य द्वितीयाभासे विरोधिगुणस्य च परिहार इत्यर्थः। बिडालमिति बिडालोनिच्छतीमपि मार्जारीं भुनक्तीति दृष्टान्तः। उपकारं कृत्वा भुनक्तीति वा। गृहीव तिष्ठतीति वा। अनेनेति महत्पदेन। गर्वाभाव इति भगवतो बोध्यः।

१०-३-३२. त्वमेवेत्यत्र स्तोत्रे इति कीर्तनभक्तिरूपे, भगवान् वदन्नित्यत्र हेतुः।

जन्मप्रकरणत्वात् मङ्ख्यातात्पर्यमाहुः चतुर्दशेति। प्रामाण्यार्थमिति भगवद्वाक्यत्वाद् वेदत्वेन प्रामाण्यार्थम्। अत्र टिप्पण्याम्। चतुर्दशविद्यासम्बन्धिप्रमाणार्थमिति स्वार्थे ष्यञि भवति तद्व्याघृत्त्यर्थमाहुः प्रमाणस्येति। व्याख्यानात्। सङ्ख्याया इति तत्प्रतीतीच्छयोच्चरितत्वतत्स्वरूपे तात्पर्यवत्त्वे। अतः षष्ठी। वक्तुरिच्छारूपतात्पर्यविषयत्वे सप्तमीप्रसङ्गः। मोक्षे इच्छास्तीतिवत्। वैश्वानरमिति वैश्वानरो देवतास्य पुरोडाशस्य, 'सास्य देवते'त्यण्। तदवयवेति पुरोडाशविशेषणभूतद्वादशकपालस्य सङ्ख्यायाः फलोक्त्या। तत्तत्फलेति सजातीयत्वं अष्टत्वादिना। त्रिवृदिति अस्थिमज्जावाग्रूपम्। नवकपाल इत्युक्तत्वात् तेजस्त्रिवृद्वदन्नं त्रिवृत्। पुरीषमांसमनोरूपम्। एवमापः त्रिवृत्। मूत्ररुधिरप्राणरूपाः। यद्वा। 'तेजस्त्रिवृ'दित्युक्तेराधिदैविकादिभेदान्नव। विराडिति छन्दः। फलसङ्ख्यासजातीयत्वायाहुः अत्र विराडिति। 'पृथिवी वा अन्नमिति'श्रुतेः दशधा पृथिवी सात्त्विक्यादिभेदात्। श्रुतिभ्य इति न च वाच्यमिति पूर्वेणान्वयः। सुबोधिन्याम्। भगवद्वाक्यार्थानाहुः पूर्वस्थितिरित्यादिकारिकाभिः। त्रिगुणमित्यादि अत्र टिप्पण्याम्, सर्वाधिकमिति लौकिकाद् वैदिकान् महदित्यत्र महदित्यस्यार्थः। तथेति द्विगुणं सत्यम्। तेष्विति आधिदैविकादिसत्येषु। 'बहुषु बहुवचन'मिति सूत्रात्। सुबोधिन्याम्। इत इति सारस्वतकल्पात्। प्रत्येवेति 'धृतिर्वाक् श्रीश्च नारीणा'मितिवाक्याद् धृतेरेवकारः। 'कश्चिद्धीर आत्मानमैक्ष'दितिश्रुतेः। पृश्नित्वं सतीत्वं वा न भगवज्ज्ञाने जानातीच्छति यतत इति प्रक्रियोक्तेःप्रयोजकमिति हेत्वन्तरमाहुः तस्या दीनत्वेनेति। 'भक्तानां दैन्यमेकं हि हरितोषणसाधन'मिति वाक्यात्। अयमपीति वसुदेवोपीत्यर्थः।

१०–३–३३. युवां वा इत्यत्र एतादृशावित्यादौ 'पुमान् स्त्रिये'त्यनेनैकशेषः। कच्चिदित्यादि न्यूनपूरणम्। सन्तापेति द्वितीयस्कन्धनवमाध्यायोक्तराद्धान्तीयसन्तापस्य वक्ष्यमाणकामस्फूर्त्यर्थं जननादित्यर्थः। भगवद्विषयकत्वादिति भगवन्तमुद्दिश्य कृतत्वात्।

१०–३–३४. वर्षवातेत्यत्र अन्तरिक्ष इति वृक्षाद्युपरि। पञ्चाग्नीति चत्वारः सर्वतः उपरि सूर्य इति पञ्चाग्नयः। उभावपीति दम्पती।

१०–३–३५. शीर्णपर्णेत्यत्र 'सती'त्युक्तत्वाद् धर्मातिशयात् सेवां[1]। द्वितीयत्वमात्रविवक्षयाऽपर इति पुंस्त्वम्। पूर्ववद्वा। भगवत्सेवामाहेति अखण्डब्रह्मज्ञानस्य वसुदेवं प्रत्युत्तरार्धे वक्तव्यत्वाज् ज्ञानाङ्गभगवत्सेवां 'भक्त्याग्राह्ये भक्त्या जानाति चाव्यय'मिति वेदाद् वेदरूपवसुदेवस्याहेत्यर्थः। कियत्कालतपसेति कर्मविशेषेण। यथाग्निना हेम्ना मले त्यक्ते ध्माते हेम्नि पुनः स्वं रूपं भजते तद्वत् शुद्धसात्त्विकगुणाविर्भावके चित्त इत्यर्थः। [3]कार्यमिति भगवतः पुत्रत्वम्। सेवयैवेत्यत्रैवकारार्थमाहुः नान्यथेति। सेवां विना

१–२. गतश्लोकस्थप्रतीकद्वयम्। ३. 'भगवत्सेवयैव कार्यं नान्यथा' इति श्रीयोगिगोपेश्वरजित्सुबोधिन्याः पाठ इति भाति।

केवलतपस्त्वेन प्रकारेण। बहिःसंवेदनेति बहिर्ज्ञानाभावे। परिचर्येति तपसा भवति। स विशेष इति स तपोविशेषः। वसुदेवस्य स्वरूपलाभो जात इत्याहुः शुद्धसात्त्विकेति। यथा बुद्धिः सात्त्विकी गीतोक्ता तथा। स्वभावत इति अधिष्ठानकृतो विशेषः। अन्येषां साधनकृत उपशमः। 'शीर्णपर्णे'त्यनेन स्नानादयो यमा आराधनशब्देनाराधनादयो नियमा इत्याशयेनाहुः एवमिति। सकामाविति अनेन ज्ञानाङ्गभक्तिः सकामा। 'अकामः सर्वकामो वे'ति वाक्यात्। न सगुणा भगवदधिष्ठानत्वात्। भगवदाविर्भावाच। सगुणत्वे भस्महोमप्रसङ्गः।

१०–३–३६. एवं षामित्यत्र दिव्यवर्षेति दिव्यं वर्षमस्मदादिषष्ठिवर्षाधिकत्रिशतं वर्षाणि, एतादृशां सहस्रसङ्ख्याकानि। चतुर्युगमिति कृतयुगप्रमाणं १७२८०००, त्रेतायुगप्रमाणं १२९६०००, द्वापरयुगप्रमाणं ८६४०००,कलियुगप्रमाणं ४३२०००, गतकलिप्रमाणं ४९४२ भोग्यकलिप्रमाणं ४२७८। अहमेवात्मनीति अत्र सप्तमी विशेषणे बहुव्रीहाविति ज्ञापकाद् व्यधिकरणपदे बहुव्रीहौ गड्वादेः परा सप्तमीति परनिपातः पद्मनाभ इतिवत्। आत्मपदं देहवाचकम्। आत्मोपपदा। तथा च परिछिन्नदेहस्य व्यापकात्मत्वेन नित्यकस्य स्थितिस्तावत्कालमित्याश्चर्यम्। द्रष्टव्यम्।

१०–३–३७. तदा वामित्यत्र स्थापयतीति वं सुखं पुष्णातीति वपुरिति व्युत्पत्त्या स्थापयति। अन्यथेति सुखपोषाभावे। पुत्रत्वस्थापनाभावे वा। परमेति स्नेहस्तु स्यादेवेत्यर्थः। इच्छेति काम इच्छा। तदपि च बालेति अमुनेत्यस्य पदस्य तात्पर्यमिदम्। 'तमद्भुतं बालकमित्यत्र 'बालक'मिति विशेषणस्य पूर्वमुक्तत्वात्। रूपस्येति उक्तेच्छापेक्षयेति बोध्यम्। तेन वात्सल्यरस उत्पन्नः। स्थानादिति करणल्युडन्तम्। पातिव्रत्यादित्यर्थः। चेति आधिदैविकाध्यात्मयोरैक्याच् छ्रद्धापरिचर्ये उक्ते, 'श्रद्धारतिर्भक्तिरनुक्रमिष्यती'ति वाक्यात्। बहिर्मुखानामिति बहिर्मुखास्तोपहेतुत्रयसहिताः तत्सम्बन्धी न परितुष्यति यथा मानसपूजादिना इति हेतोः। भावितः स्मृतः। अन्तर्मुखानामपि परितुष्यतीत्यर्थः।

१०–३–३८. प्रादुरासमित्यत्र पूर्वश्लोकोक्तभवसाधने तु हेतुत्रयमित्याशयेनाहुः चिन्तित इति। भावित इत्यस्यार्थो वा। भावत्वेनाविर्भावत्वेन कार्यकारणभावः। फलनैकट्येति फलस्य नैकट्यनियमार्थम्। आविर्भावस्य फलस्येत्यन्वयः। चैत्रस्य गुरुकुलमित्यत्रेव। याचदिति तादृश्याः क्रीडेच्छाया नियामकत्वात्। वरदराज इति वरदराद् वरदराज इति प्रयोगद्वयं छन्दसि समासान्तविकल्पात्। ताभ्यामिति अजुष्टग्राम्यविषयाभ्याम्। बालकेति 'सोबिभेत् तस्मादेकाकी बिभेती'ति पुरुषविधब्राह्मणश्रुतेः। भयं बालकलिङ्गमिति भाष्यप्रकाशे। प्रथमव्राप्तिरुत्पत्तिरिति चोत्पत्तिमत्त्वं बालकत्वम्। 'जन्म त्वात्मतया पुंसः शरीरस्वीकृतिं प्राहु'रिति शरीरस्वीकृतिमत्त्वं बालकत्वम्। त्वादृश इति

चरणस्वरूपम्। तत्रापि सङ्क्षेप इत्याशयेन विवृण्वन्ति यां युवाभ्यामित्यादि। पदद्वयं विवृत्य वृतपदं विवृण्वन्ति भूयादिति। आशीरुक्ताहिताशंमा।

१०-३-३९. अजुष्टग्राम्येत्यत्र प्रीतीति प्रतिनिधिः। भगवदधिष्ठानत्वब्रह्मविद्यात्वाभ्याम्। स्थितैवेति 'मदाराधनमीहतु'रिति वाक्यात्। सेवा न वा वृत्तेति जुष प्रीतिसेवनयोरित्यत्रार्थयोर्विकल्पेन सेवा न वृत्ता। प्रीत्या सेवायां 'प्रतिमुखस्य यथा मुखश्री'रिति सप्तमस्कन्धवाक्यात् न जुष्टो ग्राम्यविषयो याभ्यामिति अत्र टिप्पण्याम्। पाठान्तरं लौकिकप्रीतिः स्थितैव,सेवा न वृत्तेति। अजुष्टग्राम्यविषयो याभ्यामिति। द्वितीयमिति सेवनरूपम्। सुबोधिनी। तत्सम्भवेपि काम्यकर्मणा वैदिकेन ग्राम्यविषयजोपसम्भवेपि। तन्निषेधेति लौकिकसिद्धापत्यनिषेधार्थम्। अलौकिकप्रकारकापत्य निषेधार्थकं वा। अतोपीति विशेषणत्रयात्। अपिना चिक्रीडिषा। मोक्षस्यावरणं 'मोहिता'वित्यनेन मोह उक्तः। एवं स्पष्टेति न विवृता। तदिति अनपत्याविति विशेषणम्। रागस्येत्यादिसुबोधिनीं विवृण्वन्ति अजुष्टेत्यादीति। सुबोधिन्याम्। ऋणादीति देवर्णपितृर्णमनुष्यर्णेत्यृणत्रयम्। आदिना पूर्णता पुत्रकृता। अनपत्यौ द्वौ मदाराधनमिति पञ्चसु त्रयं पुत्रधनेन स्त इति। विरुद्धेति मोक्षविरुद्धगृहस्थाश्रमनिष्ठत्वात्। मोक्षस्येति 'मोहिता'वित्युक्तमोहस्तस्य तमोधर्मत्वादवरणम्। सर्वत इति चतुर्भिः। शास्त्रार्थेति विशुद्धसत्त्वत्वाद् वेदत्वाच। शास्त्रं गीता 'सर्वेन्द्रियाणि संयम्ये'त्युपक्रम्य'मिथ्याचारः स उच्यत' इति।"शास्त्रं'ऋणानि त्रीण्यपाकृत्ये'ति। शास्त्रं 'मनो मोक्षे निवेशये'दिति। त्रितयमिति विशेषणत्रयोक्तम्। इयं विशेषेति अत्र टिप्पणी आभासे मोक्षावरणेति मोहेन मोक्षावरणम्। एवमाधिक्यमिति भक्तिमार्गे मोहे मोक्षे मोहाभावादाधिक्यम्। तर्हीति मोक्षस्य लीलामृताब्धिफलकवरणानाधिक्यकाले। मदनुग्रहादिति अनुग्रहस्य दासरूपापवर्गे कारणत्वं, न तु साधारणापवर्ग इति। कारणमात्रोक्तिर्न तु साधारणापवर्गकारणोक्तिः। न त्वेवमिति मोक्षप्रतिबन्धकमायामोहितत्वेन 'न वव्राथे' इति। ज्ञानशक्तेरिति भगवत्सान्निध्याद् वसुदेवज्ञानशक्तेः। मोहमूले इति तथा च वसुदेवमोहोनूद्यते भगवता 'मोहिता'वित्यनेनेति भावः। तथेति ब्रह्मत्वेन भगवत्त्वफलत्वविराट्त्वैः। अयमिति ब्रह्मत्वादिना ज्ञानाभावः। अनुग्रहादिति भक्तिमार्गीयत्वादिति भावः।(द्वितीयं)एवेति 'वैष्णवीं व्यतनोन् मायां पुत्रस्नेहमयी'मिति वाक्यात्। एवंविध इति मोक्षरूपेर्थे। भक्तेति शास्त्रीयभक्तेत्यादिः। सर्वा इति शक्तयः। एतच्छक्तीति विशेषमायाशक्तिकार्येर्थे मोहे मोहत्वोक्तिरित्यर्थः। सर्वशक्तीति सर्वाः शक्तयः। प्रमाणेति शास्त्रीयज्ञानमार्गात्। प्रमेयेति लीलारसाब्धिफलकवरणे विशेषमायामोहमार्गः। 'नैषा तर्केण मतिरापनेये'ति काठकात्। 'आश्चर्यो वक्ते'तिकाठकः। बलिष्ठः स्वकार्यकरणात्। अत एवेति लीलार्थं

मोहस्यावश्यकत्वादेव। अत एवेति विशुद्धज्ञानत्वादेव। अत एवेति अनिवृत्तौ कारणद्वयादेव। असमास इति समासशक्त्या निवृत्तावेककारणबोधकसमसनाभाव इत्यर्थः। दास्यभावादिति ज्ञानकृतात्। पितृत्वादिभावो विशेषमायाकृतः तस्य। न्यूनत्वं भक्तिवात्सल्यरसकृतमपि बोध्यम्। एवं मोक्षस्य लीलारसाद्यपेक्षया मुख्यत्वमागतम्, मोहाभावादित्यरुच्या पक्षान्तरमाहुः यद्वेति। तथोक्तिरिति 'मोहितौ मम मायये'त्युक्तिः। तथा च परम्परया ज्ञानकार्यत्वान्न साक्षाज्ज्ञानकार्यमोक्षस्याधिक्यमिति भावः। अधुना तु रूढ्यापवर्गपदार्थ उक्तः, अङ्गेन व्याकरणेन योगोपस्थित्यार्थमाहुर्योगरूढ्या वस्तुत इति। स इतीति 'अदृश्यत्वादिगुणको धर्मोक्ते'रित्यधिकरणोक्तः पुरुषोत्तमः। तत्र निःसम्बोधोपवर्गो व्याख्यातः प्रसिद्ध्या ससम्बोधोपवर्ग उच्यते तत्राक्षराधिकरणकाधेयतासम्बन्धेन तत्र स्थितः पुरुषोत्तमोत्र गृह्यते, न त्वक्षराभिन्नः पुरुषोत्तमः। दास्यरूप इति 'स्वरूपलाभान्न परं विद्यत' इति श्रुतेः। 'य एवास्मि सन् यज' इति 'ब्रह्मदासा' इति श्रुतिभ्याम्। उच्यत इति योगरूढ्योच्यते। अप वर्जने। वृजी वर्जने उभाभ्यां वर्जनाभ्यां उत्कृष्टापवर्गो मायावर्जनरूपो यौगिकार्थः, स च दास्यरूपः। तथेति यथाश्रुतं मूलं तु 'गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्यय' इतिन्यायविरोधि मूलमित्यर्थः। श्लोकासङ्गतिं शङ्कते ननु तदेवेति। तदवरणेति दास्यावरणोक्तिप्रयोजनम्। उपपत्तेरिति अर्थादुपपत्तेः। एतदुक्तिरिति तद्दास्यवरणाभावोक्तिः। कुत इत्यत आहुः तया विनेति। दास्यावरणोक्त्या विना। दास्यरूपावर्गार्थिन विनापि प्रकृतो यः एतच्छ्लोकार्थस्तस्योपपत्तेर्भगवद्वचनैः। यथा 'तेपाथे परमं तप' इति वचनेना'जुष्टग्राम्यविषया'वित्यस्यार्थस्योपपत्तिः। नियतेच्छयैवेति आविर्भावे कारणत्वेन नियतेच्छया न तु ब्रह्मणादिष्टप्रजासर्गेच्छया। न देयमिति अतो दास्यं परमं मोक्षरूपं न देयम्। काम्यत्वाभावादिति भावः। तथेति दास्यं न दत्तवानिति ज्ञापयितुं तदुक्तिः श्लोकोक्तिः। एवं कृत इति दास्यान्यलीलायामङ्गीकारम्। प्रागेवेति अत्रैव प्राक्। कामाभावस्येति दास्यकामाभावस्य। तदनुवाद इति 'न वव्राथेपवर्गं मे' इति कामाभावस्यानुवादः। न तु श्लोकोनुवादक इति चेच्छृणु। अनुवादस्योक्तपदार्थत्वबोधकत्वादस्यार्थस्य। अन्यथेति दास्यकामाभावहेतुत्वाभावे। कृतवानिति स्वाधिष्ठाने विशुद्धसत्त्वे। सुबोधिन्याम्। समाप्तिरिति चरमावयवकध्वंसः। स च दास्येपि। यद्वा समाप्तिरभावमात्रं प्रतियोगिनोरुक्तत्वात्। जन्ममरणप्रतियोगिकाभावः। अपवर्गस्य मायानाशरूपत्वेनाभेदसम्बन्धः। भक्तिमिति ज्ञानाङ्गम्। प्रमेयेति प्रमेयस्य भगवतो बलं साधनसत्त्वे तदकार्यं बलकृतम्। एवं 'वे' इत्यस्यापवर्गेणान्वयमुक्त्वा मुख्यापवर्गार्थे त्वाहुः स इति पाठ इति।

१ एतदुक्तमिति मूले पाठः एतदुक्तिरिति श्रीयोगिगोपेश्वराणां पाठः।

१०–३–४०. गते मयीत्यत्र भोगा इति 'अकर्तरि च कारके संज्ञाया'मित्यत्र 'संज्ञाया'मित्यस्य प्रायिकत्वसिद्धान्तादत्रापि कर्मणि घञ्। लाभस्य भावित्वाल्लब्ध्वेति क्त्वाप्रत्ययासम्भवमाशङ्क्याहुः वरत्वेनेति। निर्धारं कृत्वेति सादृश्यनिर्धारं कृत्वा। तत्रेति सदृशप्राप्तौ। अकृत्वेति किन्तु साक्षात्प्राप्तौ विघ्नशङ्केति भावः। 'युवा'मिति पुनरुक्तसार्थक्यायाहुः यत इत्यादि। एकतिङ्वाक्यम्। तथापि 'युवा'मित्यधिकं मत्वाहुः पुनरिति। अयमर्थः। 'वरं लब्ध्वे'त्यनेनैव प्राप्तमनोरथत्वं जातम्, पुनः स्मरणजनकसंस्कारस्योद्बोधे 'युवा'मुद्बुद्धसंस्कारौ इति। पूर्वं'युवा'मित्यस्य कृतनिर्धारावित्यर्थः। सम्मत्यर्थ इति। यथा युवामुद्बुद्धसंस्कारौ तथाहमिति वसुदेवसम्मत्यर्थः। अन्यथा'ऽपरं भवतो जन्म परं जन्म विवस्वत' इति न्यायेनात्रापि वसुदेवप्रश्नः स्यादिति।

१०–३–४१. अदृष्ट्वान्यतममित्यत्र भ्रमादिति 'न तत्सम' इति श्रुत्या सदृशसुतवरणे भ्रमः असदृशे ससदृशत्वज्ञानात्। मर्यादेति 'एक एवेश्वर' इति मर्यादाभङ्गः। अदानेपीति वरादाने सत्यसङ्कल्पत्वमर्यादाभङ्गः। ननु स्वसदृशयाञ्चायां योगिवत् स्वदानेपि मर्यादाया भङ्गः स्यादेव वक्ष्यमाणज्ञानाङ्गभक्तिमत्त्वाद् वसुदेवस्येत्यत आहुः सादृश्येत्यादि। भगवतः सर्वभावेन सर्वैरंशैः सादृश्यं साम्यं तस्य भेदः तत्सहिष्णुत्वं योगिवत् स्वदाने स्वरूपं योगिवद् गृहीतं रूपं नेत्येवं छान्दोग्यीयरूपेषु फलप्रकरणोक्तेषु सप्तसु वर्तत इति। सप्तसु साम्यं नेति भेदसहिष्णुत्वं, तत्त्वेपि, धर्मधर्मिभावात्। आकार एवेति एकरस आकार एव विशुद्धसत्त्वत्वादेवकारः। अभिधा तु वेदस्य विद्यायाम्। आकारे तात्पर्यस्य तत्प्रतीतीच्छयोच्चरितत्वरूपस्य ज्ञापकम्। वचनं त्वादृशः पुत्रो भूयादिति वचनम्। त्वमाकारः दृश्यते यत्र त्वादृशः योगरूढः शब्दः। जीवेति भ्रान्तजीववसुदेववाक्यत्वात्। बाधित्वेति पूर्वतन्त्रे श्रुत्या स्मृतिबाधोक्तेः। अन्यतमं विशिंषन्ति यद्यपीति। नास्तीति शास्त्र इति ज्ञेयम्। तथापि लोकेऽसतो मरुमरीचिकादेर्दर्शनादाहुः असत इति। खपुष्पादिवदाकारस्य। कृत्रिम इति मिथ्यावासुदेवे। नोत्पादनीया इति कृत्रिमस्यासत्त्वात् तत्र ते उत्पादयितुमशक्या इत्यर्थः। विशिष्टस्येत्यादि व्यावहारिकसत्ताविशिष्टस्य, उत्कृष्टस्य वा। आन्तरालिकसदृशो मूलसदृशमिलितस्तस्य दर्शनं ज्ञानवतोपि प्राप्तं तस्याभावोऽदर्शनमेव। अत्यन्तायोगव्यवच्छेदक एवकारः। मानव इति प्रद्युम्नगर्भशब्दतात्पर्यार्थः। मनुर्लौकिकः पुरुषविधब्राह्मणात्। क्रमेणेति जन्मत्रयक्रमेण। 'आविवेश' त्यत्रोक्तक्रमेणेति वार्थः। ननु तथापि जन्म तादृशस्य न सङ्गच्छत एवेत्याशङ्क्याया'ऽभव'मितिपदतात्पर्यमाहुः स एकधेति। तथा तस्य भवन इति सुतत्वेन भगवतो भवने। अनेकप्रकारे मध्ये तस्यापि सद्भावात्। जन्मैव मुख्यमिति उपक्रमोपसंहारयोः सञ्जातविरोधित्वेन प्रकरणार्थ

१ 'योगिवत् स्वदाने योगिवद् स्वदाने' इति द्विवार आदर्शे उक्तम्।

एव मुख्य इत्यर्थः। अध्यायार्थत्वात्। उभयोर्ण्यासिर्व्यारिता। तन्नाम्ना पृश्निनाम्ना। स्मृत इति 'पृश्निगर्भस्तु ते बुद्धि'मिति षष्ठे स्मृतः। शब्दरूपं प्रमाणम्।

१०-३-४२. तयोर्वामित्यत्र तुल्यत्वादिति पुत्रत्वकामेन तौल्यम्, जन्मना तौल्यं वा। पुनरेवाहमिति मूलस्थपदानि व्याख्येयानि।

१०-३-४३. तृतीयेस्मिन्नित्यत्र जात इति अहं जातः, अमःसुवौ। भव इति वसुदेवदेवकीत्वेन भवः अहन्तामता। अत्रेति तृतीये जन्मन्यपि। नामद्वयमिति राम-कृष्णयोत्यवतारद्वयस्य पृश्निगर्भवामनरूपस्य नामद्वयम्। बहूनीति नामानि। चकाराद् रामः कृष्ण इति। शब्दार्थयोरैक्यात्। देवकीनन्दन इति अवतारान्तरे वक्तुमशक्यमिति मुख्यम्। तदग्र इति देवक्यां पूर्णाविर्भावोतो न केनाप्यंशेन प्राकृतत्वमतो न दैवकेय इति भवतीत्यष्टमाध्याये वक्ष्यामः। रूपभेद इति 'तमद्भुत'मित्युक्तं रूपं पूर्वभवयोर्नेति भेदः। प्रसन्नेनैवेति वृत्तेनैव एवकारः 'तदा वां परितुष्टोहममुना वपुषानघे'ति वाक्यात्। 'मया प्रसन्नेने'ति गीतैकवाक्यतया प्रसन्नपदम्। वाक्यमिति 'अहं सुतो वामभव'मिति वाक्यम्। अहं जात इत्यत्रासच्छब्दप्रयोगतात्पर्यार्थमाहुः पूर्वदेहस्येति 'आत्ममायामृत' इति वाक्यात् मायिकदेहत्यागः। तत्पुत्र इति पूर्वदेहपुत्रः। कल्पादाविति कल्पो ब्रह्मणो दिनम्। शास्त्र इति स्त्रीशास्त्रे वात्स्यायनसूत्रे तत्र स्त्रीशास्त्रपदप्रयोगात्।

१०-३-४४. एतद् वां दर्शितमित्यत्र हेतुमिति 'सत्यं मे व्याहृत'मित्यनेन वाक्यं हेतुः। आविर्भावे हेतुमिति प्रथमजन्मसौ हेतुं विषयं रूपम्। आविर्भावो विद्वन्मण्ड-नोक्तो वा। तत्र हेतुं रूपमेव। अत्र प्रथमान्तविशेष्यको बोध इति सूच्यते। युवयोरर्थे इति अर्थे प्रयोजने मद्भवज्ञाने वैषयिकाधारे सप्तमी। मद्भवज्ञानविषयम्। भवतीति यथा हस्तिदर्शने हस्तिपकस्य संबंधिनः स्मरणजनकः संस्कार उद्बुद्धो भवति तथा। एत-दिति समीपतरवर्तिरूपविषयकः। ननु भगवत्सान्निध्यजनितसर्वज्ञतयाऽलौकिकप्रत्यक्षसिद्धेः प्राग्जन्मादिविषयकमलौकिकमेव प्रत्यक्षं सेत्स्यतीत्येवं तत्स्मारणस्य किं प्रयोजनमत आहुः सान्निध्यादित्यादि। तथा च यथा सान्निध्यस्य सर्वज्ञताद्वारा प्राग्जन्मस्मरणं फलं तथा वैराग्यमपीति वैराग्येणायमविहितभक्तिरसलीलानुभवप्रतिबन्धो दोषः स्यादिति सर्वज्ञतां प्रतिबध्यतद्बालकरूपेणालौकिकप्रत्यक्षस्मारणमिति भावः। तदुद्बोधन इति 'सदृशादृष्टचिन्ताद्याः स्मृतिबीजस्य बोधकाः' इत्युक्तसंस्कारोद्बोधे रूपं सदृशत्वेनोद्बोधकम्। तत् प्राक्कालजन्मनोः स्मरणजनकसंस्कारोद्बोधकम्। तथा च रूपप्रदर्शने। अदृष्टचिन्तादिः संस्कारोद्बोधने तु, तुः सदृशस्य रूपस्योद्बोधनसाधनत्वं व्यावर्तयति। एवकारो रूप-योगव्यवच्छेदको मात्रचोऽवधारणार्थकत्वं कात्स्न्यर्थिव्यावर्तनेन निश्चिनोति। कालमात्रे स्मरणं यथा तदिदं जलं सेयं दीपमालिका सायंकाले दीपः इत्यादौ जलादभावे काल-

मात्रसरणम्। जलादिसत्त्वे तूभयसरणम्। तद्वत्। ननु रूपप्रदर्शनाभावेपि 'एतद् वां' पूर्वं वरदानकाले'रूपं दर्शित'मिति वाक्याज् ज्ञानं शाब्दं रूपज्ञानम्। दुर्बलमित्युद्बोधकम्। न कापीति सान्निध्यस्य प्राधान्ये मोहकाभावाद् वाक्याज् ज्ञानं तथा भगवद्वाक्यत्वाद् वैदिकं प्रत्यक्षात् प्रबलं स्यात्। भगवांस्तु यावत् स्वेच्छया मोहं ज्ञानं च सम्पादयतीति न वैदिकज्ञानेपि प्रत्यक्षस्य दुर्बलत्वमिति वैदिकीया शाब्दात् प्रत्यक्षं दुर्बलमित्यनुपपत्तिर्नेत्यर्थः। कापीति शब्दाभ्यां 'अथवा शून्यवद् गाढं व्योमेव ब्रह्म तादृशं प्रकाशते लोकदृष्ट्या नान्यथा दृक् स्पृशेत् पर'मिति शास्त्रार्थनिबन्धोक्तापि शङ्का नेत्यर्थः। रूपं दृष्टं वसुदेवेन मायिकं भगवता स्वेच्छया रूपमाकाशशरीरं दर्शितमिति। स्मारणफलमाहुः एतावतेति। क्लेशेनेत्युक्तिस्तु द्वितीयस्कन्धनवमाध्यायोक्ततपोद्योतनार्थम्। ननुरूपमदर्शयित्वा केवलवाक्यमेव कुतो नोक्तवानित्यत आहुः केवलवाक्ये त्वित्यादि। लौकिकरीतिकबालकरूपेणोक्ते वाक्ये। उत्तरार्धस्याभासोयम्। शास्त्रेति शास्त्रं वेदः। तदर्थपरं स्यात्। उत्तरार्धं व्याकुर्वन्ति अन्यथेत्यादिना। अनुभवेति सदृशेन स्मरणं यतः।

१०–३–४५. युवामित्यत्र अधुनेति वाक्यार्थानुसन्धाने। मुक्तिर्भवतीति 'दशपूर्वान् दशापरा'निति वाक्यात्। 'अनिच्छतोपि गतिमण्वीं प्रयुङ्क्ते' इति वाक्याच्च। ननु 'न वव्राथेपवर्गं मे' इति वाक्यादपवर्गे अप्रार्थितेप्येतच्छास्त्रस्य वेदरूपस्य मुख्यत्वात् कुतो मुक्तिरित्याशङ्क्याहुः प्रमेयेति। अप्रत्यक्षोपि प्रत्यक्ष इति प्रमेयबलम्। तस्य। शास्त्रस्येति 'दुर्दर्शोहं कुयोगिना'मिति प्रथमस्कन्धशास्त्रवद् 'युवयोः कामदित्सये'ति शास्त्रस्य। धर्म्यपेक्षया धर्मस्य गौणत्वात्। तुल्यत्वादिति विशेष्यांशे तुल्यत्वात् विहिताविहितत्वं विशेषणांशेऽतौल्यमिति फलैक्यम्। प्रकारस्येति ब्रह्मभावरूपस्य ब्रह्मत्वस्य पुत्रभावरूपपुत्रत्वस्य च। प्रकारस्यात् प्रयोजकत्वादिति पाठे वैदिका वेदे हल्तकारं मध्ये पठन्ति। मद्गतिमिति मत्सम्बन्धिनीं गतिं फलम्। व्यापिवैकुण्ठाख्यामिति सालोक्यमुक्तिम्। अधिष्ठानलीलायामङ्गीकारात्। ज्ञानाङ्गभक्तिमत्त्वाच्च। ननु वक्ष्यमाण उत्तरार्धे वसुदेवस्य ब्रह्मभावे ब्रह्मभावपदस्मारिते सति 'परा'मिति विशेषणं न देयम्, ज्ञानमार्गीयत्वादित्याशङ्क्य समाधानमाहुः माहात्म्यज्ञानेति। तुल्यत्वादिति ज्ञानमार्गे वक्ष्यमाणेत्रोक्तस्नेहे च तुल्यत्वात्। ज्ञानमार्गे ज्ञानाङ्गभक्त्या श्रवणादिरूपयाच्युतविषयिण्या 'यथा यथात्मा परिमृज्यत' इति वाक्योक्तया सूक्ष्मज्ञानविषयस्याधाराधेयसम्बन्धे माहात्म्यज्ञानं देवत्वज्ञानं तस्मिन् सति स्नेहः। 'ज्ञाते स्नेह' इति भाष्यादतस्तौल्यात्। ननु ब्रह्मभावाधिकारिणि वसुदेवे वेदे स्नेहाय माहात्म्यज्ञाननिविशे किं बीजमित्याकाङ्क्षायामाहुः अत एवेति। माहात्म्यज्ञानपूर्वकस्नेहस्य मुख्यत्वादेव। तेन मुख्यत्वं बीजमुक्तम्। गोपिकादीनामिति ज्ञानकाण्डीयब्रह्मभाववतीनाम्। उत्पादयिष्यतीति पुनः, 'ते तु ब्रह्महृदं नीता' इति

वाक्ये ब्रह्महृदनयनानन्तरं कृष्णोद्धारकथनात्। अन्यथेति पुनर्माहात्म्यज्ञानप्रवेशाभावे। अत्र टिप्पणी। ननु ज्ञान एव विषयतया माहात्म्यं प्रविष्टं भक्तिमार्गे पुनर्माहात्म्यज्ञानस्य स्नेहाङ्गत्वेन प्रतिपादने कावश्यकतेत्याकाङ्क्षायां तदावश्यकत्वे युक्तिं वदन्तीत्याशयेन टिप्पण्यामाहुः यदीति।स्वातन्त्र्येणेति उत्तरार्धे उपदेक्ष्यमाणज्ञानेन ज्ञानिनां ज्ञाने माहात्म्यस्यापि विषयतया निवेशात् ज्ञानिकोटिनिविष्टस्यानुवादेपि स्वातन्त्र्येणेत्यर्थः। यथा कथञ्चिदिति विविधहरिभावेषु येन केनापि भावेन। अत्रेति निरोधस्कन्धार्थे। सुबोधिन्याम्। बोधांश इति पुनः क्रियमाणमाहात्म्यज्ञानांशः, वसुदेवज्ञानांशो वा। विविधभावेषु एको भावोधिक इत्यापाद्यते।ज्ञानोपदेशे यो निरोधः स्कन्धार्थे निविशते तं प्रतिपादयन्ति भक्तानां प्रपञ्चेति। 'संस्था दशमार्थे' इति द्वादशस्कन्धे। संस्था प्रलयः प्रपञ्चविस्मृतिः प्रपञ्चाभाव इति यावत्। सरणात्मकः प्रपञ्चः। नन्वापादितभावः क दृष्ट इति चेत्, तत्राहुः अत एवेति। यतो विविधभावेष्वस्यापि निवेशोत एव। अत एव 'पार्थिवानि विममे रजांसि न तु भगवद्गुणा'निति श्रुतिः। उत्पत्तीति यथा प्रथमाध्याये गुह्युक्ते ब्रह्मविष्णुशिवकृतस्त्रीत्वपुंस्त्वोभयत्वनिरूपणेन देवप्रसादयुक्तभक्तनिरूपणेन जीवस्वरूपतः। चतुर्विंशतिधा निरूपिताः। ननु तर्हि प्रपञ्चविस्मृतिपूर्वकभगवदासक्तिर्निरोध इति प्रसिद्धभावे भगवदासक्तिः कदा जायत इत्यत आहुः प्रेम ज्ञानमिति। प्रेम प्रपञ्चविस्मृतिमतामुत्पन्नानां भक्तानां भगवदासक्तिः। ज्ञानं माहात्म्यज्ञानमपि। निरोधो विविधहरिभावाः। अत्रैवेति कारिकासु,'एवंविधानन्तभावै'रित्येवम्। ननु मातृप्रार्थनयान्यत्र गमनस्यावश्यकत्वेपि तत्स्थलादिकमनुक्त्वा कथमत्र भगवता वाक्यं समापितमित्याकाङ्क्षायां समापनतात्पर्यमाहुः आर्थिकमित्यादि। यदत्रार्थश्छिद्रेतरत्वादिवत् सिध्यति तदत्र कण्ठतो नोच्यत इति हेतोः भगवता वाक्यपरिसमाप्तिः कृतेत्यर्थः। आर्त्येति गीतोक्ताधिकाररूपया। अत एवेति अधिकाराभावादेव 'लोकवत्तु लीलाकैवल्य'मितिसूत्रात्। अत इति प्राकट्यात्पूर्वं। तदनन्तरं च दुःखात्। निर्बन्धोग्रे वक्तव्यः। अयमिति दण्डः। एवं स्मरणे स्नेहातिशयो दुर्लभ इत्याशङ्क्याहुः अद्भुतेत्यादि। विस्मयकर्मत्वात्। अत एव 'स विस्मयोत्फुल्लविलोचन' इति वाक्यम्। तस्येति स्नेहातिशयस्य। स्नेहातिशयं कारिकाभिराहुः आविर्भाव इत्यादि। पुत्रतयेति न तु पुरुषोत्तमत्वेन। तप इति द्वितीयस्कन्धनवमाध्याये साध्यसाधनभावः स्पष्टः। आर्तिः सन्तापोधिकाररूपः। व्यापारेण व्यापारिणो नाधासिद्धत्वात्। मुख्यं साधनमाहुः भक्तिमार्गीयमिति। मार्गणे भगवत्सान्निध्यात् प्रमेयबले पुष्टिमार्गीयं भक्तिज्ञानम्। इत्यात्मेति इति हेतोः आत्मवियोगं स्वविप्रयोगं संयोगानन्तरं लीलारसप्राप्त्यर्थम्। संयोगविप्रयोगयोर्विप्रयोगस्य विविधभावजनकत्वेन मुख्यत्वात्। तदा त्विति प्राकृतशिशुकाले। 'संयोगे विप्रयोगभावनं प्रेमे'ति भक्तिसूत्रात् संयोगे विप्रयोगभावनामाहुः

एतावन्तीति। तत्रेति वृहद्वने। अत्यार्त्येत्यधिकाररूपया। तयोर्वसुदेवदेवक्योः। मिथस्तथेति तयोरेव मिथस्तथाभावपूर्वकमालापतश्चकारादन्तःस्थितभगवत्प्रभावतः इन्द्रियाणामेकादशानां वृत्तयो हरिपरा आसन्नित्यर्थः। अत्यार्तौ भगवद्दर्शनं गुणप्रकरणे ऐश्वर्याध्याये निबन्धे विवृतम्। तादृशार्तावपि जीवने उपपत्तिमाहुः स एवेति। दर्शनं कदाचित्। हृदये स्थितिस्तु सततमित्यर्थः। तेनैकादश वर्षाणीति तृतीयस्कन्धे 'एकादश समास्तत्र गूढार्चिः सबलोवस'दिति। दशमस्कन्धे द्विचत्वारिंशाध्याये एकादशवार्षिकस्योपनयनम्। 'अथ शूरसुतो राजन् पुत्रयोः समकारयत् पुरोधसा ब्राह्मणैश्च यथावद् द्विजसंस्कृति'मिति वाक्यात् 'एकादशवर्षं क्षत्रियमुपनये'दिति गृह्यसूत्रादाविति तथा। ननु 'सर्वा हरिपरा आस'न्नित्युक्त्या सर्वात्मभावको भवति स च प्रदानमाध्य इति किं प्रदानमिति चेत् तत्राहुः युवां मामिति। एवेति 'प्रदानव'दितिव्यासूत्रादेवकारः। सस्वजातेनेति कंसवधानन्तरम्। शङ्किताविति ब्रह्मत्वज्ञानात्। एवं स्नेहातिशयः प्रासङ्गिक उक्तः।

१०-३-४६. इत्युक्त्वेत्यत्र एवमुक्त्वेति निरोधस्कन्धत्वात् कारिकोक्तनिरोधवन्तौ प्रत्युक्त्वा कीर्तनभक्तित्वेन। रूपान्तरेति 'बभूवे'त्युत्पत्त्यर्थको धातुः घटो भवतीत्यनेन। उत्पत्तिर्जन्मप्रकरणात्। 'जन्म त्वात्मतया शरीरस्वीकृतिं प्राहु'रितिवाक्यात्। तादृशकृत्यनुकूलो व्यापारः। अत्र कृतिव्यापारयोर्भेदः। ज्ञानस्यापीति कीर्तनजनकाप्राकृतज्ञानस्यापि। जानातीच्छति यतत इति। ज्ञानसत्त्वे तत्कार्याभावः तूष्णीम्भावो न स्यात्। यद्वा ज्ञानं क्रियेतिपञ्चरात्राज्ज्ञानस्य क्रियायास्तिरोभावो बाले दृष्टः। सर्वदुःखेति विहिताविहितभक्तिमतां सर्वेषां दुःखानां हन्ता। स्वरूपमिति यथार्थज्ञानरूपं अन्यथा तिरोभावे सति ज्ञानस्य प्राकृतज्ञानस्वीकारात्। भगवानित्तीति ऐश्वर्येण तथा न करिष्यतीत्यर्थः। रूपज्ञानेति रूपं चतुर्भुजं ज्ञानमखण्डब्रह्मज्ञानादि। तयोः कार्ययोः चतुर्भुजोत्थापनमखण्डज्ञानोपदेशश्च। सर्वभवनेति उक्तैश्वर्येन्यथाकर्तुं सामर्थ्यमुक्तम्। अत्र टिप्पण्यां यद्यात्मतुल्या तदाख्या मायात्वं कुत उक्तमित्यत आहुः संसारेत्यादि। तथा चैतत्कार्ये किञ्चिद्धर्मसाम्येन तथोक्तम्। कौण्डिपायिनामयनेऽग्निहोत्रशब्दवत्। तर्ह्यात्मशब्दस्य किं प्रयोजनमित्यतस्तदाहुः वस्तुत इत्यादि। एतमर्थं न्यायेनोपोद्बलयन्ति एवं सतीत्यादि। कर्मधारय इति आत्मा चासौ मायेति तेन भगवत्पदाव्यवधानस्य मायाया भगवदीयत्वाप्रापकत्वेप्यक्षतिः। भगवच्छक्त्येति आत्ममायया। अनन्येति दर्शितरूपादनन्यलभ्यत्वात्। तद्विरुद्धेति लीलाविरुद्धाविषयकत्वं स्वस्य सर्वभवनेत्यादिग्रघट्टकस्यार्थे यदैव तूष्णीं स्थित इत्यादिसुबोधिन्या बालकत्वेद्भुतरसं स्मारयन्त आहुः वस्तुतस्त्वित्यादि योजनेत्यन्तम्। शिशुरूप इति प्रथमस्कन्धवाक्यसुबोधिन्यां भगवानेवैवमवस्थो जात इतिसुबोधिन्याम्। नन्वेवं सति सर्वत्र पदेष्वासीदितिक्रियया सम्बद्धेषु सत्सु बभूवेति

क्रियान्तरं व्यर्थमसङ्गतं वा स्यादित्याकाङ्क्षायां तद्वैयर्थ्यमाहुः अपरोक्षेत्यादि। सोंश इति अप्राकृतत्वांशः। तथा च 'प्राकृतो बभूवे'ति भिन्नं वाक्यमतो न वैयर्थ्यादिदोष इति भावः। लिडिति परोक्षार्थकलिट्प्रयोगः। प्राकृतो बभूवेति वेदविषययोर्दर्शनेपि प्रकारस्य कथनत्वमभिप्रेत्य पक्षान्तरमाहुः अपरं चेत्यादि। इत्याद्युक्तमिति प्रघट्टकार्थत्वाल्लौकिके-त्यादिसुबोधिन्याद्टिप्पण्युक्तरीत्या लोकज्ञाने नैपुण्यं परमार्थस्य ब्रह्मणो ज्ञाने नैपुण्यं च ग्राह्यम्। 'युवां मा'मितिवाक्यात्। ननु 'प्राकृतो बभूवे'त्यस्य दर्शनप्रकारकथनत्वाङ्गीकारे भवनक्रियां प्रति प्राकृत इत्यस्य कर्तृत्वमसङ्गतं स्यादित्यतः पक्षान्तरमाहुः अथवेत्यारभ्यो-क्तमेवेत्यन्तम्। 'युवां मा'मितिवाक्यादाहुः लौकिकालौकिकेति। अस्मिन् पक्षे कल्पना-क्लेशादरुच्या पक्षान्तरमाहुः यद्वेति। पूर्ववदिति 'अथवे'त्याद्युक्तपक्षवत्। चतुर्थाध्याये तस्योत्पत्तिर्निरूपितेत्युक्तत्वादधुना तत्स्वीकार इत्याशयेनैतद्व्याख्याने प्राकृतपदस्यार्था-न्तराण्युक्तानि। (सुबोधिन्याम्।) लौकिकज्ञानेत्यादि। अत्र टिप्पणी। 'न भगवत्साम-र्थ्यस्य प्रतिबन्धक'मिति सुबोधिनीपाठः। पूर्वव्याकृतटिप्पण्यविरोधेनाधुना तु भगवत्सा-मर्थ्यस्य प्रतिबन्धकमिति नञ्रहितपाठमप्यङ्गीकृत्याहुः सामर्थ्यस्येत्यादिना। श्रीवल्लभ-लेखेप्ययं पाठः। लोकविद्वेशेति अलौकिकचतुर्भुजरूपे तथा। मातुरिति लोकविद्वेष-भियेत्यादिनान्वेति। यथाश्रुत एवान्वयो वा। एतद्रूपेति चतुर्भुजरूपोपसंहारः। न तदिति न भयम्। 'अभिसरत्युदायुध' इतिवाक्यात्। उक्तरूपस्येति 'अत्रैव वसुदेवदेवक्योः सामर्थ्यस्ये'त्यादिग्रन्थेनोक्तरूपस्य भयहेतुत्वं सूच्यते न तु अभिधीयते अभिधावृत्तेः 'पित्रोः सम्पश्यतो'रित्यत्रोपक्षीणत्वात्। तथात्वमिति सामर्थ्यस्य प्रतिबन्धकत्वम्। सुबोधिन्याम्। उभयोरेकतरनैपुण्यस्य वक्ष्यमाणभगवल्लीलाप्रतिबन्धकत्वमित्याशयेनाहुः उभयमपीति। विद्यमानमिति 'ज्ञानं यथा न नश्येते'तिवाक्याज्ज्ञानमपि विद्यमानमेव मोक्षायेतिज्ञेयम्। भगवत्क्रीडाया मोक्षरूपायाः। 'लोकवत् तु लीलाकैवल्य'मिति व्यास-सूत्रादित्यर्थः।

१०-३-४७. ततश्च शौरिरित्यत्र स्वीकृत्य रूपान्तरमिति तेन 'हेतूद्यमकाप-ट्यस्वीकरणैः प्रथमो महा'निति कारिकायां यथासंख्यनियमोसूचि। यथा हरिहरगुरवः गुरु-हरिहराः इत्यत्र। तेन कापट्यं चतुर्थेध्याये। अयमपपाठो 'हेतूद्यमस्वीकरणकापट्यैः प्रथमो महा'नित्येव पाठः। तत्रेति मथुरायाम्। तस्य चाज्ञानादिति तच्छब्देन प्रधानरूपस्य शिशुभाविनः परामर्शः तस्य शिशोरज्ञानात्। तस्य रूपान्तरस्वीकारस्येति वा ज्ञानं यथा स्वप्ने। एवं स्वीकारवैयर्थ्यानैयर्थ्ये ज्ञानाज्ञाने सर्वं तस्य समाधानार्थम्। तं बोधयित्वेति वसुदेवं बोधयित्वा। मां नय कन्यामानयेत्यादिप्रकारं मनसा बोधयित्वे-त्यर्थः। तूर्ष्णीं भावस्योक्तत्वात्। 'भगवत्प्रचोदित' इतिपदस्यार्थः। अयमर्थः। वसुदेवो बुद्ध्या तं बोधयित्वा मनसा मानसीनरूपेण व्यापकेन तस्य तूर्ष्णींभावो नोक्तः।

रूपान्तरस्वीकारज्ञानाज्ञानयोरेवम् । मूलनिष्ठज्ञानाज्ञानयोरप्येवम् । सप्तुपसर्गस्यार्थमाहुः उत्तमेति । इयेपेति इषु इच्छायाम् । भयाभाव इति शूरस्य भयाभावः तत्सम्बन्धात् पुत्रस्यापि । स इति प्रसिद्धो भगवदधिष्ठानम् । स इति भगवत्स्तोता भगवद्धापण-योग्यश्चेति वार्थः । भगवद्वाक्य इति 'युवां मां पुत्रभावेने'तिवाक्ये । प्राकृते चेति च पुनः प्राकृते । प्राकृतेव जातेति श्रीवल्लभलेखे । चकार इवार्थे इति च । आत्म-मायाकार्यम् । साधारणमायाकार्यं वा तामसत्वात् । अग्रेपि । साधारणमोहस्येति अत्र टिप्पण्यां तथेत्यर्थ इति साधारणेत्यादिः। साधारणत्वमिति चौरवसुदेवयोर्ज्ञाने साधा-रणत्वम् । मोह एव भवेदिति मोहाभावप्रतियोगी मोहः अन्यथा कस्याभावे भवेदित्येव-कारः । अन्यत् स्पष्टम् । सुबोधिन्याम् । भगवतः कार्योपायाः । योगमायाकृतानाहुः गमन स्वाच्छन्द्यमित्यादि । आत्मन इवेति मोहे दृष्टान्तः । आत्मानं माया मोहयतीति स्पष्टम् । प्रस्वाप इति योगमायेतिनामतः प्रमादालस्यनिद्रं तत्कार्यसाम्यम् । मुहूर्तानन्तर-मिति 'नवम्यां योगनिद्राया जन्माष्टम्यां हरेरतः, नवमीसहितोपोष्या रोहिणीबुधसंयुते'ति-भविष्योत्तरवाक्यात् नवम्यां सा जातेतिज्ञायते । किञ्च 'अथ सर्वगुणोपेत' इति सन्दर्भे निरूपितस्याधिदैविककालात्मकपञ्चचत्वारिंशच्छद्चत्वारिंशद्घटिकाद्वयरूपनिशीथस्यारम्भे मथुरायां पुरुषोत्तमजन्माभूत्, निशीथावसानसमये नन्दगृहे पुरुषोत्तमजन्म । एवं मथुरायां श्रीगोकुले च पुरुषोत्तमजन्मनः एक एव निशीथकालः। तावत्येवाष्टमी तिथिः वक्ष्यमाण-वाक्यात्, तदनन्तरं नवमी प्रवृत्ता । तस्यां गोकुले मायाजन्म । भविष्ये 'नवम्यां योग-निद्राया जन्माष्टम्यां हरेरतः नवमीसहितोपोष्या रोहिणीबुधसंयुते'त्यनेन, विष्णुपुराणे प्रथमाध्याये 'प्रावृट्काले च नभसि कृष्णाष्टम्यां महानिशि उत्पत्स्यामि नवम्यां च प्रसूतिं त्वमवाप्स्यसी'त्यनेन चाष्टम्यां पुरुषोत्तमजन्म नवम्यां मायाजन्मकथनात् । एवं चोक्तमुहूर्ते आद्यन्तयोः कृष्णजन्माष्टम्यां मुहूर्तानन्तरं नवम्यां माया जातेत्युपपन्नम् । रोहिणीति 'अथ सर्वगुणोपेत' इत्यत्र 'यर्ह्येवाजनजन्मर्क्ष'मितिनिशीथारम्भे रोहिण्यारम्भकथनाद् रोहिणी तु भगवन्मायाजन्मनोस्तुल्या । तेन रामानुजमतीयैर्यत् कृत्तिकाविद्धा रोहिणी नाद्रियते तदचारु उक्तवाक्यविरोधात् । दोषायैवेति 'सऋक्षापि न कर्तव्या सप्तमीसंयुताष्टमी अविद्धायां सरक्षायां जातो देवकीनन्दनः' इतिब्रह्मवैवर्तवाक्यात् । अन्तःस्थित इति कारागृहे स्थिते । न भवतीति ज्ञानरूपभगवता तमोरूपमायोद्गमो नाशान्न भवति । तत्रैव जातेति गमनस्वाच्छन्द्यादिस्वकार्यकाल एव । योगार्थमित्यस्य व्याख्यानं कार्यो-पायार्थमिति । कार्ये गमने उपायः प्रतिबन्धकाभावः तदर्थम् । लोकान् पौरान् व्या-मोहयति शाययतीत्यर्थः । स्वतन्त्रेति कार्योपायं जानातीच्छति यतत इत्यत्र माया यत्ने स्वतन्त्रा कर्त्रीत्वात् । इमं पक्षम् । नन्दजाययेति स्वतन्त्रकर्त्र्या । 'स्वतन्त्रः कर्ते'तिसूत्रात् । भगवानिवेति 'विष्णुः सर्वगुहाशयः आविरासी'दित्युक्तस्वतन्त्र इव ।

१०–३–४८. तया ह्रतेत्यत्र संशयादय इति आदिना विपर्यासनिश्चयस्मृतयः। आसुराभिभवमाशङ्क्य सर्वपदार्थं वदन्तोनूपसर्गार्थमाहुः मायेति। मुग्धाः स्वयं मायया स्वदेवतया मोहिताः मूर्छिताः मायाविशेषकार्यवन्तः। एवकारः 'मायेत्यसुरा'इतिवाक्यात्। अप्रभाववन्तोऽज्ञानवत्त्वाद् यशोदादयः। तानाहुः यशोदादय इति। तुः आसुरपक्षं व्यावर्तयति। क्रमेणेति अनुक्रमेण। द्वा स्था मुग्धाः असुराश्चेन् मूर्छिताः। पौरा इति पूर्ववत्। पूर्ववदिति कार्योपायार्थं लोकपौरव्यामोहवत् बुद्धिरेव गृहीताऽऽवृता। लोकान्तरमिति देशान्तरम्। कार्यमेवेति प्रत्ययवृत्तिहरणमनुशायनं च। भिन्नप्रक्रमार्थका'थ'शब्दादेवकारः। अन्यत्त्विति द्वारपिधानादिकं तु कंसाज्ञया पूर्वमेव जातं स्थितम्। व्याघ्रा दुर्गे। क्वचिदिति नगराद् बहिररण्ये। बन्ध इति द्वारपालकैः। 'बृहत्कपाटायसकीलशृङ्खला' इतिपाठे आहुः बृहन्तीति। अयं न बहुव्रीहिः किन्तु पिहिता इत्यस्यार्थकथनमिति श्रीवल्लभाः। तेन तृतीयान्तः पाठः न प्रथमान्तं पाठान्तरम्।

१०–३–४९. ताः कृष्णवाह इत्यत्र जाता इति द्वार इत्येव भगवत्क्रीडोपयोगित्वप्रादुर्भावो निरूपितः। सर्वमोक्षेति स्वयमित्यस्यार्थः। अचेतनानामिति व्रजतीति व्रजः तत्सम्बन्धिकपाटानाम्। अचेतनानामिति भगवन्माहात्म्यार्थम्। अतितामसैरिति द्वास्थैः। आसुरैः। मुक्तिरिति सदानन्दतिरोभावनेन चित्प्राकट्यान् मुक्तिः। त्रयं वा प्रकटम्। अन्येषामिति चेतनानाम्। जडभेदवत्त्वात्। ननु मुक्तिः सायुज्यं कथं जातमित्यत आहुः यदीति। यदि शुद्धसत्त्वं जडान्यनिष्ठं भगवद्वाहकं विशुद्धसत्त्वं च यदि तदा विशुद्धसत्त्वस्य व्यापकत्वात् सायुज्यमित्यर्थः। सत्त्वरूपज्ञानानामपि सायुज्यम्। एतदिति विशुद्धसत्त्वे भगवद्वाहकत्वप्रदर्शनार्थम्। अयमेवेति कृष्णवाहवसुदेव एव। एवकारोऽक्षरज्ञानं व्यावर्तयति। योगमायात्वात्। स्वत एवेति पुरुषोत्तमादेव, तमःस्वभावादेवेति वार्थः। नान्यथेति अक्षरज्ञानेन न। निर्गतेष्विति वसुदेवेन निष्क्रान्ते तु। निष्क्रमणकर्मीकृतेषु। उभयोः साम्मुख्य इति मायाभगवतोः साम्मुख्ये। योगमायाकार्यमाहुः वृष्टिरपीति। पर्जन्यः क्रियाशक्तिर्वेदार्थः उपांशुगर्जितं आरण्यके विद्युच्छब्दः। शब्दार्थावुक्तौ भगवत्साम्मुख्ये फलं वीर्यं फलमासीत्। द्वारां पृथ्वीत्वात् कृष्णस्य द्यौस्त्वात् आसीत्। अत्र मायासाम्मुख्यमप्याहुः एतावन्माययेति। आन्तरालिकसृष्टिरूपम्। प्रवृत्तमिति प्रमादालस्यनिद्रारूपम्। शेष इति शेषः शब्दो वैदिकः अन्वगमनं योगमायाकार्यम्। तेनोभयसाम्मुख्यकार्यमुक्तम्। योगमायाकार्यं पाताले स्थितं शेषस्य भगवति योजनम्। फणैरिति मायिकैः। तत्कृतं शेषकृतम्। भगवत्साम्मुख्यकार्यमाहुः अन्तरिक्ष इति। अन्तरिक्षमाकाशः 'आकाशशरीरं ब्रह्मे'तिश्रुतेः।

१०–३–५०. मघोनि वर्षतीत्यत्र निवृत्ता इति सर्वगुणोपेतः काल उक्तः,'अथ सर्वगुणोपेत' इतिश्लोक उक्तः। 'मेघछन्नेह्नि दुर्दिन'मितिकोशः। समागता इति अविद्या-

गर्भत्वात्। दुर्दिनं जातम्। महतीति भगवति। महत्परिमाणेनोपादानं विरोधस्य दुर्दिनस्यासम्भवे हेतुत्वार्थम्। अतिवेग इति तेन वेगः सात्त्विक इत्युक्तम्। राजस इति कर्मबाहुल्यात्। तामस इति निन्दितत्वात्। तामसा इति अधो नीत्वा मज्जनसामर्थ्यात्। राजसमिति चित्तविक्षेपरूपत्वात्। त्रय इति समप्रवाहः सात्त्विकः समप्रवाहराहित्यं वा। सात्त्विकस्य स्तम्भहेतुत्वात्। अग्र इति फलप्रकरणे जलक्रीडायाम्। लक्ष्मीभिरिति लक्ष्मीरूपाभिर्गोपीभिः। जामातुरिति लक्ष्मीः समुद्रपुत्री यतः। बह्वीनामिति बहवश्च बह्व्यश्च बहवः तेषाम्। गोपिकाकदम्बानां फलप्रकरणषष्ठाध्यायलीलायां स्वीकृतानाम्। यद्वा श्रुतिरूपाः भगवत्सेवानुकूलत्वलक्षणपुंस्त्ववन्त इति वेदाः। कुमारिका(ऋषिरूपा)नां वृन्दम्। कामपुरुषार्थवत्त्वेन मोक्षपुरुषार्थाभावान् नपुंसकतौल्यात्। नित्यसिद्धायूथः। यमुनाजितां यूथ इति सामान्ये नपुंसकं वा विशेषणम्। कामुक इति काम इच्छा प्रेमेतियावत्। प्रेमवान्। कुमारिकानां कामुकः। नित्यसिद्धानां यमुनाजितां च कामधर्मवान्। तत्र स्थापितलक्ष्म्यां अर्थकामुकः।

१०–३–५१. नन्दव्रजमित्यत्र शौरिरिति शूरस्यापत्यमिति। नन्दभयं नास्तीत्याहुः नन्दस्येति। अयं नन्दो न वसुदेवपुत्रः नवमस्कन्धोक्तः किन्तु भ्राता। 'दिष्ट्या भ्रातः प्रवयस' इति पञ्चमाध्यायवाक्यात्। अत आहुः। यद्वा पुत्रः तत्सम्बोधनं च वाक्य इत्यत आहुः मित्रत्वादिति। द्वितीयपक्षे पुत्रे राजधर्मे पितुर्वचनं भ्रातुरित्युपपद्यते। ननु द्वितीयपक्षे 'प्रवयस' इति पुत्रेनुपपन्नं पदमिति नेत्थ प्रवयसः लघुकाले वलीपलितयुक्तस्येत्यर्थात्। अत इति शब्दस्य जागरणहेतुत्वाभावात्। जागरणेति प्राहरिकान्। भगवत्त्व इति व्यापकत्वात् स्थापनस्य। स्वगृहानिति भगवत्प्रादुर्भावस्थानत्वेन मान्यत्वाद् बहुवचनम्।

१०–३–५२. देवक्या इत्यत्र अत्र त्विति देवकीशयने। अनादर इति भगवन्तमिवास्थापयित्वा।

१०–३–५३. यशोदेत्यत्र पत्नीशब्दः 'पत्युर्नो यज्ञसंयोग' इतिसूत्रान्निष्पन्न इति यज्ञसंयोगमाहुः तादृशे समय इत्यादि। तादृशसमयः कालः जागरणं निद्राविरुद्धं ज्ञानकम्। अयं यज्ञः। नन्दस्य पत्नीत्यनेनोक्तः। नन्द आभीरः वेदाधिकारी। त्रैवर्णिकत्वात्। अतः पूर्वमिति अपगतस्मृतित्वात् पूर्वश्लोकोक्तम्। सुस्थमिति स्त्रीस्वभावकृतकार्याभावादविघ्नमित्यर्थः। इति श्रीति कृष्णजन्मेति त्रिभिर्व्यूहैः कृष्णजन्म। चतुर्थाध्याये धर्मेनिरुद्धः चतुर्थव्यूहः।

इति श्रीमद्वल्लभचरणैकतानश्रीगोपेश्वरविरचितायां शास्त्ररीत्या
बुभुत्सुबोधिकायां तृतीयाध्यायव्याख्यानम्।

चतुर्थोऽध्यायः।

अथ चतुर्थाध्यायं विवरिषवो जन्मप्रकरणार्थस्य हेतूद्यमस्वीकरणकापट्याख्यार्थचतुष्टयघटितत्वात् तत्पूर्वाङ्गयोर्हेतूद्यमयोः पूर्वाध्यायद्वय उक्तत्वात् स्वीकरणोत्तरमत्रोत्तराङ्गभूतं कापट्यं वक्तव्यं तदत्रावसरसङ्गत्या निरूपयतीत्याशयेनाहुः। यद्वा। कापट्यं विना रूपान्तरस्वीकरणं न सम्भवतीति प्रकृतघटकोपोद्घातसङ्गत्येदं निरूपयतीत्याशयेनाहुः मायायाः कार्यमित्यादि। तच्च कपाटावरणादिसर्वधर्मनाशान्तं ज्ञेयम्। माया कापट्यम्। 'दासवद् यदमायये'त्यत्रा'मायये'त्यस्याकापट्येनेत्यर्थात्। अध्यायार्थस्तु निबन्धोक्तमनिरुद्धकार्यमिति भावः। एतयोः परस्परमन्वयस्तु कारिकोक्त एव। भगवत्कार्यमनिरुद्धकार्यं तस्य भवनार्थं मायायाः कार्यं निरूप्यत इति कार्यकारणभावेन। नन्वेतन्निरूपणस्य किं प्रयोजनमत आहुः अन्यथेत्यादि। यदि कपटरूपं मायाकार्यं न भवेत् तदाऽनिमित्ततो भगवत्कार्यं न भवेत्। अतस्तदर्थं तत्प्रयोजकं मायाकार्यमत्रावश्यं निरूपणीयमित्यर्थः। अनिमित्तत इति अत्र टिप्पणी स्पष्टार्था। यद्वा। ननु मायाकार्यं पूर्वाध्याये निरूपितमि'त्यधुने'तिकथनं न सम्भवतीत्याशङ्क्याहुः चतुर्थ इति। यद्यपि पूर्वाध्याये निरूपितं तथापि तत्र भगवत्प्राकट्यकार्योपयोगि किन्तु नात्योपयोगि, अधुना तु चतुर्थे च चतुर्थस्यानिरुद्धस्य प्राकट्यनिमित्तं निरूप्यत इत्यदोषः। तद्विशदयन्ति अन्यथेति। मायाकार्याभावेऽनिरुद्धप्राकट्याभावेन भगवत्कार्यं सर्वधर्मरक्षा देवक्यादिबन्धननिवृत्तिश्च न स्यादित्यर्थः। अध्यायावान्तरार्थान् कारिकाभिराहुः ज्ञापनेत्यादि। अत्र टिप्पणी। तत्र स्वज्ञापनमिति बालज्ञापनं गृहपालेषु। तथेत्यर्थ इति दुःखसुखदे इत्यर्थः। पितृभ्यामितिबोध्यम्। दुःखसुखदे इति वसुदेवादीनां दुःखदं कंसस्य सुखदमिति वा। सुबोधिनी। कंसस्य ह प्रसिद्धभृत्यस्य स प्रसिद्धः धर्मबाधः गोब्राह्मणहिंसनहितमाननरूप इत्येवं स्पष्टार्थेति तां विहाय न चान्यथेति कारिकांशं व्याकुर्वन्ति स मायामोहमिति। इदं 'इति प्रभाष्ये'त्यस्य सुबोधिन्यां स्फुटम्। भगवदेवेति अनिरुद्धस्य। वाक्यश्रवणेनैवेति वाक्यश्रवणस्य तन्नाशहेतुत्वमित्युक्तम्। एवकारो भगवदवतारस्य तन्नाशयोगहेतुत्वयोगं व्यवच्छिनत्ति। तामसप्रभुक इति निन्दितकरणात् कंसस्तामसः भृत्यैः कृतोऽधर्मः तद्गतो राजगतः कालपाशावृतत्वरूपो धर्मः अन्यथा भृत्याः कालपाशावृताः स्युः। अत इति तथा चावतारस्य तामसराज्यकृतामसधर्मैर्धर्मनाशकैर्निरोधकत्वात्, पूर्वस्य प्रतियोगिनो धर्मस्य नाशो वै निश्चयेन कर्तव्यः धर्मरक्षकेनानिरुद्धावतारेणेत्यर्थः। तामसाश्च त इत्यत्र तद्गताः पश्वादय इति पशूनां हननकर्मत्वाधिकार उक्तः। कण्टकेति 'कण्टकं कण्टकेनैवे'ति वाक्ये कण्टकन्यायस्तेन। धर्मेति धर्मप्रतिपक्षः तामसधर्मपदेनापि शून्यः। तस्य दूरीकरणम्। सुबोधिनी।

नित्यक्रीडास्थस्य ज्ञानवतः कंसस्य सर्वश्रेयोहनने कर्मणि प्रवृत्तिर्नैरपेक्ष्यमाशङ्क्योपपत्तिमाहुः ब्राह्मणा इत्यादि। तद्देश इति तामसराजकस्य देशे। स्वभावादिति चिक्रीडिषया स्वभावस्तस्मात्। तथाविध इति भगवत्सेवार्थमागतः बालकाकाङ्क्षानुकूलत्वात् तामसः। तम काङ्क्षायाम्। यस्मादिति बालेच्छावशात् इत्येवं स्फुटार्थेति न व्याख्याता। पश्चादित्यादिकारिकां विवृण्वन्ति तमःकार्यनिवृत्तेरिति। पश्चात् सात्त्विकप्रकरणे जातः। तथेति सात्त्विकः।

१०–४–२. ते त्वित्यत्र ननु पक्षव्यावर्तनार्थकतुशब्दप्रयोगे व्यावर्त्यपक्षः क इत्याकाङ्क्षायामाहुः देवक्यादिभिरिति। तुशब्द इति पक्षव्यावर्तकः। निलायनादिकमिति दूरादुक्ते देवक्यपि शृणुयात् ततो बालस्य निलायनं कुर्यात्। आदिना शब्दान्तरेण प्रतिबन्धश्च कंसश्रवणे। वस्तुतस्त्वतद्गुणसंविज्ञानः निगडगृहीतानां निलायनासम्भवात्। एतादृशायेति प्रतीक्षमाणाय। उद्विग्न इतीति ओविजी भयचलनयोः। क्तप्रत्ययः। 'ओदितश्चे'ति नत्वम्।

१०–४–३. स तल्पादित्यत्र महानिति ससेवकः। उत्थित इति भयात्। 'भयात् कंस' इतिवाक्यात्। भयाज्जीवन्मुक्तो वा तदा जातः। उत्थितोऽणुरूपेणाङ्गुष्ठमात्रेण सदेहः। देहस्य विद्यमानत्वाज् जीवन्मुक्तत्वेपि।

१०–४–४. तमाहेत्यत्र हननेऽदर्शनं लिङ्गज्ञानं च कारणं सर्वावयवविकलस्य मार्गाज्ञानवतो देहाज्ञानवतथापि। तेन हननजन्यभयमपि तस्य भगवद्धर्यंशः। 'स्त्रिय'मितिविशेषणाभिप्रायमाहुः पुत्रबुद्ध्यैवेति। ननु 'मा हंतु'मिति हनननिषेधो कंसस्य मारणार्थं प्रवृत्तौ सम्भवत्यत आर्थिकार्थमाहुः मारणार्थमिति। दृष्ट्वेत्यादि। अधिकेति। तस्या देवक्या एव। त्वदीयेति पापस्य तव सम्बन्धिनी। कन्येव कन्यका इवार्थे कन्। भ्रातृत्वात्। हेतुकार्यफलैरिति प्रतिलोमक्रमः। दाने स्नुषात्वं फलम्। अष्टममारणं कार्यं हतपुत्रेषु। अवरजात्वादि हेतुः। त्रिषु श्लोकेषु। सात्त्विक्यपि स्त्रीति यद्यपि ब्रह्मविद्यात्वाज्ज्ञानयुक्ता तथापि स्त्रीस्वाभाव्यादाहेत्यर्थः। देवीत्यत्र दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकांतिगतिष्विति धातोरर्थानाहुः ज्ञात्वेत्यादि। द्युतिरर्थो दिवेः। कृतवतीति पचाद्यच् प्रत्ययार्थः। दिवेर्व्यवहारार्थमाहुः असत्यमपीति। अनेन क्रीडार्थोप्युक्तः। 'प्राणसंकटे नानृतं स्याज्जुगुप्सित'मितिवाक्यात्। अनालोचितेति न विचारितं कन्यायाचकस्य कंसस्य स्वरूपं यया तादृशी। अनालोचितेति अनालोचितो याचको येन। अनालोचितस्य याचकोनालोचितयाचकः इति वा। कालज्ञानादिति क्षत्रियस्य त्रिकर्मत्वाद्याचनानौचित्येपि आपत्काले तदुचितमेवेति तादृशकालज्ञानात्। तथेति भगवान् तथायाचनानुरूपं तस्या मोचनं करिष्यति। कंसक्रियायाः भगवदीयत्वात्।

दाने प्रतारकत्वदोषनिवृत्त्यर्थमिति नार्थः। कन्यानैकट्याभावादित्याशयेनाहुः अन्यथेति। अयाचने,कन्यामारणे। मातुलेति मातुर्भ्राता मातुलः। अयं पक्षः क्वचित् वर्तते 'त्यक्त्वा चांद्रायणं चरे'दिति वाक्ये तादृशवाक्ये क्वचिन्मातुलकन्यापरिणयनपक्षाभावे तत्त्यागो नोपपद्येत। पितोग्रसेनो यथा तथा देवकोपि पितृभ्रातृत्वात्। तस्य कन्या देवकी कंसस्य स्वसा भगिनी। तस्याः कन्या तत्र सुतेन परिणेया। यथा माता तद्भ्राता तयोः सम्बन्धस्तुल्यः तथा पिता कंसस्तत्स्वसा देवकीति कंसपुत्रसम्बन्धस्तुल्यः। तत्र दृष्टान्तः यथेति। 'राजाधिदेव्यास्तनयां मित्रविंदां पितृष्वसुः प्रसह्य हृतवान् कृष्णः राजन् राज्ञां प्रपश्यता'मिति वाक्यात्। पितृष्वसुः वसुदेवभगिन्याः तनयामित्यर्थः। स्नुषा भवतीति स्नु प्रस्रवणे। स्नु व्रश्चिकृत्यृषिभ्यः किदिति सः। षत्वम्। 'समाः स्नुषाजनीवध्व' इतिकोशात्। त्रीणि पुत्रभार्याया इति व्याख्यानम्। तथापि 'समा' इति पदस्यान्यत्रापि शक्तिमाहुः अनेनेति। स्नुषेति पुत्रीपुत्रभार्यासमपददानेन समतया भ्रातृभगिन्योः पुत्रिकेतिवक्ष्यमाणत्वात्। पुत्रिकेतिवक्ष्यमाणपदे तवपदव्यवहितस्य देवीपदस्य नान्वय इति। यशोदादेवकीकंसानां समा पुत्रिकेयमिति। सहजमिति कन्यया सह प्रादुर्भूतम्। पुत्र एवेति नवमस्कन्धेऽनुक्तेरेवकारः। व्याख्यानतो विशेषप्रतिपत्तेराहुः त्वं पुत्रजननेति। तथापि पुत्रो भविष्यतीति पुत्रिकाधर्मेणापि।

१०–४–५. बह्व इत्यत्र लोकाख्यायिकायां क्वचित्स्त्रियाः हंत्रीत्वमत आहुः शास्त्र इति। हता इति तत्र मंडलेष्टानां कृते [1]ष्टमोपि हत इतिभावः। बह्व इति कंससंतोषार्थम्। पराक्रमोपीति कंसस्य सः। तस्येति कंसस्य। आहेति दैवसृष्टेनेति विशेषणेनाहेत्यर्थः। अभ्रातृमतीति दाने हेतुः। भ्रातृमती तु न देया। दत्वेति कंसपुत्रायापि।

१०–४–६. नन्वहमित्यत्र हेतुमिति कारिकोक्तफलकार्ये पूर्वश्लोकाभ्यामुक्ते इति भावः। अधुना तु हेतुकार्यफलैरितिकारिकांशमानुलोम्यक्रमेणाहुः अवद्ध्येति। फलमिति याचनफलम्। तेन पूर्वश्लोके दानपात्रकार्यं याचनम्। ततः पूर्वश्लोके दानपात्रे हेतुरित्यपि बोध्यम्। उभयेति कंसदेवक्योरनुभवः। सूचित इति मंदशब्दार्थाः विश्वकोशे 'मंदः खले मंदरवे मूर्खेऽल्परोगिणि अभाग्येपि च पातंगिगजजातिप्रभेदयो'रिति। अयं तु सूचितार्थ इत्यर्थः। मंदाल्परोगिणीत्यर्थः। अत्त इति रजःशुक्रमिश्रणाभावात्।

१०–४–७. उपगृह्येत्यत्र यशोदात्मजात्वेन स्वात्मजत्वाभावाच्छुकोक्तात्मजपदाभिधौ वार्थमाहुः आत्मन इत्यादि। 'अहं बीजप्रदः पिते'तिवाक्यात्। नन्वेवं शुकस्य परमार्थोक्तिः कुत इत्यत आहुः व्यवहार इत्यादि। यत्तो घटापटादिशब्दा अन्येपभ्रंशशब्दाः। गवाक्ष इत्यादयो भवंति तत्र 'गोख' इत्यादयः। अन्ये भिन्नाः यथा नामपद्धत्यां भाषायां कथमर्थे केनचित्संकेतितादपि केशवशब्दात् तत् ज्ञानं कथमर्थस्यैव बोध

1. अत्र मूलेष्टशून्यानि सन्ति, निम्नशून्यं तु विशेषेण निर्दिष्टम्।

इतरेषां तु नेतिवदत्र शुकैरात्मजाशब्द उक्त इत्यर्थः । देहादाविति भाषायां तथाप्रयोग आत्मोपनिषदुक्तपरमार्थानामेव । अपीति अपिनात्मजाशब्दः । 'हस्ता'दित्यत्रैकत्वं विवक्षितमित्याशयेनाहुः एकेनेति । हेतुरिति, स्नेहसूचनेन संचयकरणाद्देवक्याः खलत्वं संचायकत्वं हेतुः । खल संचय इति धातुपाठात् । सकलदोषनिधानत्वं खलत्वं तु नास्ति । 'जिघांसंतं जिघांसीया'दितिमनुवचनात् ॥ सौहृदोन्मूलनस्य वक्ष्यमाणत्वात् । सति सौहृदे तन्मूलनस्य युक्तत्वात् ।

१०-४-८. तां गृहीत्वेत्यत्र खलत्वमिति यद्ययं निरभिमानः स्वमरणे तिष्ठेत् तदा भगवान् कंसं न मारयेदतः खलत्वं सकलदोषनिधानत्वं व्यंजनया समर्थितम् । उभयेति भगिनीतत्पुत्रीविषयकम् । स्वार्थमिति स्वजीवनार्थम् । अत्र कंसस्य देवक्यां स्नेहो गत इत्याहुः उन्मूलितमिति । सौहृदं स्नेहः ।

१०-४-९. सा तद्धस्तादित्यत्र अनुजात्वं हि न भगवज्जन्मोत्तरकालिकजन्मता । तत्कालजातेष्वतिप्रसंगात् । प्रकृते च समानमातृकत्वस्य विष्णुमाययोरभावाच्छुकेन कथमस्यामनुजात्वमुक्तमित्यत आहुः यशोदेत्यादि । एकैवेति यशोदामुक्तिरैक्यरूपा देवकीरूपब्रह्मविद्यासाध्या । अतः साधनफले एकीकृत्य निरूपिते । यथा भाष्ये फलाध्याये तथा च श्रुतौ । कृष्णोपनिषदि । 'यो नन्दः परमानन्दो यशोदा मुक्तिगेहिनी'ति । तथा 'देवकी ब्रह्मविद्या सा या वेदैरुपगीयत' इति । पश्चाच्च जातेति अनुजापदस्यार्थः । देवक्यां विष्णुः यशोदायां माया विष्णोः पश्चाज्जाता । लोकप्रसिद्धेरिति ऐतिह्यरूपायाः । 'श्रुतिः प्रत्यक्षमैतिह्य'मितिश्रुतौ प्रमाणत्वेनाङ्गीकारात् । भगवत्कार्यमिति निबन्धोक्तप्रकारेणानिरुद्धकार्यम् । विपरीतमिति बालरूपमलौकिकरूपाद् विपरीतम् । इयं तु लौकिकरूपं कृत्वा तद्विपरीतमलौकिकं रूपं प्रदर्शितवती । अतो भगवत्कृतिसिद्धिः । तस्या मायाया निवृत्तेर्ज्ञानसाध्यायाः सर्वेष्टत्वात् । 'बन्ध इन्द्रियविक्षेपो मोक्ष एषां च संयम' इति निरोधेयं मोक्षो भवति । एवमियमपीत्यस्य गृहीतवतीत्यनेन ग्रन्थेन नान्वयः, किन्तु 'प्रदर्शितवती'त्यन्वयः । विष्णोरनुजा देवी प्रमादकैरदृश्यतेत्यन्वयः ।

१०-४-१०. दिव्यस्रगित्यत्र तस्याः सामग्रीमाहेत्याभासो न किन्त्वाविर्भावादित्यादिग्रन्थ आभासः । पोथानन्तरं मृतकमदृष्ट्वा रूपान्तरमलौकिकमम्बरं गताम्बररूपं आविर्भावादेतोः गृहीतवतीतिहेतोस्तस्याः रूपान्तरेण भिन्नायास्तच्छब्दवाच्यायास्तच्छब्दार्थधर्मरूपायाः सामग्रीं कारणकलापमाहेत्यर्थः । दिव्याः स्रज इति 'आकाशस्तल्लिङ्गा'दितिव्यासद्वयादनुजात्वेनाकाशशरीरिण्या आकाश आकाशः शरीरिणि शरीरिणी लीना । मुक्ता जाता । तस्या आविर्भावात् 'तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा चे'ति शारीरब्राह्मणोक्ता न सामग्री किन्तु सायुधाष्टमहाभुजाया अदृष्टायाः शाब्दप्रतीतिविषयायाः । दिव्याः स्रजः

सामग्री आविर्भावकारणम्। दिवि देवी दिवि भवा दिव्या स्रजः वर्तमानस्य वस्तुनो दर्शनविषयत्वयोग्यतारूपाविर्भावकारणम्। दर्शनं तु देवीप्रसादकानाम्। एवमम्बराणीत्यादि अलङ्करणेति जातेष्टेरावश्यकत्वात् सङ्ख्यातात्पर्यम्। अलङ्करणचतुष्टयसाहित्येन चतुष्पाद्ब्रह्मणैनां समयतीति फलम्। देव्या अदर्शनं सामग्र्या दर्शनमत आहुः दर्शनेति। गन्धादिति खपुष्पाभावात्, यथा 'सम्पुष्पितस्य वृक्षस्य दूराद् गन्धो वाती'तिश्रुते'र्वृक्ष इव स्तब्धो दिवि तिष्ठत्येक' इत्युक्तपुरुषस्य पुष्पाणां गन्धात्। तान्युद्दामानि। सूत्रप्रोतानि वा। अदृष्टाया मायायाः स्रजां कर्णकरकण्ठसम्बन्धिनीनां प्रतीतिरनुपासकानामपि। धनुर्वामेति स्त्रीणामङ्गस्फुरणं वामे श्रेष्ठमिति वामपरावृत्तायुधधारणम्। धनुषो धनुर्वेदोक्तस्य देहसम्बन्धित्वं 'यजुर्वेदोपवेदत्वात्। यजुर्वेदस्तु मानुष' इति मनुस्मृतेः। अतः प्राथम्यम्। वामप्रथमेहस्ते। शूलं सप्तमे दक्षिणहस्ते। इषु पञ्चमे दक्षिणहस्ते। चर्म वामे चतुर्थे। असिर्दक्षिणेऽष्टमे। शङ्खो वामे द्वितीयहस्ते। चक्रं दक्षिणे षष्ठे हस्ते। गदा वामे तृतीये करे। गदाधरा। भगवदायुधानां ज्ञानरूपाणां शङ्खचक्रगदाशूलानामावरकैर्धनुरिषुचर्मासिभिरावरणमित्येवमायुधक्रमः। भूम्नः शूलस्थाने पद्मन्।

१०-४-११. सिद्धेत्यत्र भगवत इवेति 'देवी भगवती'तिवाक्यात्। त्रिगुणा इति तया सृष्टाः। सत्त्वगुणः सिद्धाः। रजोगुणश्चारणाः। तमोगुणो गन्धर्वाः। रजस्तमसो व्युत्क्रमो वा। चारणानां तमोगुणत्वम्। अन्ये चेति अप्सरआदयः। अप्सराः सत्त्वगुणः। किन्नरा रजोगुणः। उरगास्तमोगुणः प्रसिद्धः। ऐकपद्यमिति 'अप्सरःकिन्नरोरगै'रित्येवमैकपद्यम्। पञ्चगुणेति पञ्चगुणैः सत्त्वादिभिरुपजीवनं सिद्ध्या वंशशंसनेन गानेन नृत्येन किञ्चिन्नरत्वेन उरगत्वजात्या च भगवद्धर्मैश्वर्याद्यावरकैः कुर्वन्ति। कंसदर्शन इति सतिसप्तमी। कंसदर्शनकालसमानाधिकरणाः। कंसदर्शनकाल इत्यर्थः। कंसवधमिति स्तवनेन स्त्रीस्वाभाव्यात् तथा, भगवदावेशेन मृत्यौ कंसस्य निरभिमानत्वाभावाद् वा।

१०-४-१२. किं मयेत्यत्र न हन्यत इति कंसः। रक्षार्थमिति देवक्यादीनाम्। तदाहेति उभयसमाधानमाह। न करोमीति समर्थापि सङ्कर्षणकार्यत्वेन स्वाकार्यत्वात्। मन्द इति अज्ञानी मम कर्तृत्वस्य। प्रथमचरणेन द्वितीयं समाधानमुक्तं 'हतये'त्यस्यासत्येत्यर्थात्। प्रथमसमाधानं पादद्वयेनाहुः अवधे हेतुरित्यादिना। देवगुह्यमिति देवगोप्यं प्रियम्। 'अस्याः त्वामष्टमो गर्भ' इतिवाक्ये गर्भपदोपादानात्। 'देवाः प्रत्यक्षद्विषो' यतः। भगवानिति भवान् कालः। अबुद्ध्वेति अहं तु हननेप्यपकारं न करोमीतिवृत्तान्ताज्ञानेन। पूर्वशत्रुरिति पूर्वस्य कालनेमेः शत्रुः। तथैवेति गर्भ इत्यत्र पुंस्त्वविवक्षणात्। अत इति यत्र क्वचिदष्टमगर्भस्य जातत्वात्। न कोपीति पुत्रान्तरेऽष्टमत्वाभावाच्च कोपि शत्रुहननरूपः।

१०-४-१३. इति प्रभाष्येत्यत्र गतेति निकेतेषु स्वप्रतिमासु गता। अनेनेति प्रोपसर्गेणोक्तस्य निरूपणस्य परपक्षनिराकरणपूर्वकस्वपक्षस्थापनरूपत्वेन। संवादान्तरं पूर्वपक्षनिराकरणरूपमित्यर्थः। अहं तु हननेऽप्यकारं न करोमीति स्वपक्षस्थापनात्। अन्यथेति सर्वस्य मायाकार्यत्वाज्ञाने। न कुर्यादिति कंसः। ब्राह्मत्वादिति भावः। तेनेति कंसेन। सर्वमिति अर्चनकर्मत्वादिकं स्वस्य। देवीति तेन दिवेर्द्युतिर्ज्ञानमत्रार्थः। स्वरूपमुक्त्वा तस्या मोहरूपं कार्यमाहुः यद्यन्य इति। अन्यथा चरेदिति मायावादविरुद्धं चरेत्। च्वदेदितिपाठे चद याचने भ्वा० उभ० से०। भगवद्भावेति भगवतीत्वप्राकट्यम्। भगवद्वाक्येति 'अर्चिष्यन्ति मनुष्यास्त्वा'मिति भगवद्वाक्यानुसारेण। रूपभेदस्येति द्विभुजचतुर्भुजत्वादिरूपभेदस्य।

१०-४-१४. तया कथितमित्यत्र वाक्यं त्विति भगवता सह वाच्यवाचकसम्बन्धोऽस्यास्तीति वाच्यवाचकसम्बन्धि तस्य भावस्तत्ता। तया। तस्या असत्त्वात्। विमर्शमाहुः यदीयमिति। मारितापि अनपकारकर्त्री। धृत्वैवेति ज्ञानसाधनाद्धृदि धृत्वा स्थाप्येत। मायासिद्धान्तस्योक्तत्वात्। शृङ्खलां दूरीकृत्येति तेन विभागानुक्तफलो व्यापारो मुञ्चतेरर्थः। शुद्धभाव इति मानसः। प्रश्रित इति कायिकशुद्धभावः। वाचिकमिति 'अब्रवी'दित्यनेन वाचिकं शुद्धभावम्।

१०-४-१५. अहो इत्यत्र फलस्येति स्वापराधफलस्य मृत इव श्वासस्य। भ्रमाच्चैवेति मारकपुत्रभ्रमाद् वृथैव शिशुहननरूपः शोकदूरीकरणं 'मा शोचतं' इत्यत्र स्पष्टः। आत्मनो न हीति भावार्थः। ज्ञानाद् दृष्टश्चेति मायिको दृष्टः आत्मभेदः। मायासिद्धान्तस्योक्तत्वात्। शोको न कर्तव्य इति 'मानुशोचत' इतिपदेन स्पष्टः। 'यावद्धतोसी'त्यत्र स्पष्टः। कर्माज्ञानेति कर्माज्ञानयोर्वशः। तथैवेति आश्चर्येणैव। प्राणरक्षार्थमिति राक्षसाः भक्षणाभावे म्रियन्ते। सर्वोपि। तत्र इति राक्षसेभ्यः।

१०-४-१६. स त्वहमित्यत्र दैत्यावेशादिति इदमाविष्टदैत्ये दोषजनकम्। त्वं स्वतः समीचीनः। तं पक्षमिति आविष्टे दोषपक्षम्। करिष्यमाणत्वादिति ज्ञानोक्त्या ज्ञानयज्ञस्य करिष्यमाणत्वात्। तदभाव इति अपकीर्त्यभावः। सर्वजनीनत्वं व्युत्पादयन्ति स सर्वात्मकत्वादिति। भगवत इति भयात् प्राप्तस्य जीवन्मुक्तताकारणस्य। अत्रापराधफलं मृतश्वास उक्तः।

१०-४-१७. दैवमित्यत्र न भवतीति किन्तु भ्रमाच्चैवापराधोयमिति स्वदोषपरिहारमित्यादिः। स्वदोषपरिहारो न वाच्यार्थ इतीवशब्दप्रयोगः। दुर्गायां त्वनृतवक्त्रीत्वामावाद्दैवपदार्थमाहुः आकाशेति। वाक्यमिति अनृतम्। दुर्गेति विष्णोरनुजा। अपिना माया साधारिणी। आकाशवाणी वा 'दुर्गां देवता पर्वतेराध्यास'मितिश्रुतेः। देवतास्मरणम्।

एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमितिन्यायात्। प्रत्यक्षेति 'यत्र क्वचित् पूर्वशत्रु'-रित्यादि। विसंवादीति अष्टमो गर्भो हतः न तु हन्तेति विसंवादि। ननु न विसंवादि कृष्णो हनिष्यतीति चेत् तत्राहुः देवगुह्येति। देवरूपदैवगुह्यस्य गोप्यस्य प्रियस्याज्ञानात् कंसस्येत्यर्थः। विपरीतमिति सत्यविपरीतमनृतम्। यद्वेति वाक्यात् यद्वा विश्वासात्। सुतानिति सुताश्च सुता च सुताः तान्। वृथैवेति दुर्गापि देवतेति विश्वासाद् वृथा। सन्देह इति दैववाक्यात् सन्देहः। यत्र क्वचिद् पूर्वशत्रुर्हतो वापूर्वशत्रुर्वेति। प्रकृतय इति हृदि धृत्वा स्थापिताः माया दैवदुर्गाः। भगवत्य इति प्रमाणम्। 'अत्र प्रमाणं भगवा'नितिवाक्यात्। अन्तःकरणप्रवृत्तय इति पाठे अन्तःकरणस्य प्रवृत्तयो याभिरिति पूर्वोक्त एवार्थः। हृदयमिति हृदेव हृदयम्। हरतेः अयं च हृक् च। वयः प्रसिद्धं विरुद्धं हनने। विरुद्धां सङ्ख्यामाहुः अष्टम एक इति। सामर्थ्येति शब्दसामर्थ्यमष्टमो गर्भो हन्तेतिवाक्येऽष्टमपदैकसङ्ख्यासामर्थ्यं 'कपिञ्जलानालभेते'त्यत्र त्रित्वे बहुत्वपर्यवसानवत्। हन्तायमिति सप्तसु ज्ञानं नास्ति किन्त्वष्टम एवेत्येकत्वे शब्दसामर्थ्यम्।

१०–४–१८. मा शोचतमित्यत्र कर्तव्यमाहुः महतामित्यादिना। महतां देवकसम्बन्धिनामखण्डब्रह्मज्ञानाधिकारिणां शोके शोकनिमित्तं शोकफलाय। प्रायश्चित्तेप्यनधिकारी ब्रह्मवित्, 'एतऽह वाव न तपती'तिश्रुतेः। एतं ब्रह्मविदं साधुकर्म असाधुकर्म वा न तपतीतिश्रुत्यर्थः। शोके हेतुभूतो न भवतीत्यर्थः। भवतीति नञ्रहितपाठेऽविद्यया विद्योपमर्दात् प्रायश्चित्तेऽनधिकार्यपि शोके हेतुभूतो भवतीत्यर्थः। अनधिकारी वसुदेवोत्र। मत्कृपयेति मयि कंसे कृपया। भागोत्र शत्रुमित्रोदासीनभावाभाव इत्याहुः महतां शत्रुमित्रेत्यादि। स्वाकृतार्थत्वेनेति न कृतोऽर्थः लोकजयलक्षणः पुत्रोत्पादनेन येन सोकृतार्थः। मरीचिपुत्रा इति उत्तरार्धे षट्त्रिंशाध्याये भगवद्वाक्यानि 'आसन् मरीचेः षट् पुत्रा. ऊर्णायां प्रथमान्तरे। देवाः कं जहसुर्वीक्ष्य सुतां यभितुमुद्यतम्। तेनासुरीमगन् योनिमधुनावद्यकर्मणा। हिरण्यकशिपोर्जाता नीतास्ते योगमायया। देवक्या उदरे जाता राजन् कंसविहिंसिता' इति बलिं प्रति। तेन एवं जाता इत्यस्याः देवकीपुत्रा जाताः। न जानातीति 'आत्मजा'नितिपदात्। कार्यादिति 'स्वकृतंभुज' इत्यत्र स्वकृतपदार्थः। अनुमिनोतीति स्वकृतंभुजः तादृशकर्मकर्तृत्वात्। अस्मदादिवदिति अनुमानं करोति। तैरिति हिरण्यकशिपोर्जातैः। हता इति पूर्वं द्वितीयाध्याये षट् पुत्रा ऐश्वर्यादिरूपा वेदान्तानुसारेणोक्ताः। उत्तरार्धे तु वेदमार्गानुसारेण मरीचिपुत्रा भगवतोक्ताः। वेदान्ते पुरुषोत्तमोर्थात्मकः वेदे पुरुषोत्तमः शब्दात्मकः वेदोपि शब्दः। जायस्वेति अयं तृतीयकर्ममार्गश्छान्दोग्ये। दैवाधीना इतीति फलबलकल्प्या हि भगवदिच्छोक्ता। न सम्यगिति नैकरूपतया।'समासत'इतिपाठमङ्गीकृत्योक्तम्। अत्र शोकदूरीकरणं कारिकोक्तं स्पष्टम्।

१०-४-१३. इति प्रभाष्येत्यत्र गतेति निकेतेषु स्वप्रतिमासु गता। अनेनेति प्रोपसर्गेणोक्तस्य निरूपणस्य परपक्षनिराकरणपूर्वकस्वपक्षस्थापनरूपत्वेन। संवादान्तरं पूर्वपक्षनिराकरणरूपमित्यर्थः। अहं तु हननेप्यकारं न करोमीति स्वपक्षस्थापनात्। अन्यथेति सर्वस्य मायाकार्यत्वाज्ञाने। न कुर्यादिति कंसः। ब्राह्मत्वादिति भावः। तेनेति कंसेन। सर्वमिति अर्चनकर्मत्वादिकं स्वस्य। देवीति तेन दिवेर्द्युतिर्ज्ञानमत्रार्थः। स्वरूपमुक्त्वा तस्या मोहरूपं कार्यमाहुः यत्रन्य इति। अन्यथा चरेदिति मायावादविरुद्ध चरेत्। चदेदितिपाठे चद याचने भ्वा० उभ० से०। भगवद्भावेति भगवतीत्वप्राकट्यम्। भगवद्वाक्येति 'अर्चिष्यन्ति मनुष्यास्त्वा'मिति भगवद्वाक्यानुसारेण। रूपभेदस्येति द्विभुजचतुर्भुजत्वादिरूपभेदस्य।

१०-४-१४. तया कथितमित्यत्र वाक्यं त्विति भगवता सह वाच्यवाचकसम्बन्धोस्यास्तीति वाच्यवाचकसम्बन्धि तस्य भावस्तत्ता। तया। तस्या असत्त्वात्। विसर्गमाहुः यदीयमिति। मारिताप्यनपकारकर्त्री। धृत्वैवेति ज्ञानसाधनाद्धृदि धृत्वा स्थाप्येत। मायासिद्धान्तस्योक्तत्वात्। शृङ्खला दूरीकृत्येति तेन विभागानुक्तफलो व्यापारो मुञ्चतेरर्थः। शुद्धभाव इति मानसः। प्रश्रित इति कायिकशुद्धभावः। वाचिकमिति 'अब्रवी'दित्यनेन वाचिकं शुद्धभावम्।

१०-४-१५. अहो इत्यत्र फलस्येति स्वापराधफलस्य मृत इव श्वासस्य। भ्रमाचैवेति मारकपुत्रभ्रमाद् वृथैव शिशुहननरूपः शोकदूरीकरणं 'मा शोचत' इत्यत्र स्पष्टः। आत्मनो न हीति भावार्थः। ज्ञानाद् दृष्टश्चेति मायिको दृष्टः आत्मभेदः। मायासिद्धान्तस्योक्तत्वात्। शोको न कर्तव्य इति 'मानुशोचत' इतिपदेन स्पष्टः। 'यावद्धतोसी'त्यत्र स्पष्टः। कर्माज्ञानेति कर्माज्ञानयोर्वशः। तथैवेति आश्चर्येणैव। प्राणरक्षार्थमिति राक्षमाः भक्षणाभावे म्रियन्ते। सर्वोपि। तत्त इति राक्षसेभ्यः।

१०-४-१६. स त्वहमित्यत्र दैत्यावेशादिति इदमाविष्टदैत्ये दोषजनकम्। त्वं स्वतः समीचीनः। तं पक्षमिति आविष्टे दोषपक्षम्। करिष्यमाणत्वादिति ज्ञानोक्त्या ज्ञानयज्ञस्य करिष्यमाणत्वात्। तदभाव इति अपकीर्त्यभावः। सर्वजनीनत्वं व्युत्पादयन्ति स्म सर्वात्मकत्वादिति। भगवत्त इति भयात् प्राप्तस्य जीवन्मुक्तताकारणस्य। अत्रापराधफलं मृतश्वास उक्तः।

१०-४-१७. दैवमित्यत्र न भवतीति किन्तु भ्रमाचैवापराधोयमिति स्वदोषपरिहारमित्यादिः। स्वदोषपरिहारो न वाच्यार्थ इतीवशब्दप्रयोगः। दुर्गाया रजतकश्रीत्वाभावाद्देवपदार्थमाहुः आकाशेति। वाच्यमिति अनृतम्। दुर्गेति विष्णोरनुजा। अपिना माया साधारिणी। आकाशवाणी वा 'दुर्गा देवता पर्वतेराध्यास'मितिश्रुतेः। देवतास्मरणम्।

एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमितिन्यायात्। प्रत्यक्षेति 'यत्र क्वचित् पूर्वशत्रु'-रित्यादि। विसंवादीति अष्टमो गर्भो हतः न तु हन्तेति विसंवादि। ननु न विसंवादि कृष्णो हनिष्यतीति चेत् तत्राहुः देवगुह्येति। देवरूपदैवगुह्यस्य गोप्यस्य प्रियस्याज्ञानात् कंसस्येत्यर्थः। विपरीतमिति सत्यविपरीतमनृतम्। यद्वेति वाक्यात् यद्वा विश्वासात्। सुतानिति सुताश्च सुता च सुताः तान्। वृथैवेति दुर्गापि देवतेति विश्वासाद् वृथा। सन्देह इति दैववाक्यात् सन्देहः। यत्र क्वचिद् पूर्वशत्रुर्हतो वापूर्वशत्रुर्वेति। प्रकृतय इति हृदि धृत्वा स्थापिताः माया देवदुर्गाः। भगवत्य इति प्रमाणम्। 'अत्र प्रमाणं भगवा'नितिवाक्यात्। अन्तःकरणप्रवृत्तय इति पाठे अन्तःकरणस्य प्रवृत्तयो याभिरिति पूर्वोक्त एवार्थः। हृदयमिति हृदेव हृदयम्। हरतेः अयं च हृक् च। वयः प्रसिद्धं विरुद्धं हनने। विरुद्धां सङ्ख्यामाहुः अष्टम एक इति। सामर्थ्येति शब्दसामर्थ्यमष्टमो गर्भो हन्तेतिवाक्येऽष्टमपदैकसङ्ख्यासामर्थ्यं 'कपिञ्जलानालभेते'त्यत्र त्रित्वे बहुत्वपर्यवसानवत्। हन्तायमिति सप्तसु ज्ञानं नास्ति किन्त्वष्टम एवेत्येकत्वे शब्दसामर्थ्यम्।

१०-४-१८. मा शोचतमित्यत्र कर्तव्यमाहुः महतामित्यादिना। महतां देवकसम्बन्धिनामखण्डब्रह्मज्ञानाधिकारिणां शोके शोकनिमित्तं शोकफलाय। प्रायश्चित्तेप्यनधिकारी ब्रह्मवित्, 'एतऽह वाव न तपती'तिश्रुतेः। एतं ब्रह्मविदं साधुकर्म असाधुकर्म वा न तपतीतिश्रुत्यर्थः। शोके हेतुभूतो न भवतीत्यर्थः। भवतीति नञ्रहितपाठेऽविद्यया विद्योपमर्दात् प्रायश्चित्तेऽनधिकार्यपि शोके हेतुभूतो भवतीत्यर्थः। अनधिकारी वसुदेवोत्र। मत्कृपयेति मयि कंसे कृपया। भागोत्र शत्रुमित्रोदासीनभावाभाव इत्याहुः महतां शत्रुमित्रेत्यादि। स्वाकृतार्थत्वेनेति न कृतोऽर्थः लोकजयलक्षणः पुत्रोत्पादनेन येन सोकृतार्थः। मरीचिपुत्रा इति उत्तरार्धे षट्त्रिंशाध्याये भगवद्वाक्यानि 'आसन् मरीचेः षट् पुत्रा ऊर्णायां प्रथमान्तरे। देवाः कं जहसुर्वीक्ष्य सुतां यभितुमुद्यतम्। तेनासुरीमगन् योनिमधुनावद्यकर्मणा। हिरण्यकशिपोर्जाता नीतास्ते योगमायया। देवक्या उदरे जाता राजन् कंसविहिंसिता' इति बलिं प्रति। तेन एवं जाता इत्यस्याः देवकीपुत्रा जाताः। न जानातीति 'आत्मजा'नितिपदात्। कार्यादिति 'स्वकृतंभुज' इत्यत्र स्वकृतपदार्थः। अनुमिनोतीति स्वकृतंभुजः तादृशकर्मकर्तृत्वात्। अस्मदादिवदिति अनुमानं करोति। तैरिति हिरण्यकशिपोर्जातैः। हता इति पूर्वं द्वितीयाध्याये षट् पुत्रा ऐश्वर्यादिरूपा वेदान्तानुसारेणोक्ताः। उत्तरार्धे तु वेदमार्गानुसारेण मरीचिपुत्रा भगवतोक्ताः। वेदान्ते पुरुषोत्तमोर्थात्मकः वेदे पुरुषोत्तमोत्तमः शब्दात्मकः वेदोपि शब्दः। जायस्वेति अयं तृतीयकर्ममार्गश्छान्दोग्ये। दैवाधीना इतीति फल्गुफलकल्प्या हि भगवदिच्छोक्ता। न सम्यगिति नैकरूपतया। 'समासत'इतिपाठमङ्गीकृत्योक्तम्। अत्र शोकदूरीकरणं कारिकोक्तं स्पष्टम्।

१०-४-१९. भुवि भौमानीत्यत्र म्रियन्त इति 'जायस्व म्रियस्वे'ति तृतीयकर्ममार्गः । न कदाचिदनीदृशं जगदिति जैमिनिः कर्मतत्त्वज्ञः । कूटस्थो निर्लेपः । ननु मायादैवदुर्गाधूतवतः कंसस्य वेदवेदान्तप्रकारः कथमित्यत आहुः साङ्ख्यानामित्यादि । प्रकृतिः कर्त्री पुरुषः पुष्करपलाशवन्निर्लेप इति साङ्ख्यसूत्रम् । भूमावेव लयमिति कार्याणां स्वस्वकारणे लयनियमात् तथा । भूमित्वेन भूमिः दृष्टाविरोधेन लयस्थानम् । न चाप्सु लय इति वाच्यम् । अत्रित्रिवृत्कृतभूविषयत्वा'दद्भिः पृथिवी'तिश्रुतेः। एतेन श्रुतिस्मृत्योर्विरोधे श्रुतिः प्रबलेति श्रुतिकृतबाधः प्रत्युक्तः । आत्मोपेति मायादिहृदयः विद्यापूर्वप्रश्ने न मन्यते । चतुर्थस्कन्धे 'माया मनः सृजति कर्ममय'मित्युक्तेः। अत एवैवकारः । भुवि भौमानीति अत्र टिप्पणी तेषु विद्यमानस्येति तेषु भूतेषु विद्यमानस्यात्मनः। तद्धर्मेति विकृतत्वभूतधर्मेत्यर्थः। तथात्वमिति सार्थकत्वम् । सुबोधिनी । आत्मपदमावृत्य सप्तम्यन्तं परिणमय्य भूतानीत्यनेनान्वितकरणे गौरवमालोच्य पक्षान्तरमाहुः भूतानि जातानि वेति । एवं स्पष्टार्थेति तां त्यक्त्वा दृष्टान्त एवेति सुबोधिनीं व्याकुर्वन्ति स दृष्टान्तनिरूपकेति । भिन्नं वाक्यमिति एकतिङ्वाक्यमिति तिङन्तरग्रहणेन तथा । अग्रे त्विति उक्तेषु मनुष्यादिदेहेष्विति ग्रन्थे । उक्तेष्वेतेष्विति टिप्पण्यां पाठः। सुबोधिन्याम् । तथा चैवमन्वयः । प्रथमपक्षे 'विपर्ये'तीत्यनेनोक्तो विकार उत्पत्तिलयरूपः,स एव 'यान्त्यपयान्ती'त्यनेनोक्तः। द्वितीयपक्षे 'यान्त्यपयान्ती'त्यनेन गमनागमने उक्ते । 'विपर्येती'त्यनेन विकारोन्यथाभावरूप उच्यते । तत्रैवमन्वयः। 'भुवि भौमानि भित्यादीनीत्येव सम्बध्यत' इति सुबोधिन्यामेवकारेण 'भौमानि' भूविकाराणि 'भूतानि' कृमिकीटादीनि वृक्षादीनि वेति सहैवान्वयस्य व्यवच्छेदकेनैवकारेण । यथा भुवि भित्त्यादीनि यान्त्यपयान्ति तथैवात्मनि भूतान्यब्जादीनि जातानि वा यान्त्यपयान्ति । एतेषु विद्यमान एवात्मा 'न तथा' न याति नापयातीति । दृष्टान्तेनात्मनो गमनागमने निषिद्धे । द्वितीयदृष्टान्तेन विकारं निषेधति । न तथैतेष्वितिपदत्रयस्यावृत्तिं कृत्वा यथा भूमिर्बहिः स्थिता न विपर्येति तथैतेषु भूतेष्वन्तर्विद्यमान आत्मापि न विपर्येतीति । अत्रैव पक्षे भूमेर्विकारोपलब्धेररुचिं मत्वा यथा भूरित्यत्र नकारमसंयोज्य यथा भूर्विक्रियेत तथात्मा न विक्रियत इतिव्यतिरेकदृष्टान्तपक्ष उक्तः । तेनात्मनो न हि शोकोस्तीति कारिकोक्तशोकाभाव इति भावः।

१०-४-२०. यथा नैवमित्यत्र ऐकात्म्य इति देहेषु भिन्नेष्वात्मा एक एव तस्य भावः । आहेति ज्ञानाद् दृष्टो भेदो नश्यतीत्याहेत्यर्थः । यथेत्युक्तमिति यथावदर्थकयथेत्युक्तम् । एकं पदमिति वेदनं विद् भावे क्विप् । तत एवमित्यनेन केवलसमासः। ततो न एवंविदनेवंविदिति नञ्तत्पुरुषः । ततो यथावदनेवंवित् यस्येति बहुव्रीहिः । समासान्त इति शेषाद् 'विभाषे'तिसूत्रेण कप् प्राप्तः। स त्वनित्यो वैकल्पिक इत्यर्थः। ननु भेद-

स्थानेवंविद्विषयत्वे किं मानमित्याकाङ्क्षायां भेदस्थानेवंविद्विषयत्वमुपपादयन्ति स्म भेदस्त्वित्यादि। इमौ द्वौ घटपटौ अयमस्माद् भिद्यन इति। भेदप्रत्यक्षे प्रत्यक्षं प्रमाणमुक्तम्। ननु द्वित्वमेव भेदसाध्यं कुतो नेत्यत आहुः न ह्येकस्मिन्निति। तथा चैकस्मिन् दृष्टे एक एवेति बुद्धिर्भवति न तु भिन्न इत्यतो द्वित्वसाध्य एव भेदो न तु भेदसाध्यं द्वित्वमित्यर्थः। अपेक्षाबुद्धीति अयमेकोयमेक इमौ द्वावित्यपेक्षाबुद्धिः। वस्त्वित्यति आत्मनिष्ठम्। अतस्तत्साध्यो भेदोपि नात्मनिष्ठः। बुद्धिस्थेति यथावदनेवंविद्बुद्धिः अपेक्षाबुद्धिः, आत्मा तत्स्थं विशेषेण सिनोति बध्नाति यद् द्वित्वं तद्बुद्धिस्थविषयं स्वार्थे कः। यथावदनेवंविद्बुद्धिस्थ आत्मा विषयो यस्य द्वित्वस्येति बहुव्रीहौ कब्वा। एकरसश्रुतेरेवकारः। नन्वान्तरं द्वित्वाभाववति द्वित्वप्रकारकं ज्ञानं भ्रमः[1] स न युज्यतेन्यत्र स्थितस्यान्यत्रारोपाङ्गीकारात्। तस्माद् बहिर्द्वित्वं(द्वित्वसाध्यो भेदः)बुद्ध्याकाशादौ घटपटनिष्ठे उत्पाद्यते तदनन्तरमन्यथ्यस्यते इतिपक्षं निराकुर्वन्ति बुद्ध्येति। यथा यन्मायया बहिःक्षिप्ता ख्यायते बुद्धिरर्थवच्छुक्तिरजतादौ तथा विषयोत्पादनासम्भवात्। तेन किमत आहुः अत इति। अज्ञानं यथावदनेवंवित्त्वं तत्कृत एव भेदो द्वित्वसाध्यः, न तु बुद्धिकृत इत्यर्थः। नन्वात्मन इदमित्थतया ज्ञानाविषयत्वं भाष्य उक्तमिति यथा कथञ्चिद् भेदोपि द्वित्वसाध्यः बुद्धिकृत इति चेत् तत्राहुः अपेक्षेति। पदस्य पदान्तराभावप्रयुक्तान्वयाननुभावकत्वमपेक्षा। तत्र विषयतया प्रविष्टानां द्वित्वसाध्यभेदानां परमार्थेऽभावात्। आत्मरूपे तु भवतु मा वेत्यन्यदेतत्। निरपेक्षेष्विति घटः पटः कुड्यं कुसूल इत्यादिशब्देषु। उक्तापेक्षा तद्विषयिणी बुद्धिरित्यर्थः। अज्ञानेन तमसा कृता तामसी। अतद्वति तत्प्रकारकज्ञानरूपत्वादेवकारो नैयायिकमतेनापि। भेद इति आत्मनां परस्परं भेदः। एतदनुमानं बाधकतर्केण दूषयन्ति आत्मविपर्ययो न स्यादिति। बाधकतर्कप्रणयनं तच्च व्याप्तिरोधकमन्यथाज्ञानम्। तथा चात्मभेदः अपारमार्थिकः स्वकृतव्यवहारेणात्मविपर्ययादन्यथाज्ञानवदिति प्रत्यनुमानेन सत्प्रतिपक्षत्वं पूर्वानुमानस्येति भावः। आत्मविपर्यय इति आत्मविकारः यथा शरावादिरूपेण भिन्ना भूर्भेदेन विकृता। अन्यथाबुद्धीति अभेदवति आत्मनि भेद(विकृतत्व)प्रकारकबुद्धिहेतुत्वात्। नन्वात्मविपर्ययोऽज्ञानेन न तु भेदेनेत्यत आहुः अन्यथेति। नोत्पद्येतेति विक्रिया नोत्पद्येत। भिन्नयोर्देवदत्तयज्ञदत्तदेहयोर्विक्रिया षड् भावविकारा भवन्त्येव। प्रत्याहारन्यायेन देहयोगवियोगाभ्यां षड् भावविकाराः मासाः चकारस्य कोर्थ इत्याकाङ्क्षायामाहुः चकार इति। सर्वव्यवहारेति भेदकृतगौरोहं श्यामोहमिति सर्वव्यवहारसमुच्चयार्थः। संसार इह प्रपञ्चोहन्ताममतात्मको वेत्याशयेनाहुः भेदज्ञान इत्यादि। मायाकार्ये भेदज्ञाने विद्यमाने।'भिदा मायामात्र'मितिवाक्यात्।जन्म-

१ रो द्वित्वसाध्यभेदाभाववति द्वित्वसाध्यभेदप्रकारक ज्ञानं भ्रमः।

मरणयोरिति तमोऽविद्याकार्ययोरन्यथाज्ञानाभावरूपयोर्विद्यमानत्वं भेदमायाकार्यत्वात्। माया तत्कार्यान्यतरसत्त्वे संसारः प्रपञ्चोहन्ताममतात्मको वा न निवर्तते। 'आत्ममायामृते राजन् परस्यानुभवात्मनः न घटेतार्थसम्बन्ध' इतिवाक्यात्। 'अर्थसम्बन्धो' देहसम्बन्धः। अत इति जन्ममरणोपलक्षितषड्भावविकाराणां विद्यमानत्वात्। कूटस्थ इति मायादेव देवतानां हृत्स्थत्वात् कंसस्य कूटस्थः मायिकस्थः। न तु सर्वोपनिषदुक्तः कूटस्थः, उपनिषत्तु 'ब्रह्मादिपिपीलिकापर्यन्तं सर्वप्राणिबुद्धिरष्टविशिष्टतयोपलभ्यमानः सर्वप्राणिबुद्धिस्थो यदा तदा कूटस्थ इत्युच्यत' इति। शोको न सम्भवतीति ज्ञानाद् दृष्टो भेदो नश्यतीति शोको न सम्भवति। द्वितीयाभावात्।

१०-४-२१. तस्माद् भद्र इत्यत्र शोको न कर्तव्य इति कारिकोक्तः। न करिष्यतीति शुद्धसत्त्वत्वान् न करिष्यति। अपत्यमिति नवमस्कन्धे 'बलं गदं सारणं चे'त्यष्टकथनं क्रीडोपयोगिनाम्। 'स्नुषेयं तव कल्याणे'तिवाक्यसत्यत्वार्थम्। मानुशोचेति मूले शोचेति यत इति च भिन्नं पदद्वयमिति ज्ञापितम्। 'माङि लुङ् सर्वलकारापवादः' 'लोट् चे'ति सूत्राभ्याम्। व्यापादिता इति मृता इति रूढोर्थः। यौगिकार्थस्तु, तनयाः षण्मरीचिपुत्राः, अकृतार्थगतत्वात्, यन्नैवं तन्नैवम्, देवदत्तवदित्येवमनुमाने यदि मरीचितनया न स्युः अकृतार्था न गच्छेयुरित्येवं मारितषट्पुत्रेषु मरीचितनयत्वमापाद्यते। अतो मया व्यापादिताः षट्। अनुशोक इति कर्माननुसन्धानरूपान्तर्मुखानामननुशोके उपपत्तिर्युक्तिः। अनुपपत्तिः कर्मानुसन्धाननिषेधरूपा। कर्मानुसन्धानं पदार्थसम्भावनार्थकापेरर्थः तदभावो द्योत्यः। एवं बहिर्मुखानां मय्यविशेषेणेत्यर्थः। एवं अनुशोके बहिर्मुखानामप्येकानुपपत्तिः तामाहेति पाठेर्थ उक्तः। अथ पाठान्तरम्। अननुशोके बहिर्मुखानामस्त्युपपत्तिः तामाहेति। यतः सर्व इति प्रतीकसर्वपदार्थमाहुः बहिर्मुखानामपीति। तथा च बहिर्मुखान्तर्मुखरूपः सर्वः। भुञ्जत इत्यत्र विन्दत इत्यपि पाठः। भुङ्क्त इति तेन 'भुञ्जत' इति बहुवचन छान्दसं मूले। ततः प्रेरककर्माननुसन्धानमिति भावः, यत्तदोर्नित्यसम्बन्धात्। यतः कर्मणः सर्वोवशः स्वकृतं कर्मफलं भुङ्क्ते, ततः कर्मणः प्रेरककर्माननुसन्धानमितिपदद्वयरहितोत्तरार्धार्थः। अस्य मत इति दैत्यमते सृष्टेः पुष्टिप्रवाहमर्यादाचर्षणीभेदेन चातुर्विध्यं न। आत्मा एक उक्तः। तस्य नानात्वप्रतीतावुपाधिभेदः कारणं, तेन तथा प्रतीतिमाहुः भुञ्जन इतीति। 'उपाधिर्भिद्यते न तद्वा'निति साङ्ख्यप्रवचनीयसूत्रोक्तसिद्धान्त उक्तः। मयेति कंसेन। दण्डाभावेनेति निमित्तेन। अपिना देवक्याः।

१०-४-२२. यावदित्यत्र कर्मत्वमिति हत इत्यत्र कर्मणि क्तप्रत्ययात्। कर्तृत्वमिति हन्तेत्यत्र कर्तरि तृचः। नन्वेवकारो न देयः हतत्वहन्तृत्वयोरुपाधिदेहधर्मत्वादित्यत आहुः कर्मत्व इत्यादि। अनेन कर्माज्ञानवश इति कारिकोक्तं कर्मोक्तम्। तदुपपादयन्ति

स अक्रिय इति। मन्यत इति अभिमन्यते। प्राप्नोतीति प्रकृतिस्थामात्मनि दैवेभिमानेन प्राप्नोति। आत्मा दैवं बाध्यो बाधको वेति। दृष्टिः प्रत्यक्षम्। जानातीति शाब्दज्ञानविषयं करोति। एवकारव्यावर्त्यमाहुः न त्विति। जानातीति सम्बध्यते, न तु प्रत्यक्षज्ञानविषयं करोतीत्यर्थः। देहाद्यध्यास इति देहोहं स्थूलोहमित्यादिरित्यन्यत्रान्यावभासः। स्वरूपेति दैवत्वेन मायात्वेन देवतात्वेन वा स्वरूपस्याज्ञानं देहत्वेन स्थूलत्वेन वान्यधर्मेण ज्ञानम्। तदभिमानी बाध्यबाधकत्वरूपदेहधर्माभिमानी। अज्ञ इति दैवत्वादिना स्वरूपं जानातीति ज्ञः, तद्भिन्नोऽज्ञः। तेन कारिकोक्तमज्ञानमुक्तम्। एवेति एवकारो यथारूपत्वेन घटादिज्ञानवानज्ञः तथेति।

१०–४–२३. क्षमध्वमित्यत्र हृदय इति हृदि अनुशये पश्चात्तापे 'भवेदनुशयो द्वेषे पश्चात्तापानुबन्धयो'रिति विश्वः। भूयानिति मनसः करणत्वात् यावदात्मानं न गृह्णाति तावत् शोको भूयान् भवति। 'तरति शोकमात्मवि'दिति श्रुतेः। अतो महतां पूर्वापराधमविचार्य क्षमैवोचितेति भावः। पादग्रहणमिति क्रियाविशेषणम्। अकर्तव्यमपि करोति चेत् कर्तव्यं तु कुर्यादेवेत्याहुः गृहीतेति। इदं कैमुत्यन्यायेनोक्तम्। स्वस्रोरिति द्विवचनं साधयितुं श्रीधरमतं दूषयन्ति स स्वसृशब्देनेत्यादिना। अभिधीयेते इति एकयोक्त्याभिधीयेते यथा पुष्पवच्छब्देन दिवाकरनिशाकरौ ह्यभिधीयेते। इति न स्वसृपदे श्रीधरोक्तमिश्रलक्षणा।'लक्षणां नैव वक्ष्या'मीति प्रतिज्ञातत्वात्। तदुक्तम्। महाभाष्ये 'साधूनेव प्रयुञ्जीते'ति। तथा च स्वसा च स्वसा च स्वसारौ तयोः स्वस्रोः। 'सर्वे सर्वार्थवाचका' इति श्रुतेरेकं स्वसृपदं तत्पतिवाचकम्। यथैकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ। स्वसृपदेन तत्पतिग्रहणे हेतु(युक्ति)माहुः तत्सम्बन्धादेवेति स्वसृसम्बन्धादेव। अन्यथा ज्ञातिवमान्यः स्यात्। तथा च मान्यत्वद्योतनाय वसुदेवे स्वसृपदप्रयोगः। तं प्रतीति वसुदेवं प्रति। एकशेषे लुप्तस्य स्वसुः पादाभ्यां नान्वय इत्याहुः लुग्विधानसामर्थ्यात् सति बाधके। एकस्या एवेति एवकारो वसुदेवयोगं व्यवच्छिनत्ति। द्विवदिति 'पादा'वित्यत्र द्वित्वसमर्थनम्। द्वितीयान्ताद्वतिः। राजकर्तृकपादग्रहणकर्मत्वस्यैकपादे पर्यवसानम्। कपिञ्जलबहुत्वस्य त्रित्वे पर्यवसानवत्। एकशेषे लुप्तस्य पादस्याग्रहीदित्यत्रानन्वयाच्च लुग्विधानसामर्थ्यात् सति बाधके भवति अन्यथा लोपं लुक्स्थाने वदेत् सूत्रे। 'न लुमताङ्गस्ये'तिपाणिनिसूत्रात्। एवं 'स्वस्रो'रित्यत्रापि द्वित्वसमर्थनम्। अथ'कशेषे'त्यादि'रिति चे'त्यन्तो ग्रन्थोनतिप्रयोजनः काकपाददानात्। तथापि व्याक्रियते ग्रन्थस्थत्वात्। ननु स्वरूपैकशेषस्य स्वसा तत्पतिश्चेति द्वन्द्वे वक्तुमशक्यत्वाद्विरूपैकशेषस्य पाणिनिनाननुशिष्टत्वात्। कथं स्वस्रोरिति प्रयोगसिद्धिरित्यत आहुः एकशेषेत्यादि। तृतीयेति 'स्त्रीपुंसयोः पुमा'निति सूत्रयितव्ये तृतीयाघटितसूत्रेऽप्रधाने तृतीयेत्यर्थः। न च शरीरगौरवमिति वाच्यम्। अकारस्य विष्णु-

वाचकस्य सत्त्वेन विष्णुसहस्रादिस्तोत्रापलापप्रसङ्गात्। न चादृष्टोत्पत्तिः सूत्रपाठे स्यादिति वाच्यम्। महाभाष्ये 'भीत्रार्थानां भयहेतु'रित्यादिसूत्राणां प्रत्याख्यानात्। ननु यथाव्याख्यानं तृतीयास्तु किं ज्ञापनेनेत्यत आहुः अन्यथेति। पुरुषयोरित्येव स्यात्। पुम्भ्यामिति च प्रयोगः स्यात्। उभयोः प्राधान्ये त्वेवं प्रयोगः स्यादेव। अतिप्रयोजनानतिप्रयोजनग्रन्थसाधारण्येनाहुः अत्रापीति। स्वसैवेति तत्पत्युः स्वसृसम्बन्धेन मान्यत्वात् स्वसुः प्राधान्यात्। एवकारस्तु श्रीभागवतप्रामाण्यात्। भिन्नप्रक्रम इति दैत्यावेशस्याऽग्रेमृतमिव जातत्वेन राजसभावस्य च त्यागात्।

१०-४-२४. मोचयामासेत्यत्र दैत्यावेशस्येति अयं ग्रन्थः पूर्वान्वेय्यप्यत्र श्लोकाभासेपि पुस्तके वर्ततेत्यणिजन्तुभावेनाथेत्यनुवर्त्य तदर्थत्वेन व्याख्येयः,स्वकृतिभिन्नेन भृत्यप्रेरणप्रक्रमेण स प्रक्रमः दैत्यावेशस्येत्याद्यर्थः। निरोधं चेति निगडम्। तामसं निरोधं प्रपञ्चविस्मृतिपूर्वकभगवदासक्तिरूपं च स्वस्येतः परं 'भयात् कंस' इतिवाक्यात् भयेन निरोधो नावेशदशायाम्। 'निगडौ मोचयामासे'त्यनुक्त्वा पश्चाद्युक्तेस्तात्पर्यमाहुः निगडाविति। निगडेति तेन न निगडौ मोचयामास भृत्यद्वारेति णिजन्तप्रयोगः। अक्षुब्धाविति 'यत्र क्वचिज्जातस्तवात्मज' इति वसुदेवगृहे निषेधवचनात् हृष्टौ। एताभ्यामिति वसुदेवदेवकीभ्याम्। विचारितवानिति वसुदेवदेवकी हर्षेण विचारितवान् अनुमितवान् तौ कापट्यवन्तौ तादृशवाक्येन हर्षात्। तादृशासदादिवदिति। असत्यमपीति तमोरूपत्वेन मायाया भ्रान्तिविषयवाक्यमसत्यम्। अपीति सत्यं विष्णोरनुजात्वात्। लिङ्गवचने इति विश्वासहेतोर्वचने। वसुदेवेनैवेति एवकारो देवकीयोगव्यवच्छेदकः। तथाकृतत्वादिति यत्र क्वचिज्जातत्वेन कृतत्वात्। ननु कृष्णेन यत्र क्वचिज्जातत्वं न देवक्याः कृपणात्वमिति मायायाः कंसेऽन्यथाबुद्धिकर्तृत्वमत आहुः अन्यथेति। सिद्धमेवेति माया च तमोरूपेति नृसिंहतापिनीये सिद्धमेव। असिद्धत्वयोगव्यवच्छेदकैवकारः। पाठक्रमेणाहुः प्रथमत इति। स्वयं परिचर्यामिति सौहृदं स्नेहवाचकम्। स्नेहेन परिचर्येत्यवैधभक्तौ सिद्धम्। स्वयमिति च मयकार्यम्। सौहृदं स्नेहम्।

१०-४-२५. भ्रातुरित्यत्र प्रसाद इति स्नेहेन परिचर्याफलं प्रसादः। 'यदृच्छया तुष्यते हरि'रितिवाक्यात्। 'जातो भवे'दिति पूर्वसुबोधिन्यां 'जात' इत्यत्र सुप्तुपस्यै क्रियापदस्य विवक्षणात् प्रार्थनायां लिङतः प्रार्थिते। 'क्षान्त्वा रोपे'त्यत्र 'क्षान्त्वा रोष'मिति पाठं मत्वाहुः रोषं क्षान्त्वा क्षमित्वेति। क्षमूष् सहने। भ्वा० आ० सेट्। तस्य रूपमिति द्योतितं व्याख्यानेन। यत्वोविचारे विशेषो नात्र। तेन नात्र क्षनू वन्धे इत्यस्य तनादेरुदितः सेटो रूपमिति वन्धित्वा वध्वेति वा व्याख्यानं छान्दसमिडभावं कृत्वा न भवतीति भावः। पाठभेदादिति 'क्षान्त्वा रोष'मिति पाठभेदात्। 'रोषं क्षान्त्वे'ति वा

पाठः। अतो रोषं वा व्यसृजदित्यत्र कर्म। सोढ इति क्षान्तः सोढो रोषः पूर्वापराधो यया। तथा स्वकीयं रोषं तु व्यसृजत् त्यक्तवतीत्यर्थः। कृतकार्यस्येति कृतं कार्यं मायाहननं येन कंसरोषेण तस्य। अकृतेति न कृतं कार्यं ब्रह्मविद्यया येन स्वकीयेन रोषेण तस्य। गूढहृदय इति गूढं प्रसादज्ञापने गुप्तं हृदयं हृद्यस्येति तथोक्तः।

१०–४–२६. एवमेतदित्यत्र तस्यैवेति मायाप्रधानकंसस्य। एवकारो ब्राह्मयोगव्यवच्छेदकः, न तु ब्राह्मस्येति। अज्ञानादिति देहादिप्रविविक्तात्माज्ञानात्। एवकारो ज्ञानयोगव्यवच्छेदकः। मायामुक्त्वा तत्सृष्टिं भेदरूपामाहुः तस्मात् स्वपरेति। देहाध्यासेति देहोऽहमित्यध्यासवताम्। संयोगः सम्बन्धो देहिनामित्यत्र। अहङ्कारस्येति अहं देहोऽहं स्थूल इत्यहङ्कारस्यात्मानात्माविवेकरूपाज्ञानजनितत्वे देहाध्यासः प्रयोजक इति देहाध्यासी अहङ्कारीति अधिकारत्वेनाध्यासो 'यत' इतिपदेन मूले निरूपितः। न च यतः अहंधियः स्वपरेति भिदेति योजनया न पूर्वोक्तमिति वाच्यम्। अहंधियः स्वपरभिदारूपमायाकारणत्वाभावात्। एवं चाज्ञानप्रभवा, यतोध्यासात् प्रभवाहंधीः स्वपरेति भिदा यस्याम्। अहंधीरित्यत्राहं स्वं विषयः तत्सम्बन्धिपरोपि विषयः स्वं पर इति भिदा स्वनिष्ठा परनिष्ठा चेति सापि विषयः। तथा च यत इत्यस्याध्यासादित्यर्थः। तथा सत्यन्वयमाहुः अन्यथेति। अज्ञानप्रभवा पुनर्देहाध्यासात् प्रयोजककारणाचाहंधीरित्यर्थः। तदिति अन्यथाज्ञानं, अज्ञानं माया तत्कृतम्। अज्ञानप्रभवे'तिपदस्यार्थः। अन्यथेति स्वरूपे स्थौल्येन देहोहमिति प्रत्ययेऽसदर्थे भासमाने। अन्यत्र भावः स्थौल्यस्येति बोध्यम्। अन्यत्र भावादिति पाठः। अन्यत्र भायादिति पाठान्तरम्। अन्यत्र आत्मनि स्थौल्यं भायादित्यर्थः। 'यत' इत्यस्याहंधियः अहं स्थूल इत्यध्यासरूपाया इत्यर्थः। यद्यप्यहंधीरित्यत्राहं स्थूल इत्यप्रत्ययः अहंधीरित्यस्य तु नाध्यासरूपत्वम्। असदर्थस्य धियाऽभेदात् 'ज्ञानमात्रपरं ब्रह्मे'त्युक्तेः। धीरपि मनोवृत्तिः 'स मानसीन आत्मे'ति मनोवृत्तिरात्मापि, तथापि धर्मज्ञानस्य धर्मिज्ञानेध्यास एव।

१०–४–२७. शोकहर्षेत्यत्र तदुक्तमिति कंसोक्तम्। नित्यानित्येति नित्य आत्माऽनित्यो देहः। यथा 'भुवि भौमानी'त्यनेनाविकृत आत्मा भूर्विकृता नित्याऽनित्या च। कृपयेति साधुत्वदीनवत्सलत्वाभ्यां कृपा। 'साधवो दीनवत्सला' इतिवाक्यात्। न मारयतीति 'यावद्धतोसि हन्तासी'तिवाक्ये। स्वसिद्धान्तं स्वीयवेदान्तसिद्धान्तमाह किन्तु केनेति। अन्तर्यामिणा अन्तरो यमयतीत्यन्तर्यामिब्राह्मणात्। प्रविष्ट इति 'तत्सृष्ट्वा तदेवानुप्राविश'दितिश्रुतेः। मारयतीति 'कर्ता शास्त्रार्थवत्त्वा'दित्यधिकरणे 'जीवीयकर्तृत्वं परा'दित्युक्तत्वात्। शास्त्रं भाष्यं वेदान्तं वा। बाधका इति भगवतो ज्ञानं धर्मैस्तादृशज्ञानरूपधर्माणां तामसत्वान् मायाकृतधर्माः बाधकाः आवरकाः। 'परोपि मनुतेनर्थं तत्कृतं चाभिपद्यते' इतिवाक्यात्। भगवदिति ज्ञानप्रतिपक्षाः अज्ञानरूपाः। स

हीति ईश्वरो हि। तत्कृतेर्थे जीवेंशतः कर्तुमकर्तुमन्यथा कर्तुं सामर्थ्यस्य सत्त्वात् साक्षात्सृष्टौ। कथं शोक इति जगत आनन्दत्वेन शोकाभावः। आनन्दावरकत्वेनानन्दाभावः शोकः कथमिति प्रश्नः। मायासत्त्वात् स्वरूपे शोकाभावेपि जीवे शोकः 'मायां च तदपाश्रयां यया सम्मोहितो जीव आत्मानं त्रिगुणात्मकं परोपि मनुत' इति प्रश्न एव शास्त्रपरिसमाप्तिः। परन्तु समाधिभापावासनावतां पुंसाम्। परस्य जीवस्य मायासम्बन्धं तत्कृतं शोकं चाह। शरीरसम्बन्धे मायाशरीरसम्बन्धानन्तरं शोको मायागुणः। आनन्दरूपे जगति शोके युक्तिमाहुः अन्यथेति। शोकाभावे अन्यथापेक्षितं भगवद्विचारात् प्रकारान्तरेण यदपेक्षितं शोकजनकं नाशप्रतियोगि स्वांशानां जीवानां तत् अन्यो भगवदंशः परः न नाशयेत्। आनन्दजनकस्य नाशयोग्यत्वाभावात् प्रतियोगित्वाभावात्। अन्यस्य सामर्थ्याभावात्। दण्डप्राप्तेश्च भगवानेव नाशयतीति ज्ञानाभावादैश्वर्यविरुद्धः शोक इत्यर्थः। हर्षभययोः वीर्यविरुद्धत्वं व्युत्पादयन्ति स हर्षश्चेत्यादि। कालरूपवीर्यकृते स्वांशानामपेक्षितनाशेर्थे कथं हर्षो भयं चेति प्रश्नः पूर्ववत्। तदिति अव्ययम्। हर्षः। न भवेदिति पाठः। भगवतो वीर्यं कालः प्राप्तिविरुद्धः इति ज्ञाते प्राप्तिजन्यो हर्षो न भवेदित्यर्थः। भयविरुद्धवीर्यरूपकालश्चेद् भयं न भवेदित्यर्थः। द्वेपस्य यशोविरुद्धत्वं व्युत्पादयन्ति स न भवेदिति। तत्कृतेर्थे यशोविरुद्धो द्वेषश्च न भवेदित्यर्थः। द्वेषशब्दो मूर्धन्यान्तः। यथा ह्युपाधिको दोषस्तथा धनोपाधिको लोभ इत्याहुः द्वेषश्चेति। तदुभयमिति 'कामस्यान्तं हि क्षुत्तृड्भ्यां क्रोधस्यान्तं फलोदया'दित्युक्त्वा 'लोभस्यान्तं न विद्यत' इति सप्तमस्कन्धात्। त्रित्वसामर्थ्येन स्वरूपलक्षणगतेन भगवत एव। एवकारव्यावर्त्यमाहुः न स्वस्येति। वसुदेवस्य मायाया वा। भगवता तथा कर्तुमुचितम्। द्वेषस्यापकारित्वात्। लोभस्य भक्तिविरोधात्। प्रसिद्ध इति ज्ञानस्य भगवद्धर्मत्वात् मोहस्य मायाधर्मत्वात् प्रसिद्धः। ज्ञानस्य तमोनाशकत्वात्। ज्ञानविरुद्धो मोहः। मदस्त्विवति वैराग्यविरुद्धो मद इति भावः। अत इति साधनाभावात्। मारयन्तमिति भगवन्तं न पश्यन्ति। अन्यथेति यदि पश्येयुः। एको भगवान् घातकः ज्ञातः स्यात्। भगवच्छास्त्र इति श्रीभागवते वेदान्ते वा। 'भावैर्भाव'मित्यस्य 'भावैः' कंसवाय्यादिभिर्विपर्ययैर्मिथो घ्नन्तं 'भावं' भगवन्तमविषयं न पश्यन्ति चक्षुरादिकरणस्य भावेपूपक्षयात्। न पश्यन्तीत्यन्वयेपि भावानां बाधकानां करणत्वं बाध्ये भगवद्रूपे भावेऽभावाद् बाध्याकाङ्क्षायामाहुः बाध्या इति। एवकारव्यावर्त्यमाहुः न तु धर्मीति। 'भाव'मितिपदेनोक्तो भावः। कुत इत्यत आहुः ये हीति। बलीयस्त्वमिति उत्पादने विलये च, बलहीनास्तु नोत्पद्यन्ते, न विलीयन्ते च, तत्तत्सत्तावत्। वक्ष्यमाणस्य करणे सम्बन्धस्य वक्तुं बाध्यं भावं धर्मिणो भावात् पृथक्कर्तुं क्रीडेच्छया प्रवेशमाहुः यद्बाधार्थमिति। एवकारोत्राबाध्ययोगं व्यवच्छिनत्ति। भाव इति बाधके भावे। निवि-

शतीति अनुदात्ते तामात्मनेपदानित्यत्वम्। स त्वमिति स भगवान् निविष्टद्वारा त्वं वाच्यम्। भवदादीनामिति कंसादीनाम्। आदिना वाश्यादि। करणमिति कंसवाश्यादि। उपालभ्यते स्तूयते वेति त्वं कुण्ठितधारं त्वं तीक्ष्णधारं इति। कुण्ठितधारं तीक्ष्णधारमिति तूपालभ्यते स्तूयते च। सम्बन्ध एवेति पाठे दशा करणे कंसवाश्यादौ सम्बन्धो न त्वेकात्मनि। सम्बद्ध इति पाठे कर्तेत्यनेन सम्बध्यते। कर्तेति आत्मा देवदत्तादिश्च। करणं वेति करणं वा कर्तुः पृथक् ज्ञायत इत्यर्थः। तत इत्यादि तदनन्तरम्। एवंबुद्धिरिति वध्यघातकभावबुद्धिः। त्वमिति कंसः। न कर्तव्य इति असद्वत्।

१०-४-२८. कंस एवमित्यत्र स्वकार्यमिति कंसवसुदेवज्ञानसहितम्। 'परिभाषित' इत्यत्र परिशब्दार्थमाहुः राजन्निति।'एवमेतन्महाभागे'त्यत्र'महाराजे'ति सुबोधिनीपाठाद् राजसभावस्य ज्ञानकथनेन गतत्वान् महत्पदरहितं सम्बोधनमुक्तम्। 'एवमेत'दिति कंसकृतानुवादस्तेन निरूपितौ विशुद्धिप्रसादौ निरूपितौ, प्रसन्नौ कंसवसुदेवौ निरूपिताविति वा। 'प्रतिभाषित' इतिपाठे प्रतिनिधिज्ञानेन भाषित इत्यर्थः। देवकीवसुदेवाभ्यामित्यस्य तात्पर्यमाहुः एवास्येति। वसुदेवस्यैव एवकारो देवकीयोगव्यवच्छेदकः। प्रतीकाररूपकर्मणोरुक्तौ न्यूनं पूरयन्ति स प्रतीकारमकृत्वेति गृहातिरिक्तकर्मयोगव्यवच्छेदार्थक एवकारः।

१०-४-२९. तस्यामित्यत्र भगवत्प्रेरणयेति 'गच्छ देवि व्रजं भद्रे' इत्यत्र लोटा भगवत्प्रेरणा प्रतीयते तया। स्वतन्त्रतयेति भगवत्प्रेरणां विनापि स्वातन्त्र्येण। ननु तस्याः स्वतन्त्रतया कार्यकरणस्य किं प्रयोजनमित्याकाङ्क्षायामाहुः यदीति। अवध्य एवेति कंसोऽवध्य एव। मृत्यौ निरभिमानत्वात्। एवकारोऽक्लिष्टकर्मत्वाद् भगवतः। एवं च मायाया अस्वतन्त्रीत्वेपि भगवदिच्छया स्वातन्त्र्यमुक्तं तत्तत्पुराणसिद्धम्। दैवं देवता मायेति तिस्रः योगमायापदेन मूले व्यावर्त्यन्त इत्याहुः न च देवानामिति। अनिष्टमितीति इति हेतोः दैवं माया न तत्कार्यं क्षतवत् किन्तु देवतामायेत्यादिः। 'न चे'त्यन्वेति। सर्वशास्त्रेति अन्धं तमः। सम्पादयत्तीति 'न चे'त्यत्राप्यन्वेति। तथा कथेति योगमायात्वेन योगमायाकथनम्। राजधर्म इति कनिष्ठत्वेन राजधर्मादरः सूचितः। पूर्वमिति देवयुद्वाहे। कृतमिति देवकीहननकम्। अन्यथेति शत्रुहननं न जातं प्रत्युतासद्धननकं प्राप्तमित्यन्यथा। पूर्वेति भगवच्छक्तियोगमायोक्तम्। ज्ञानस्येति आत्मज्ञानस्य स्वशत्रूत्पत्तिज्ञानस्येति वार्थः। कार्यस्येति यत्र कुत्र जातहननस्य। विलम्बसहिष्णुत्वादिति पाठः। विलम्बासहिष्णुत्वादित्यपि पाठः। तत्राम्नेति कंसपदस्य पुनरुपादानप्रयोजनम्। स तु नोक्त इति 'यदुक्तं योगमायये'त्यस्य कर्मतया'चष्टे'त्यत्रान्वयादिति भावः। योगनिद्रापि योगमाया नाम तदाहुः योगनिद्रयेति। आचष्टेति चक्षिङ् व्यक्तवाचि। अदादिः आ० सेट्। लङ्।

१०-४-३०. आकर्ण्य भर्त्रित्यत्र तेषामिति 'यथे'त्यादिनोक्तानां नातिकोविदानां दैतेयानाम्। अतिकोविदास्तु 'विवेकस्तु हरिः सर्वं निजेच्छातः करिष्यती'त्याचार्योक्तविवेकवन्तः। देवद्वेषेत्यादिना 'देवान् प्रति कृतामर्षा' इत्यस्यार्थस्यानुवादः। अतः सुबोधिन्यामुत्तरार्धं न व्याख्यातम्।

१०-४-३१. एवं चेदित्यत्र भविष्यतीति इतिर्निश्चयसमाप्तौ। तरतमेति पृ-पालनपूरणयोः। पचाद्यचि गुणः। पालयति विष्णुः मास्त्रिक इति पुरस्थाः मास्त्रिकाः। पुर अग्रगतौ वा। तु० प० से०। ग्रामस्थास्तामसाः। ग्रस अदने। ग्रसेरा चेति मन् आत्वम्। व्रजस्था राजसाः व्रजतीति व्रज इति कर्मप्रधानत्वात्। अतिक्रान्तेति अतिक्रान्तानि दशाहानि यैरिति विग्रहः। समासान्तः। विशेषाकारेण स्त्रीपुंविशेषाकारेणेत्यर्थः। दैत्यग्रहेष्विति उग्रग्रहेषु दैत्यसम्बन्धिष्वपि। हन्तव्या इति निश्चयाकारः। अन्यैरपीति त्वदीयैरिति ज्ञेयम्। न वदेदिति यदुक्तं योगमायया तन्न वदेत् मन्त्रिभ्य इत्यर्थः।

१०-४-३२. किमुद्यमैरित्यत्र स्वकृत्यमिति दैत्यकृत्यम्। तस्येति कंसस्य। तं कंसम्। तवेति भयात् प्राप्तजीवन्मुक्तिकस्य। सामर्थ्यं चेति राज्ञो जीवन्मुक्तस्यैश्वर्यादिषड्गुणा अनाविष्टस्यैते। दीनत्वं यद्यपि तृतीयश्लोके भीतेषु तथापि 'यथा राजा तथा प्रजे'तिवाक्यात् कंसे राज्ञि कारिकोक्तं सामर्थ्यमुक्तम्।

१०-४-३३. अस्यत इत्यत्र हन्यमान इति हननमत्र हन्यमाननिष्ठम्। तच्चेत् प्राणवियोगानुकूलव्यापारवद् भवेत् 'समन्तत' इत्याद्यग्रेतनश्लोकविरोध इति तदनुरोधेन हन्यमानपदार्थमाहुः संछिन्नेति। तथा च हन्यमाना इत्यत्र न हि मार्थकहन्तेः प्रयोगः। प्राणवियोगाभावात्। किन्तु हन्यमाना अङ्गैर्गम्यमानाः सर्वाङ्गेष्विति गत्यर्थकहन्तेः प्रयोगः। चेति प्राणवियोगमिति चकारार्थः। 'जिजीविषव' इतिपदेन द्योत्यते। 'ययु'रित्यत्र कर्म किमित्याकाङ्क्षा तु देशस्याविवक्षणाद् यं कमपि देशमिति पूरणीया। कारिकोक्तजय उक्तः।

१०-४-३४. केचिदित्यत्र अन्तःकरणस्य त्याग इति युद्धे तथा जाते दयावता त्वया न हन्यते। 'भयसन्नता'निति वक्ष्यमाणवाक्यात्। अन्तःकरणस्य अवस्था प्रदर्शितेत्यन्वयो वा। युद्धत्यागे सति न हन्यत इति च। यद्वा त्यागे सति न हन्यत इति शास्त्रपरिपालनाय न्यस्तशस्त्रा इति। स्वधर्मेति युद्धत्यागे। स्वर्ग इत्यात्मसुखकम्। कार्यकारणभावात्। स्वर्गभोग इति स्वधर्मफलमित्यर्थः। केषाञ्चिदिति बोध्यम्। साधनतरतमभावात्। देवा इति स्वर्गक्रीडावन्तः। दिवु क्रीडाविजिगीषेति धातुपाठात्। येषामिति 'सुमनसाम्। परमापदाविति परमपदा औ इति छेदः। औ अव्ययमम्बुध्यर्थकम्। परमापदा औ अम्बुधिः तस्मिन्। तेषां धर्माणां शास्त्रे उक्तं विकल्पमुक्तवानित्यर्थः। एवं परमापदौ विकल्पं तेषामुक्तमिति पाठेर्थ उक्तः। परमापदा वैकल्यं

तेपामुक्तमिति पाठेर्थः सुगमः। केचिदिति पुनरुक्तेरभिप्रायमाहुः येपां पुनरिति। कारिकोक्तं दीनत्वमुक्तम्। 'यथा राजा तथा प्रजा' इति प्रजानिष्ठम्।

१०–४–३५. न त्वमित्यत्र वचनेपीति 'प्रपन्नं विरथं भीतं न रिपुं हन्ति धर्मवि'दिति वचने 'भीताः स्मे'ति वचने वा। विमुग्धाश्चेति कर्मधारयः। चकारः समुच्चयार्थकः। द्वन्द्वेनाहुः उभयेति। तथा चान्यासक्ताः विमुग्धाश्चेति विग्रहः। अत्र श्लोके कारिकोक्तदयोक्ता।

१०–४–३६. किं क्षेमशूरैरित्यत्र मत्तेति द्वन्द्वसमासे सप्तविधाः। पूर्वन्यायेनेति 'न हंसी'ति पूर्वश्लोकोक्तन्यायेनेत्यर्थः। साधारणानामिति देवानाम्। महतामिति वाय्वग्निवरुणादीनाम्। विबुधा इति विशेषेण परितो बुधाः। बुध ज्ञाने। 'इगुपधज्ञाप्रियकिरः क' इति सूत्रेण कः। वाचनिकमिति मानसिकमपि बोध्यम्। 'यन् मनसा ध्यायति तद्वाचा वदती'तिश्रुतेः। यस्त्वेकान्त इति 'रहोजुपे'त्यत्र 'रहः'पदार्थः। 'जुपे'त्यस्यार्थमाहुः तदेकपर इति। एवं रहोजुपा सह वर्तमानेन हरिणेत्यर्थः। रहोजुपा हरिणेतिपक्षेर्थमाहुः हरिरपीति। रहस्करं जुपतीत्यर्थः। पक्षान्तर इति अप्रयोजकत्वपक्षे स्त्रीतुल्यता प्रयोजकता। हर्यक्षरयोर्महानारायणे पर्यायता स्तूयते। 'तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः स हरिः सेन्द्रः सोक्षर' इति। अतः स्त्रीतुल्यता। 'मम योनिर्महद् ब्रह्म तस्मिन् गर्भं दधाम्यह'मिति गीता। द्वितीयव्युत्पत्त्याहुः सर्वदुःखेति। निरूपित इति 'रहोजुपे'तिपदेन निरूपितः। असमत्त्वादिति वैराग्यातिशयेपि त्रिपुरान्तकत्वेनासमत्वात्। अत्र शत्रूणामल्पता कारिकोक्तोक्ता। शत्रूणामल्पता शौर्ये बोध्या। विशेष्यविशेषभेदेनाभासोक्तं चतुष्टम्। विशिष्टं शुद्धान्नातिरिच्यत इति हरिः सात्त्विकः। नीलमुत्पलमितिवद् विशेषणस्य व्यावर्तकत्वे राजससात्त्विकः। द्वौ भेदौ। विशिष्टं शुद्धान्नातिरिच्यत इति शम्भुः तामसः। नीलमुत्पलमितिवद् विशेषणस्य व्यावर्तकत्वे सात्त्विकतामसः। 'वने तु सात्त्विको वास' इतिवाक्यात्। एवं चत्वारः। सार्धश्लोकाभासो वा। तेन हरिशम्भिवन्द्रब्रह्माणश्चत्वारः।

१०–४–३७. किमिन्द्रेणेत्यत्र 'ब्रह्म जानाति ब्राह्मण' इति विग्रहः गोपालतापिनीये प्रसिद्धः। तपस्वीति द्वितीयस्कन्धनवमाध्याये 'अतप्यत साखिललोकतापनं तप' इति वाक्यात्। 'अतप्यते'ति तप ऐश्वर्ये इत्यस्य रूपं लङि। अयं० दिवा० आत्म० अनि० तप इति तप सन्तापे भ्वा० प० अ० तस्य रूपम्। तथा च तपोनिष्ठैश्वर्यानुकूलभूतव्यापारवानिति ब्रह्मविशेषणम्। राजनीतीति कारिकोक्तः पष्ठो धर्मः कंसस्य। कश्यपेति 'पश्यकः कश्यप' इत्यारण्यकेस्ति। तस्य दायं भागमदन्ति ते कश्यपदायादाः। 'वयं मन्मह' इत्यनेनान्येपामपि ज्ञानं व्यज्यते तदाहुः अयमर्थ इति।

१०–४–३८. तत इत्यत्र योगेन रूढ्या चेति अनुव्रतं येपामिति योगः, भृत्ये

१ 'इगुपधज्ञाप्रीकिर क' इतिमुद्रितपाणिनीसूत्रपाठ।

१०–४–३०. आकर्ण्य भर्त्रित्यत्र तेषामिति 'यथे'त्यादिनोक्तानां नातिकोविदानां दैतेयानाम्। अतिकोविदास्तु 'विवेकस्तु हरिः सर्वं निजेच्छातः करिष्यती'त्याचार्योक्तविवेकवन्तः। देवद्वेषेत्यादिना 'देवान् प्रति कृतामर्षा' इत्यस्यार्थस्यानुवादः। अतः सुबोधिन्यामुत्तरार्धं न व्याख्यातम्।

१०–४–३१. एवं चेदित्यत्र भविष्यतीति इतिर्निश्चयसमाप्तौ। तरतमेति पृ-पालनपूरणयोः। पचाद्यचि गुणः। पालयति विष्णुः सात्त्विक इति पुरस्थाः सात्त्विकाः। पुर अग्रगतौ वा। तु० प० से०। ग्रामस्थास्तामसाः। ग्रस अदने। ग्रसेरा चेति मन् आत्वम्। व्रजस्था राजसाः व्रजतीति व्रज इति कर्मप्रधानत्वात्। अतिक्रान्तेति अतिक्रान्तानि दशाहानि यैरिति विग्रहः। समासान्तः। विशेषाकारेण स्त्रीपुंविशेषाकारेणेत्यर्थः। दैत्यग्रहेष्विति उग्रग्रहेषु दैत्यसम्बन्धिष्वपि। हन्तव्या इति निश्चयाकारः। अन्यैरपीति त्वदीयैरिति ज्ञेयम्। न वदेदिति यदुक्तं योगमायया तन्न वदेत् मन्त्रिभ्य इत्यर्थः।

१०–४–३२. किमुद्यमैरित्यत्र स्वकृत्यमिति दैत्यकृत्यम्। तस्येति कंसस्य। तं-कंसम्। तवेति भयात् प्राप्तजीवन्मुक्तिकस्य। सामर्थ्यं चेति राज्ञो जीवन्मुक्तस्यैश्वर्यादि-षड्गुणा अनाविष्टस्यैते। दीनत्वं यद्यपि तृतीयश्लोके भीतेषु तथापि 'यथा राजा तथा प्रजे'तिवाक्यात् कंसे राज्ञि कारिकोक्तं सामर्थ्यमुक्तम्।

१०–४–३३. अस्यत इत्यत्र हन्यमान इति हननमत्र हन्यमाननिष्ठम्। तच्चेत् प्राणवियोगानुकूलव्यापारवद् भवेत् 'समन्तत' इत्याद्यग्रेतनश्लोकविरोध इति तदनुरोधेन हन्यमानपदार्थमाहुः संछिन्नेति। तथा च हन्यमाना इत्यत्र न हि सार्थकहन्तेः प्रयोगः प्राणवियोगाभावात्। किन्तु हन्यमाना अस्त्रैर्गम्यमानाः सर्वाङ्गेष्विति गत्यर्थकहन्तेः प्रयोगः चेति प्राणवियोगमिति चकारार्थः। 'जिजीविषव' इतिपदेन द्योत्यते। 'ययु'रित्यत्र कर्म किमित्याकाङ्क्षा तु देशस्याविवक्षणाद् यं कमपि देशमिति पूरणीया। कारिकोक्तजय उक्तः।

१०–४–३४. केचिदित्यत्र अन्तःकरणस्य त्याग इति युद्धे तथा जाते दयावता त्वया न हन्यते। 'भयसन्नता'निति वक्ष्यमाणवाक्यात्। अन्तःकरणस्य अवस्था प्रदर्शितेत्यन्वयो वा। युद्धत्यागे सति न हन्यत इति च। यद्वा त्यागे सति न हन्यत इति शास्त्रपरिपालनाय न्यस्तशस्त्रा इति। स्वधर्मेति युद्धत्यागे। स्वर्ग इत्यात्मसुखकम्। कार्यकारणभावात्। स्वर्गभोग इति स्वधर्मफलमित्यर्थः। केषाञ्चिदिति बोध्यम्। साधनतरतमभावात्। देवा इति स्वर्गक्रीडावन्तः। दिवु क्रीडाविजिगीषेति धातुपाठात्। येषामिति सुमनसाम्। परमापदाविति परमपदा औ इति छेदः। औ अव्ययमम्बुध्यर्थकम्। परमापदा औ अम्बुधिः तस्मिन्। तेषां धर्माणां शास्त्रे उक्तं विकल्पमुक्तवानित्यर्थः। एवं परमापदौ विकल्पं तेषामुक्तमिति पाठेर्थ उक्तः। परमापदा वैकल्यं

लेपामुक्तमिति पाठेर्थः सुगमः। केचिदिति पुनरुक्तेरभिप्रायमाहुः येषां पुनरिति। कारिकोक्तं दीनत्वमुक्तम्। 'यथा राजा तथा प्रजा' इति प्रजानिष्ठम्।

१०-४-३५.न त्वमित्यत्र वचनेपीति 'प्रपन्नं चिरथं भीतं न रिपुं हन्ति धर्मवि'दिति वचने 'भीताः से'ति वचने वा। विमुखाश्चेति कर्मधारयः। चकारः समुच्चयार्थकः। द्वन्द्वेनाहुः उभयेति। तथा चान्यासक्ताः विमुखाश्चेति विग्रहः। अत्र श्लोके कारिकोक्तदयोक्ता।

१०-४-३६. किं क्षेमशूरैरित्यत्र सप्तेति द्वन्द्वसमासे सप्तविधाः। पूर्वन्यायेनेति 'न हंसी'ति पूर्वश्लोकोक्तन्यायेनेत्यर्थः। साधारणानामिति देवानाम्। महतामिति वाग्न्यग्निवरुणादीनाम्। विबुधा इति विशेषेण परितो बुधाः। बुध ज्ञाने। 'इगुपधज्ञाप्रियकिरः क'[1] इति सूत्रेण कः। वाचनिकमिति मानसिकमपि बोध्यम्। 'यन् मनसा ध्यायति तद्वाचा वदती'तिश्रुतेः। यस्त्वेकान्त इति 'रहोजुपे'त्यत्र 'रहः'पदार्थः। 'जुपे'त्यस्यार्थमाहुः तदेकपर इति। एवं रहोजुपा सह वर्तमानेन हरिणेत्यर्थः। रहोजुपा हरिणेतिपक्षेर्थमाहुः हरिरपीति। रहस्करं जुपतीत्यर्थः। पक्षान्तर इति अप्रयोजकत्वपक्षे स्त्रीतुल्यता प्रयोजकता। हर्यक्षरयोर्महानारायणे पर्यायता स्तूयते। 'तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः स हरिः सेन्द्रः सोक्षर' इति। अतः स्त्रीतुल्यता। 'मम योनिर्महद् ब्रह्म तस्मिन् गर्भं दधाम्यह'मिति गीता। द्वितीयव्युत्परयाहुः सर्वदुःखेति। निरूपित इति 'रहोजुपे'तिपदेन निरूपितः। असमत्वादिति वैराग्यातिशयेपि त्रिपुरान्तकत्वेनासमत्वात्। अत्र शत्रूणामल्पता कारिकोक्तोक्ता। शत्रूणामल्पता शौर्ये बोध्या। विशेष्यविशेषभेदेनाभासोक्तं चतुष्टम्। विशिष्टं शुद्धान्नातिरिच्यत इति हरिः सात्त्विकः। नीलमुत्पलमितिवद् विशेषणस्य व्यावर्तकत्वे राजससात्त्विकः। द्वौ भेदौ। विशिष्टं शुद्धान्नातिरिच्यत इति शम्भुः तामसः। नीलमुत्पलमितिवद् विशेषणस्य व्यावर्तकत्वे सात्त्विकतामसः। 'वने तु सात्त्विको वास' इतिवाक्यात्। एवं चत्वारः। सार्धश्लोकाभासो वा। तेन हरिशम्भिवन्द्रब्रह्माणश्चत्वारः।

१०-४-३७.किमिन्द्रेणेत्यत्र 'ब्रह्म जानाति ब्राह्मण' इति विग्रहः गोपालतापिनीये प्रसिद्धः। तपस्वीति द्वितीयस्कन्धनवमाध्याये 'अतप्यत साखिललोकतापनं तप' इति वाक्यात्। 'अतप्यते'ति तप ऐश्वर्ये इत्यस्य रूपं लङि। अयं० दिवा० आत्म० अनि० तप इति तप सन्तापे भ्वा० प० अ० तस्य रूपम्। तथा च तपोनिष्ठैश्वर्यानुकूलभूतव्यापारवानिति ब्रह्मविशेषणम्। राजनीतीति कारिकोक्तः षष्ठो धर्मः कंसस्य। कश्यपेति 'पश्यकः कश्यप' इत्यारण्यकेस्ति। तस्य दाम्रं भागमदन्ति ते कश्यपदायादाः। 'वयं मन्मह' इत्यनेनान्येषामपि ज्ञानं व्यज्यते तदाहुः अयमर्थ इति।

१०-४-३८. तत इत्यत्र योगेन रूढ्या चेति अनुवृत्तं येषामिति योगः, भृत्ये

१ 'इगुपधज्ञाप्रीकिर. क' इतिमुद्रितपाणिनीसूत्रपाठ।

रूढिः। अग्र इति 'मूलं विष्णु'रितिश्लोके। मध्य इति 'तस्मा'दितिश्लोके दैत्यमतिदैत्यकृत्योर्मध्ये।

१०-४-३९. यथामय इत्यत्र उपेक्षायामिति 'उपेक्ष्या' इति पूर्वश्लोकोक्तायाम्। मारणीया इति सापत्न्याः। सर्वनाशेति आत्ममात्रद्वेपित्वे सति कुलद्वेपित्वात्। षडङ्गनाशकत्वमाहुः इन्द्रियैर्विषयेति। 'इन्द्रियैर्विषयाकृष्टैराक्षिप्तं ध्यायतां मनः। चेतनां हरते बुद्धेः स्तम्बस्तोयमिव ह्रदा'दितिवाक्यम्। चालयितुमपीति सापत्न्या इतोन्यत्र गच्छन्त्विति चालयितुमपिना मारयितुं जेतुं वा।

१०-४-४०. मूलं विष्णुरित्यत्र स त्विति यागादिः। 'यथेन्द्राय स्वाहे'ति। इन्द्रमुद्दिश्य हविस्त्यागः। यज्ञो देवानां मूलमिति यज्ञस्य विष्णोः कार्यं पालनं भक्ष्यं मूलम्। पालनमित्यत्र करणे ल्युट्। मूलशब्दो विष्णौ तत्कार्ये चोक्तः। स चेति स च यज्ञः। 'यज्ञो वै विष्णु'रिति आधिदैविकाध्यात्मिकयोरभेदान्वयः 'तच्चक्षुर्देवहित'मिति श्रुत्यन्तरे यथा। पञ्चात्मकत्वं वक्तुमधिष्ठानकारणं वदत एव धर्मद्वैविध्यमाहुरित्याहुः न केवलमिति। आवृत्तेः फलं लौकिकदेवानां लौकिकधर्मो वैदिकदेवानां वैदिको धर्मः। अधिष्ठानकारणत्वं च। प्रभुरित्याधिदैविकः। 'मूल'माधार इत्युक्तम्। तस्मादिति धर्मद्वैविध्यादधिष्ठानकारणत्वाच्च। लौकिकेति लौकिकदेवा अक्षरमूलाः। वैदिकदेवाः शब्दमूलाः। 'शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्या'मितिसूत्रात्। मूलमधिष्ठानम्। तस्यापीति विष्णोः, अपिना तत्कार्यस्य पालनस्य यागस्य (भक्ष्यस्य)। मूलमाहेति विष्णोर्द्रव्यदेवतयोर्यागरूपयोश्च मूलमाधारमाहेत्यर्थः। ब्रह्म वेद इति वेदो देवानां मूलम्। 'शब्द इति चेन्नातः प्रभवा'दितिव्याससूत्रात्। विष्णोर्मूलं कारणमपि वेदः। शब्दार्थयोरौत्पत्तिकसम्बन्धात्। 'औत्पत्तिकं नित्यं ब्रूम' इति शाबरभाष्यात्। विष्णुकार्ययाग(भक्ष्य)रूपपालनाधारौ 'गावो विप्राश्चे'त्युक्तौ। गोषु हविर्द्रव्यम्। विप्रेषु मन्त्राः 'मन्त्रमयी देवते'ति भाट्टदीपिकायाम्। तपोधिकारः। यज्ञाः साधनानि। परं सदक्षिणाः। एवं षड्गुणो यज्ञ उक्तः। तमाहुः प्रमाणं वेद इति। एकत्रेति गोषु। एकत्रेति विप्रेषु। भार्येति चतुर्थस्कन्धेस्ति। अनेनेति दक्षिणाया भार्यात्वनिरूपणेन गृहस्थाश्रमत्वसूचनेन। तस्येति यज्ञस्य। गृहस्थाधिकारात्। पक्षान्तरमाहुः पञ्चात्मको चेति। 'अधिष्ठानं तथा कर्ता करणं च पृथग्विधम्। विविधाश्च पृथक् चेष्टा दैवं चैवात्र पञ्चमम्। शरीरवाङ्मनोभिर्यः कर्म प्रारभते नरः। न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः। तत्रैवं सति कर्तारमात्मानं केवलं तु यः। पश्यत्यकृतबुद्धित्वान् न स पश्यति दुर्मति'रिति। प्रकारान्तरेण द्वयमेव मूलमित्याहुः अनेनेति। मूलनिरूपकवाक्येनेत्यर्थः। द्वयं किमित्युक्ते 'ब्राह्मणा गावश्चे'त्युत्तरश्लोकाभासोक्तमनुपपद्यते।

१. 'यत्र' इतिमुद्रितगीतापाठ.

१०-४-४१. तस्मादित्यत्र ब्राह्मणा गावश्चेति एतयोः पूर्वान्वय उक्तः। तत्रेति उभयोर्मध्येत्र श्लोके गावो दुहन्त्यो ग्राह्याः 'हविर्दुघा' इति विशेषणात्। प्रातिलोम्यक्रमेण। यज्ञकर्तारो मूले 'दानशील'पदेनोक्ताः। यजेर्दानार्थस्य ग्रहणात्। नञ्। तपस्विन इति स्पष्टम्। अधिकारार्थत्वात्। ब्रह्मवादिनो वेदान्तविदः। वेदविदो 'ब्राह्मणा गाव'श्चेत्यत्र पूर्वमुक्ताः। विशेषणस्य व्यावर्तकत्वात्। खननमिति तेषां दर्शनाद्धन्म इत्यनेन खननं विखनःसृष्टित्वात्। खननमासुरभावत्याजनेन शुद्ध्या स्वकर्मयोग्यतासम्पादकं निराकरणम्। खन अवदारणे भ्वा० उ० से० सम्पादकमित्यन्तं अवोपसर्गार्थः क्रियारूपः। दारणं दृङ् अनादरे तु० आ० अ० इत्यस्य रूपं तस्यार्थो निराकरणम्। 'कामक्रोधादयो दैत्या' इति कृष्णोपनिषदः नित्यक्रीडास्थाः पूतनादयो बाहिर्मुख्येन्तर्दृष्टिसम्पादकाः। विखनसा कृतं वैखानसं मतम्। विखनःसृष्टिकृतमन्तर्दृष्टिसम्पादनं मतम्। 'दैतेया मातिकोविदा' इति वाक्यात्। वेदवेदार्थविद इति ब्रह्मणोर्वादिनो ब्रह्मवादिन इति षष्ठीतत्पुरुषे वेदो ब्रह्म न च वेदादृते किञ्चिच्छास्त्रं ब्रह्माभिधायकमिति कौर्म्यात् ब्रह्मार्थं इति तथोक्ताः। वेदशब्देन वेदान्ता वा। उभयमिति कर्मज्ञानात्मकमिति लेखेर्थः। ब्रह्म कुर्वन्तीत्यर्थः। 'तमेव धीरो विज्ञाय प्रज्ञां कुर्वन्ति ब्राह्मणा'[1] इति बृहदारण्यकात्। ज्ञानात्मकं ब्रह्म कुर्वन्ति। 'प्रज्ञा' भावना वा। भावना ज्ञानं स्मरणं कर्म च, भू सत्तायाम्। क्रियावाचिनो भ्वादय इति च। उभयविधं च कुर्वन्तीति पाठः। यज्ञशीलाः। दानशीलानित्यत्रार्थत्रयमुपलक्षणीयमित्यर्थः। लटीति 'वर्तमानसामीप्ये वर्तमानवद्वे'तिसूत्रात् मन्त्रकरणसमीप एव ब्राह्मणादिनिराकरणज्ञापनार्थो 'हन्म' इति प्रयोग इति भावः।

१०-४-४२. विप्रा गाव इत्यत्र साक्षादिति साक्षाद्विष्णुनिराकरणाय तनुद्वारा। अन्यस्य साक्षात्त्वेपि निराकरणाविषयत्वात्। अन्यान्यप्यन्नानीति गोनिष्ठपयसोन्यानि हविःसाधनानि व्रीहियवादीनि उपलक्षणविधया। 'विप्रा गाव' इत्याभ्यां द्रव्यदेवात्मकयागाधारावुक्तौ। तत्प्रतिपादका वेदाः। अङ्गानि शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति षट्। वेदप्रतिपाद्यधर्मानाहुः तपः सत्यमित्यादि। क्रमेणाश्रमधर्माः कायिकवाचिकैन्द्रियकमानसधर्मा अप्येत इत्याहुः तपः शारीर इत्यादि। सर्वत्रेति आश्रमधर्मेषु। मूलोक्ततनुपदसामर्थ्यादाहुः एवं दशेति। अवतरणं तनुषु हरेरवतारः। विप्रो वामनः गौः पृथिव्याधिदैविकी गन्धरूपापीति नासाग्रविवरप्राणरूपवराहेपि। सत्यं नवमोपदेशरूप कृष्णः। दया बुध इत्येवं वा ज्ञेयम्। सङ्ख्यातात्पर्यं जन्मप्रकरणत्वात् सा। 'ब्रह्मवादिन' इत्यत्र वेदवेदान्तयोर्ब्रह्मपदेनोक्तत्वाद् वेदान्त उक्त्वा वेद आहुः क्रतव इति। ज्योतिष्टोमादय इति आदिना कारीर्यादयः। सर्वदुःखेति हरेरित्यस्यार्थः। प्रयत्न इति साङ्ख्योक्त

१. 'कुर्वीत ब्राह्मण.' इतिमुद्रितोपनिषत्पाठः।

प्रणिधानम्। उभयविधं च कुर्वन्तीत्युक्तं कर्म। प्रतिष्ठितः पर्यवसितः दैत्यानां वा विष्णौ प्रयत्नः प्रतिष्ठितः।

१०–४–४३. स हीत्यत्र उपसंहरन्निति दैत्यमन्त्रणम्। तस्येति विष्णोः। पूर्वोक्तेति मूलन्यायेन 'मूलं विष्णुर्हि देवाना'मितिश्लोकोक्तेन। सहभाव इति असुरैः सहभावो देवानाम्। एवकारोसुरसहभावयोगं व्यवच्छिनत्ति न त्वसुरसहभाववान्। न शक्यत इति सहभावे कदाचिद्धननशक्तिः तदभावान् न शक्यते विष्णुः सत्त्वोपाधिर्न गुहाशय इत्यत आहुः गुह इति। गुह संवरणे भावप्रत्ययः। गुपू रक्षणे भावे क्तः। रक्षणे गुहायां सत्त्वगुणे शेत इति। गुहा हृदयाकाश इत्यत्र हृदयमात्रे वा सात्त्विके हृदि। अवगणनेति इन्द्रपराधीनत्वात् तथा। अयमित्यत्र एवेति साक्षात्प्रतीकारयोगव्यवच्छेदक एवकारः असुरद्विट्त्वात् गुहाशयत्वाच्च। ऋषीति ऋषयो मन्त्रद्रष्टारः। सर्वे इति मन्त्रैः सर्वे धर्मा इति तथा।

१०–४–४४. एवमित्यत्र तेषामिति दैत्यानाम्। कृतवानिति कंसः। हितत्वेनेति मेने। पर्यवेति यद्ययं कंसः स्वमरणे निरभिमानस्तिष्ठेदक्लिष्टकर्मा भगवान् न तं मारयेदतः साभिमानपर्यवसाने दोषः कंसमारणं तस्य दर्शनस्याभावात्। जात इति ब्राह्मणरक्षकत्वस्वभावतिरोभावात्। दुर्मतित्वमुत्पन्नम्। तत्रापीति दुःसङ्गेपि। मन्त्रित्वेन गृहीत इति मन्त्रित्वेन गृहीतो मन्त्री दुष्टश्चेत् तदा तस्य सङ्गो दुःसङ्गः बाधकः। यदा तु दुष्टत्वेन गृहीतो मन्त्री तदा तत्सङ्गस्तथा न बाधक इत्यर्थः। मित्रत्वेनेति पाठेपि तथैवार्थः। अत एवेति दुष्टस्य मन्त्रित्वेन ग्रहणादेव न तु दुष्टत्वेनेत्यर्थः। भाव इति ब्राह्मणरक्षकत्वरूपः। अन्यथेति दुर्मतित्वेन परिणतः। आपद्ग्रस्त इति 'कालपाश' आपत्। 'आवृतो' ग्रस्तः। तत्रापीति कालपाशेपि अथवा आपद्ग्रस्तत्वेपि। 'काल' आकाशवाणी शब्दभयं, 'पाशो' दुर्मन्त्रिणः।

१०–४–४५. सन्दिश्येति कदनेति कदनमन्यायपीडितम्। स्वविषय इति स्वदेशेन्यदेशे च। स्वविशय इति तालव्यमध्यपाठे तु कंससंशय इत्यर्थः। प्रवेशनमिति प्रवेश उक्तः।

१०–४–४६. ते वै रज इत्यत्र द्विषन्त्येवेत्यत्यन्तायोगव्यवच्छेदकैवकारः सात्त्विकविद्वेषसम्भावनायै। चेरुः कृतवन्त इति चर गतिभक्षणयोरस्य प्रकृत्यर्थः। 'विद्वेष'पदेनोक्त इति व्यापारमात्रार्थ उक्तः, कृतवन्त इत्यनेन। अनेनेति अनेन श्लोकेन। तेषां दुर्मन्त्रिणां स्वरूपतोन्तःकरणनाशात् अन्तःकरणं हि वैकारिककार्यत्वाज् ज्ञानजनकत्वाच्च स्वरूपतः सात्त्विकम्। तत्स्वरूपनाशश्च रजोरूपत्वे संशयेऽज्ञानस्यापि निवेशात्। तस्य धर्मो ज्ञानं तमसा ज्ञानमात्रनाशाद्धर्मतश्च नाश इति उपद्रवं कृतवन्त इत्युक्तं भवतीत्यर्थः। मृत्युग्रस्ता इति 'नैवेह किञ्चनाग्र आसीत् मृत्युनैवावृतमासी'दिति बृहदारण्यकात्।

१०-४-४७. आयुः श्रियमित्यत्र विकल इति कलावतां कृष्णादिद्रोहासम्भवाद् विकलः। सर्वनाशार्थमिति सर्वदैत्यनाशार्थम्। महदतिक्रमस्येति सतां विद्वेषकृतमहदतिक्रमस्येत्यर्थः। महदतिक्रमत्वेनायुरादिहतित्वेन कार्यकारणभाव उक्तः। जीवा मुक्ता जीवन्मुक्ताः साधारणाश्च, तत्र मुक्तानां जीवानां भगवद्गुणाः स्पष्टाः। जीवन्मुक्तगुणाः कंसस्य 'सामर्थ्यं च जयश्चैव दीनत्वं च दया तथा। शत्रूणामल्पता चैव राजनीतिस्तथैव चे'तिकारिकया 'किमुद्यमै'रितिश्लोके पूर्वमुक्ताः। साधारणानां जीवानामाहुः जीवानामिति। उत्तमा इति आत्ममाययार्थसम्बन्धो जीवस्य द्वितीयस्य नवमाध्याय उक्तः। षड् मायागुणा निकृष्टाः उक्ता मध्यमाः। एते उत्तमा इत्यर्थः। जीवन्मुक्तगुणसादृश्यात्। अकृतार्थ इति न कृतः ऐहिकः आमुष्मिकः अर्थः प्रयोजनं येन स तथोक्तः। अन्तरङ्ग इति यशसो हि श्र्यपेक्षा। धर्मस्य श्र्यपेक्षा। सन्तापात्मकार्त्यधिकारमत्त्वादधनिकस्यापि धर्मसिद्धेः स्वल्पापेक्षत्वलक्षणमन्तरङ्गत्वं वर्तत एव। पुत्रादय इति आदिशब्देन स्त्रीधनकर्माणि। पूर्णत्वं पञ्चानां सत्त्वे भवति। बृहदारण्यकात्। पूर्णत्वं प्रपञ्चस्य 'पूर्णमदः पूर्णमिद'मितिश्रुतेः। नन्वन्धंतमःप्रवेशे मुक्तौ मायिकायुरादिपञ्चहतिः प्रकृते इष्टैवेति दैत्यचेष्टितमिष्टमेवेति चेत् तत्राहुः एवकारेणेति। षड्गुणेषु प्रविष्टाप्याशीराशिष्ट्वेन पञ्चातिरिक्ताशिषं गृह्णानायुरादिनिष्ठाशीष्ट्वं न जहाति। 'आशिष एवे'त्यस्याशिषः द्वितीयाबहुवचनान्तं,'एव' समान्, एवकारः साम्यार्थकः। सन्निहितत्वादाशीष्ट्वेन व्यापकधर्मेण समा सर्वानित्यर्थः। नाशयतीति महदतिक्रमः नाशयति। नन्वेवं गौरवेण व्याख्यानस्य किं प्रयोजनमिति चेत् तत्राहुः अन्यथेति। तस्येत्यनधिकारिणः। चेष्टितमिति दैत्यादिभिश्चेष्टितम्। किं कुर्यादिति किमनिष्टं कुर्यात्। गणिता इति षड्गुणाः। स्वतन्त्रस्येति अतिक्रमकर्तुः। 'स्वतन्त्रः कर्ते'त्यनुशासनात्। न विशेषेण भगवत्सम्बन्धेन महान् किन्तु भगवदीयत्वमात्रम्। तस्य। भगवत्सम्बन्धादिति आराग्रेति जीवस्य। 'तथा तृतीये प्रद्युम्नश्चतुर्थे तुर्य ईर्यते। न निबद्धो यतः कैश्चिदतः सर्वे विमोचिताः। धर्मरक्षार्थहेतूक्त्यै धर्मबाधश्च वर्ण्यते' इति चतुर्थाध्यायार्थ उक्तस्तमाहुः एवं भगवदिति। एवं प्रकारेण यन् मायाकार्यं सर्वदुःखात्मकं निरूपितं तद् भगवतोनिरुद्धस्य यच्चरित्रं सर्वधर्मरक्षारूपम्, तत्सिद्ध्यर्थं हेतुत्वेन निरूपितमित्यर्थः। तथा च सर्वविमोचनधर्मबाधश्च यत्राग्रे कृतः सोनिरुद्धांश इति भावः।

इति श्रीमद्वल्लभचरणैकतानश्रीगोपेश्वरविरचितायां शास्त्ररीत्या बुभुत्सुबोधिकायां चतुर्थाध्यायव्याख्यानम्। जन्मप्रकरणं समाप्तम्।

जन्मप्रकरणोपरि अमुद्रितस्वतन्त्रलेखाः ।

श्रीहरिः । नम इति श्रीकृष्णस्य यत्पादाब्जे तयोस्तले तत्र यद्रंजिते कुंकुमपङ्के तयोः रुचे नमः । श्रीकृष्णपदेन भक्तसहितलीलारमाविष्टत्वं सूचितम् । तादृशस्य चरणयोरब्जत्वोक्त्या लीलायां परस्परसंबंधेन उभयोस्तापहारकत्वं सुखदत्वं च ज्ञापितम् । किञ्च । अब्जं विकसितं भवति । अत्रापि तत्तद्भर्षादिषु तत् तथैव भवति । अब्जे अरुणत्वं भवति, तदत्र सहजमपि विशेषतः कुंकुमपंकेन तादृशम् । पद्मिनीनां तलमप्यारक्तं भवति । शृंगारादिषु कुंकुमपङ्केन रंजितमपि क्रियते । अत एव रुचे नम इत्युक्तम्, न तु पंकाय तदभावादिति । तत्कान्तेः सर्वोत्कृष्टत्वज्ञापनाय नमनमेवोक्तम् । तदेवाहुः यदरुणमिति । मदीयं हृदयाम्बुजं यतः संबंधेन शश्वदारक्तं जातम्, निरंतरं तत्कान्तेः स्थित्या तदात्मकतया तादृशमेव जातमिति भावः । यद्वा, अत्र प्रभुचरणसरोजतलसंबंधिकुंकुमपङ्कमुक्तम् । तन्नायिकानामेव संभवति, न तु नायकस्येति कथमुपपद्यत इति चेत्, तत्रोच्यते । श्रीकृष्णपदेन गूढभावात्मकत्वम्, तेन तद्भावात्मकस्य विरचितप्रियावेषोचितसकलशृंगारस्य प्रभोश्चरणतलमपि तेन रंजितं क्रियत इति तत् स्मृत्वा तथोक्तम् । प्रियायास्तु पूर्वं तादृशमेवेत्युभयोश्चरणतलस्यारुणत्वमुक्तम् । अत एव पङ्कयोरिति द्विवचनं चोक्तम् । अन्यथा पङ्कस्यैकरूपत्वात् कथमेवं वदेयुः । तयो रुचे नम इति । तत्तलशोभां दृष्ट्वा प्रणयभरेणात्यातुरतया रसेन नमनम्, अन्यथा चरणं विहाय रुचे नम इति कथमुक्तं स्यात् । किञ्च । यत्संबंधेन मामकं हृदयांबुजं सततमरुणं जातम् । रसात्मकतत्संबंधेन हृदयमपि तल्लीलारसात्मकं जातम् । तादृशलीलासमये प्रियासहितप्रभुचरणतलं स्वकरतलेन यदा लालितं क्रियते, तदा तच्छोभादर्शनेन परमरसावेशेन तदात्मकतया तच्चरणतलं हृदये स्थाप्यते । तदा तदा तद्धृदयं पूर्वमपि अंबुजत्वेन सरसं तथापि तदानींतनप्रचुरभावेनांतर्लीलारसभरेण पुष्टं विशेषतो जातमिति तथोक्तम् । अत एव तादृग्लीलाविवरणमभूत् । सर्वदा तल्लीलात्मकमेव तिष्ठतीति शश्वदित्युक्तम् । किञ्च । यथा रविसम्बन्धेन कमलं विकसितं भवति, तदा तदरुणकान्तिसम्बन्धेनैतद्धृदयांबुजमपि विकसितं पुनस्तस्य तद्रसात्मकतया तद्रूपत्वमेव जातमिति तथोक्तम् । किञ्च, यथा प्रियमिलने तदात्मकतया प्रियरूपत्वं भवति, तथा तलस्यारुणत्वे तत्सम्बन्धेन हृदयस्याप्यरुणत्वं युक्तमित्यारक्तादिपदानि विहायारुणपदोपादानादवगम्यते ॥ इति टिप्पण्याः प्रथमश्लोकस्य केषांचिद्व्याख्यानम् ॥

श्रीगोपीजनवल्लभाय नमः। टिप्पण्याम्। तेन लोके सत्यं व्रतं चेत्यारभ्य धर्मी चेति षोडशधेत्यन्ते ग्रन्थे सत्यं विव्रीयते। लोके सत्यवचनम्। व्रतमेकादश्याद्युपोषणादिरूपम्। लोके लौकिकं नियामकं सत्यं तप्ततैलादौ शपथरूपम्। वैदिकं द्वादशविधम्। भगवतो व्रतानि 'कौंतेय प्रतिजानीहि न मे भक्तः प्रणश्यति' 'द्विः शर'मित्यादिना निरूपितानि। लोकानुसारेण देवहितकारिणो नियामकं भगवतो भगवद्वचनसत्यत्वम्। भूरादित्रयं, कायादित्रयम्। इदमष्टविधं सत्यम्। लोके व्रतं शपथरूपं च सत्यमुक्तद्वादशविधं वैदिकं चेति द्विविधम्। लोके सत्यवचनम्, व्रतमेकादश्यादि, तप्ततैलादौ शपथरूपं सत्यं चेदं त्रयं लौकिकत्वेनैकविधमुक्तद्वादशविधं वैदिकत्वेनैकविधमिदं द्विविधं इदं त्रिविधमपि व्रतत्वेनैकम्। शपथस्य नियामकत्वेनान्येषामुत्कृष्टत्वेन च परत्वात्। भगवतो व्रतं नियामकं भगवद्वचनसत्यत्व चेति द्विविधम्। भगवद्धर्मत्वेनैकम्। भूरादयः फलरूपाः। कायादयः साधनानि। भूरादीनां फलत्वेन कायादीनां साधनत्वेन चैक्यम्। इदं चतुर्विधं सत्यम्। प्रमाणादिचतूरूपं सत्यम्। तत्र प्रमाणरूपं सत्यं वेदो भगवद्धर्माः। प्रमेयरूपसत्यं सत्यस्य कारणरूपो भगवान्। साधनरूपं सत्यं सत्ये स्थितः सत्यरक्षको भगवान्। फलरूपं सत्यं सत्यस्य लयस्थानमाधिदैविकसत्यरूपो भगवान्। भगवति प्रतिष्ठित वस्तु सत्यं चैतदुभयं फलितसत्यत्वेन पंचमं सत्यम्। इदं पंचविधं सत्यम्। सत्यत्वेन परत्वेन साधनत्वेन ऐहिकफलमूलत्वात् फलत्वेन रमणाधिकरणत्वेनेतिप्रकारैः पंचविधं सत्यं वेदे निरूपितम्। तदष्टविध एव प्रविशति। पूर्वोक्तमष्टविधं प्रमाणादिरूपं पंचविधं चेति त्रयोदशधा। इदं त्रयोदशधा ज्ञानशक्तिद्वयं वेदो भगवद्धर्माश्च धर्मी चेति षोडशधा। वेदभगवद्धर्माणां प्रमापकत्वात् प्रमाणत्वोपाधिना क्रियाशक्तिरूपपंचविधसत्यमध्ये प्रवेशेपि द्रुतं भगवत्साक्षात्कारसाधकत्वेन तद्ज्ञानशक्तित्वेनापि निरूपणं न दोषाय, सर्वत्रोपाधिभेदेन भेदात्। इति सत्यविवरणम्॥ १०–२–२६.

अचेतनकपाटादिबन्धनिवृत्तौ च वसुदेवागमनस्यैव हेतुत्वम्, न तु साक्षाद्भगवतः, वृष्टिभयाद् वस्त्रपिहितत्वात्, परं वसुदेवस्य तथा सामर्थ्ये कृष्णवाहत्वं हेतुरिति ज्ञापयितुं तथा विशेषणम्। अत एव भगवद्रहितस्य तस्यागमने पुनर्मुक्तानां बन्धो भविष्यति। न हि साक्षाद्भगवद्विमुक्तानां पुनर्बन्धो भवितुमर्हति। एवं सति रवेर्दृष्टान्तत्वमुपपद्यते, यतो रवावपि भगवद्रूपमदृश्यमस्तीति ततस्तमोनिवृत्तिः, पुनरागतिश्च दृश्यते। तथा च कैमुतिकन्यायेन उभयत्र भगवन्माहात्म्यमेवेति भावः। निरूपितमित्यनन्तरं प्रभूणां स्वतन्त्रः। १०–३–४९।

जन्मप्रकरणोपरि अन्ये स्वतन्त्रलेखाः वेणुनादमासिकपत्रे मुद्रिताः।

जन्मप्रकरणोपरि अमुद्रितस्वतन्त्रलेखाः ।

श्रीहरिः । नम इति श्रीकृष्णस्य यत्पादाब्जे तयोस्तले तत्र यद्रंजिते कुंकुमपङ्के तयोः रुचे नमः । श्रीकृष्णपदेन भक्तसहितलीलारसाविष्टत्वं सूचितम् । तादृशस्य चरणयोरब्जत्वोक्त्या लीलायां परस्परसंबंधेन उभयोस्तापहारकत्वं सुखदत्वं च ज्ञापितम् । किञ्च । अब्जं विकसितं भवति । अत्रापि तत्तद्वंधादिषु तत् तथैव भवति । अब्जे अरुणत्वं भवति, तदत्र सहजमपि विशेषतः कुंकुमपंकेन तादृशम् । पद्मिनीनां तलमप्यारक्तं भवति । शृंगारादिषु कुंकुमपङ्केन रंजितमपि क्रियते । अत एव रुचे नम इत्युक्तम्, न तु पंकाय तदभावादिति । तत्कान्तेः सर्वोत्कृष्टत्वज्ञापनाय नमनमेवोक्तम् । तदेवाहुः यदरुणमिति । मदीयं हृदयाम्बुजं यतः संबंधेन शश्वदारक्तं जातम्, निरंतरं तत्कान्तेः स्थित्या तदात्मकतया तादृशमेव जातमिति भावः । यद्वा, अत्र प्रभुचरणसरोजतलसंबंधिकुंकुमपङ्कमुक्तम् । तन्नायिकानामेव संभवति, न तु नायकस्येति कथमुपपद्यत इति चेत्, तत्रोच्यते । श्रीकृष्णपदेन गूढभावात्मकत्वम्, तेन तद्भावात्मकस्य विरचितप्रियावेषोचितसकलशृंगारस्य प्रभोश्चरणतलमपि तेन रंजितं क्रियत इति तत् स्मृत्वा तथोक्तम् । प्रियायास्तु पूर्वं तादृशमेवेत्युभयोश्चरणतलस्यारुणत्वमुक्तम् । अत एव पङ्कयोरिति द्विवचनं चोक्तम् । अन्यथा पङ्कस्यैकरूपत्वात् कथमेवं वदेयुः । तयो रुचे नम इति । तत्तलशोभां दृष्ट्वा प्रणयभरेणात्यातुरतया रसेन नमनम्, अन्यथा चरणं विहाय रुचे नम इति कथमुक्तं स्यात् । किञ्च । यत्संबंधेन मामकं हृदयांबुजं सततमरुणं जातम् । रसात्मकतत्संबंधेन हृदयमपि तल्लीलारसात्मकं जातम् । तादृशलीलासमये प्रियासहितप्रभुचरणतलं स्वकरतलेन यदा लालितं क्रियते, तदा तच्छोभादर्शनेन परमरसावेशेन तदात्मकतया तच्चरणतलं हृदये स्थाप्यते । तदा तदा तद्धृदयं पूर्वमपि अंबुजत्वेन सरसं तथापि तदानींतनप्रचुरभावेनांतर्लीलारसभरेण पुष्टं विशेषतो जातमिति तथोक्तम् । अत एव तादृग्लीलाविवरणमभूत् । सर्वदा तल्लीलात्मकमेव तिष्ठतीति शश्वदित्युक्तम् । किञ्च । यथा रविसम्बन्धेन कमलं विकसितं भवति, तदा तदरुणकान्तिसम्बन्धेनैतद्धृदयांबुजमपि विकसितं पुनस्तस्य तद्रसात्मकतया तद्रूपत्वमेव जातमिति तथोक्तम् । किञ्च, यथा प्रियमिलने तदात्मकतया प्रियरूपत्वं भवति, तथा तलस्यारुणत्वे तत्सम्बन्धेन हृदयस्याप्यरुणत्वं युक्तमित्यारक्तादिपदानि विहायारुणपदोपादानादवगम्यते ॥ इति टिप्पण्याः प्रथमश्लोकस्य केषांचिद्व्याख्यानम् ॥

श्रीगोपीजनवल्लभाय नमः। टिप्पण्याम्। तेन लोके सत्यं व्रतं चेत्यारभ्य धर्मी चेति षोडशधेत्यन्ते ग्रन्थे सत्यं विव्रीयते। लोके सत्यवचनम्। व्रतमेकादश्याद्युपोषणादिरूपम्। लोके लौकिकं नियामकं सत्यं तप्ततैलादौ शपथरूपम्। वैदिकं द्वादशविधम्। भगवतो व्रतानि 'कौंतेय प्रतिजानीहि न मे भक्तः प्रणश्यति' 'द्विः शर'मित्यादिना निरूपितानि। लोकानुसारेण देवहितकारिणो नियामकं भगवतो भगवद्वचनसत्यत्वम्। भूरादित्रयं, कायादित्रयम्। इदमष्टविधं सत्यम्। लोके व्रतं शपथरूपं च सत्यमुक्तद्वादशविधं वैदिकं चेति द्विविधम्। लोके सत्यवचनम्, व्रतमेकादश्यादि, तप्ततैलादौ शपथरूपं सत्यं चेदं त्रयं लौकिकत्वेनैकविधमुक्तद्वादशविधं वैदिकत्वेनैकविधमिदं द्विविधं इदं त्रिविधमपि व्रतत्वेनैकम्। शपथस्य नियामकत्वेनान्येषामुत्कृष्टत्वेन च परत्वात्। भगवतो व्रतं नियामकं भगवद्वचनसत्यत्व चेति द्विविधम्। भगवद्धर्मत्वेनैकम्। भूरादयः फलरूपाः। कायादयः साधनानि। भूरादीनां फलत्वेन कायादीनां साधनत्वेन चैक्यम्। इदं चतुर्विधं सत्यम्। प्रमाणादिचतूरूपं सत्यम्। तत्र प्रमाणरूपं सत्यं वेदो भगवद्धर्माः। प्रमेयरूपसत्यं सत्यस्य कारणरूपो भगवान्। साधनरूपं सत्यं सत्ये स्थितः सत्यरक्षको भगवान्। फलरूपं सत्यं सत्यस्य लयस्थानमाधिदैविकसत्यरूपो भगवान्। भगवति प्रतिष्ठितं वस्तु सत्यं चैतदुभयं फलितसत्यत्वेन पंचमं सत्यम्। इदं पंचविधं सत्यम्। सत्यत्वेन परत्वेन साधनत्वेन ऐहिकफलमूलत्वात् फलत्वेन रमणाधिकरणत्वेनेतिप्रकारैः पंचविधं सत्यं वेदे निरूपितम्। तदष्टविधं एव प्रविशति। पूर्वोक्तमष्टविधं प्रमाणादिरूपं पंचविधं चेति त्रयोदशधा। इदं त्रयोदशधा ज्ञानशक्तिद्वयं वेदो भगवद्धर्माश्च धर्मी चेति षोडशधा। वेदभगवद्धर्माणां प्रमापकत्वात् प्रमाणत्वोपाधिना क्रियाशक्तिरूपपंचविधसत्यमध्ये प्रवेशेपि द्रुतं भगवत्साक्षात्कारसाधकत्वेन तद्ज्ञानशक्तित्वेनापि निरूपणं न दोषाय, सर्वत्रोपाधिभेदेन भेदात्। इति सत्यविवरणम्॥ १०-२-२६.

अचेतनकपाटादिबन्धननिवृत्तौ च वसुदेवागमनस्यैव हेतुत्वम्, न तु साक्षाद्भगवतः, वृष्टिभयाद् वस्त्रपिहितत्वात्, परं वसुदेवस्य तथा सामर्थ्ये कृष्णवाहत्वं हेतुरिति ज्ञापयितुं तथा विशेषणम्। अत एव भगवद्रहितस्य तस्यागमने पुनर्मुक्तानां बन्धो भविष्यति। न हि साक्षाद्भगवद्विमुक्तानां पुनर्बन्धो भवितुमर्हति। एवं सति रवेर्दृष्टान्तत्वमुपपद्यते, यतो रवावपि भगवद्रूपमदृश्यमस्तीति ततस्तमोनिवृत्तिः, पुनरागतिश्च दृश्यते। तथा च कैमुतिकन्यायेन उभयत्र भगवन्माहात्म्यमेवेति भावः। निरूपितमित्यनन्तरं प्रभूणां स्वतन्त्रः। १०-३-४९।

जन्मप्रकरणोपरि अन्ये स्वतन्त्रलेखाः वेणुनादमासिकपत्रे मुद्रिताः।

जन्मप्रकरणे शोधः ।

अ० १–२

पत्रे, पङ्क्तौ, शुद्धम्

१८–१ भक्तत्व–
२६–५ धनार्पण–
२८ १८ साक्षादेव
२९-३५ करणं अथ–
२९-३६ एकमक्रम
७०-२० बालकाः
७१-३४ न मरिष्यति
७४-२२ प्रसृतास्तथा
७५–९ तु साधूनां
७६-१७ न कालभेद–
८३-१७ विदेहांस्ते–
८६–६ आकांक्षार्थं
८७-२४ सा चानेक–
९०-१० 'तन्मात्तरा'

पत्रे, पङ्क्तौ, शुद्धम्

९०-२६ 'गां गता तत्
९३–९ निगडगृहीता
९६-१८ वशस्तथापि विक्रमं
९६-१९ सत्वेवा–
९६-२६ वधः
९८-१२ भगवान्
१०२–९ सत्यपर–
१०५-२१ -माहुर्यथेत्यादि, यथा
१०८–८ भवन्ति । तत्र एकस्मिन् फलेऽसंख्यानि बीजानि भवन्ति । एकस्य बीजस्यार्थं ब्रह्माण्डात्मको वृक्षो भवति । सोपि
१११-१६ –पोतेनेत्यत्र
११४-२४ श्रीवल्लभमहाराजकृतलेखः ।

पत्रे, पङ्क्तौ, शुद्धम्

११४-२८ श्रीपुरुषोत्तमचरणप्रणीतः प्रकाशः ।
११६–१ श्रेयउपायनं
११७-१० ,,
११७-२५ भावेन
११७-२८ सत्त्वगुणो
११७-२८ सात्त्विक–
११७-३० –भवती– ,,
१२२–२ यस्त्वच्चरणारविन्द–
१२३–७ नामध्यानं
१२८–२ भूम्युद्धारपूर्वक–
१२८,२–१२९,२० "अ॰ इत्यारभ्य "गणितः" इति प्रभूणां स्वतन्त्रः ।
१३०-२४ एकविंशतिः ।

अ० ३–४

पत्रे, पङ्क्तौ, शुद्धम्

१-१७ 'न नामरूपे' इत्यत्र
४–८ भूर्भुवःस्वरिति
८-१० वनपङ्क्त्यो
८-२१ पञ्चीकृतत्वात्
११–३ प्रादुरासीद्
११,१६-१८ delete ईदशस्तु–निशीथो...एवं सति यद्

पत्रे, पङ्क्तौ, शुद्धम्

१८–७ आद्यश्लोकस्य द्वितीयश्लोकस्य विशेषण–
२०–७ साधितरूपवति
२०-२३ –मूर्धा
२२-२१ कारिकायोजना

पत्रे, पङ्क्तौ, शुद्धम्

२४-३२ क्रमोत्र
२६-२४ कण्ठे स्थापनस्य
२७–६ प्रभुगुणगानं
२९-१४ तच्चिद्रूप–
२९-१६ तच्चिष्येकत्वोक्त्या

११-२३ सिद्धेरिति, अत एतावत् भवति, पञ्चचत्वारिंशत्पट्चत्वारिंशद्घटिकाद्वयमिति । ईदशस्तु निशीथो विषुवद्दिने एकस्मिन् भवति पञ्चमस्कन्धीयात् । यदा मेषतुलयोर्वर्तते तदाऽहोरात्राणिसमानि भवन्तीतिवाक्यात् ज्योतिःशास्त्राच्च निश्चीयते । तदग्रे तु प्रत्यहं पलद्वयं रात्रेर्दिनस्य च वृद्धिह्रासौ । एवं सति यदत्राष्टम्याः ...

१६-१२ सर्वपुरुषार्थ–
१७–२ –मम्बुजेक्षणं

२३-१९ कार्यकरणार्थमवतारचतुष्टयकथनेन

२९-२५ क्रियाशक्तौ प्रति–
३१–१५,१६ गम्यास्तेवा–

पत्रे, पङ्क्तौ, शुद्धम्

३१-२१ ज्ञानमिति ॥१०॥
३१-२५ विशेषेण दानादिकं
३१-२८ delete ॥१०॥
३१-३० तथा मध्ये
३२-७ नैमित्तिकं ज्ञानमपि जातं करणात्
३२-८ सामर्थ्यम्। असामर्थ्ये
३२-२१ भगवत्यन्यत्रापि
३३-१ अन्यथासन्त-
३३-३० सह पञ्च-
३३-३४ प्रकारमाहु-
३३-३५ स्तुत्योः
३४-२६ शास्त्रमप्युच्यते
३५-१६ -माहुरत्रैव-
३६-१९ भवत्पदेन
३८-२० delete आधिदैविक-स्वभावेनेति
३८-३४ इन्द्र इवेति
३९-५ सृष्ट्वेत्यग्रे
३९-८,९ स्यात्, उक्तरीत्या ॥१४॥
३९-१७ -त्वेत्यन्तम् ॥१४॥
३९-२३ धर्मो
४०-८ येऽविकृताः
४१-२२ सन्निपत्येत्यस्य
४३-२० प्रतीयन्ते
४४-४ सामर्थ्येन
४४-३१ ग्रहणं
४६-१८ प्रतीतिकृत-
४६-२५ भगवा'निति

पत्रे, पङ्क्तौ, शुद्धम्

४८,९-४८,२१ 'अथवात्मनो' इत्यारभ्य 'भवान्' इत्यन्तं प्रभूणां स्वतन्त्रः।
५०-२३ वासुदेववदिति-
५१-१ सत्त्वं
५१-३ सत्त्व-
५१-१३ विरोधाभावं
५१-२७ वृष्टिद्वारेन्द्रादे'स्तदग्रे
५१-३३ इन्द्रादय
५२-३१ न त्वित्यारभ्य
५३-१ श्रुत्वाग्रजास्ते
५३-१७ स्वबुद्ध्या
५३-१८ पुरुषोत्तमस्य
५७-१८ नवविधेत्यादि
६०-४ पुनर्लौकिकाः
६०-११ माध्यगच्छद्
६०-३१ -मालभन-
६२-३१ वेत्यनेन
६४-१ delete श्रीभगवानुवाच।
६४-२० संख्याया अपि
६५-१ श्रीभगवानुवाच।
६५-१४ यदा
६६-११ तपसा सह
६६-१६ संख्याया एव
६८-२० मोक्षावरण-
६९-३० तिष्ठेदेवेति। किञ्च, 'स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिन' इतिवाक्यात् निरयतुल्यत्वं यस्मिन् भगवत्परा मन्यन्ते, तस्यापवर्गस्यावरणं भक्तानां मायामोहकार्यमिति कथं वक्तुं शक्यम्, अतो यथोक्त एवार्थो ज्ञेयः ॥३९॥

पत्रे, पङ्क्तौ, शुद्धम्

७० १२ -मदृष्ट्वा
७१-४ जायते
७३,४-७४,९ 'एभि'रित्यारभ्य 'शङ्कितौ' इत्यन्तं प्रभूणां स्वतन्त्रः
७३-८ -मन्यत्रादृष्ट्वा
७४-७ तेनासीज् जीवनं
७४-१७ एतद्व्याख्याने
७५-२८ delete सतीत्यादि
७५-३० न'न्वेतद् वा'मित्यादि
७६-३३ क्रियायाः
७७ ८ 'प्रकृतिमगन्
७७ १२ delete पित्रोः सम्पश्यतोरित्यत्र
७७-३८ -रत एवेत्यादि
७८-४ चाज्ञानात्
७८-३० मा'मिति
७९-१३ आत्मन इवेति,
७९-१६ भगवद्दर्शने
७९-२६ बुधसंयुते'-
८०-७ देवकीनन्दन'
८० २७ प्रयुञ्जते
८१-१ -न्यभावे केवला नवम्य-

पत्रे, पङ्क्तौ, शुद्धम्	पत्रे, पङ्क्तौ, शुद्धम्	पत्रे, पङ्क्तौ, शुद्धम्
८१-४ 'यर्थेवा-	९०-२९ क्षुगुप्सित'	९५-३१ त्वद्हृदये
८१-१० नवम्यप्सु-	९१-६ विनिर्भर्त्स्य	९६-३४ गमनागमने
८४-११ दुरत्ययाः	९१-२० विनिर्भर्त्स्य,	९९-३३ चातुर्विध्यं
८४-२१ 'निरूपित'मित्यनन्तरं प्रभूणां स्वतन्त्रलेखोस्ति सोस्मिन् ग्रन्थे मुद्रितोस्ति ।	९१-३० इत्यादिना,व्यवहार	१००-६ स्वसोरेथा-
	९१-३२ देहेत्यादि ॥७॥	१००-१० कर्मत्वे बाध्यत्वं कर्तृत्वे बाधकत्व-
	९३-१५ गदाधरा	१०२-२४ अन्यथाज्ञान-
	९३-३१ इत्युक्तम् ॥१२॥	१०४-८ देवक्या
८५-१० मघोनि	अग्रे,वाक्यं तु इति १४श्लोके	१०४-१७ -मात्मष्ट ॥२१॥
८७-६ नाशो वै कर्तव्यस्ता-	९३-३३ -त्स्यर्थः ॥१४॥	१०४-१७ delete ॥१९॥ after तन्मन्त्रिणोपि
८७-२२ निमित्ततो	९४-१५ -र्निर्बन्धो	
८७-२९ हताः	९५-६ समासते	१०५-१० यथा
८७-३२ पश्चाज्ञातो	९५-११ नरकसम्भावने-	१०५-१२ तथा
८८-५ ध्वनिमिव ध्वनिं	९५-१३ तथात्वे वा	१०६-२८ मम्मुखो
९०-५ परकन्यामारणं	९५-१६ सम्भावनयापि	१०८-७ विहिंसनम् ॥४३॥

जन्मप्रकरणस्थश्लोकानामकारादिवर्णानुक्रमः ।

	अ०श्लो०		अ०श्लो०		अ०श्लो०
अग्नेर्यथा दारु—	१-५१	अहो भगिन्यहो भाम	४-१५	उपगूह्यात्मजामेवं	४-७
अजुष्टग्राम्यविषया—	३-३९	आकर्ण्य भर्तुर्गदितं	८-३०	उपसंहर विश्वात्मन्	३-३०
अथ काल उपावृत्ते	१-५६	आत्मानमिह सञ्जातं	१-६८	ऋषेर्विनिर्गमे	१-६५
अथ सर्वगुणोपेतः	३-१	आयुः श्रियं यशो धर्मं	४-४७	एकायनोसौ द्विफल—	२-२७
अथाहमंशभागेन	२-९	आसीनः संविशंस्तिष्ठन्	२-२४	एके तमनुरुन्धाना	२-४
अथैनमस्तौदवधार्य	३-१२	इत्यभिष्टूय पुरुषं	२-४२	एतत् कंसाय भगवान्	१-६४
अथैनमात्मजं वीक्ष्य	३-२३	इत्यादिश्यामरगणान्	१-२६	एतदन्यच्च सर्वं मे	१-१२
अदृष्ट्वान्यतमं लोके	३-४१	इत्युक्त्वासीद्धरिस्तूष्णीं	३-४६	एतद् वां दर्शितं रूपं	३-४४
अन्यैश्चासुरभूपालैर्—	२-२	इत्युक्तः स खलः पापो	१-३५	एतं निशम्य भृगुनन्दन	१-१४
अयं त्वसभ्यस्तव	३-२२	इति घोरतमाद् भावात्	२-२३	एषा तवानुजा बाला	१-४५
अर्चिष्यन्ति मनुष्या—	२-१०	इति प्रभाष्य तं देवी	४-१३	एवमेतन् महाराज	४-२६
अवतीर्य यदोर्वंशे	१-३	उग्रसेनसुतः कंसः	१-३०	एवं चेत् तर्हि भोजेन्द्र	४-३१
अस्यतस्ते शरव्रातैर्—	४-३३	उग्रसेनं च पितरं	१-६९	एवं दुर्मन्त्रिमिः	४-४४

	अ०श्लो०
एवं भवान् बुद्ध्यनुमेय—	३-१७
एवं वां तप्यतोर्भद्रे	३-३६
एवं विमृश्य तं पापं	१-५२
एवं स सामभिर्भेदैः	१-४६
कथितो वंशविस्तारो	१ १
कंस एवं प्रसन्नाभ्यां	४-२८
कसान् मुकुन्दो भगवान्	१-९
किमद्य तस्मिन्	२-२१
किमिन्द्रेणाल्पवीर्येण	४-३७
किमुद्यमैः करिष्यन्ति	४-३२
किं क्षेमशूरैर्विबुधै—	४-३६
किं दुःसहं नु साधूनां	१-५८
किं मया हतया मन्द	४-१२
कीर्तिमन्तं प्रथमजं	१-५७
कुमुदा चण्डिका कृष्णा	२-१२
केचित् प्राञ्जलयो भीताः	४-३४
गते मयि युवां लब्ध्वा	३-४०
गर्भसङ्कर्षणात् तं वै	२-१३
गर्भे प्रणीते देवक्याः	२ १५
गिरं समाधौ गगने	१-२१
गौर्भूत्वाश्रुमुखी खिन्ना	१-१८
चतुःशतं पारिबर्हं	१-३१
जगुः किन्नरगंधर्वास्—	३-६
जन्म ते मय्यसौ पापो	३-२९
ज्योतिर्यथैवोदक—	१-४३
ततश्च शौरिर्भगवत्प्र—	३-४७
ततस्तन्मूलखनने	४-३८
ततो जगन्मङ्गल—	२-१८
तत्र गत्वा जगन्नाथं	१-२०

	अ०श्लो०
तथा न ते माधव	२-३३
तथेति सुतमादाय	१-६१
तदा वां परितुष्टोऽहं	३-३७
तमद्भुतं बालकमम्बुजेक्षणं	३-९
तमाह भ्रातरं देवी	४-४
तया हृतप्रत्ययसर्व—	३-४८
तया कथितमाकर्ण्य	४-१४
तस्मात् सर्वात्मना	४-४१
तस्माद् भद्रे स्वतनयान्	४-२१
तस्मान् न कस्यचिद्द्रोहं	१-४४
तस्यां तु कर्हिचिच्छौरिः	१-२९
तस्यां रात्र्यां व्यतीतायां	४-२९
तयोर्वां पुनरेवाहं	३-४२
ताः कृष्णवाहे वसुदेव	३-४९
तृतीयेऽस्मिन् भवेऽहं वै	३-४३
ते पीडिता निविविशुः	२-३
ते वै रजःप्रकृतयस्—	४-४६
ते तु तूर्णमुपव्रज्य	४-२
तं जुगुप्सितकर्माणं	१-३६
तां वीक्ष्य कंसः प्रभया—	२-२०
तां गृहीत्वा चरणयोर्—	४-८
त्वमेक एवास्य सतः	२-२८
त्वय्यम्बुजाक्षाखिल—	२-३०
त्वत्तोऽस्य जन्मस्थिति—	३-१९
त्वमस्य लोकस्य विभो	३-२१
त्वमेव पूर्वसर्गेभूः	३-३२
दासीनां सुकुमारीणां	१-३२
दिव्यस्रगम्बरालेप—	४-१०
दिशः प्रसेदुर्गगनं	३-२

	अ०श्लो०
दिष्ट्याम्ब ते कुक्षिगतः	२-४१
दिष्ट्या हरेऽस्या भवतः	२-३८
दृष्ट्वा समत्वं तच्छौरेः	१-५९
देवकीं वसुदेवं च	१-६६
देवक्या जठरे गर्भं	२-८
देवक्याः शयने न्यस्य	३-५२
देहे पञ्चत्वमापन्ने	१-३९
देहं मानुषमाश्रित्य	१-११
दैवमप्यनृतं वक्ति	४-१७
द्रौण्यस्त्रविप्लुष्टमिदं मदङ्गं	१-६
न चास्यास्ते भयं सौम्य	१-५४
न तेऽभवस्येश भवस्य	२-३९
न त्वं विस्मृतशस्त्रास्त्रान्	४-३५
नद्यः प्रसन्नसलिलाः	३-३
न नामरूपे गुणजन्म—	२-३६
नन्दव्रजं शौरिरुपेत्य	३-५१
नन्दाद्या ये व्रजे गोपा	१-६२
नन्वहं ते ह्यवरजा	४-६
नष्टे लोके द्विपरार्धा—	३-२५
नामधेयानि कुर्वन्ति	२ ११
निर्बन्धं तस्य तं ज्ञात्वा	१-४७
निवृत्ततर्षैरुपगीयमानाद्	१-४
निशीथे तमउद्भूते	३-८
नैषातिदुःसहा क्षुन् मां	१-१३
पथि प्रग्रहिणं कंस—	१-३४
पितामहा मे समरे—	१-५
पुरैव पुंसावधृतो	१-२२
प्रत्यर्प्य मृत्यवे पुत्रान्	१-४९
प्रतियातु कुमारोऽयं	१-६०

	अ० श्लो०
प्रलम्बबकचाणूर-	२-१
प्रसार्य वदनाम्भोजं	१-५३
प्रादुरासं वरदराड्	३-३८
बह्वो हिंसिता भ्रातः	४-५
बहिरन्तः पुरद्वारः	४-१
बिभर्षि रूपाण्यवबोध	२-२९
ब्रह्मा तदुपधार्याथ	१-१९
ब्रह्मा भवश्च तत्रैत्य	२-२५
भगवानपि विश्वात्मा-	२-६
भगवानपि विश्वात्मा	२-१६
भुवि भौमानि भूतानि	४ १९
भूमिर्दृप्तनृपव्याज-	१-१७
भ्रातुः समनुतप्तस्य	४-२२
मघोनि वर्षत्यसकृद्	३-५०
मत्स्याश्वकच्छपनृसिंह-	२-४०
मनांस्यासन् प्रसन्नानि	३-५
मर्त्यो मृत्युव्यालभीतः	३-२७
महार्हवैदूर्यकिरीट-	३-१०
मातरं पितरं भ्रातॄन्	१-६७
मा शोचतं महाभागा-	४-१८
मुमुचुर्मुनयो देवाः	३-७
मूलं हि विष्णुर्हि	४-४०
मृत्युर्जन्मवतां वीर	१-३८
मृत्युर्बुद्धिमतापोह्यो	१-४८
मोचयामास निगडान्	४-२४
य आत्मनो दृश्यगुणेषु	२ १८
यतो यतो धावति	१-४२
यथानेवंविदो भेदो	४-२०
यथामयोऽङ्ग समुपेक्षितो	४-३९
यथेमेऽविकृता भावास्-	३-१८
यदोश्च धर्मशीलस्य	१-२
यशोदा नन्दपत्नी च	३-५३
यावद्धतोसि हन्तासी-	४-२२
युवां मां पुत्रभावेन	३-४५
युवां वै ब्रह्मणादिष्टौ	३-३३
येऽन्येऽरविन्दाक्ष विमुक्त-	२-३२
योऽयं कालस्तस्य ते-	३-२६
राजधानी ततः साभूत्	१-२८
रूपं यत् तत् प्राहु-	३-२४
रोहिणी वसुदेवस्य	२ ७
रोहिण्यास्तनयः प्रोक्तो	१-८
वर्षवातातपहिम-	३-३४
ववौ वायुः सुखस्पर्शः	३-४
वसुदेवगृहे साक्षाद्	१-२३
वासुदेवकथाप्रश्नः	१-१६
वासुदेवकलानन्तः	१-२४
विदितोसि भवान्	३-१३
विपर्ययो वा किं न	१-४०
विप्रा गावश्च वेदाश्च	४-४२
विभर्षि यदेतत् स्वतनौ	३-३१
विष्णोर्माया भगवती	१-२५
वीर्याणि तस्याखिल-	१-७
व्रजे वसन् किमकरोन्	१-१०
व्रजंस्तिष्ठन् पदैकेन	१-४०
शङ्खतूर्यमृदङ्गानि	१-३३
शीर्णपर्णानिलाहारा-	३-३५
शूरसेनो यदुपतिर्-	१-२७
शृण्वन् गृणन्	२-३७
शोकहर्षभयद्वेष—	४-२७
श्लाघनीयगुणः शूरैः	१-३७
स एष स्वप्रकृत्येदं	३-१४
स एष जीवन् खलु	२-२२
स तल्पात् तूर्णमुत्थाय	४-३
सत्यव्रतं सत्यपरं	२-२६
स त्वहं त्यक्तकारुण्य-	४-१६
सत्त्वं त्रिलोकस्थितये	३-२०
स त्वं घोरादुग्रसेनात्म-	३-२८
सत्त्वं न चेद् धातरिदं	२-३५
सत्त्वं विशुद्धं श्रयते	२-३४
सन्दिश्य साधुलोकस्य	४-४५
सन्दिष्टैवं भगवता	२-१४
सन्निपत्य समुत्पाद्य	३-१६
सप्तमो वैष्णवं धाम	२-५
स बिभ्रत् पौरुषं धाम	२-१७
सम्यग्व्यवसिता बुद्धिः	१-१५
सर्वे वै देवताप्राया	१-६३
स विस्मयोत्फुल्लविलो-	३-११
स हि सर्वसुराध्यक्षो	४-४३
सा तद्धस्तात् समुत्पत्य	४-९
सा देवकी सर्वजगन्-	२-१९
सिद्धचारणगन्धर्वैः	४-११
सुहृद्वधान् निववृते	१-५५
स्वप्ने यथा पश्यति	१-४१
स्वयं समुत्तीर्य सुदुस्तरं	२-३१
क्षमध्वं मम दौरात्म्यं	४-२३